अथर्ववेदभाष्यम्

(चतुर्थकाण्डम्)

55

भाष्यकारः

श्री पं० क्षेमकरणदासत्रिवेदी

सम्पादिका

डा० प्रज्ञा देवी व्याकरणाचार्या

ओ३म्

अथर्ववेदभाष्यम्

चतुर्थकाण्डम्

आर्यभाषायामनुवादः भावार्थादिसहितम्
संस्कृते व्याकरणनिरुक्तादिप्रमाणसमन्वितम्

श्रीमद्राजाधिराजप्रथितमहागुणमहिमधीरवीरचिरप्रतापि
श्री सयाजीराव गायकवाड़ाधिष्ठितबड़ौदेपुरी-
गतश्रावणमासदक्षिणापरीक्षायाम् ऋग्वेद-
सामाथर्ववेदभाष्येषु लब्धदक्षिणेन
श्री पण्डित क्षेमकरणदासत्रिवेदिना
विरचितम्

पदवाक्यप्रमाणज्ञानां वैयाकरणप्रवराणां पं० ब्रह्मदत्तजिज्ञासु-
महोदयानाम् अन्तेवासिन्या डा० प्रज्ञादेवी
व्याकरणाचार्यया (Ph. D.)
सम्पादितम्

ग्रन्थप्राप्तिस्थानम्—
डा० कु० प्रज्ञादेवी आचार्या पाणिनि कन्या
महाविद्यालय, वाराणसी ।

द्वितीयं संस्करणम्, १०००
मूल्यम् २६.००

प्रकाशक:—डा० इन्द्रदयाल सेठ, पी० एच० डी०
अथर्ववेद भाष्य कार्यालय
३४ लूकरगञ्ज, इलाहाबाद

मुद्रक :—तारा प्रिंटिङ्ग वर्क्स (द्वितीयं तृतीय काण्डान्त)
विष्णु मुद्रणालय (प्रथम चतुर्थ काण्ड)

॥ ओ३म् ॥

॥ अथर्ववेदः ॥

चतुर्थं काण्डम् ॥

प्रथमोऽनुवाकः ।

सूक्तम् ॥ १ ॥

मन्त्राः १—७ ॥ वेनो देवता । त्रिष्टुप्छन्दः ॥

सृष्टिविद्यया ब्रह्मविचारः–सृष्टि विद्या से ब्रह्म का विचार ।

ब्रह्मं जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसंतश्च वि वः ॥१॥

ब्रह्मं । जज्ञानम् । प्रथमम् । पुरस्तात् । वि । सीमतः । सुऽरुचः । वेनः । आवः । सः । बुध्न्याः । उपऽमाः । अस्य । विऽस्थाः । सतः । च । योनिम् । असंतः । च । वि । वः ॥ १ ॥

सान्वयभाषार्थः—(वेनः) प्रकाशमान वा मेधावी परमेश्वर ने (पुरस्तात्) पहिले काल में (प्रथमम्) प्रख्यात (जज्ञानम्) उपस्थित रहने वाले (ब्रह्म) वृद्धि के कारण अन्न को और (सुरुचः) बड़े रुचिर लोकों को (सीमतः)

१— शब्दार्थव्याकरणादिप्रक्रिया—ब्रह्म । अ० १ । ८ । ४ । वृद्धिकारणम् । अन्नम्–निघ० २ । ७ । जज्ञानम् । जनी प्रादुर्भावे—शानच्‌ शपः श्लौ सति

सीमाओं वा छोरों से (वि आवः) फैलाया है। (सः) उसने (बुध्न्याः) अन्तरिक्ष में वर्तमान (उपमाः) [परस्पर आकर्षण से] तुलना करने वाले (विष्ठाः) विशेष विशेष स्थानों, अर्थात् (अस्य) इस (सतः) विद्यमान [स्थूल] के (च) और (असतः) अविद्यमान [सूक्ष्म जगत्] के (योनिम्) घर को (च) निश्चय करके (वि वः) खोला है॥ १॥

भावार्थः—जैसे उत्पन्न होने से पहिले बालक के लिये माता के स्तनों में दूध हो जाता है, ऐसे ही जगत् के जननी जनक परमेश्वर ने सृष्टि से पूर्व प्रत्येक शरीरी के लिये प्रभूत (ब्रह्म) अन्न वा पालन शक्ति और पृथिवी, सूर्य, चन्द्रमा, नक्षत्र, आदि को बनाया, जो परस्पर आकर्षण से स्थिर हैं। यही सब

रूपम्। जायमानम्। दृश्यमानम्। **प्रथमम्**। अ० १।१२।१। प्रख्यातम्। **पुरस्तात्**। **दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः** (पा० ५।३।२७) इति पूर्वशब्दात् अस्तातिः। **अस्ताति च** (पा० ५।३।४०) इति पूर्वस्य पुरादेशः। अतीते प्रथमे काले वा। सृष्ट्यादौ। **वि**। **व्यवहिताश्च** (पा० १।४।८२) इति व्यवधानेन उपसर्गसम्बन्धः। **सीमतः**। **नामन्सीमन्व्योमन्०** (उ० ४।१५१) इति षिञ् बन्धने-मनिन्। **अपादाने चाहीयरुहोः** (पा० ५। ४।४५) इति तसिः। सीम्नः सीमतः सीमातो मर्यादातः। सीमा मर्यादा विषीव्यति देशाविति-निरु० १।७। सीमभ्यः। लोकमर्यादाभ्यः। **सुरुचः**। रुच दीप्तावभिप्रीतौ च-क्विप्। सुष्ठु रोचमानान् लोकान्। **वेनः**। अ०। २।१।१। दीप्यमानः परब्रह्मात्मकः-इति सायणोऽपि। मेधावी-निघ० ३।१५। **वि आवः**। वृञ् वरणे लुङ्। **मन्त्रे घस०** (पा० २।४।८०) इति च्लेर्लुक्। हल्ङ्यादिलोपे। **छन्दस्यपि दृश्यते** (पा० ६।४।७३) इति आडागमः। विवृतानकरोत्। **सः**। वेनः। **बुध्न्याः**। **बन्धेर्ब्रधिबुधी च** (उ० ३।५) इति बन्ध बन्धने-नक् तस्य च बुध आदेशः। बुध्नो मेघो मूलमन्तरिक्षं वा। **भवे छन्दसि** (पा० ४।४।११०) इति यत्। बुध्नमन्तरिक्षं बद्धा अस्मिन् धृता आप इति वा इदमपीतरद् बुध्नमेतस्मादेव बद्धा अस्मिन् धृताः प्राणा इति। योऽहिः स बुध्न्यो बुध्नमन्तरिक्षं तन्निवासात्। निरु० १०।४४। बुध्नेऽन्तरिक्षे भवाः सूर्यचन्द्रपृथिवीतारकादयो लोकाः। **उपमाः**। **आतश्चोपसर्गे** (पा० ३।३।१०६) इति उप+माङ् माने-अङ्, टाप्। उपमीयमानाः। मानं प्राप्ताः। **अस्य**। दृश्यमानस्य जगतः। **विष्ठाः**। **आतश्चोपसर्गे** (पा० ३।३।१०६) वि+ष्ठा गतिनिवृत्तौ-अङ्

लोक कार्य वा मूर्त और कारण वा अमूर्त दो प्रकार के जगत् के भण्डार हैं ॥ १ ॥

यह मन्त्र यजुर्वेद अ० १३ म० ३ और सामवेद पूर्वार्चिक प्र० ४ द० ३ म० ९ में है ॥

इयं पित्र्या राष्ट्र्येत्वग्रे प्रथमाय जनुषे भुवनेष्ठाः ।
तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्तु प्रथमाय धास्यवे ॥२॥

इयम् । पित्र्या । राष्ट्री । एतु । अग्रे । प्रथमाय । जनुषे । भुवनेऽस्थाः । तस्मै । एतम् । सुऽरुचम् । ह्वारम् । अह्यम् । घर्मम् । श्रीणन्तु । प्रथमाय । धास्यवे ॥ २ ॥

भाषार्थः—(पित्र्या) पिता [जगत् पिता परमेश्वर] से आई हुई, (भुवनेष्ठाः) सब जगत् में ठहरी हुई (इयम्) यह (राष्ट्री) राजराजेश्वरी शक्ति [वेद वाणी] (प्रथमाय) सबसे उत्तम (जनुषे) जन्म के लिये (अग्रे) हमारे आगे (एतु) आवे, [अर्थात्] "(तस्मै) उस (प्रथमाय) सबसे ऊपर विराजमान (धास्यवे) संसार का धारण पोषण चाहने वाले परमात्मा के लिए (एतम्) इस (सुरुचम्) बड़े रुचिर (ह्वारम्) अनिष्ट को झुका देने वाले (अह्यम्) प्राप्ति के योग्य, वा प्रति दिन वर्तमान (घर्मम्) यज्ञ को (श्रीणन्तु) सब लोग परिपक्व करें" ॥ २ ॥

टाप् । **उपसर्गात् सुनोतिसुवति०** (पा० ८ । ३ । ६५) इति षत्वम् । **सतः** । विद्यमानस्य । मूर्त्तस्य । स्थूलस्य । **च** । समुच्चये । अवधारणे । **योनिम्** । अ० १ । ११ । ३ । गृहम्-निघ० ३ । ४ । आकाशम् । कारणम् । **वि वः** । वि+वृञ् वरणे-लङ् । **मन्त्रे घस०** (पा० २ । ४ । ८०) इतिच्लेर्लुक् । **बहुलं छन्दस्यमाङ्योगेऽपि** (पा० ६ । ४ । ७५) इति अडभावः । विवृतमकरोत् ।

२—इयम् । परिदृश्यमाना । **पित्र्या** । **पितुर्यच्च** (पा० ४ । ३ । ७९) इति पितृ-यत्, टाप् । पितृसकाशाद् आगता । पैतृका । **राष्ट्री** । राजतिः, ऐश्वर्य-कर्मा—निघ० २ । २१ । **सर्वधातुभ्यः ष्ट्रन्** (उ० ४ । १५९) इति राजृ दीप्तौ,

भावार्थः—जैसे पैतृक धन सब सन्तानों को यथावत् मिलता है वैसे ही जगत् पिता परमेश्वर की सर्वव्यापिनी, सर्वनियन्त्री यह वेदवाणीरूप शक्ति सबके हृदय में बसे कि सब मनुष्य अपना यज्ञ अर्थात् पुरुषार्थ परमात्मा को समर्पण करें जिससे मनुष्य जन्म सफल होवे ॥ २ ॥

प्र यो ज॒ज्ञे वि॒द्वान॑स्य॒ बन्धु॒र्विश्वा॑ दे॒वाना॒ं जनि॑मा विवक्ति ।
ब्रह्म॒ ब्रह्म॑ण॒ उज्ज॑भार॒ मध्या॑न्नी॒चैरु॒च्चैः स्व॒धा अ॒भि प्र त॑स्थौ ॥३॥

प्र । यः । ज॒ज्ञे । वि॒द्वान् । अ॒स्य॒ । बन्धुः॑ । विश्वा॑ । दे॒वाना॑म् । जनि॑म । वि॒वक्ति॒ । ब्रह्म॑ । ब्रह्म॑णः । उत् । ज॒भा॒र॒ । मध्या॑त् । नी॒चैः । उ॒च्चैः । स्व॒धा । अ॒भि । प्र । त॒स्थौ॒ ॥ ३ ॥

भाषार्थः—(यः विद्वान्) जो विद्वान् परमेश्वर (अस्य) इस [जगत्]

ऐश्वर्ये-ष्ट्रन् । **व्रश्चभ्रस्ज०** (पा० ८।२।३६) इति षत्वम् । षित्वात् ङीष् (पा० ४ । १ । ४१) राष्ट्री, ईश्वरनामसु । निघ० २ । २२ । राज्ञी । ईश्वरी । सर्वजगद्व्यवहारस्य नियन्त्री शक्तिः । **एतु** । गच्छतु । प्राप्नोतु । **अग्रे** । अभिमुखम् । **प्रथमाय** । म० १ । प्रख्याताय । प्रधानाय । **जनुषे** । **जनेरुसिः** (उ० २ । ११५) इति जनी प्रादुर्भावे-उसिः । जन्मने । जीवनाय । **भुवनेष्ठाः** अ० २ । १ । ४ । सर्वलोके स्थिता व्याप्ता । **तस्मै** । वेनाय । **एतम्** । समीपस्थम् । **सुरुचम्** । म० १ । सुष्ठु रोचमानम् । **ह्वारम्** । ह्वृ कौटिल्ये-ण्यन्तात् पचाद्यच् । अनिष्टस्य कुटिली कारकम् । **अह्यम्** । अहि गतौ-ण्यत् । संज्ञापूर्वको विधिरनित्यः—इति परिभाषया वृद्धेरभावः । गन्तव्यम् । प्राप्यम् । यद्वा । **भवे छन्दसि** (पा० ४ । ४ । ११०) इति अहन्-यत् । **नस्तद्धिते** (पा० । ६ । ४ १४४) इति टिलोपः । अहनि भवम् । **घर्मम्** । **घर्मग्रीष्मौ** (उ० १ । १४९) इति घृ सेचनदीप्त्योः-मक् । आतपम् । ग्रीष्मम् । स्वेदम् । यज्ञम्, निघ० ३ । १७ । **श्रीणन्तु** । श्रीञ् पाके । पचन्तु । पक्वं कुर्वन्तु । संस्कुर्वन्तु । **धास्यवे** । अ० २ । १ । ४ । जगतो धारणपोषणेच्छवे ॥

३—**प्र** । प्रकर्षेण । सर्वोपरि । **यः** । वेनः परमेश्वरः । **जज्ञे** । जनी

का (बन्धुः) बन्धन वा नियम करने वाला, अथवा, बन्धु हितकारी (प्र) अच्छे प्रकार (जज्ञे) प्रकट हुआ था, और जो (देवानाम्) भूमि, सूर्य आदि दिव्य पदार्थों वा महात्माओं के (विश्वा=विश्वानि) सब (जनिमा) जन्मों को (विवक्ति) बतलाता है। उसने (ब्रह्मणः) ब्रह्म [अपने परब्रह्म स्वरूप] के (मध्यात्) मध्य से (ब्रह्म) वेद को (उज्जहार) उभारा था, वही (नीचैः) नीचे और (उच्चैः) ऊँचे (स्वधाः) अनेक अमृतों वा अन्नों को (अभि = अभिलक्ष्य) सन्मुख करके (प्र) उत्तमता से (तस्थौ) स्थित हुआ था ॥ ३ ॥

भावार्थः—अनादि, सर्वज्ञ सर्वोत्तम परमात्मा ने सब चराचर जगत् को यथानियम रचा और वेद विद्या को अपने में से प्रकट करके नीचे ऊँचे लोकों की सृष्टि के अनुकूल अन्न आदि पदार्थ उत्पन्न किये हैं, सब मनुष्य उस जगत् नियन्ता की उपासना द्वारा पुरुषार्थ करके आनन्द भोगें ॥ ३ ॥

इस मन्त्र का 'विश्वा देवानां जनिमा विवक्ति' यह पाद अ० २ । २८ । २ । में आया है।

स हि दिवः स पृथिव्या ऋतस्था मही क्षेमं रोदसी अस्कभायत् ।
महान् मही अस्कभायद् वि जातो द्यां सद्म पार्थिवं च रजः ॥४॥

प्रादुर्भावे - लिट् । **यद्वृत्तान्नित्यम्** (पा० ८ । १ । ६६) इति निघातप्रतिषेधः । प्रादुर्बभूव । **विद्वान्** । अ० २ । १ । २ । ज्ञानी । **अस्य** । दृश्यमानस्य जगतः । **बन्धुः** । अ० २ । १ । ३ । बन्धकः । नियामकः । बान्धवः । **विश्वा** । विश्वानि । सर्वाणि । **देवानाम्** । पृथिवीसूर्यादीनां दिव्यपदार्थानाम् । महात्मनाम् । **जनिमा=जनिमानि** । अ० १ । ८ । ४ । जन्मविधानानि । **विवक्ति** । अ० २ । २८।२ । वच परिभाषणे । अदादिकः । शपः श्लुः । कथयति । उपदिशति । **ब्रह्म** । वेदम् । **ब्रह्मणः** । स्वपरब्रह्मस्वरूपस्य । **उज्जभार** । हृञ् हरणे-लिट् । **हृग्रहोर्भश्छन्दसि** (वा० पा० ३।१।८४) इत्यनेन वार्त्तिकेन भकारः । उज्जहार । उद्धृतवान् । उत्थापितवान् । **मध्यात्** । मध्यभागात् । **नीचैः** । अ० २ । ३ । ३ । अधोदेशे । **उच्चैः** । **उदि चेर्डैसिः** (उ० ५ । १२) इति उत्+चिञ् चयने—डैसिः । उपरिभागे । **स्वधाः** । अ० २ । २९ । ७ । अन्नानि । पोषकद्रव्याणि । **अभि** । अभिलक्ष्य । **तस्थौ** । स्थितवान् ॥

सः । हि । दिवः । सः । पृथिव्याः । ऋतऽस्थाः । मही इति । क्षेमम् । रोदसी इति । अस्कभायत् । महान् । मही इति । अस्कभायत् । वि । जातः । द्याम् । सद्म । पार्थिवम् । च । रजः ॥ ४ ॥

भाषार्थः—(सः) उस (सः) विष्णु वा शिव ने (हि) ही (दिवः) सूर्य के और (पृथिव्याः) पृथिवी के (ऋतस्थाः+सन्) सत्य वा कारण में स्थित होकर (मही=महत्यौ) विशाल (रोदसी=०-स्यौ) सूर्य और पृथिवी को (क्षेमम्) क्षेम के साथ (अस्कभायत्) ठहराया। (महान्) उस विशाल परमेश्वर ने (जातः+सन्) प्रकट होकर (मही=महत्यौ) दोनों विशालों, अर्थात् (द्याम्) सूर्यरूप (सद्म) घर (च) और (पार्थिवम्) पृथिवी वाले (रजः) लोक को (वि) अलग अलग (अस्कभायत्) स्थिर किया ॥ ४ ॥

४—**सः** । प्रसिद्धः । **हि** । अवश्यम् । **दिवः** । द्युलोकस्य । सूर्यस्य । **सः** । षो अन्तकर्मणि—डः । स्यति नाशयति दुष्टानिति सः । विष्णुः । ईश्वरः । शिवः । **पृथिव्याः** । भूलोकस्य । **ऋतस्थाः** । **अञ्चिघृसिभ्यः क्तः** (उ० ३ । ८९) इति ऋ गतौ—क्तः । ऋतं सत्यनाम—निघ० ३ । १० । उदकम्—निघ० १ । १२ । **आतो मनिन्क्वनिब्वनिपश्च** (पा० ३ । २ । ७४) इति ऋत+ष्ठा गतिनिवृत्तौ-विच् । ऋते सत्ये कारणे स्थितः । कारणस्य कारणमित्यर्थः । **मही** । मह पूजायाम्-क्विप् । **इयाडियाजीकाराणामुपसंख्यानम्** (वा० पा० ७। १। ३९) इति ईकारो विभक्तौ । महत्यौ । विशाले । **क्षेमम्** । अ० ३ । ३ । ५, कुशलम् । **रोदसी** । **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति रुधेरसुन् । धस्य दकारः, **उगितश्च** (पा० ४ । १ । ६) इति ङीप् । **वा छन्दसि** (पा० ६ । १ । १०६) इति पूर्वसवर्णः । आभ्यां हि रुद्धानि सर्वभूतानि । रोदस्यौ । द्यावापृथिव्यौ—निघ० ३ । ३० । **अस्कभायत्** । स्कम्भु गतिप्रतिबन्धे-लङ् । **छन्दसि शायजपि** (पा० ३ । १ । ८४) इति श्नः शायच् । अस्कभ्नात् । स्थापितवान् । **महान्** । विशालः । **मही** । पूर्ववत् । महत्यौ । **वि** । पृथक् पृथक् । **जातः** । प्रादुर्भूतः । **द्याम्** । अ० १ । २ । ४ । द्योतमानं सूर्यात्मकम् । **सद्म** । **सर्वधातुभ्यो मनिन्** (उ० ४ । १४५) इति षद्लृ विशरणगत्यवसादनेषु—मनिन् । संग्रामनाम—निघ० २ । १७ । गृहनाम—निघ० ३ । ४ । उदकनाम—निघ० १ । १२ । सदनम् । गृहम् ।

भावार्थः—सूर्य आदि के (ऋतस्थाः) कारण के कारण परमेश्वर ने सूर्य आदि लोकों को रचा, और परस्पर आकर्षणरूप डोरी लगाकर उनको पृथक् पृथक् कर दिया। उस परमेश्वर की ऐसी बड़ी महिमा देखकर हम सदा पुरुषार्थ करें ॥ ४ ॥

स बुध्न्यादाष्ट्र जनुषोऽभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट्।
अहर्यच्छुक्रं ज्योतिषो जनिष्टाथ द्युमन्तो वि वसन्तु विप्राः ॥५॥

सः। बुध्न्यात्। आष्ट्र। जनुषः। अभि। अग्रम्। बृहस्पतिः। देवता। तस्य। सम्ऽराट्। अहः। यत्। शुक्रम्। ज्योतिषः। जनिष्ट। अथ। द्युऽमन्तः। वि। वसन्तु। विप्राः ॥ ५ ॥

भाषार्थः—(सः) ईश्वर (जनुषः) उत्पन्न जगत् के (बुध्न्यात्) मूल देश से लेकर (अग्रम् अभि) उपरि भाग तक (आष्ट्र = आष्ट) व्याप्त हुआ। (बृहस्पतिः) बड़े बड़ों का स्वामी (देवता) प्रकाशमान परमेश्वर (तस्य) उस [जगत्] का (सम्राट्) सम्राट् [राजराजेश्वर] है। (यत्) क्योंकि (ज्योतिषः) ज्योतिः स्वरूप परमेश्वर से (शुक्रम्) चमचमाता हुआ (अहः) दिन [सूर्य] (जनिष्ट = अजनिष्ट) उत्पन्न हुआ, (अथ) तभी (विप्राः) इन्द्रियां वा बुद्धिमान् लोग (द्युमन्तः) प्रकाशमान् होकर (वि) विविध प्रकार से (वसन्तु) निवास करें ॥ ५ ॥

पार्थिवम्। अ० २। २८। ३। भौमम्। **रजः**। **भूरञ्जिभ्यां कित्** (उ० ४। २१७) इति रञ्ज रागे–असुन्। रजो रजतेर्ज्योती रज उच्यते, उदकं रज उच्यते, लोका रजांस्युच्यन्तेऽसृगहनी रजसी उच्येते–निरु० ४। १९। लोकम् ॥

५—**सः**। म० ४। ईश्वरः। **बुध्न्यात्**। म० १। मूले भवाद् देशात्। **आष्ट्र**। अशूङ् व्याप्तौ–छान्दसो लुङ्। आष्ट। आश्नुत। व्याप्नोत्। **जनुषः**। म० २। प्रादुर्भूतस्य संसारस्य। **अभि**। अभितः सर्वतः। **अग्रम्**। उपरिभागम्। **बृहस्पतिः**। बृहतां लोकानां स्वामी। **देवता**। **देवात् तल्** (पा० ५। ४। २७)

भावार्थः—परमेश्वर इस सब जगत् के आदि अन्त में विराजमान है, वही सार्वभौम शासक है, उसी ने सूर्य को बनाया है जिससे इन्द्रियां प्रकाश पाकर अपना व्यापार करती हैं। उसी से पंडित जन विद्या प्रकाश करके कीर्तिमान होते हैं ॥ ५ ॥

पं० सेवकलाल कृष्णदास की संहिता और सायणभाष्य में 'आष्ट्र' के स्थान में 'आष्ट' है।

नूनं तदस्य काव्यो हिनोति महो देवस्य पूर्व्यस्य धाम ।
एष जज्ञे बहुभिः साकमित्था पूर्वे अर्धे विषिते ससन् नु ॥६॥

नूनम् । तत् । अस्य । काव्यः । हिनोति । महः । देवस्य । पूर्व्यस्य । धाम । एषः । जज्ञे । बहुऽभिः । साकम् । इत्था । पूर्वे । अर्धे । विऽसिते । ससन् । नु ॥ ६ ॥

भाषार्थः—(काव्यः) स्तुति योग्य परमेश्वर [वेनः, म० १] (अस्य) इस (पूर्व्यस्य) समग्र जगत् के हित करने वाले (देवस्य) प्रकाशमान सूर्य के (तत्) उस (महः)

इति स्वार्थे तल् । देवः प्रकाशमानः परमेश्वरः । **तस्य** । जनुषो जगतः । **सम्राट्** । सत्सूद्विष० (पा० ३ । २ । ६१) इति सम्+राजृ दीप्तौ—क्विप् । **मो राजि समः क्वौ** (पा० ८ । ३ । २५) इति समो मस्य अनुस्वाराभावः सम्यक् राजमानः । राजाधिराजः चक्रवर्त्ती । **अहः** । दिनम् । **यत्** । यस्मात् कारणात् । **शुक्रम्** । अ० । २ । ११ । ५ । दीप्यमानम् । **ज्योतिषः** । अ० १ । ९ । १ । द्योतमानात् परमेश्वरात् । **जनिष्ट** । जनी प्रादुर्भावे, लुङ् अडभावः । प्रादुरभूत् । **अथ** । अनन्तरम् । तस्मात् कारणात् । **द्युमन्तः** । दीप्तिमन्तः । **वि वसन्तु** । विविधं वर्तन्ताम् । **विप्राः** । अ० ३ । ३ । २ । विप्राणां व्यापनकर्मणामिन्द्रियाणाम्—निरु० १४ । १३ । इन्द्रियाणि । मेधाविनः पुरुषाः ॥

६—**नूनम्** । निश्चयेन । **तत्** । प्रसिद्धम् । **अस्य** । दृश्यमानस्य । **काव्यः** । **ऋहलोर्ण्यत्** । (पा० ३ । १ । १२४) इति कबृ वर्णे-ण्यत् । बवयोरैक्यम्,

विशाल (धाम) तेज को (नूनम्) अवश्य (हिनोति) भेजता है। (ससन्) सोता हुआ (एषः) यह परमेश्वर (पूर्वे) समस्त (अर्धे) प्रवृद्ध जगत् के (विषिते) खुलने पर (इत्था) इस प्रकार से [जैसे सूर्य] (बहुभिः साकम्) बहुत [लोकों] के साथ (नु) शीघ्र (जज्ञे) प्रकट हुआ है ॥ ६ ॥

भावार्थः—परमेश्वर प्रलय की अवस्था में सोता हुआ सा था, उसने सृष्टि उत्पन्न करने पर, आकर्षण, आतप वृष्टि आदि द्वारा संसार के हित के लिये सूर्य, पृथिवी, बृहस्पति, शुक्र आदि असंख्य लोक रचे। उस जगदीश्वर का सामर्थ्य विचार कर हम अपना सामर्थ्य बढ़ाकर उपकार करें ॥ ६ ॥

योऽथर्वाणं पितरं देवबन्धुं बृहस्पतिं नमसाव च गच्छात्।
त्वं विश्वेषां जनिता यथासः कविर्देवो न दभायत् स्वधावान् ॥७॥

यः। अथर्वाणम्। पितरम्। देवऽबन्धुम्। बृहस्पतिम्। नमसा। अव। च। गच्छात्। त्वम्। विश्वेषाम्। जनिता। यथा। असः। कविः। देवः। न। दभायत्। स्वधाऽवान् ॥ ७ ॥

भाषार्थः—(यः) गतिवाला, पुरुषार्थी पुरुष (अथर्वाणम्) निश्चल, (पितरम्) पिता, (देवबन्धुम्) विद्वानों वा सूर्यादि दिव्य लोकों का बन्धु वा

यथा, काव्या=बुद्धिः। स्तुत्यः परमेश्वरः। **हिनोति**। हि गतौ वृद्धौ च। प्रेरयति। **महः**। विशालम्। **देवस्य**। प्रकाशमानस्य सूर्यस्य। **पूर्व्यस्य**। **तस्मै हितम्** (पा० ५।१।५) इति पूर्व-यत्। पूर्वाय समस्ताय जगते हितम्। **धाम**। अ० १।१३।३। प्रभावम्। लोकम्। तेजः। **एषः**। पुरोवर्त्ती परमेश्वरः। **जज्ञे**। प्रादुर्बभूव। **बहुभिः**। असंख्यैर्देवैर्लोकैः। **साकम्**। सार्धम्। **इत्था**। **था हेतौ च च्छन्दसि** (पा० ५।३।२६) इति इदम्-था। अनेन प्रकारेण यथा, सूर्यः। **पूर्वे**। पुर्व पूर्व पूरणे-अच्। समस्ते। **अर्धे**। ऋधु वृद्धौ-घञ्। प्रवृद्धे संसारे। **विषिते**। वि विरोधे। षिञ् बन्धने-क्तः। विवृत्ते प्रकाशिते सति। **ससन्**। षस स्वप्ने-शतृः। निद्रां गच्छन् सन्। प्रलयकालेऽज्ञातदशायां वर्तमान इत्यर्थः ॥

७—यः। यातीति यः। या प्रापणे-डः। याता। गतिवान्। उद्योगी पुरुषः। **अथर्वाणम्**। अथर्वाणोऽथनवन्तस्थर्वतिश्चरतिकर्मा तत्प्रतिषेधः—निरु० ११।

नियामक, (बृहस्पतिम्) बड़े बड़ों के स्वामी परमेश्वर को (नमसा) नमस्कार के साथ (च) निश्चय करके (अव गच्छात्) पहिचाने। [हे परमेश्वर !] (त्वम्) तू (विश्वेषाम्) सब [सुखों] का (जनिता) उत्पादक (असः) हो, (यथा) क्योंकि (कविः) मेधावी, (स्वधावान्) अन्नवान् वा स्वयं धारण सामर्थ्य वाला (देवः) परमेश्वर (न) कभी नहीं (दभायत्) ठगता है ॥ ७ ॥

भावार्थः--मनुष्य विश्वास करके सत्य स्वभावरूप परमेश्वर से प्रार्थना करें- "हे ईश्वर आप दुःखों से मुक्ति दाता हैं और आप कभी किसी को नहीं सताते" और पुरुषार्थ से पाप कर्मों को त्यागकर सुख प्राप्त करें ॥ ७ ॥

१८। **स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्** (उ० ४।११३) इति अ+थर्व चरणे=गतौ —वनिप्। वकारलोपो विकल्पेन। न थर्वति न चरतीति अथर्वा निश्चलः परमेश्वरः। यद्वा अथ + ऋ गतौ-वनिप्। अथ लोकमङ्गलाय ऋच्छति गच्छति व्याप्नोतीति अथर्वा। निश्चलं मङ्गलाय व्यापकं वा परमात्मानम्। **पितरम्।** अ० १।२।१। पातारं पालयितारं वा-निरु० ४।२१। **देवबन्धुम्।** देवानां विदुषां सूर्यादिदिव्यलोकानां वा बन्धुं हितकारं बन्धकं नियामकं वा। **बृहस्पतिम्।** बृहतां लोकानां रक्षकम्। **नमसा।** नमस्कारेण। कराभ्यां-शिरः संयोगविशेषेण स्वापकर्षसूचकेन व्यापारभेदेन। **च।** अवधारणे। **अव गच्छात्।** अवगच्छेत्। जानीयात्। **त्वम्।** अथर्वा वेनो वा परमेश्वरः। **विश्वेषाम्।** सर्वेषां सुखानाम्। **जनिता।** अ० २।१।३। जनयिता। **यथा।** यस्मात् कारणात्। **असः।** भवेः। **कविः।** **सर्वधातुभ्य इन्।** (उ० ४।११८) इति कबृ वर्णे-इन्। यद्वा। **अच इः** (उ० ४।१३९) इति कु शब्दे-इः। कविः क्रान्तदर्शनो भवति कवतेर्वा। निरु० १२।१३। अतीतानागतविप्रकृष्टविषयं युगपत् ज्ञानं यस्य स क्रान्तदर्शनः-इति देवराजयज्वा निरुक्तटीकाकारः-निघ० ३।१५ मेधावी-निघ० ३।१५ ब्रह्मा, पण्डितः। **देवः।** दीप्यमानः। **न।** न हि। **दभायत्।** दम्भु दम्भने=वञ्चने। **छन्दसि शायजपि** (पा० ३।१।८४) इति श्नः शायच्। इकारलोपश्च। दभ्नोति वञ्चति। **स्वधावान्।** अन्नवान्। स्वयं धारणवान् ॥

सूक्तम् ॥ २ ॥

१–८॥ कः प्रजापतिर्देवता । १–७ त्रिष्टुप्छन्दः, ८ आपो वत्समिति अनुष्टुप्, कस्मै देवायेति त्रिष्टुप् पादः ॥

ब्रह्मविद्योपदेशः—ब्रह्म विद्या का उपदेश ॥

य आत्मदा बलदा यस्य विश्वं उपासते प्रशिषं यस्य देवाः ।
यो ३ स्येशे द्विपदो यश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥१॥

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिषम् । यस्य । देवाः । यः । अस्य । ईशे । द्विऽपदः । यः । चतुःऽपदः । कस्मै । देवाय । हविषा । विधेम ॥ १ ॥

भाषार्थः—(यः) जो (आत्मदाः) प्राण [आत्मबल] का देने वा शुद्ध करने वाला और (बलदाः) शारीरिक बल का देने वा शुद्ध करने वाला है, (यस्य) जिस (यस्य) व्यापक वा पूजनीय के (प्रशिषम्) उत्तम शासन को (विश्वे) सब (देवाः) देवता [सूर्य चन्द्रादि सब लोक] (उपासते) सेवते हैं, (यः) जो (यः) व्यापक वा पूजनीय (अस्य) इस (द्विपदः) दुपाये और (चतुष्पदः) चौपाये जीव समूह का (ईशे=ईष्टे) ईश्वर है, उस (कस्मै= काय) प्रजापति सुखदाता परमेश्वर की (देवाय) दिव्य गुण के लिये मैं (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें ॥ १ ॥

१—**यः** । कः परमेश्वरः । **आत्मदाः** । **आतो मनिन्क्वनिब्वनिपश्च** (पा० ३ । २ । ७४) इति आत्मन्+डुदाञ् दाने, दैप् शोधने वा-विच् । आत्मनः प्राणस्य आत्मबलस्य दाता शोधयिता वा । **बलदाः** । इति पूर्ववत् सिद्धिः । शरीरबलस्य दाता शोधयिता वा । **यस्य** । ईश्वरस्य । **विश्वे** । सर्वे । **उपासते** । आस उपवेशने-अदादिः । सेवन्ते । भजन्ते । **प्रशिषम्** । **क्वौ च शास इत्वं भवतीति वक्तव्यम्** (वा० पा० ६ । ४ । ३४) इति शासु अनुशिष्टौ, इति क्विबन्तस्य उपधाया इत्वम् । **शासिवसिघसीनां च** (पा० ८ । ३ । ६०) इति षत्वम् । प्रकृष्टं

भावार्थः—जिस परमात्मा की आज्ञा में अग्नि, वायु, सूर्य, चन्द्रमा आदि सब देवता [यजु० १४ । २०] और मनुष्य गौ आदि सब प्राणी चलते हैं, उस जगदीश्वर की उपासना करके हम लोग आत्मिक और शारीरिक बल बढ़ाकर सुख भोगें ॥ १ ॥

यह मन्त्र कुछ भेद से ऋ० १० । १२१ । २, और य० २५ । १३, में है ॥

यः प्राणतो निमिषतो महित्वैको राजा जगतो बभूव ।
यस्यच्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥

यः । प्राणतः । निऽमिषतः । महिऽत्वा । एकः । राजा । जगतः । बभूव । यस्य । छाया । अमृतम् । यस्य । मृत्युः । कस्मै । देवाय । हविषा । विधेम ॥ २ ॥

भाषार्थः—(यः) जो महित्वा = ०—त्वेन) अपनी महिमा से (प्राणतः)

शासनम् । आज्ञाम् । **यस्य** । या प्रापणे वा यज पूजायाम्—डः । याति व्याप्नोति यद्वा इज्यते पूज्यते स यः । व्यापकस्य । पूज्यस्य । **देवा** । अग्निवायुसूर्यादयः—यथा यजु० १४।२० । **अस्य** । दृश्यमानस्य । **ईशे** । ईश ऐश्वर्ये । **लोपस्त आत्मनेपदेषु** (पा० ७ । १ । ४१) इति तलोपः । ईष्टे । ईश्वरो भवति । **द्विपदः** । अ० २।३४।१ । पादद्वययुक्तस्य मनुष्यादेः । **यः** । व्यापकः । यजनीयः । **चतुष्पदः** । अ० २ । ३४ । १ । पादचतुष्टयोपेतस्य गवाश्वादेः । **कस्मै** । **अन्येष्वपि दृश्यते** (पा० ३ । २ । १०१) इति कचि दीप्तिबन्धनयोः कमु कान्तौ वा क्रमु पादविक्षेपे वा गतौ च-डप्रत्ययः । छान्दसी सर्वनामता[1] । द्वितीयार्थे चतुर्थी । कः कमनो वा क्रमणो वा । दीप्यमानाय प्रजापतये । **देवाय** । दिव्यगुणाय—यथा दयानन्दभाष्ये, यजु० ४।३५ । **हविषा** । अ० १ । ४ । ३ । आत्मदानेन । भक्त्या । **विधेम** । अ० १ । १२ । २ । परिचरेम । सेवेमहि । परिचरणं कुर्याम ॥

२—यः । प्रजापतिः कः । **प्राणतः** । अन प्राणने—शतृ । प्रश्वसतः । चेतनस्य

१. प्रजापति के पर्यायवाची 'क' शब्द की सर्वनाम संज्ञा छन्द में 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' आदि नियमों एवं शतपथ (श० ब्रा० ७ । ३ । १ । २०) महाभाष्यादि (म० भा० ४ । २ । २५) के प्रमाण से सिद्ध है । एकस्मै के अर्थ में भी कस्मै का प्रयोग कतिपय प्राचीन ग्रन्थों (मी०/शावरभाष्य १० । ३ । १५) में प्राप्त होता है, सो छान्दस एकार-लोट् एवं स्वर व्यत्यय से 'क' को उदात्त मानकर वह माना जा सकता है ॥ सम्पा० ॥

श्वास लेते हुए, चेतन और (निमिषतः) आंख मूदे हुए, अचेतन (जगतः) जगत् का (एकः) एक (राजा) राजा (बभूव) हुआ है। (यस्य) जिसकी (छाया) छाया [छाया समान अनुगामी अथवा आश्रय वा कान्ति अर्थात् ज्ञान] (अमृतम्) अमरपन [जीवन वा पुरुषार्थ वा जीवन की सफलता, मोक्ष पद] है और (यस्य=यस्यच्छाया) जिसकी [छाया अर्थात् छाया समान अनुगामी अथवा अनाश्रय, वा प्रकाश का ढकना, अज्ञान] (मृत्युः) मरण [शरीर त्याग वा निरुत्साह, वा जीवन की विफलता, नरक] है, उस (कस्मै) प्रजापति सुखदाता परमेश्वर की (देवाय) श्रेष्ठ गुण के लिये (हविषा) भक्ति के साथ (विधेम) सेवा किया करें ॥ २ ॥

भावार्थः—जो मनुष्य सब चेतन और अचेतन जगत् के एक स्वामी परमेश्वर की आज्ञा में चलता है, वह जीते जागते हृदय वाला पुरुष पुरुषार्थ करके अमर [यशस्वी वा मुक्त] हो जाता है और इसके विपरीत मरे मन वाला निरुत्साही मृतक सा होकर नरक भोगता है ॥ २ ॥

यह मन्त्र कुछ भेद से ऋ० १० । १२१ । ३, और यजु० २५ । ११, में है ॥

यं क्रन्द॑सी॒ अव॑तश्चस्कभा॒ने भि॒यसा॑ने॒ रोद॑सी॒ अह्व॑येथाम् ।
यस्या॒सौ पन्था॒ रज॑सो वि॒मान॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥३॥

निमिषतः । मिष स्पर्धायाम्—शतृ: । तुदादित्वात् शः । निमेषणं निमीलनं चक्षुर्मुद्रणं कुर्वतः । अचेतनस्य । **महित्वा** । **सर्वधातुभ्य इन्** (उ० ४ । ११८) इति मह पूजायाम्—इन् । महेर्महतो भावो महित्वम् । यद्वा । **अन्येभ्योऽपि दृश्यन्ते** (पा० ३ । २ । ७५) इति मह—भावे इत्वन् । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति तृतीयायाः आकारः । महित्वेन । महत्त्वेन । **एकः** । अद्वितीयः । **राजा** । शासकः अधिपतिः । **जगतः** । संसारस्य । **बभूव** । **यस्य** । कस्य । प्रजापतेः । **छाया** । **माछाशसिभ्यो यः** (उ० ४ । १०९) इति छो छेदने—यः टाप्, गृहनाम—निघ० ३ । ४ । आश्रयः इत्यर्थः । कान्तिः प्रकाशः । प्रतिबिम्बम् । प्रकाशावरणम् अज्ञानमित्यर्थः । यद्वा । छायेव अनुगामी वशीभूतः । **अमृतम्** । भावे—क्तः । अमरणम् । जीवनम् । जीवनसाफल्यम् । **यस्य** । यस्यच्छाया । **मृत्युः** । मरणम् । जीवनवैफल्यम् अन्यद् गतम् ॥ म० १ ॥

यम् । क्रन्दसी इति । अवतः । चस्कभाने इति । भियसाने इति । रोदसी इति । अह्वयेथाम् । यस्य । असौ । पन्थाः । रजसः । विऽमानः । कस्मै । देवाय । हविषा । विधेम ॥ ३ ॥

भाषार्थः—(यम्) जिसको (चस्कभाने) परस्पर रोकती हुई (क्रन्दसी) ललकारती हुई दो सेनायें (अवतः) प्राप्त होती हैं, और [जिसको] (भियसाने) हे डरती हुई (रोदसी) सूर्य और भूमि ! (अह्वयेथाम्) तुम दोनों ने पुकारा है। (यस्य) जिसका (असौ पन्थाः) यह मार्ग (रजसः) संसार का (विमानः) विविध प्रकार नापने वाला वा विमान रूप है, उस (कस्मै) प्रजापति सुखदाता परमेश्वर की (देवाय) उत्तम गुण के लिये (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें ॥ ३ ॥

भावार्थः—परमेश्वर को ही दो लड़ती हुई सेनायें पुकारती हैं, उसी की आज्ञा में सूर्य आदि लोक रहते हैं, उसी की व्याप्ति संसार भर में है, उसी परब्रह्म की भक्ति करके सब मनुष्य पुरुषार्थ करें ॥ ३ ॥

इस मन्त्र का पूर्वार्ध कुछ भेद से ऋ० १० । १२१ । ६ और यजु० ३२ । ७ और उत्तरार्ध यजु० ३२ । ६ में है ॥

३—**यम्** । प्रजापतिम् । **क्रन्दसी** । **सर्वधातुभ्य इन्** (उ० ४ । ११८) इति क्रदि आह्वाने रोदने च—असुन् । **उगितश्च** (पा० ४ । १ । ६) इति ङीप् । **वा छन्दसि** (पा० ६ । १ । १०६) इति पूर्वसवर्णः । क्रन्दस्यौ । आक्रोशन्त्यौ । आह्वानं शब्दं वा कुर्वाणे द्वे सेने । **अवतः** । अव रक्षणगतिकान्तिप्रीत्यादिषु । अव गतौ प्राप्तौ—लट् । गच्छतः । प्राप्नुतः । **चस्कभाने** । स्कभि प्रतिबन्धे—कानच् । प्रतिबन्धं कुर्वाणे । **भियसाने** । **छन्दस्यसानच् शुजभ्याम्** (उ० २ । ८६) इति ञिभी भये—असानच् । बिभ्यत्यौ । **रोदसी** । अ० ४ । १ । ४ । भूतानां निरोधनशीले । द्यावापृथिव्यौ । **अह्वयेथाम्** । ह्वेञ् आह्वाने, स्पर्धायां शब्दे च—लङ् । युवाम् आहूतवत्यौ । **यस्य** । कस्य । प्रजापतेः । **असौ** । प्रसिद्धः । दृश्यमानः । **पन्थाः** । **पतःस्थ च** (उ० ४ । १२) इति पत्लृ गतौ—इन् । मार्गः । **रजसः** । अ० ४ । १ । ४ । लोकस्य । **विमानः** । वि+माङ् माने ल्युट् । परिच्छेदकः सर्वमानः । देवरथः । व्योमयानम् । विमानवत् । अन्यद् व्याख्यातम् ॥

यस्य द्यौरुर्वी पृथिवी च मही यस्याद उर्व१न्तरिक्षम् ।
यस्यासौ सूरो विततो महित्वा कस्मै देवाय हविषा विधेम ॥४॥

यस्य । द्यौः । उर्वी । पृथिवी । च । मही । यस्य । अदः । उरु । अन्तरिक्षम् । यस्य । असौ । सूरः । विऽततः । महिऽत्वा । कस्मै । देवाय । हविषा । विधेम ॥ ४ ॥

भाषार्थः—(यस्य) जिसकी (महित्वा=०त्वेन) महिमा से (उर्वी) विस्तीर्ण (द्यौः) सूर्य (च) और (मही) विशाल (पृथिवी) पृथिवी है, (यस्य) जिसकी [महिमा से] (अदः) यह (उरु) चौड़ा (अन्तरिक्षम्) मध्य लोक है। (यस्य) जिसकी [महिमा से] (असौ) यह (सूरः) धर्म प्रचारक विद्वान् मनुष्य (विततः) विस्तार वाला है, उस (कस्मै) प्रजापति सुखदाता परमेश्वर की (देवाय) दिव्य गुण के लिये (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें॥ ४ ॥

भावार्थः—जिस परमात्मा ने सूर्य आदि अनेक लोकों को रचकर परस्पर आकर्षण द्वारा स्थिर किया है, और जिसने मनुष्य को अद्भुत शक्तियां देकर ऐश्वर्यवान् और प्रतापी बनाया है, उसकी भक्ति करके हम पुरुषार्थ के साथ अपनी उन्नति करें॥ ४ ॥

४—**यस्य** । कस्य । प्रजापतेः । **द्यौः** । अ० २।१२।६। द्योतमानः सूर्यः । **उर्वी** । अ० ३।२०।९। विस्तीर्णा । **पृथिवी** । भूलोकः । **मही** । महती । विशाला । **अदः** । एतत् दृश्यमानम् । **उरु** । अ० २ । १२ । १ । विस्तीर्णम् । **अन्तरिक्षम्** । अ० १ । ३० । ३ । मध्यलोकः । **असौ** । प्रत्यक्षं दृश्यमानः । **सूरः** । **सुसूधाञ्गृधिभ्यः क्रन्** । (उ० २ । २४) इति षू प्रेरणे वा षूङ् प्राणिगर्भविमोचने, क्रन् । सुवति प्रेरयति, यद्वा, सूते उत्पादयति लोकं धर्मं वा । सूर्यः । पण्डितः **महित्वा** । म० २ । महित्वेन । अन्यद् गतम्—म० १ ॥

यस्य॒ विश्वे॑ हि॒मव॑न्तो महि॒त्वा स॑मु॒द्रे यस्य॑ र॒सामिदा॒हुः ।
इ॒माश्च॑ प्र॒दिशो॒ यस्य॑ बा॒हू कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥५॥

यस्य॑ । विश्वे॑ । हि॒म॒ऽव॑न्तः । म॒हि॒ऽत्वा । स॒मु॒द्रे । यस्य॑ । र॒साम् । इत् । आ॒हुः । इ॒माः । च॒ । प्र॒ऽदिशः॑ । यस्य॑ । बा॒हू इति॑ । कस्मै॑ । दे॒वाय॑ । ह॒विषा॑ । वि॒धे॒म॒ ॥ ५ ॥

भाषार्थः—(यस्य) जिसकी (महित्वा=०--त्वेन) महिमा से (विश्वे) सब (हिमवन्तः) हिम वाले पहाड़ हैं, और (यस्य) जिसकी [महिमा से] (समुद्रे) समुद्र [अन्तरिक्ष,वा पार्थिव समुद्र] में (रसाम्) नदी को (इत्) भी (आहुः) बताते हैं। (च) और (इमाः) यह (प्रदिशः) बड़ी दिशायें (यस्य) जिसकी (बाहू) दो भुजायें हैं, उस (कस्मै) सुख दायक प्रजापति सुखदाता परमेश्वर की (देवाय) दिव्य गुण के लिये (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें ।। ५ ।।

भावार्थः— जैसे मनुष्य अपनी दो भुजाओं के बल से अर्थात् शारीरिक और आत्मिक सामर्थ्य से प्रजा पालन आदि बड़े २ बोझ उठाते हैं, उसी प्रकार परमेश्वर ने दिशाओं अर्थात् अवकाश के भीतर सब लोकों को रचकर परस्पर आकर्षण द्वारा स्थापित किया है, उस जगदीश्वर की आज्ञा में चलकर हम यज्ञ से उत्तम गुण प्राप्त करें ।। ५ ।।

यह मन्त्र कुछ भेद से ऋ० १० । १२१ । ४ और यजु० २५ । १२ में है ।।

५—यस्य । कस्य । ईश्वरस्य । **विश्वे** । सर्वे । **हिमवन्तः** । भूम्नि मतुप्, मस्य वः । बहुहिमयुक्ता महागिरयः । **महित्वा** । म० २ । महित्वे । **समुद्रे** । अ० १ । ३ । ८ । अन्तरिक्षे । पार्थिवसागरे । **रसाम्** । **नन्दिग्रहि०** पा० ३ । १ । १३४) इति रस शब्दे-पचाद्यच् । यद्वा । रस उदकम्—निघ० १ । १२ । रसोऽस्त्यस्यामिति रसा । **अर्श आदिभ्योऽच्** (पा० ५ । २ । १२७) इति रस—अच् । रसा नदी रसतेः शब्दकर्मणः—निरु० ११ । २५ । नदीम् । जल-धाराम् । **इत्** । एव । **आहुः** । ब्रुवन्ति । **इमाः** । दृश्यमानाः । **प्रदिशः** । प्रकृष्टा दिशाः । **बाहू** । अ० २ । २७ । ३ । भुजद्वयवद् वर्त्तमानाः । अन्यद् गतम्—म० १ ॥

आपो॒ अग्रे॒ विश्व॑मावन् गर्भं॒ दधा॑ना अ॒मृता॑ ऋत॒ज्ञाः ।
यासु॑ दे॒वीष्वधि॑ दे॒व आसी॒त् कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥६॥

आप॑ः । अग्रे॑ । विश्व॑म् । आ॒व॒न् । गर्भ॑म् । दधा॑नाः । अ॒मृता॑ः । ऋ॒त॒ऽज्ञाः ।
यासु॑ । दे॒वीषु॑ । अधि॑ । दे॒वः । आसी॒त् । कस्मै॑ । दे॒वाय॑ । ह॒विषा॑ । वि॒धे॒म ॥६॥

भाषार्थः—(गर्भम्) बीज को (दधानाः) धारण करते हुए, (अमृताः) मरण रहित [जीवन शक्ति वाले] (ऋतज्ञाः) सत्य नियम को जानने वाले (आपः) उन व्यापक जलों [वा तन्मात्राओं] ने (अग्रे) पहिले (विश्वम्) जगत् की (आवन्) रक्षा की थी, (यासु देवीषु अधि) जिन दिव्य गुण वालों के ऊपर (देवः) परमेश्वर (आसीत्) था उस (कस्मै) सुखदायक प्रजापति परमेश्वर की (देवाय) दिव्य गुण के लिये (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें ॥ ६ ॥

भावार्थः— सृष्टि की आदि में ईश्वर नियम से जल [वा तन्मात्रा] के भीतर जगत् का बीज और जीवन सामर्थ्य था, जिससे यह सृष्टि हुई है। उसी परमात्मा के नियम पर चलकर हम अपने जीवन को पुरुषार्थ करके सुधारें ॥६॥

६—**आपः** । अ० १ । ४ । ३ । जलानि । व्यापिकास्तन्मात्राः—इति दयानन्दो यजुर्वेदभाष्ये २७।२५ । **अग्रे** । सृष्टयादौ । **विश्वम्** । सर्वं जगत् । **आवन्** । अव रक्षणगत्यादिषु—लङ् । अरक्षन् । **गर्भम्** । अ० ३ । १० । १२ । बीजम् । मूलम् । प्रधानम् । **दधानाः** । दधातेः शानच् । धारयन्त्यः । धरन्त्यः सत्यः । **अमृताः** । नास्ति मृतं मरणं याभिस्ताः । मरणरहिताः । प्राप्तजीवनशक्तयः । **ऋतज्ञाः** । **आतोऽनुपसर्गे कः** (पा० ३ । २ । ३) इति ऋत + ज्ञा अवबोधने कः । टाप् । ऋतं सत्यं नियमं जानानाः । **यासु** । अप्सु । **देवीषु** । दिव्यगुणसंपन्नासु । **अधि** । अधिकम् । उपरि । **देवः** । परमेश्वरः । **आसीत्** । अभवत् । अन्यद् व्याख्यातम् म० १ ॥

---

१. यद्वृत्तोपपदाच्च (यजु० प्रा० ६ । १४) के नियम से आसीत् यहाँ आद्युदात्त है ॥ सम्पा० ॥

यह मन्त्र कुछ भेद से ऋ० १० । १२१ । ७, ८ और यजु० २७ । २५, २६ में है। मनु महाराज ने भी ऐसा कहा है--

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ॥ मनु० १ । ८ ॥

उस परमात्मा ने सब ओर ध्यान करके अपने शरीर [अव्याकृत रूप वा सामर्थ्य] से नानाविध प्रजायें उत्पन्न करने की इच्छा करते हुये जल ही पहिले उत्पन्न किया और उसमें बीज छोड़ दिया ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीमुत द्यां कस्मै देवाय हविषा विधेम ॥ ७ ॥

हिरण्यऽगर्भः । सम् । अवर्तत । अग्रे । भूतस्य । जातः । पतिः । एकः । आसीत् । सः । दाधार । पृथिवीम् । उत । द्याम् । कस्मै । देवाय । हविषा । विधेम ॥ ७ ॥

भाषार्थः—(हिरण्यगर्भः) तेज वाले लोकों का आधार (अग्रे) पहिले ही (सम्) ठीक ठीक (अवर्तत) वर्त्तमान था । वही (जातः) प्रकट होकर (भूतस्य) पृथिवी आदि पंचभूत का (एकः) एक (पतिः) पति, ईश्वर (आसीत्) हुआ, (सः) उसने (पृथिवीम्) पृथिवी (उत) और (द्याम्) सूर्य को (दाधार) धारण किया, उस (कस्मै) सुखदायक प्रजापति परमेश्वर की (देवाय) दिव्य गुण के लिये (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें ॥ ७ ॥

७—**हिरण्यगर्भः** । हिरण्यं व्याख्यातम्—अ० १ । ९ । २ । गर्भश्च, अ० ३ । १० । १२ । हिरण्यगर्भो हिरण्यमयो गर्भो हिरण्यमयो गर्भोऽस्येति वा निरु० १० । २३ । हिरण्यानि सूर्यादितेजांसि गर्भे यस्य स परमात्मा—इति दयानन्दभाष्ये यजु० २५ । १० । **सम्** । प्रकर्षेण । **अवर्तत** । वृतु वर्तने—लङ् । वर्तमान आसीत् । **अग्रे** । सृष्टेः प्राक् । **भूतस्य** । पृथिव्यप्तेजोवाय्वाकाशपञ्चकस्य

भावार्थः—सर्वशक्तिमान् अविनाशी परमात्मा प्रलय काल में विद्यमान था। उसके कर्मों से ज्ञात होता है कि उस अकेले ने सूक्ष्म पंचभूत का यथावत् संयोग वियोग करके पृथिवी, सूर्य आदि सृष्टि को रचा और धारण किया है, उसकी उपासना से उत्तम गुण प्राप्त करके आनन्द भोगें ॥ ७ ॥

यह मन्त्र कुछ भेद से ऋ० १० । १२१ । १, यजु० १३ । ४ तथा २५ । १० और निरु० १० । २३ में है ॥

आपो॑ व॒त्सं ज॒नय॑न्ती॒र्गर्भ॒मग्रे॒ समैर॑यन् । तस्यो॒त जाय॑मान॒स्योल्ब॑ आसीद्धिर॒ण्यय॒ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ ८ ॥

आप॑ः । व॒त्सम् । ज॒नय॑न्तीः । गर्भ॑म् । अग्रे॑ । सम् । ऐ॒र॒य॒न् । तस्य॑ । उ॒त । जाय॑मानस्य । उल्ब॑ः । आ॒सी॒त् । हि॒र॒ण्यय॑ः । कस्मै॑ । दे॒वाय॑ । ह॒विषा॑ । वि॒धे॒म ॥ ८ ॥

भाषार्थः—(अग्रे) पहिले ही पहिले (वत्सम्) निवास स्थान संसार को वा बालक रूप संसार को (जनयन्तीः=०-न्त्यः) उत्पन्न करते हुए (आपः) जलधाराओं [वा तन्मात्राओं] ने (गर्भम्) बालक [रूप संसार] को (समैरयन्) यथावत् प्रकट किया, (उत) और (तस्य) उस (जायमानस्य)

वस्तुतत्त्वस्य । उदकस्य—निघ० १ । १२ । **जातः** । उत्पन्नः । प्रादुर्भूतः । प्रसिद्धः सन् । **पतिः** । अ० १ । १ । १ पाता । रक्षिता । ईश्वरः । स्वतन्त्रः । एकः । मुख्यः । अद्वितीयः । **आसीत्** । अभवत् । **दाधार** । धृञ् धारणे—लिट् । धृतवान् । **पृथिवीम्** । भूमिम् । **उत** । अपि च । **द्याम्** । अ० २ । १२ । ६ । प्रकाशम् । सूर्यम् । अन्यद् गतम् ॥

८—**आपः** । जलानि । तन्मात्राः । **वत्सम्** । अ० ३ । १२ । ३ । वृतॄवदिवचिवसि० (उ० ३।६२) इति वद व्यक्तायां वाचि यद्वा वस निवासे—सः । वसन्ति भूतान्यस्मिंस्तं संसारम् । वदति सततमिति वत्सो बालस्तं वा—इति दयानन्दभाष्ये यजु० ३३ । ५ । **जनयन्तीः** । जनयतेः शतृः । जसि पूर्वसवर्णदीर्घः । जनयन्त्यः ।

उत्पन्न होते हुए [बालक, संसार] का (उल्वः) जरायु [गर्भ की झिल्ली] (हिरण्ययः) तेजोमय परमात्मा (आसीत्) था, इस (कस्मै) सुखदायक प्रजापति परमेश्वर की (देवाय) दिव्य गुण के लिये (हविषा) भक्ति के साथ (विधेम) हम सेवा किया करें ॥ ८ ॥

भावार्थः—जल [वा तन्मात्राओं] की उत्पादन शक्ति से यह संसार उत्पन्न हुआ है और सृष्टि का आदिकारण परमेश्वर है, जो सृष्टि को सब ओर से गर्भ की झिल्ली के समान ढके हुए है और वीज में भी उत्पादन शक्ति देने वाला वही है—मन्त्र ६ देखो ॥ ८ ॥

यह मन्त्र कुछ भेद से ऋ० १० । १२१ । ७ और यजु० २७ । २५ में है ॥

मनु भगवान् ने इस प्रकार कहा है—

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।

तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ मनु० १ । ९॥

वह [बीज] सूर्य के समान प्रकाशवाला चमकीला अंडा हो गया, उस [अण्डे] में ब्रह्मा [परमात्मा] सब लोकों का पितामह [दादा] अपने आप प्रकट हुआ [अर्थात् उसमें परमातमा की महिमा जान पड़ी] ॥

सूक्तम् ॥ ३ ॥

१–७॥ इन्द्रो देवता । १ पथ्या पङ्क्तिः, २–४–७ अनुष्टुप्, ३ गायत्री ।

शत्रुनाशोपदेशः—बैरी के नाश का उपदेश ॥

उदितस्त्रयो अक्रमन् व्याघ्रः पुरुषो वृकः । हिरुग्घि यन्ति सिन्धवो हिरुग् देवो वनस्पतिर्हिरुङ् नमन्तु शत्रवः ॥१॥

उत्पादयन्त्यः । **गर्भम्** । मूलं प्रधानम् । वीर्यम् । शिशुम् । **अग्रे** । प्राक्काले । **सम्** । सम्यक् । यथावत् । **ऐरयन्** ।ईर गतौ कंपने च ण्यन्ताल्लङ् । प्रेरितवत्यः । प्रकाशितवत्यः । **तस्य** । प्रसिद्धस्य । **उत** । अपि च । **जायमानस्य** । उत्पद्यमानस्य गर्भस्य । **उल्वः** । **उल्वादयश्च** (उ० ४ । ९५) इति उच समवाये—वन् चस्य लत्वं गुणाभावश्च । यद्वा । वल संवरणे—वन्प्रत्ययः संप्रसारणं च । जरायुः । गर्भवेष्टनः । **आसीत्** । अभवत् । **हिरण्ययः** । मलोपः । हिरण्यमयः । तेजोमयः । अन्यद् गतम् म० ॥१॥

उत् । इ॒तः । त्र॒यः । अ॒क्र॒म॒न् । व्या॒घ्रः । पुरु॑षः । वृकः॑ । हिरु॑क् । हि । यन्ति॑ । सिन्ध॑वः । हिरु॑क् । दे॒वः । वन॒स्पतिः॑ । हिरु॑क् । न॒म॒न्तु॒ । शत्र॑वः ॥ १ ॥

भाषार्थः—(त्रयः) तीनों, (व्याघ्रः) सूंघकर पकड़ने वाला, बाघ, (पुरुषः) आगे बढ़ने वाला, [चोर] मनुष्य, और (वृकः) हुंडार वा भेड़िया (इतः) यहां से (उदक्रमन्) फलांगकर निकल गये। (सिन्धवः) नदियां (हि) अवश्य (हिरुक्) नीचे को (यन्ति) जाती हैं, (देवः) दिव्य गुण वाला (वनस्पतिः) सेवकों का रक्षक, वृक्ष भी (हिरुक्) नीचे को, [इसी प्रकार] (शत्रवः) हमारे बैरी (हिरुक्) नीचे को (नमन्तु) झुकें ॥ १ ॥

भावार्थः—मनुष्य प्रयत्न करे कि हिंसक मनुष्य और अन्य प्राणी वशीभूत होकर झुके रहें, जैसे नदी और वृक्ष नीचे को झुकते हैं । ॥१॥

परे॑णैतु प॒था वृकः॑ प॒र॒मेणो॒त तस्क॑रः ।
परे॑ण द॒त्वती॒ रज्जुः॒ परे॑णाघा॒युर॑र्षतु ॥ २ ॥

१—उत् । **उपसर्गाः क्रियायोगे** (पा० १।४।५९) **इतः** । अस्मात् स्थानात् । **त्रयः** । त्रिसंख्यकाः । **उदक्रमन्** । क्रमु पादविक्षेपे—लङ् । **क्रमः परस्मैपदेषु** (पा० ७ । ३ । ७६) इति दीर्घाभावश्छान्दसः । उदक्रामन् । उत्क्रान्ता उत्थिता अभवन् । **व्याघ्रः** । **आतश्चोपसर्गे** (पा० ३ । १ । १६) इति वि+आङ्+घ्रा गन्धोपादाने कः । व्याजिघ्रति विशिष्टाघ्राणमात्रेण प्राणिनो हन्तीति । हिंसकजन्तुविशेषः । **पुरुषः** । अ० १ । १६ । ४ । पुर—कुषन् । पुरति अग्रेऽगच्छतीति[1] । चौरः । परमेणोत तस्करः । इति उत्तरत्र म० २ तस्यैवानुकीर्तनात् । **वृकः** । **सृवृभूशुषिमुषिभ्यः कक्** (उ०३।४१) इति वृञ् वरणे-कक् । यद्वा । वृक आदाने-कः । कुक्कुराकारो हरिणादिघातको जन्तुविशेषः । हुण्डार इति भाषा । **हिरुक्** । हि गतौ—रुकक् । वर्जने । त्यागे । अधमे । विना । निर्णीतान्तर्हितनाम-निघ० ३ । २५ । अन्तर्हितम् । **हि** । प्रसिद्धौ । **यन्ति** । गच्छन्ति । **सिन्धवः** । **स्यन्देः सम्प्रसारणं धश्च** (उ०१। ११) इति स्यन्दू प्रस्रवणे—उः । दस्य धः । सिन्धुः स्यन्दनात्—निरु० ९ । २६ । स्यन्दनशीलाः नद्यः । **देवः** । दिव्यगुणयुक्तः । **वनस्पतिः** । वनानां सेवकानां पाता रक्षकः । वृक्षः । **नमन्तु** । प्रह्वी भवन्तु । **शत्रवः** । शातनशीलाः । विरोधिनः ॥

---

१. पुरुषः पुरिषादः पुरिशयः पूरतेर्वा (निरु० २ । ३, १ । १२) ऐसा निरुक्त में कहा है । अर्थात् पूः शरीरं बुद्धिर्वा तयोः सीदतीति पुरिषादः=पुरुषः । अथवा पुरि शेते इति पुरुषः । पुरुषस्य सर्वगतत्वाद्वा पूरयतेः पुरुषः ॥सम्पा०॥

परेण । एतु । पथा । वृकः । परमेण । उत । तस्करः । परेण । दत्वती । रज्जुः । परेण । अघऽयुः । अर्षतु ॥ २ ॥

भावार्थः—(वृकः) हुण्डार वा भेड़िया (परेण) दूर (पथा) मार्ग से (एतु) चला जावे, (उत) और (तस्करः) पीड़ा देने वाला चोर (परमेण) अधिक दूर मार्ग से (दत्वती) दान्त वाली (रज्जुः) रसरी अर्थात् साँप (परेण) दूर से, और (अघायुः) बुरा चीतने वाला पापी (परेण) दूर से (अर्षतु) भाग जावे ॥२॥

भाषार्थः—मनुष्य अपने घर ऐसे बनावें और ऐसा प्रबन्ध करें जिससे दुष्ट मनुष्य और हिंसक जीवों से रक्षा रहे ॥२॥

अक्ष्यौ च ते मुखं च ते व्याघ्र जम्भयामसि ।
आत् सर्वान् विंशतिं नखान् ॥ ३ ॥

अक्ष्यौ । च । ते । मुखम् । च । ते । व्याघ्र । जम्भयामसि । आत् । सर्वान् । विंशतिम् । नखान् ॥ ३ ॥

भाषार्थः—(व्याघ्र) हे बाघ ! (ते) तेरी (अक्ष्यौ) दोनों [हृदय और

२—**परेण** । अन्येन, दूरेण । **एतु** । गच्छतु । **पथा** । मार्गेण । **वृकः** । म० १ । अरण्यश्वा । **परमेण** । दूरतरेण । **उत** । अपि । **तस्करः** । **त्यजितनियजिभ्यो डित्** । (उ० १ । १३२) इति तनु विस्तारे श्रद्धोपकरणयोः वा—अदिः । तनुते विस्तृतो भवतीति तद्, **दिवाविभानिशा०** (पा० ३ । २ । २१) इति तत् इत्युपपदे कृञ् करणे—टप्रत्ययः । **तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च** (वा० पा० ६ । १ । १५७) इति सुट्तलोपौ । तद् करोतीति तस्करः[1] । चोरः । **दत्वती** । दन्त—मतुप् ङीप् । **पद्दन्नोमास्०** (पा० ६ । १ । ६३) इति दत् । दन्त—वती । **दत्वती रज्जुः** । दन्तयुक्तो रज्ज्वाकृतिः सर्पः । **अघायुः** । अ० १ । २० । २ । अनिष्टचारी । पापात्मा । **अर्षतु** । ऋषी गतौ । गच्छतु ॥

३—**अक्ष्यौ** । अ० १ । २७ । २ । अक्षिणी । उभे मानसिकमस्तिष्कनेत्रे ।

१. तस्कर शब्द स्तेन = चोर (निन्दित) के अर्थ में यहाँ रूढि है ऐसा जानना चाहिये । निरुक्त में तस्करस्तत्करो भवति, करोति यत् पापकमिति नैरुक्ताः, तनोतेर्वा स्यात् सन्ततकर्मा (अहर्निशम्) भवति (निरु० ३ । १४) ऐसा आया है । सायणाचार्य ने यहाँ वार्त्तिक से अच् किया है जो कि चिन्त्य है, क्योंकि स्त्रीलिङ्ग में चोर वाची तस्कर शब्द से ङीबन्त प्रयोग ही मिलते हैं । चोराभिधेय से अन्यत्र अच् होकर 'तत्कारा' होगा ॥सम्पा०॥

मस्तक की] आंखों को (च) और (च) भी (ते मुखम्) तेरे मुख को, (आत्) और भी (सर्वान्) सब (विंशतिम्) बीसों (नखान्) नखों को (जम्भयामसि = ०-मः) हम नष्ट करते हैं ॥३॥

भावार्थः जैसे हिंसक जन्तुओं को अंग भंग करके नष्ट कर देते हैं, इसी प्रकार मनुष्य अपने अपने शत्रुओं को सेनादि और शरीर के अंगों से नष्ट करके प्रजा में शान्ति रक्खें ॥ ३ ॥

व्याघ्रं दुत्वतां वयं प्रथमं जम्भयामसि ।

आदु ष्टेनमथो अहिं यातुधानमथो वृकम् ॥ ४ ॥

व्याघ्रम् । दुत्वताम् । वयम् । प्रथमम् । जम्भयामसि । आत् । ऊँ इति । स्तेनम् । अथो इति । अहिम् । यातुऽधानम् । अथो इति । वृकम् ॥ ४ ॥

भाषार्थः—(दत्वताम्) दाँत वालों में से (प्रथमम्) पहिले (व्याघ्रम्) बाघ, (आत् उ) और भी (अहिम्) साँप, (अथो) और भी (वृकम्) भेड़िये, (स्तेनम्) चोर (अथो) और भी (यातुधानम्) पीड़ा देने वाले राक्षस को (वयम्) हम (जम्भयामसि) नष्ट करते हैं ॥ ४ ॥

भावार्थः—मनुष्य प्रयत्न पूर्वक दुष्ट जन्तुओं और उनके समान दुष्ट स्वभाव वाले चोर डाकुओं और रोगों तथा दोषों को नष्ट करें ॥४॥

मुखम् । अ० २ । ३५ । ५ । आस्यम् । **ते** । तव । **व्याघ्र** । म० १ हे व्याघ्रेव हिंसक पुरुष । **जम्भयामसि** । म० ३ । नाशयामः । **आत्** । अनन्तरम् । **सर्वान्** । सकलान् । **विंशतिम्** । पङ्क्तिविंशति० (पा० ५ । १ । ५९) इति विन्शब्दात्[1] शति प्रत्ययान्तो निपातः । द्वे दशती । पादचतुष्टये पञ्चशोऽवस्थितान् । **नखान्** । अ० २ । ३३ । ६ । नखरान् ।

४—व्याघ्रम् । म० १ । हिंसकजन्तुविशेषं शार्दूलम् । **दत्वताम्** । म० २ । दन्तवतां दंशनशीलानां हिंस्राणां मध्ये । **वयम्** । मनुष्याः । **प्रथमम्** । अग्रे । **जम्भयामसि** । म० ३ । नाशयामः । **आत् उ** । अनन्तरमेव । **स्तेनम्** । स्तेन चौर्ये—पचाद्यच् । चोरम् । **अथो** । अनन्तरमेव । **अहिम्** । अ० २ । ५ । ५ । आहन्तारम् । सर्पम् । **यातुधानम्** । अ० १ । ७ । १ । पीडाप्रदं राक्षसम् । **वृकम्** । म० १ । अरण्यश्वानम् ॥

---

१. द्वयोर्दशतोर्विन् भावः शतिश्च प्रत्ययः इति काशिका (काशि० ५।१।५६) ॥सम्पा०॥

यो अद्य स्तेन आयति स संपिष्टो अपायति ।
पथामपध्वंसेनैत्विन्द्रो वज्रेण हन्तु तम् ॥ ५ ॥

यः । अद्य । स्तेनः । आऽअयति । सः । सम्ऽपिष्टः । अप ।
अयति । पथाम् । अपऽध्वंसेन । एतु । इन्द्रः । वज्रेण । हन्तु । तम् ॥५॥

भाषार्थः—(यः स्तेनः) जो कोई चोर (अद्य) आज (आयति) आवे, (संपिष्टः) चूर चूर किया हुआ (सः) वह (अप अयति) हट जावे, और (पथाम्) मार्गों के (अपध्वंसेन) विनाश से (एतु) चला जावे, (इन्द्रः) ऐश्वर्यवान् प्रतापी मनुष्य (वज्रेण) वज्र से (तम्) उसको (हन्तु) मार डाले ॥५॥

भावार्थः- मनुष्य घर और रक्षकों का ऐसा प्रबन्ध करें कि यदि चोर आदि आ भी जावें तो मार्ग भूलकर निराश होकर भागने लगे, और राजा पकड़ कर उसे यथोचित दंड देवे ॥ ५ ॥

मूर्णा मृगस्य दन्ता अपिशीर्णा उ पृष्टयः ।
निम्रुक् ते गोधा भवतु नीचायच्छशयुर्मृगः ॥ ६ ॥

मूर्णाः । मृगस्य । दन्ताः । अपिऽशीर्णाः । ऊं इति । पृष्टयः ।
निऽम्रुक् । ते । गोधा । भवतु । नीचा । अयत् । शशयुः । मृगः ॥ ६ ॥

भाषार्थः- [रे चोर !] (मृगस्य) पशु [अर्थात् तेरी गाह] के (दन्ताः) दान्त (मूर्णा) बन्द वा मोंथरे (उ) और (पृष्टयः) पसलियां (अपि शीर्णाः)

५—**यः अद्य** । अस्मिन् दिने । **स्तेनः** । म० ४ । चोरः । **आ-अयति** । अय गतौ । आगच्छतु । **सः** । चोरः । **संपिष्टः** । पिष्लृ संचूर्णने-क्तः । सर्वथा चूर्णीकृतः । **अप-अयति** । निर्गच्छतु । **पथाम्** । मार्गाणाम् । **अपध्वंसेन** । ध्वन्सु गतौ, अधः पतने—घञ् । विनाशेन । **एतु** । गच्छतु । **इन्द्रः** । ऐश्वर्यवान् पुरुषः । **वज्रेण** । अस्त्रभेदेन । **हन्तु** । मारयतु । **तम्** । चोरम् ।

६—**मूर्णाः** । मुर्वी बन्धने । **राल्लोपः** (पा०६।४।२१) इति वकारलोपः । **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** (पा० ८।२।४२) इति तस्य नः । बद्धाः ।

चूर चूर [हो जावें], (ते) तेरी (गोधा) गोह (निम्रुक्) नीचे (भवतु) हो जावे, और (मृगः) वह पशु (शशयुः) सोता हुआ [निरुद्यमी होकर] (नीचा) नीचे (अयात्) आ जावे ॥ ६ ॥

भावार्थः—(गोधा) गोह वा गोसांप एक छपकली जाति का जन्तु होता है, चोर उसकी पूंछ में डोरी बांधकर ऊंचे घरों पर फेंक देते, और उसे पकड़ कर ऊपर चढ़ जाते हैं। मनुष्य घर ऐसे चिकने और दृढ़ बनावें और सावधानी रक्खें कि चोर, डाकुओं की गोह आदि फंदे घरों पर न चिपट सकें किन्तु निकम्मे होकर नीचे फिसल पड़ें ॥ ६ ॥

यत् संयमो न वि यमो वि यमो यन्न संयमः ।
इन्द्रजाः सोमजा आथर्वणमसि व्याघ्रजम्भनम् ॥ ७ ॥

यत् । सम्ऽयमः । न । वि । यमः । वि । यमः । यत् । न । सम्ऽयमः ।
इन्द्रऽजाः । सोमऽजाः । आथर्वणम् । असि । व्याघ्रऽजम्भनम् ॥७॥

भाषार्थः—(यत्) जिससे (इन्द्रजाः) परमेश्वर से प्रकट हुआ, और (सोमजाः) मंथन करने वाले तत्ववेत्ताओं अथवा सर्वप्रेरक शूरवीर पुरुषों से

कुण्ठिताः । **मृगस्य** । अ० २ । ३६ । ४ । अन्वेषणशीलस्य । पशोः । गोधायाः । **दन्ताः** । **हसिमृग्रिण्वामिदमि०** (उ० ३ । ८६) इति दमु उपशमे-तन् । रदनाः । दशनाः । **अपि-शीर्णाः** । शॄ हिंसायाम्-क्तः । हिंसिताः । विदीर्णाः । त्रोटिताः । **उ** । अपि । **पृष्टयः** । पृषु सेचने-क्तिच् । पर्शवः । पार्श्वस्थीनि । **निम्रुक्** । नि+म्रुचु गतौ–क्विप् । नीचगतिः । **ते** । तव । चोरस्य । **गोधा** । **हलश्च** (पा०३।३।१२१) इति गुध परिवेष्टने-घञ् । टाप् । धनुर्गुणाघातवारणाय प्रकोष्ठबद्धा चर्मपट्टिका । जन्तुविशेषः । **भवतु** । **नीचा** । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति नीचैः डा । नीचैः । **अयात्** । अय गतौ लेट् । अडागमः । अयतात् । गच्छतु । **शशयुः** । **भृमृशीङ्तृ०** (उ० १ । ७) इति शीङ् स्वप्ने–उः । बाहुलकाद् द्विर्वचनम् । शयुः शयानः । निरुद्यमः । **मृगः** । पशुः ॥

७—**यत्** । यस्मात् कारणात् । **संयमः** । सम्यक् नियमः सुनियमः

प्रकाशित हुआ (संयमः) यथावत् नियम (वि यमः) विरुद्ध नियम (न) नहीं होता, और (यत्) जिससे (वि यमः) विरुद्ध नियम (संयमः) यथावत् नियम (न) नहीं होता है, [इसलिये हे मनुष्य तू] (आथर्वणम्) निश्चल वा मंगलप्रद परमेश्वर से आया हुआ (व्याघ्रजम्भनम्) व्याघ्रों [व्याघ्र स्वभाववाले शत्रुओं और विघ्नों] के नाश का सामर्थ्य (असि) है ॥ ७ ॥

भावार्थः—ईश्वर ने, और वेदवेत्ता आप्त पुरुषों ने जिन कर्मों को सत्य, और जिनको विरुद्ध वा असत्य बताया है, वे सर्वदा वैसे ही हैं, इसलिये मनुष्य विवेक पूर्वक विघ्नों को निर्मूल करके सदा आनन्द भोगें ॥ ७ ॥

सूक्तम् ॥ ४ ॥

१—८ ॥ वृषेन्द्रश्च देवते । अनुष्टुप् छन्दः ॥

मनुष्यो बलं वर्धयेत्—मनुष्य बल को बढ़ावे ।

यां त्वा गन्धर्वो अखनुद् वरुणाय मृतभ्रंजे ।
तां त्वा वयं खनामस्योषधिं शेपहर्षणीम् ॥ १ ॥

याम् । त्वा । गन्धर्वः । अखनत् । वरुणाय । मृतऽभ्रंजे ।
ताम् । त्वा । वयम् । खनामसि । ओषधिम् । शेपःऽहर्षणीम् ॥ १ ॥

प्रबन्धः । **वि यमः** । विरुद्धनियमः । **इन्द्रजाः** । **जनसनखनक्रमगमो विट्** (पा० ३ । २ । ६७) इति इन्द्र + जनी प्रादुर्भावे–विट् । **विड्वनोरनुनासिकस्यात्** (पा० ६ । ४ । ४१) इति आत्वम् । इन्द्रात् परमेश्वराज्जातः प्रादुर्भूतः । **सोमजाः** । पूर्ववद् विट् प्रत्यये सिद्धिः । षुञ् अभिषवे, यद्वा षू प्रेरणे-मन् । सोमेभ्यो मन्थनशीलेभ्यः सर्वप्रेरकेभ्यो वा पुरुषेभ्यः प्रकाशितः । **आथर्वणम्** । अथर्वा, इति व्याख्यातः अ० ४ । १ । ७ । **तत आगतः** (पा० ४।३।७४) इति अथर्वन्–अण् । **अन्** (पा० ६।४।१६७) इति अणि प्रकृतिभावः । अथर्वणो निश्चलात् मङ्गल-प्रदाद् वा परमेश्वराद् आगतं प्राप्तम् । **असि** । हे मनुष्य त्वं भवसि । **व्याघ्रजम्भनम्** । व्याघ्रस्वभावानां हिंसकानां शत्रूणां नाशसामर्थ्यम् ।

भाषार्थः—(याम् त्वा) जिस तुझको (गन्धर्वः) वेद विद्या धारण करने वाले पुरुष ने (मृतभ्रजे) नष्ट बल वाले (वरुणाय) उत्तम गुणयुक्त मनुष्य के लिये (अखनत्) खना है, (ताम् त्वा) उस तुझ (शेपहर्षणीम्) सामर्थ्य बढ़ाने वाली (ओषधिम्) ओषधि को (वयम्) हम (खनामसि) खनते हैं ॥१॥

भावार्थः—जिस प्रकार पूर्व ऋषियों ने मनुष्य के हित के लिये परीक्षा करके श्रेष्ठ औषधियों को प्राप्त किया है, उसी प्रकार हम उत्तम औषधियों की परीक्षा और सेवन से बलवान् होकर सुखी रहें ॥१॥

उदुषा उदु सूर्य उदिदं मामकं वचः ।
उदेजतु प्रजापतिर्वृषा शुष्मेण वाजिना ॥ २ ॥

उत् । उषाः । उत् । ऊँ इति । सूर्यः । उत् । इदम् । मामकम् ।
वचः । उत् । एजतु । प्रजाऽपतिः । वृषा । शुष्मेण । वाजिना ॥ २ ॥

भाषार्थः—(वाजिना) वेग रखने वाले (शुष्मेण) बल वा प्रभाव से (उषाः) प्रभात बेला (उत्=उदेजतु) ऊँची होवे, (उ) और (सूर्यः) सूर्य

१—याम् त्वा । यां त्वाम् ओषधिम् । **गन्धर्वः** । अ० २ । १ । २ । गां वाणीं पृथिवीं गतिं वा धरति धारयति वा सः । वेदवेत्ता पुरुषः । **अखनत्** । विदारितवान् । **वरुणाय** । अ० १ । ३ । ३ । वरेण्याय वरणीयाय जीवाय । **मृतभ्रजे** । भ्रस्ज पाके—क्विप्, सलोपः । नष्टपाकसामर्थ्याय । नष्टबलाय । **वयम्** । आयुर्वेदज्ञाः । **खनामसि** । खनामः । विदारयामः । **ओषधिम्** । अ० १ । ३० । ३ । भेषजम् । **शेपहर्षणीम्** । **वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च** (उ० ४।२०१) इत्यनेन स्वाङ्गेऽभिधेये असुन् प्रत्ययः पुट् आगमश्च । शेते येन तत् शेपः [1]सामर्थ्यम्, वीर्यम् । हृष्यतेः करणे ल्युट्, टित्वाद् ङीप् । शेपस्य वीर्यस्य वर्धनीम् ॥

२—उत् । उदेजतु । **उषाः** । **उषः क्रिच्च** (उ० ४ । २३४) इति उष दाहे बधे च, यद्वा, उछी विवासे, यद्वा, वश कान्तौ असिः । उषाः कस्मादुच्छतीति

---

१. शाखान्तरों में 'शेपो' मन्त्र पाठ है । यहाँ छान्दस सकार लोप जानें ॥सम्पा०॥

(उत्) ऊंचा चढ़े, (इदम्) यह (मामकम्) मेरा (वचः) वचन (उत्) ऊंचा होवे, (प्रजापतिः) प्रजाओं की पालन करनेवाली (वृषा) बल बढ़ाने वाली [कोई औषधि वा मूसाकन्नी औषधि विशेष] (उदेजतु) ऊंची होवे ॥२॥

भावार्थः - मनुष्य प्रभात समय उठकर ईश्वर चिन्तनादि, सूर्य के उदय होने पर जीविकादि की प्राप्ति, और आप्त पुरुषों से वेद अध्ययनादि, और बल वर्द्धक वृषा आदि औषधि सेवन से बलवृद्धि करके आनन्द भोगें ॥२॥

वृषा 'स्त्रीलिंग' औषधि के नाम अमरकोश में ये हैं—

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ।
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ॥ अम० को० २ । ५ ॥

चित्रा, उपचित्रा, न्यग्रोधी, द्रवन्ती, शम्बरी, वृषा, प्रत्यक्श्रेणी, सुतश्रेणी, रण्डा, मूषिकपर्णी, ये दस नाम मूषापर्णी के हैं ॥

यथा॑ स्म ते विरो॑ह॒तो॒ऽभित॑प्त॒मिवान॑ति ।
तत॑स्ते शुष्म॑वत्तरमि॒यं कृ॑णो॒त्वोष॑धिः ॥ ३ ॥

सत्या रात्रेरपरकालः—निरु० २ । १८ । उषा वष्टेः कान्तिकर्मण उच्छतेरितरा माध्यमिका—निरु० १२ । ५ । कल्यम् । प्रभातकालः । उ । अपि । सूर्यः । रविः । **इदम्** । मन्त्रात्मकम् । **मामकम्** । अ० १ । २९ । ५ । मदीयम् । **वचः** । वचनम् । **उदेजतु** । एजृ कम्पने । उत्कम्पयतु । उदेतु । **प्रजापतिः** । प्रजायन्ते इति प्रजाः । **उपसर्गे च संज्ञायाम्** (पा०३।२।९९) इति प्र + जनी प्रादुर्भावे—डः । प्रजानां पालयित्री । **वृषा** । अ० १ । १२ । १ । वृषु सेचने—कनिन् । यद्वा कप्रत्ययः, टाप् स्त्रियाम् । बलसेचिका । ओषधिविशेषः । तत्पर्यायाः । चित्रा । उपचित्रादयः—अमरकोशे २ । ५ । **शुष्मेण** । **अविसिविसिशुषिभ्यः कित्** । (उ० १ । १४४) इति शुष शोषणे-मन् । शुष्ममिति बलनाम शोषयतीति सतः—निरु० २ । २४ । बलेन । प्रभावेण । **वाजिना** । वज गतौ—घञ् । वाजो वेगः । अन्नम्—निघ० २ । ७ । बलम्—निघ० २ । ९ । **अत इनिठनौ** (पा० ५।२।११५) इति इनिः । वेगवता अन्नवता ॥

यथा । स्म । ते । विऽरोहतः । अभितप्तम्ऽइव । अनति ।
ततः । ते । शुष्मवत्ऽतरम् । इयम् । कृणोतु । ओषधिः ॥ ३ ॥

भाषार्थः—[हे मनुष्य] (यथा स्म) जिस प्रकार से ही (ते विरोहतः) तुझ वृद्धिशील का [मन विद्या से] (अभितप्तमिव) प्रतापयुक्त सा (अनति) चेष्टा करता है, (ततः) उस प्रकार से ही (ते=त्वाम्) तुझे (इयम् ओषधिः) यह ओषधि (शुष्मवत्तरम्) अधिक बलयुक्त (कृणोतु) करे ॥ ३ ॥

भावार्थः—जिस प्रकार विद्याभ्यास से मनुष्यों का मन बढ़ता जावे उसी प्रकार परीक्षित उत्तम उत्तम बलवर्धक वृषा आदि ओषधि और यथावत् आहार विहार से अपना शरीर बल भी बढ़ावें ॥ ३ ॥

उच्छुष्मौषधीनां सारं ऋषभाणाम् ।
सं पुंसामिन्द्र वृष्ण्यमस्मिन् धेहि तनूवशिन् ॥ ४ ॥

उत् । शुष्मा । ओषधीनाम् । सारा । ऋषभाणाम् । सम् ।
पुंसाम् । इन्द्र । वृष्ण्यम् । अस्मिन् । धेहि । तनूऽवशिन् ॥ ४ ॥

भाषार्थः—(ऋषभाणाम्) श्रेष्ठ [अथवा कांकड़ासिंगी आदि] (ओषधीनाम्) ओषधियों में से (शुष्मा) बल वाली (सारा) श्रेष्ठ [वा वृषा नाम ओषधि] (उत्=उदेजतु) उदय हो । (तनूवशिन्) हे शरीरों को वश में

३—**यथा** । येन प्रकारेण । **स्म** । खलु । **ते** । तव मनः । **विरोहतः** । रुह बीजजन्मनि प्रादुर्भावे च-शतृः । वृद्धिशीलस्य । **अभितप्तम् इव** । तप दाहैश्वर्ययोः-क्तः । प्रतापयुक्तं यथा । **अनति** । अनिति, चेष्टते । **ततः** । तेनैव प्रकारेण । **ते** । द्वितीयार्थे षष्ठी । त्वाम् । **शुष्मवत्तरम्** । अधिकबलयुक्तम् । **इयम्** । पूर्वोक्तां वृषाम् । **कृणोतु** । करोतु । **ओषधिः** । औषधम् ॥

४—**उत्** । उदेजतु-म० २ । **शुष्मा** । म० २ । बलवती । **ओषधीनाम्** । वीरुधां मध्ये । **सारा** । सृ-घञ्, टाप् । श्रेष्ठा । यद्वा । सृ णिच्-अच्, टाप् दूर्वा । शातला—यथा । शातला सप्तला सारा विमला विदुला च सा । तथा

रखने वाले (इन्द्र) बड़े ऐश्वर्य वाले सद्वैद्य ! (पुंसाम्) रक्षाशील पुरुषों के मध्य (वृष्ण्यम्) बल (अस्मिन्) इस मनुष्य में (संधेहि) यथावत् धारण कर दे ॥४॥

भावार्थः—सद्वैद्य प्रयत्न करें कि उत्तम सारवती बलवर्धक [वृषा आदि] औषधियों के सेवन से मनुष्य ऐसे वीर्यवान् हों कि शूरवीरों के मध्य उनके बल की प्रशंसा होवे ॥४॥

'ऋषभ' और 'सारा' श्रेष्ठ वाचक हैं और औषधि विशेष भी हैं ॥

अपां रसः प्रथमजोऽथो वनस्पतीनाम् ।
उत सोमस्य भ्रातास्युतार्शमसि वृष्ण्यम् ॥ ५ ॥

अपाम् । रसः । प्रथमऽजः । अथो इति । वनस्पतीनाम् । उत । सोमस्य । भ्राता । असि । उत । आर्शम् । असि । वृष्ण्यम् ॥ ५॥

भाषार्थः—[हे औषध !] तू (अपाम्) व्यापन शील जलों का (अथो) और भी (वनस्पतीनाम्) अपने सेवा करने वालों के पालक वृक्षों का (प्रथमजः) प्रथम उत्पन्न होने वाला (रसः) रस, (उत) और (सोमस्य) अमृत का

निगदिता भूरिरेफा चर्मकषेत्यपि इति शब्दकल्पद्रुमः । **ऋषभाणाम्** । अ० ३ । २३ । ४ । ऋषी गतौ—अभच् । टाप् । श्रेष्ठानाम् । ऋषभौषधादिरसानाम् । **सार ऋषभाणाम्** । **ऋत्यकः** (पा० ६ । १ । १२८) इति प्रकृतिभावः । **पुंसाम्** । अ० १ । ८ । १ । पा रक्षणे—डुमसुन् । रक्षणशीलानां पुरुषाणां मध्ये । **इन्द्र** । परमैश्वर्यवन् सद्वैद्य । **वृष्ण्यम्** । **खलयवमाषतिलवृषब्रह्मणश्च** (पा० ५ । १ । ७) इति वृषन्—यत् । वृष्णे—इन्द्राय जीवाय हितं बलम् । वीर्यम् । **अस्मिन्** । पुरुषे । **संधेहि** । सम्यग् धारय । **तनूवशिन्** । अ० १ । ७ । २ । तनूनां शरीराणां वशयितः ॥

५—अपाम् । व्यापनशीलानां जलानाम् । **रसः** । सारः । **प्रथमजः** प्रथमं जातः प्रादुर्भूतः । **अथो** । अपि च । **वनस्पतीनाम्** । अ० १ । १२ । ३ वनानां सेवकानां पतीनां पालकानां वृक्षाणाम् । **उत** । अपि । **सोमस्य** । अमृत

ऐश्वर्य का (भ्राता) प्रकाशक वा धारक और पोषक (असि) है, (उत) और (आर्शम्) शूरों का हितकारक (वृष्ण्यम्) वल (असि) है ॥ ५ ॥

भावार्थः—उत्तम जल और उत्तम वृक्षों और अन्न आदिकों के यथावत् सेवन से मनुष्य ऐश्वर्यवान् और वलवान् होते हैं ॥ ५ ॥

अ॒द्याग्ने॑ अ॒द्य स॑वितर॒द्य दे॑वि सरस्वति ।
अ॒द्यास्य ब्र॑ह्मणस्पते॒ धनु॑रि॒वा ता॑नया॒ पसः॑ ॥ ६ ॥

अ॒द्य । अग्ने॒ । अ॒द्य । स॒वि॒त॒रिति॑ । अ॒द्य । दे॒वि॒ । स॒र॒स्व॒ति॒ । अ॒द्य । अ॒स्य । ब्र॒ह्म॒णः । प॒ते॒ । धनुः॑ऽइव । आ । ता॒न॒य॒ । पसः॑ ॥ ६ ॥

भाषार्थः—(अद्य) आज (अग्ने) हे भौतिक अग्नि ! (अद्य) आज (सवितः) हे लोकप्रेरक सूर्य ! (अद्य) आज (देवि) दिव्य गुण वाली (सरस्वति) विज्ञानवति विद्या ! (अद्य) आज (ब्रह्मणस्पते) हे अन्न, वा धन, वा वेद, वा ब्राह्मण के रक्षक परमेश्वर ! (अस्य) इसके (पसः) राज्य को (धनुः इव) धनुष के समान (आ) भले प्रकार (तानय) फैला ॥ ६ ॥

स्य । ऐश्वर्यस्य । **भ्राता** । अ० १ । १४ । २ । भ्राजृ दीप्तौ-तृन् । प्रकाशकः अथवा । डुभृञ् धारणपोषणयोः—तृन् । अन्योऽन्यभरणशीलः । भ्राता भरतेर्हरतिकर्मणो हरतेर्भागं भर्त्तव्यो भवतीति वा-निरु० ४ । २६ । भ्रातृसमानगुणः । **असि** । भवसि । **आर्शम्** । **इगुपधज्ञा०** (पा० ३ । १ । १३५) इति ऋश हिंसायाम्—कः । सौत्रो धातुः । ऋशति शीर्यते हिनस्ति शत्रूनिति ऋशः शूरः । **तस्मै हितम्** (पा० ५ । १ । ५) इति अण् । ऋशाय शूराय हितम् । **वृष्ण्यम्** । म० ४ । वलम् ॥

६—**अद्य** । वर्तमानदिने । **अग्ने** । भौतिकाग्ने । **सवितः** । हे लोकप्रेरक सूर्य । **देवि** । हे दिव्यगुणे । **सरस्वति** । **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति सृ गतौ—असुन् । मतुप्, मस्य वः, ङीप् । सरो नीरं विज्ञानं वा विद्यतेऽस्यां सा सरस्वती । वाक्—निघ० १ । ११ । सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति-निरु०२।२३ । हे विज्ञानवति विद्ये । **अस्य** । शूरपुरुषस्य । **ब्रह्मणस्पते** ।

भावार्थः—मनुष्य यथावत् औषधि सेवन से अपना शारीरिक और मानसिक बल बढ़ाकर अग्नि, सूर्य आदि पदार्थों और अनेक उत्तम विद्याओं से नित्य उपकार करता हुआ, ईश्वर के आश्रय से अन्न आदि प्राप्त करके अपना राज्य और सुख फैलावे, जैसे धनुष को लक्ष्य के लिये दृढ़ तानते हैं ॥६॥

आहं तंनोमि ते पसो अधि ज्यामिव धन्वनि ।
क्रमस्वर्श इव रोहितमनवग्लायता सदा ॥ ७ ॥

आ । अहम् । तनोमि । ते । पसः । अधि । ज्याम्ऽइव । धन्वनि ।
क्रमस्व । ऋशःऽइव । रोहितम् । अनवऽग्लायता । सदा ॥ ७ ॥

भाषार्थः—(अहम्) मैं [हे मनुष्य !] (ते) तेरे (पसः) राज्य को (आ) यथावत् (तनोमि) फैलाता हूं (ज्याम् इव) जैसे डोरी को (धन्वनि अधि) धनुष में। (अनवग्लायता) बिना ग्लानि वा थकावट के (सदा) सदा [शत्रुओं पर] (क्रमस्व) धावा कर, (ऋश:इव) जैसे हिंसकजन्तु, सिंह आदि (रोहितम्) हरिण पर ॥७॥

अ० १ । २९ । २ । ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा । ब्रह्म, अन्नम् निघ० २ । ७ । धनम्—निघ० २ । १० । हे ब्रह्मणोऽन्नस्य, धनस्य, वेदस्य विप्रस्य वा पालक परमेश्वर । **धनुरिव** । **अर्त्तिपृवपियजि०** (उ० २ । ११७) इति धन धान्ये—उसिः । चापं यथा । **आ** । समन्तात् । **तानय** । तनु विस्तारे-णिच् विस्तारय । **पसः** । **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति पस बन्धे[1] बाधे च असुन् । राज्यप्रबन्धम् । राष्ट्रम्-इति दयानन्दभाष्ये, यजु० २३ । २२ ॥

७—आ । समन्तात् । **अहम्** । नीतिज्ञः । **तनोमि** । विस्तारयामि । **ते** तव । **पसः** । म० ६ । राष्ट्रम् । **अधि** । सप्तम्यर्थानुवादी । **ज्यामिव** । मौर्वीमिव **धन्वनि** । **कनिन् युवृषितक्षिराजिधन्वि०** (उ० १ । १५६) इति धवि गतौ कनिन् । धनुषि । **क्रमस्व** । **वृत्तिसर्गतायनेषु क्रमः** (पा० १ । ३ । ३८) इति आत्मनेपदम् । आक्रमस्व । **ऋशः** । **इगुपधज्ञा०** (पा० ३ । १ । १३५) इति ऋश

---

१. पस दन्त्य सकारान्त धातु का बन्धे बाधे अर्थ वाचस्पत्यम् आदि कोषों के अनुसार दर्शाया गया है । क्षीरतरंगिणी आदि में तो कहीं यह अर्थ नहीं है । पस का राष्ट्रम् अर्थ श.ब्रा. १३।२।९।६ में आया है ॥ सम्पा० ॥

२. इदितो नुम्धातोः (पा० ७ । १ । ५८) से यहां नुम् होकर 'धन्व' बना है ॥ सम्पा० ॥

भावार्थः—जैसे लक्ष्य वेधने के लिये धनुष में डोरी को दृढ़ कसते हैं, वैसे ही बलवान् पुरुष राज्य प्रवन्ध को प्रजा के सुख के लिये यथाशास्त्र दृढ़ रक्खे, और जैसे सिंह आदि हरिण आदि को दबोच लेते हैं, वैसे ही शत्रुओं पर धावा करके कुरीतियों को मिटावे ॥७॥

अश्वस्याश्वतरस्याजस्य पेत्वस्य च ।
अथ ऋषभस्य ये वाजास्तानस्मिन् धेहि तनूवशिन् ॥ ८ ॥

अश्वस्य । अश्वतरस्य । अजस्य । पेत्वस्य । च । अथ । ऋषभस्य । ये । वाजाः । तान् । अस्मिन् । धेहि । तनूऽवशिन् ॥ ८ ॥

भाषार्थः—(अश्वस्य) घोड़े के, (अश्वतरस्य) खच्चर के, (अजस्य) बकरे के, (च) और (पेत्वस्य) मेढ़े के, (अथ) और भी (ऋषभस्य) बलीवर्द के (ये वाजाः) जो बल हैं, (तान्) उनको, (तनूवशिन्) हे शरीरों को वश में रखने वाले शूर ! (अस्मिन्) इस पुरुष में (धेहि) धारण कर ॥ ८ ॥

हिंसायाम्[१]—कः । ऋशति शीर्यते हिनस्ति शत्रूनिति ऋशः । शूरो हिंसको जन्तुर्वा । रोहितम् । **हसृरुहियुषिभ्य इतिः** (उ० १ । ९७) इति रुह प्रादुर्भावे–इतिः । मृगं हरिणम्—यथा- शार्दूलाय रोहित् । य० २४ । ३० एको रोहिद् ऋश्यः शार्दूलाय—इति तद्भाष्ये महीधरः । शार्दूलाय महासिंहाय रोहित् रक्तगुणविशिष्टो मृगः—इति तत्रैव दयानन्दभाष्ये । **अनवग्लायता । संश्चत्तृपद्वेहत्** (उ० २ । ८५) इति अन्+अव+ग्लै हर्षक्षये–अतिप्रत्ययः, स च शतृवत्, अहर्षक्षयेण । अग्लानेन । आनन्देन । **सदा** । सर्वदा ॥

८—**अश्वस्य** । अ० १ । १६ । ४ । अश्वःकस्मादश्नुतेऽध्वानं महाशनो भवतीति वा–निरु० २ । २७ । घोटस्य । **अश्वतरस्य** । **वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे** (पा० ५ । ३ । ९१) इति अश्व-ष्टरच्, तनुत्वे । अश्वायां गर्दभेन जातस्य पशुविशेषस्य वेशरस्य । खच्चर इति भाषायाम् । **अजस्य** । अज गतिक्षेपणयोः— अच् । छागस्य । **पेत्वस्य** । **अन्येऽपि दृश्यन्ते** (उ०४।१०५) इति पा पाने, वा पत्लृ

---

१. यह धातु धातुपाठादि में कहीं नहीं है। इसको वाचस्पत्यम् में सौत्र धातु माना है। पर यह सूत्र पठित भी नहीं है ॥ सम्पा० ॥

भावार्थः—शूरवीर पुरुष अश्व आदि उपकारी पशुओं को पालकर खेती, वाणिज्य, सेना आदि के यथायोग्य कामों में लगाकर संसार में सुख बढ़ावें ॥ ८ ॥

सूक्तम् ५ ॥

१--७ ॥ इन्द्रो देवता । १--६ अनुष्टुप्, ७ पथ्या पङ्क्तिः ॥

प्रजास्वापनार्थं गीतम्—बच्चों के सुलाने का गीत अर्थात् लोरी ।

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥ १ ॥

सहस्रऽशृङ्गः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् ।
तेन । सहस्येन । वयम् । नि । जनान् । स्वापयामसि ॥ १ ॥

भाषार्थः—(यः) जो (वृषभः) सुख बरसाने वाला (सहस्रशृङ्गः) सहस्रों तेज अर्थात् नक्षत्रों वाला चन्द्रमा [अथवा सहस्रों किरणों वाला सूर्य] (समुद्रात्) आकाश से (उदाचरत्) उदय हुआ है, (तेन) उस (सहस्येन) बल के लिये हितकारक [चन्द्रमा] से (वयम्) हम लोग (जनान्) सब जनों को (नि स्वापयामसि) सुला दें ॥ १ ॥

गतौ—त्वन्, पृषोदरादिरूपम् । पेत्वः पतनशीलो वेगवान् पशुः—इति महीधरो यजुर्वेदभाष्ये—२९ । ५८ । मेषस्य । **अथ** । अपि च । **ऋषभस्य** । **ऋषिवृषिभ्यां कित्** (उ० ३ । १२३) इति ऋषी गतौ-अभच् । बलीवर्दस्य । **वाजाः** । बलानि । अन्यत् सुगमं व्याख्यातं च म० ४ ॥

१—**सहस्रशृङ्गः** । सहो बलम्—निघ० २ । ९ । रो मत्वर्थे । सहस्र बहुनाम—निघ० ३ । १ । **शृणातेर्ह्रस्वश्च** (उ० १ । १२६) इति शॄ हिंसायाम्—गन्, स च कित्, नुडागमः । शृङ्गाणि ज्वलतो नामसु—निघ० १ । १७ । शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा निरु० २ । ७ । सहस्राणि बहूनि शृङ्गाणि तेजांसि नक्षत्राणि किरणा वा यस्य स

भावार्थः--माता पिता आदि बच्चों को चन्द्रमा के दर्शन कराते हुये सुलावें, जिससे उनके शरीर की पुष्टि और नेत्रों की ज्योति बढ़े [(सहस्रशृङ्गः) का अर्थ सूर्य भी है, अर्थात् सूर्य का प्रकाश आने से यह घर स्वास्थ्यकारक है। हम सब सोवें] ॥१॥

इस सूक्त के चार मन्त्र कुछ भेद से ऋग्वेद म० ७। सू० ५५ के हैं जिनका इन्द्र देवता है, इससे यहां भी सूक्त का इन्द्र ही देवता है। यह मन्त्र उक्त सूक्त का मन्त्र ७ है॥

न भूमिं वातो अति वाति नाति पश्यति कश्चन।
स्त्रियश्च सर्वाः स्वापय शुनश्चेन्द्रसखा चरन्॥ २॥

न। भूमिम्। वातः। अति। वाति। न। अति। पश्यति। कः। चन। स्त्रियः। च। सर्वाः। स्वापय। शुनः। च। इन्द्रऽसखा। चरन्। २॥

भाषार्थः--(न) न (वातः) पवन (भूमिम्) भूमि पर (अति) अत्यन्त (वाति) चलता है, और (न) न (कश्चन) कोई जन (अति) ऊपर से (पश्यति) देखता है [हे पवन !] (इन्द्रसखा) इन्द्र अर्थात् जीवात्मा को अपना सखा

बहुतेजाः। असंख्यातनक्षत्रः। चन्द्रः। सूर्यः। **वृषभः।** **ऋषिवृषिभ्यां कित्** (उ० ३। १२३) इति वृषु सेचने-अभच्। यद्वा, वृह वृद्धौ-अभच्, हस्य षकारः। वृषभः प्रजां वर्षतीति वाति वृहति रेत इति वा तद् वृषकर्मा वर्षणाद् वृषभः--निरु० ९। २२। किरणद्वारा सुखस्य वर्षकः। **यः।** **समुद्रात्।** अ० १। ३। ८। अन्तरिक्षात्--निघ० १। ३। **उत्+आ+अचरत्।** उदागात्। **तेन।** प्रसिद्धेन। तादृशेन। **सहस्येन।** **तस्मै हितम्** (पा० ५। १। ५) इति सहस्--यत्। सहसे बलाय हितेन, चन्द्रेण। **वयम्।** **नि।** नित्यम् सर्वथा। **जनान्।** गृहस्थप्राणिनः। **स्वापयामसि।** स्वापयामः। निद्रापयामः॥

२--**न।** निषेधे। **भूमिम्।** पृथिवीम्। **वातः।** अ० १। ११। ६। पवनः। **अति।** अतिशयेन। **वाति।** गच्छति। **पश्यति।** प्रेक्षते। **कश्चन।** कोऽपि-जनः। **स्त्रियः।** अ० १। ८। १। स्त्यायति स्तौति वा गुणान् स्तूयते वा सा

रखने वाला तू, (चरन्) चलता हुआ, (सर्वाः स्त्रियः) सब स्त्रियों (च) और (शुनः) कुत्तों को (च) भी (स्वापय) सुला दे ॥२॥

भावार्थः—मनुष्य प्रयत्न करे कि रात्रि को सोते समय तीव्र वायु वा अन्य किसी तुच्छ कारण से निद्रा भंग न हो और न बाहिरी पुरुष गुप्त बातें सुने ॥२॥

प्रोष्ठेशयास्तल्पेशया नारीर्या वह्यशीवरीः ।
स्त्रियो याः पुण्यगन्धयस्ताः सर्वाः स्वापयामसि ॥ ३ ॥

प्रोष्ठेऽशयाः । तल्पेऽशयाः । नारीः । याः । वह्यऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगन्धयः । ताः । सर्वाः । स्वापयामसि ॥ ३ ॥

भाषार्थः—(प्रोष्ठेशयाः[1]) बड़े घर वा बड़े आंगन में सोने वाली, (तल्पेशयाः) खाटों पर सोने वाली, और (वह्यशीवरीः—०-र्यः) हिंडोला आदि में सोने वाली (याः) जो (नारीः=नार्यः) नारियाँ हैं, और (याः) जो (स्त्रियः) स्त्रियाँ (पुण्यगन्धयः) पुण्य गति वाली हैं, (ताः सर्वाः) उन सबको (स्वापयामसि=०-मः) हम सुलाते हैं ॥३॥

स्त्री । नारीः । **सर्वाः । स्वापय ।** निद्रापय । **शुनः । श्वन्नुक्षन्पूषन्०** (उ० १ । १५९) इति टुओश्वि गतिवृद्ध्योः—कनिन् । श्वयतीति श्वा । कुक्कुरान् । **च । इन्द्रसखा । इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्ट०** (पा० ५ । २ । ९३) इति इन्द्र आत्मा । "इन्द्रः आत्मा । स सखा यस्य प्राणवायोस्तदात्मकः"—इति सायणः । आत्मप्रियः । वातः । **चरन् ।** देहे वर्तमानः ॥

३—**प्रोष्ठेशयाः । उषिकुषिगार्त्तिभ्यस्थन्** (उ० २ । ४) इति उष दाहे—थन् इति ओष्ठः । **एङि पररूपम्** (पा० ६ । १ । ९४) अत्र वार्त्तिकम् । **ओत्वोष्ठयोः समासे वा ।** इति पररूपम् । **अधिकरणे शेतेः** (पा० ३ । २ । १५) इति प्रोष्ठे + शीङ् स्वप्ने अच् । **शयवासवासिष्वकालात्** (पा० ६ । ३ । १८) इति सप्तम्या अलुक् । प्रोष्ठे अतिशयेन प्रौढे गृहे प्राङ्गणे वा शयानाः । **तल्पेशयाः । खष्पशिल्पशष्प०** (उ० ३ । २८) इति तल प्रतिष्ठायाम्—प प्रत्ययः । शेषे पूर्ववत् सिद्धिः । खट्वासु शयानाः । **नारीः ।** नार्यः । **वह्यशीवरीः । वह्यं करणम्** (पा० ३ । १ । १०२) इति वह प्रापणे - यत् । **अन्येभ्योऽपि दृश्यन्ते** (पा०३ ।२ ।

---

१. द्र० ऋ० ७ । ५५ । ८ ॥ सम्पा० ॥

भावार्थः— गृहस्थ लोग स्त्रियों के रहने के घर ऐसे उत्तम बनावें जिससे रात्रि को वे सुखपूर्वक सोया करें ॥ ३ ॥

यह मन्त्र कुछ भेद से ऋ० ७ । ५५ । ८ में है ॥

एजदेजदजग्रभं चक्षुः प्राणमजग्रभम् ।
अङ्गान्यजग्रभं सर्वा रात्रीणामतिशर्वरे ॥ ४ ॥

एजत्ऽएजत् । अजग्रभम् । चक्षुः । प्राणम् । अजग्रभम् ।
अङ्गानि । अजग्रभम् । सर्वा । रात्रीणाम् । अतिऽशर्वरे ॥ ४ ॥

भाषार्थः—(एजदेजत्) इधर उधर पड़ी हुई प्रत्येक वस्तु को (अजग्रभम्) मैंने संग्रह करलिया है, (चक्षुः) नेत्र और (प्राणम्) प्राण मार्ग [नासिका] को (अजग्रभम्) मैंने ग्रहण कर लिया है, और (रात्रीणाम्) रात्रियों के मध्य (अतिशर्वरे) अत्यन्त अन्धकार में (सर्वा = सर्वाणि) सब (अङ्गानि) अंगों को (अजग्रभम्) मैंने थाम लिया है ॥४॥

भावार्थः मनुष्य इन्द्रिय निग्रह करके शान्त चित्त होकर रात्रि में सोवें ॥४॥

---

७५) इति वह्य + शीङ्—क्वनिप् । **वनो र च** (पा०४।१।७) इति ङीब्रेफौ । **वा छन्दसि** (पा० ६ । १ । १०६) इति जसि पूर्वसवर्णदीर्घः । वह्ये वहनसाधने आन्दोलिकादौ शयनस्वभावाः । **पुण्यगन्धयः** । **पूञो यण् णुग्घ्रस्वश्च** । (उ० ५ । १५) इति पूञ् पवने-यत्, णुक् ह्रस्वश्च । **सर्वधातुभ्य इन्** (उ० ४ ।११८) इति गन्ध गतिहिंसायाचनेषु[1]–इन् । पुण्यं पवित्रं गन्धिगमनं यासां ताः पवित्रगतयः । अन्यद् गतम् ॥

४ - **एजदेजत्** । एजृ कम्पने - शतृ । इतस्ततः पतत् प्रत्येकं वस्तु । **अजग्रभम्** । ग्रह उपादाने—लङ् । हस्य भत्वम् । अहं संगृहीतवानस्मि । **चक्षुः** । दर्शनसाधनं नेत्रम् । **प्राणम्** । प्राणसंचारमार्गं घ्राणम् । **अजग्रभम्** । निद्रया सह गृहीतवानस्मि । **अङ्गानि** । हस्तपादादीनि । **अजग्रभम्** । **सर्वा** । सर्वाणि । **रात्रीणाम्** । रात्रीणां मध्ये । **अतिशर्वरे** । **कॄगॄशॄवॄञ्चतिभ्यः ष्वरच्** (उ०२ । १२१) इति शॄ हिंसायाम्–ष्वरच् । शर्वरं तमः । अत्यन्ततमसि ॥

---

१. धातुवृत्ति आदि में 'गन्ध अर्दने' धातु पठित है । सो अर्द गतौ याचने च (भ्वा०) अर्द हिंसायाम् (चुरा०) ये धातुयें पठित होने से अर्दन के गति, हिंसा एवं याचन ये तीन अर्थ होकर गन्ध धातु के भी ये तीन अर्थ दिखाये हैं, ऐसा जानना चाहिये । इस विषय में (काशि० १।३।३२) भी देखें ॥ सम्पा० ॥

य आस्ते यश्चरति यश्च तिष्ठन् विपश्यति ।
तेषां सं दध्मो अक्षीणि यथेदं हर्म्यं तथा ॥ ५ ॥

यः । आस्ते । यः । चरति । यः । च । तिष्ठन् । विऽपश्यति ।
तेषाम् । सम् । दध्मः । अक्षीणि । यथा । इदम् । हर्म्यम् । तथा ॥ ५ ॥

भाषार्थः—(यः) जो कोई (आस्ते) बैठता है, (यः) जो (चरति) चलता है, (च) और (यः) जो (तिष्ठन्) खड़े होकर (विपश्यति) विविध प्रकार से देखता है, (तेषाम्) उनकी (अक्षीणि) आंखों को (तथा) उस प्रकार से (संदध्मः) हम मूंदते हैं, (यथा) जैसे (इदम्) इस (हर्म्यम्) हर्म्य [धनियों के मनोहर घर] को ॥५॥

भावार्थः—जैसे धनिक लोगों के घर सुरक्षित होते हैं, जिन्हें बन्ध करके सुख पूर्वक वे सोते हैं वैसे ही घर सब गृहस्थ बनावें, जिनमें निर्भय होकर रात्रि को आनन्द से सोवें ॥५॥

यह मन्त्र कुछ भेद से ऋग्वेद म० ७ । ५५ । ६ । में है ॥

स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विश्पतिः ।
स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः ॥ ६ ॥

स्वप्तु । माता । स्वप्तु । पिता । स्वप्तु । श्वा । स्वप्तु । विश्पतिः ।
स्वपन्तु । अस्यै । ज्ञातयः । स्वप्तु । अयम् । अभितः । जनः ॥ ६ ॥

५—**यः, आस्ते** । उपविशति । **यः** । **चरति** । संचरति । **यः च** । **तिष्ठन्** । स्थितः सन् । **विपश्यति** । विविधम् इतस्ततः पश्यति । **तेषाम्** । **संदध्मः** । संहितानि निमीलितानि अदर्शकानि कुर्मः । **अक्षीणि** । चक्षूंषि । **यथा** । येन प्रकारेण । **इदम्** । दृश्यमानम् । **हर्म्यम्** । अघ्न्यादयश्च (उ० ४ । ११२) इति हृञ् हरणे-यक्, मुट् च । हरति मनांसि । धनिनां वासम् । मनोहरं गृहम् । **तथा** । तेन प्रकारेण ।

भाषार्थः—(अस्यै) इस [सन्तति, पुत्री वा पुत्र के हित] के लिये (माता) माता (स्वप्तु) सोवे, (पिता) पिता (स्वप्तु) सोवे, (श्वा) कुत्ता (स्वप्तु) सोवे, (विश्पतिः) प्रजापालक गृहपति (स्वप्तु) सोवे। (ज्ञातयः) ज्ञाति के लोग (स्वपन्तु) सोवें, और (अयम्) यह (जनः) सब जने (अभितः) चारों ओर (स्वप्तु) सोवें ॥६॥

भावार्थः—अव रात्रि में सब लोग चुप चाप सो जावें खलबल न मचावें जिससे यह बालक सुख पूर्वक सो जावे ॥६॥

यह मन्त्र कुछ भेद से ऋग्वेद ७। ५५। ५ में है ॥

स्वप्नं स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम्। ओत्सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहमिन्द्र इवारिष्टो अक्षितः ॥७॥

स्वप्न। स्वप्नऽअभिकरणेन। सर्वम्। नि। स्वापय। जनम्। आऽउत्सूर्यम्। अन्यान्। स्वापय। आऽव्युषम्। जागृतात्। अहम्। इन्द्रःऽइव। अरिष्टः। अक्षितः ॥ ७ ॥

भाषार्थः—(स्वप्न) हे निद्रा ! (स्वप्नाभिकरणेन) नींद के उपाय वा साधन से (सर्वं जनम्) सब जनों को (नि, स्वापय) सुलादे। (अन्यान्) दूसरे

६—**स्वप्तु**। ञिष्वप् शये। इडभावश्छान्दसः। स्वपितु। निद्रातु। **माता**। जननी। **पिता**; जनकः। **श्वा**। म० २। गमनशीलः। वृद्धिशीलः। कुक्कुरः। **विश्पतिः**। विशां प्रजानां पालको गृही। गृहाधिपतिः। **स्वपन्तु**। निद्रान्तु। **अस्यै**। दृश्यमानायै प्रजायै सन्तत्यै। कन्यायाः पुत्रस्य वा हिताय। **ज्ञातयः**। **क्तिच्क्तौ च संज्ञायाम्** (पा० ३। ३। १७४) इति ज्ञा अवबोधने-क्तिच्। जानाति कुलस्थितिं स ज्ञातिः। एककुलोत्पन्नाः पितृव्यादयः। बान्धवाः। सम्बन्धिनः। **अभितः**। परितः स्थितः। **जनः**। लोकः, मनुष्यसमूहः॥

७—**स्वप्न**। ञिष्वप् शये **स्वपो नन्** (पा० ३। ३। ९१) इति नन्। हे निद्रे। **स्वप्नाभिकरणेन**। निद्राजनकेन साधनेन कर्मणा द्रव्येण वा। **सर्वम्**।

पुरुषों को (ओत्सूर्यम्) सूर्य उदय तक (स्वापय) सुला, (अहम्) मैं (इन्द्रः इव) प्रतापी मनुष्य के समान (अरिष्टः) नाश रहित और (अक्षितः) हानि रहित (आव्युषम्) प्रभात तक (जागृतात्=जागराणि) जागरण करूँ ॥ ७ ॥

भावार्थः---घर के अन्य सब स्त्री पुरुष अपने अपने स्थानों पर सो जावें और गृहपति यथावत् जागकर सावधानी रक्खे ॥ ७ ॥

इति प्रथमोऽनुवाकः ॥

अथ द्वितीयोऽनुवाकः

सूक्तम् ६ ॥

१-८ ॥ विषं देवता । १, ३—८ अनुष्टुप्, २ यावतीति त्रिष्टुप्, वाचमित्यनुष्टुप् ॥

विषनिवारणायोपदेशः—विष दूर करने के लिये उपदेश ॥

ब्राह्मणो जज्ञे प्रथमो दशशीर्षो दशास्यः ।
स सोमं प्रथमः पपौ स चकारारसं विषम् ॥ १ ॥

ब्राह्मणः । जज्ञे । प्रथमः । दशऽशीर्षः । दशऽआस्यः । सः ।
सोमम् । प्रथमः । पपौ । सः । चकार । अरसम् । विषम् ॥ १ ॥

सकलम् । **नि स्वापय** । सर्वथा निद्रापय । **जनम्** । मनुष्यसमूहम् । **ओत्सूर्यम्** । उद्यन् सूर्य्यो यस्मिन् काले स उत्सूर्यः कालः । सूर्योदयपर्यन्तम् । **अन्यान्** । इतरान् मनुष्यान् । **आव्युषम्** । उष दाहे-कः, वा टाप् । उषः, उषा वा रात्रिशेषः । उषः कालावधि । रात्र्यवसानपर्यन्तम् । **जागृतात्** । जागृ निद्राक्षये लोट्, उत्तम-पुरुषस्य छन्दसि प्रथमपुरुषः । अहं जागराणि । जागृतो भवानि । **अहम्** । गृहपतिः । **इन्द्रः इव** । प्रतापी पुरुषो यथा । **अरिष्टः** । अहिंसितः । **अक्षितः** । क्षयरहितः ॥

भाषार्थः—(प्रथमः) सब वर्णों में प्रधान, (दशशीर्षः) दस प्रकार के [१—दान, २—शील, ३—क्षमा, ४—वीर्य, ५—ध्यान, ६—बुद्धि, ७—सेना, ८—उपाय, ९—गुप्त दूत, और १०—ज्ञान] बलों में शिर रखने वाला और (दशास्यः) दस दिशाओं में मुख के समान पोषण शक्ति वाला वा दस दिशाओं में स्थिति वाला (ब्राह्मणः) ब्राह्मण अर्थात् वेदवेत्ता पुरुष (जज्ञे) उत्पन्न हुआ। (सः प्रथमः) उस प्रधान पुरुष ने (सोमम्) सोम नाम ओषधि का रस (पपौ) पिया, और (सः) उसने (विषम्) विष को (अरसम्) निर्गुण कर दिया ॥ १ ॥

भावार्थः—जैसे वेदवेत्ता सद्वैद्यों ने पूर्ण विद्या प्राप्त करके सब दिशाओं में खोजकर संसार के उपकार के लिये सोम रस को पाया और आरोग्यनाशक और शरीरविकारक विष को हटाया है, हम लोग उसीप्रकार सोमलता आदि औषधों की प्राप्ति और परीक्षा करके संसार का कष्ट मिटाकर सबको सुख पहुंचावें और ब्राह्मण अर्थात् वेदवेत्ता होकर अगुआ बनें ॥ १ ॥

सोम का विशेष वर्णन ऋग्वेद मण्डल ९, और सामवेद उत्तरार्चिक प्रपाठक १ आदि में है, यहां दो मन्त्र लिखते हैं।

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया।
इन्द्राय पातवे सुतः ॥ १ ॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहतम्।
द्रुणा सधस्थमासदत् ॥ २ ॥

ऋग्वेद ९।१।१, २॥ यजु० २६।२५, २६॥ साम उत्तरा० प्र० १ अ० १ त्रिक १५॥

(सोम) हे सोम रस (स्वादिष्ठया) बड़ी स्वादिष्ट और (मदिष्ठया) अति आनन्द कारक (धारया) धारा से (इन्द्राय) बड़े प्रतापी इन्द्र, पुरुष के लिये (पातवे) पीने को (सुतः) छनकर (पवस्व) शुद्ध हो ॥ १ ॥

१—**ब्राह्मणः**। **तदधीते तद्वेद** (पा० ४।२।५९) इति ब्रह्मन्—अण्। **ब्राह्मोऽजातौ** (पा०।६।४।१७१) इति अपत्ये जातौ टिलोपः न भवति। वेदपाठी। वेदवेत्ता पुरुषः। **जज्ञे**। जनी—लिट्। प्रादुर्बभूव। **प्रथमः**। सर्ववर्णेषु प्रधानः। अग्रिमः। **दशशीर्षः**। **श्रयतेः स्वाङ्गे शिरः क्रिच्च** (उ० ४।१९४) श्रिञ् सेवायाम्—असुन्, शिरादेशः। पृषोदरादित्वात् शिरः शब्दस्य शीर्षं वा आदेशः। उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्,

(रक्षोहा) रोगादि दुष्ट राक्षसों के नाश करने वाले (विश्वचर्षणिः) सब मनुष्यों के हितकारक उस [सोम] ने (अयोहतम्) सुवर्ण से बने हुये (सधस्थम्) एक साथ ठहरने योग्य (योनिम्) स्थान (द्रुणा=द्रोणे) द्रोण कलश में (अभि) व्याप कर (आ असदत्) पाया है ॥ २ ॥

सोम का वृत्तांत सुश्रुत चरक आदि वैद्यक ग्रन्थों में सविस्तार है वहां देख लेवें ॥

यावंती द्यावापृथिवी वरिम्णा यावंत् सप्त सिंधवो वितष्ठिरे ।
वाचं विषस्य दूषणीं तामितो निरवादिषम् ॥ २ ॥

यावंती इति । द्यावापृथिवी इति । वरिम्णा । यावंत् । सप्त । सिंधवः । विऽतस्थिरे । वाचम् । विषस्य । दूषणीम् । ताम् । इतः । निः । अवादिषम् ॥२॥

भाषार्थः—(द्यावापृथिवी = ० – व्यौ) सूर्य और पृथिवी लोक (वरिम्णा)

इत्यमरः, (का० २, व० ६, श्लो० ९४) दानशीलक्षमावीर्य्यध्यानप्रज्ञा बलानि च । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि च । इति शब्दकल्पद्रुमवचनाद् दशसु बलेषु शीर्षं शिरोबलं यस्य स तथाभूतः पुरुषः । **दशास्यः । ऋहलोर्ण्यत्** (पा०३।१।१२४) इति असु क्षेपणे-ण्यत् । अस्यतेऽन्नमस्मिन्निति आस्यं मुखम् । यद्वा । आस उपवेशने-ण्यत्, टाप् । आस्या स्थितिः, आसनम् । दशसु दिक्षु आस्यं मुखवत् पोषणं यस्य । यद्वा । दशसु दिक्षु आस्या स्थितिर्यस्य स तथाभूतः । **सः** । ब्राह्मणः । **सोमम्** । अ० १ । ६ । २ । सोमलतारसम् । औषधिः सोमः सुनोतेर्यदेनमभिषुण्वन्ति । बहुलमस्य नैघण्टुकं वृत्तमाश्चर्य्यमिव प्राधान्येन— निरु० ११ । २ । **प्रथमः** । प्रधानः । **पपौ** । पीतवान् । **चकार** । कृतवान् । **अरसम्** । रसरहितं निर्वीर्यम् । **विषम्** । विष विप्रयोगे, यद्वा, विष्लृ व्याप्तौ—कः । विषमित्युदक-नाम, विष्णातेर्विपूर्वस्य स्नातेः शुद्धयर्थस्य विपूर्वस्य वा सचतेः—निरु० १२।२६। आरोग्यस्य शरीरस्य वा नाशकं द्रव्यम् ॥

२—**यावती** । **यत्तदेतेभ्यः परिमाणे वतुप्** (पा० ५ । २ । ३९) इति यत्—

ने विस्तार से (यावती = ०—त्यौ) जितने हैं, और (सप्त) जीव से मिली वा गमन शील, वा सात (सिन्धवः) बहने वाली नदी रूप इन्द्रियां [दो न, दो नथने, दो आंखे और एक मुख] (यावत्) जितने (वितष्ठिरे) कर स्थित हैं। (इतः) इस स्थान से (विषस्य) विष की (दूषणीम्) न करने वाली (ताम्) उस (वाचम्) वाणी को (निरवादिषम्) मैंने दिया है ॥ २ ॥

भावार्थः—मनुष्य उपाय करें कि आकाश और पृथिवी के सब गोचर र्थों में विष का संसर्ग न हो और पुष्टिकारक और बलवर्धक वस्तुओं के र्श, दर्शन, श्रवण, मनन, संभोग आदि से आनन्द प्राप्त हो ॥ २ ॥

पर्णस्त्वा गरुत्मान् विषं प्रथममावयत् ।
मीमदो नारूरुप उतास्मा अभवः पितुः ॥ ३ ॥

पर्णः । त्वा । गरुत्मान् । विषं । प्रथमम् । आवयत् । न ।
मीमदः । न । अरूरुपः । उत । अस्मै । अभवः । पितुः ॥ ३ ॥

पुप् । ङीप् । **आ सर्वनाम्नः** (पा० ६ । ३ । ९१) इति आत्वम् । **वा छन्दसि** पा० ६ । १ । १०६) इति विभक्तेः पूर्वसवर्णदीर्घः । यावत्यौ । यावत्परिमाण- क्ते । **द्यावापृथिवी** । पूर्वसवर्णदीर्घः । सूर्यपृथिव्यौ । **वरिम्णा । पृथ्वादिभ्यः** मनिज्वा (पा० ५ । १ । १२२) इति उरु—इमनिच् । **प्रियस्थिर०** (पा० ६ । । १५७) इति वर् आदेशः । उरुत्वेन । विस्तारेण । **सप्त । सप्यशूभ्यां तुट् च** उ० १ । १५७) इति षप समवाये, यद्वा, सृप्लृ गतौ कनिन्, तुट् च, ऋकारस्य कारः । सप्तपुत्रं सप्तमपुत्रं सर्पणपुत्रमिति वा सप्त सृप्ता सङ्ख्या सादित्यरश्मय इति निरु० ४ । २६ । जीवेन सह समवेताः सर्पणा गमनशीला सप्तसङ्ख्याका वा । **सिन्धवः** । अ० ४ । ३ । १ । स्यन्दनशीलानि नदी- पाणि शीर्षण्यानि कर्णनासिकाचक्षुर्द्वयमुखानि-व्याख्यातम् । अ० २ । १२ । ७ । वितष्ठिरे । ष्ठा गतिनिवृत्तौ-लिट् । **समवप्रविभ्यः स्थः** (पा० १ । ३ । २२) इति आत्मनेपदम् । विस्तारेण स्थिताः । **वाचम्** । वाणीम् । **दूषणीम्** । दुष वैकृत्ये- ण्यन्तात् ल्युट् । ङीष् । नाशनीम् । **ताम्** । तादृशीम् । **इतः** । अस्माद् देशात् । **निः अवादिषम्** । वद व्यक्तायां वाचि लुङ् । **वदव्रजहलन्तस्याचः** (पा०७ । २ । ३) इति वृद्धिः । अहं निर्गमय्य उच्चारितवानस्मि ॥

भाषार्थः—(विष) हे विष ! (सुपर्णः) शीघ्रगामी (गरुत्मान्) पंख वाले गरुड़ ने (प्रथमम्) प्रसिद्ध (त्वा) तुझको (आवयत्) खाया [उसे] (न) न तो (अमीमदः) मत्त किया और (न) न (अरूरुपः) घबरा दिया, (उत) किन्तु तू (अस्मै) उसके लिये (पितुः) अन्न (अभवः) हुआ है ॥ ३ ॥

भावार्थ—जैसे गरुड़, मोर आदि पक्षी अपनी विष पाचक शक्ति से विषैले सर्प को खाकर अपना शरीर पुष्ट करते हैं, इसी प्रकार सद्वैद्य औषधि द्वारा विष-जनक रोगों का नाश करके संसार में निरोगता फैलाते हैं ॥ ३ ॥

यस्त आस्यत् पञ्चाङ्गुरिर्वक्राच्चिदधि धन्वनः ।
अपस्कम्भस्य शल्यान्निरवोचमहं विषम् ॥ ४ ॥

यः । ते । आस्यत् । पञ्चऽअङ्गुरिः । वक्रात् । चित् । अधि । धन्वनः ॥ अपऽस्कम्भस्य । शल्यात् । निः । अवोचम् । अहम् । विषम् ॥

३—**सुपर्णः** । अ० १ । २४ । १ । सुपर्णाः सुपतना आदित्यरश्मयः सुपर्णाः सुपतनानीन्द्रियाणि—निरु० ३ । १२ । शीघ्रगतिः । शोभनपक्षयुक्तः । **त्वा** । त्वां विषम् । **गरुत्मान्** । मृग्रोरुतिः (उ० १ । ९४) इति गॄ शब्दे-उति । गृणाति शब्दायते वायुवेगात् स गरुत् पक्षः । ततो मतुप् । उरगाशनः पक्षि-विशेषः । गरुडः । **विष** । **प्रथमम्** । प्रधानम् । अतिप्रभावयुक्तमित्यर्थः । **आवयत्**=आ **अवयत्** । वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु—लङ् । आवयतिः, अत्तिकर्मा—निघ० २ । ८ । अभक्षयत् । **न** । निषेधे । **अमीमदः** । मदी हर्षग्लेपनयोः । ग्लेपनं दैन्यम् । ण्यन्तात् लुङि चङि रूपम् । मत्तं ज्ञानशून्यं विकलम् अकार्षीः । **अरूरुपः** । रुप विमोहने ण्यन्तात् लुङि चङि रूपम् । विमूढम् अकार्षीः । **उत** । अपि तु । **अस्मै** । गरुत्मते । **अभवः** । लङ् । **पितुः** । कमिमनि०[1] (उ० १।७३) इति पा रक्षणे, वा पा पाने, अथवा ओप्यायी वृद्धौ—तु प्रत्ययः । धातोः पिभावः । पितुरित्यन्ननाम पातेर्वा पिबतेर्वा प्यायतेर्वा—निरु० ९ । २४ । अन्नम्[2] ॥

१. बाहुलक से यहाँ 'पा' धातु से तु प्रत्यय होगा ॥ सम्पा० ॥
२. अन्नं वै पितुः (श.ब्रा. १ । ६ । २ । २०) शतपथ में कहा है ॥ सम्पा० ॥

भाषार्थः—(यः) जिस किसी पुरुष ने (पञ्चाङ्गुरिः) पांचों अंगुली जमा (वक्रात्) टेढ़े (चित्) ही (धन्वनः अधि) धनुष पर से (अपस्कम्भस्य) के बन्धन की (शल्यात्) अणि व पैनी कील से (ते) तेरे लिये [विष] (आस्यत्) चलाया है, (अहम्) मैंने (विषम्) उस विष को (निः) निकाल (अवोचम्) वचन बोला है ॥४॥

भावार्थः—यदि शत्रु अपने छल बल से दृढ़ हाथ से छोड़े हुये विष में बुझे से किसी वीर मनुष्य के शरीर में विष प्रवेश कर दे, चतुर वैद्य उसकी चिकित्सा के यश प्राप्त करे ॥४॥

ल्याद् विषं निरवोचं प्राञ्जनादुत पर्णधेः ।
पाष्ठाच्छृङ्गात् कुल्मलान्निरवोचमहं विषम् ॥ ५ ॥

ल्यात् । विषम् । निः । अवोचम् । प्रऽअञ्जनात् । उत । पर्णऽधेः ।
पाष्ठात् । शृङ्गात् । कुल्मलात् । निः । अवोचम् । अहम् । विषम् ॥ ५ ॥

भाषार्थः—(शल्यात्) बाण की अणि से, (प्राञ्जनात्) लेप से (उत) र (पर्णधेः) पंख वाले तीर के भाग से (विषम्) विष को (निः) निकाल

४—यः । कश्चित् पुरुषः । ते । तुभ्यम् । आस्यत् । असु क्षेपणे लङ् । प्राक्षि- । पञ्चाङ्गुरिः । बालमूललघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम् (वा० पा०८।२।१८) इति लस्य रत्वम् । बाणारोपणे पञ्च अङ्गुरयः अङ्गुलयो यस्य तथोक्तः । दृढ़हस्तः सन् । वक्रात् । स्फायितञ्चिवञ्चि० (उ० २।१३) इति वञ्चु म्भने—रक् । कुटिलात् । क्रूरात् । चित् । अपि । अधि । उपरिभावे । धन्वनः । १ । ३ । ९ । चापात् । अपस्कम्भस्य । स्कभि प्रतिबन्धे—घञ् । शर- धनात् । शल्यात् । अ० २ । ३० । ३ । शल गतौ—यः । बाणाग्रभागात् । निः । षधिबलेन निःसार्य । अवोचम् । उक्तवानस्मि । विषम् । हलाहलम् ॥

५—शल्यात् । विषम् । निः । अवोचम् । गतम्—म० ४ । प्राञ्ज- त् । अञ्जू व्यक्तिगतिम्रक्षणेषु—ल्युट् । प्रलेपात् । उत । अपि । पर्णधेः । युक्तशरकाण्डात् । अपाष्ठात् । अप + आङ् + ष्ठा—क । उपस्थितात्

कर (अवोचम्) मैंने वचन बोला है। (शृङ्गात्) तीक्ष्ण (अपाष्ठात्) फल से और (कुल्मलात्) बाण छिद्र से (विषम्) विष को (निः=नि निकाल कर (अहम्) मैंने (अवोचम्) वचन कहा है ॥५॥

भावार्थः—विषैले बाण के जिस जिस खंड से जहाँ जहां शरीर हों, बुद्धिमान् वैद्य वहां वहां से सावधानी के साथ विष निकालकर पुरुष को स्वस्थ करे ॥५॥

अरसस्त इषो शल्योऽथो ते अरसं विषम्।
उतारसस्य वृक्षस्य धनुष्टे अरसारसम् ॥ ६ ॥

अरसः। ते। इषो इति। शल्यः। अथो इति। ते। अरसम्। विषम्। उत। अरसस्य। वृक्षस्य। धनुः। ते। अरस। अरसम् ॥ ६

भाषार्थः—(इषो) हे हिंसक बैरी! (ते) तेरे (शल्यः) बाण का (अरसः) निर्बल, (अथो) और भी (ते) तेरा (विषम्) विष (अ निर्बल [हो जावे]। (उत) और (अरस) हे निर्बल शत्रु! (अरसस्य) (वृक्षस्य) वृक्ष का (ते धनुः) तेरा धनुष (अरसम्) निकम्मा [हो जावे]

बाणफलात्। **शृङ्गात्**। अ० २। ३२। ६। शॄ हिंसायाम्—गन्, नुट् च। तीति शृङ्गं तीक्ष्णम्। तीक्ष्णात्। **कुल्मलात्**। अ० २। ३०। ३। बाणद द्रात्। गतमन्यत् ॥

६—**अरसः**। निर्बलः। **ते**। तव। **इषो**। **ईषेः क्रिच्च** (उ० १ ईषति हिनस्तीति इषुः। हे हिंसक! हे बाण! हे बाणधारिन्—इत्यर्थः। श म० ४। बाणाग्रभागः। **अथो**। अपि च। **अरसम्**। निर्वीर्यम्। निष्प्रभ **विषम्**। **उत**। अपि च। **अरसस्य**। निःसारस्य। **वृक्षस्य**। अ० १ ३। अ० ३।६।८। वृक्ष वरणे—कः। स्वीकरणीयस्य। विटपस्य वृक्षकाष्ठस्ये **धनुः**। अ० ४। ४। ६। चापः। **ते**। तव। **अरस**। निर्वीर्यशत्रो ॥

भावार्थः—चिकित्सक लोग ऐसी उत्तम संजीवनी औषधें उपस्थित रक्खें जिनसे शत्रुओं के अस्त्र शस्त्रों के घाव योधाओं के अंगों में भर कर तुरन्त अच्छे हो जावें ॥ ६ ॥

ये अपीषन् ये अदिहन् य आस्यन् ये अवासृजन् ।
सर्वे ते वध्रयः कृता वध्रिर्विषगिरिः कृतः ॥ ७ ॥

ये । अपीषन् । ये । अदिहन् । ये । आस्यन् । ये । अवऽअसृजन् ।
सर्वे । ते । वध्रयः । कृताः । वध्रिः । विषऽगिरिः । कृतः ॥ ७ ॥

भाषार्थः—(ये) जिन शत्रुओं ने [विष को] (अपीषन्) पीसा है, (ये) जिन्होंने (अदिहन्) लेप किया है, (ये) जिन्होंने (आस्यन्) दूर से फेंका है, और (ये) जिन्होंने (अवासृजन्) पास से छोड़ा है। (ते सर्वे) वे सब (वध्रयः) असमर्थ (कृताः) कर दिये गये, और (विषगिरिः) विष पर्वत भी (वध्रिः) निर्वीर्य (कृतः) कर दिया गया है ॥७॥

भावार्थः—राजा विष प्रयोगी पुरुषों को यथावत् दंड देकर सर्वथा बलहीन कर देवे, और विष के उत्पत्ति स्थानों को भी नियम वद्ध रक्खे ॥७॥

वध्रयस्ते खनितारो वध्रिस्त्वमस्योषधे ।
वध्रिः स पर्वतो गिरिर्यतो जातमिदं विषम् ॥ ८ ॥

वध्रयः । ते । खनितारः । वध्रिः । त्वम् । असि । ओषधे ।
वध्रिः । सः । पर्वतः । गिरिः । यतः । जातम् । इदम् । विषम् ॥ ८ ।

भाषार्थः—(ओषधे) हे दाह [जलन] के धारण करने वाले विष ! (ते)

७—**ये** । जनाः । **अपीषन्** । पिष्लृ संचूर्णने लङि छान्दसरूपम् । अपिषन् । पिष्टवन्तः । विषमिति शेषः । **अदिहन्** । दिह उपचये = वृद्धौ—लङ् । लिप्तवन्तः । **आस्यन्** । म० ४ । दूरात् क्षिप्तवन्तः । **अव—असृजन्** । सृज विसर्गे—लङ् । अवसृष्टवन्तः समीपे त्यक्तवन्तः । **सर्वे** । **ते** । पूर्वोक्ता जनाः । **वध्रयः** । अ० ३ । ९ । २ । बन्ध बन्धने क्रिन् । विफलाः । निर्वीर्याः । **कृताः** । निष्पादिताः । **वध्रिः** । निर्वीर्यः । **विषगिरिः** । विषोत्पत्तिहेतुः पर्वतः ॥

८—**वध्रयः** म० ७ । असमर्थाः । **ते** । तव । **खनितारः** । खननकर्तारः ।

तेरे (खनितारः) खोदने वाले (वध्रयः) असमर्थ [हो जावें] और (त्वम्) तू भी (वध्रिः) निर्वीर्य (असि) है। (सः) वह (पर्वतः) अवयव वाला (गिरिः) पहाड़ (वध्रिः) असमर्थ [हो जावे] (यतः) जिससे (इदम् विषम्) यह विष (जातम्) उत्पन्न हुआ है ॥ ८ ॥

भावार्थः—राजा विष व्यापारियों और विष स्थानों को नीति विधान से अपने वश में रक्खे ॥ ८ ॥

सूक्तम् ॥ ७ ॥

१—७ ॥ विषो देवता । अनुष्टुप् छन्दः ॥

विषनाशायोपदेशः—विष नाश करने का उपदेश ॥

वारि॒दं वा॑रयातै॒ व॒रणाव॑त्या॒मधि॑ ।
तत्रा॒मृत॒स्यासि॑क्तं॒ तेना॑ ते वारये वि॒षम् ॥ १ ॥

वाः । इ॒दम् । वा॒र॒या॒तै॒ । व॒रण॒ऽव॑त्याम् । अधि॑ । तत्र॑ । अ॒मृत॑स्य । आऽसि॑क्तम् । तेन॑ । ते॒ । वा॒र॒ये॒ । वि॒षम् ॥ १ ॥

भाषार्थः—(वरणावत्याम् अधि) उत्तम गुण वाली क्रिया में [अथवा वरुण नाम वाली ओषधि में] वर्तमान (इदम्) यह (वाः) जल (वारयातै) [विष को] हटावे। (तत्र) उस [जल] में (अमृतस्य) अमृत अर्थात्

वध्रिः । निर्वीर्याः,निर्वीर्यः । **त्वम् असि** । **ओषधे** । अ० १ । २३ । ३ । उष दाहे—घञ्+डुधाञ् धारणपोषणयोः–किः । हे दाहधारक विष । **सः** । **पर्वतः** । अ० १ । १२ । ३ । पर्व पूरणे अतच् । पर्वति पूरयति भूमिम् । यद्वा । **पर्वमरुद्भ्यां तप् वक्तव्यः** (वा० पा० ५ । २ । १२२)इति पर्वन्—तप् मत्वर्थे । पर्ववान् । अवयवयुक्तः । **गिरिः** । अ० २ । २५ । ४ । शैलः । **यतः** । यस्माद् गिरेः । **जातम्** । उत्पन्नम् । **इदम्, विषम्** ॥

१—**वाः** । अ० ३ । १३ । ३ । वारि । जलम् । **इदम्** । **वारयातै** । वारयतेर्लेटि आडागमः । निवारयतु विषम् । **वरणावत्याम्** । **सुयुरुवृञो युच्** (उ० २ । ७४) इति वृञ् वरणे—युच् । **शरादीनां च** (पा० ६ । ३ । १२०) इति मतौ पूर्वपदस्य

स्वास्थ्य का (आसिक्तम्) रस है। (तेन) उस [जल] से (ते विषम्) तेरे विष को (वारये) मैं हटाता हूं ॥ १ ॥

भावार्थः—(१) यथावत् क्रिया से किये हुये जल के अभिषेक आदि से और (२) वरुण नाम औषध के रस प्रयोग से विष और विष जनक रोगों की निवृत्ति होती है ॥ १ ॥

अरसं प्राच्यं॑ विषम॑रसं यदु॑दीच्य॑म्।
अथे॒दम॑धरा॒च्यं॑ कर॒म्भेण॒ वि क॑ल्पते ॥ २ ॥

अ॒र॒सम्। प्रा॒च्य॑म्। वि॒षम्। अ॒र॒सम्। यत्। उ॒दी॒च्य॑म्।
अथ॑। इ॒दम्। अ॒ध॒रा॒च्य॑म्। क॒र॒म्भेण॑। वि। क॒ल्प॒ते॒ ॥ २ ॥

भाषार्थः—(प्राच्यम्) पूर्व वा सन्मुख दिशा का (विषम्) विष (अरसम्) अरस होवे, और (यत्) जो (उदीच्यम्) उत्तर वा बांयी दिशा में

दीर्घः। वरणीयगुणयुक्तायां क्रियायाम्। अथवा वरणो वरुणो वृक्षविशेषः। वरुण-रसवत्याम् ओषधौ वर्तमानम्। वरुणस्य गुणाः। कटुत्वम्, उष्णत्वम् रक्तदोष-शीतवातहरत्वम्, स्निग्धत्वम्, दीपनत्वं च—इति शब्दकल्पद्रुमात्। **अधि**। सप्तम्यर्थानुवादी। **तत्र**। तस्मिन् जले। **अमृतस्य**। अमरणस्य, स्वास्थ्यस्य। **आसिक्तम्**। षिच क्षरणे—भावे क्तः। आसेचनम्। समन्ताद् वर्षणम्। रसः। **तेन**। उदकेन। **वारये**। अहं निवारयामि। **विषम्**। विषप्रभावम् ॥

२—**अरसम्**। नीरसम्। निष्प्रभावम्, भवतु। **प्राच्यम्**। **द्युप्रागपागुदक्प्रतीचो यत्** (पा० ४। २। १०१) इति प्राच्-यत्। पूर्वदिग्भवम्। स्वाभिमुखदिशि भवम्। यत्। यद् विषमस्ति तदपि। **उदीच्यम्**। उदच्—यत् पूर्ववत् उत्तरदिशि भवम् वामदिशि भवम्। **अथ**। अनन्तरम्। **इदम्**। **अधराच्यम्**। अधराच्—यत्। अधस्ताद् वर्तमानायां दिशि भवम्। **करम्भेण**। **अकर्तरि च कारके संज्ञायाम्** (पा० ३। ३। १९) इति क+रभि शब्दे, अत्र सेचने—घञ्। **रभेरशब्लिटोः** (पा० ७। १। ६३) इति नुम्। केन जलेन रभ्यते सिच्यते मिश्रीक्रियते वा स करम्भः तेन, जलसेचनकर्मणा। यद्वा दधिमिश्रितसक्तुभिः। **विकल्पते**। कृपू सामर्थ्ये। **कृपो रो लः** (पा० ८। २। १८) इति लत्वम्। विगतसामर्थ्यं भवति ॥

है [वह भी] (अरसम्) अरस होवे । (अथ) और (इदम्) यह (अधराच्यम्) नीचे की दिशा का [विष] (करम्भेण) जल सेचन से [वा दही मिले सत्तुओं से] (विकल्पते) असमर्थ हो जाता है ॥ २ ॥

भावार्थः—चिकित्सक लोग विष और विषैले रोगों को यथावत् जल सेचन से अथवा सत्तुओं के प्रयोग से हटावें ॥ २ ॥

'करम्भ' शब्द का अर्थ जल क्रिया वा जल सेचन अथवा दही मिले हुये सत्तुओं का है [करम्भो दधिसक्तवः—इत्यमरः, २ । ९ । ४८]

क॒र॒म्भं कृ॒त्वा ति॒र्यं॑ पीवस्पा॒कमु॑दा॒र॒थिम् ।
क्षु॒धा किल॑ त्वा दुष्टनो जक्षि॒वान्त्स न रू॑रुपः ॥ ३ ॥

क॒र॒म्भम् । कृ॒त्वा । ति॒र्यं॑म् । पी॒बः॒ऽपा॒कम् । उ॒दा॒र॒थिम् । क्षु॒धा । कि॒ल॑ । त्वा॒ । दु॒स्त॒नो॒ इति॑ दुः॒ऽत॒नो॒ । ज॒क्षि॒ऽवान् । सः । न । रू॒रु॒पः॒ ॥ ३ ॥

भाषार्थः—(दुष्टनो) हे शरीर के दुःख दायक [विष !] (किल) तिरस्कार के साथ (त्वा) तेरे लिये [तेरे हटाने के लिये] (तिर्यम्) रोग जीतने में समर्थ, (पीबस्पाकम्) मुटाई वा चर्बी रोग पचाने वाले और

३—**करम्भम्** । म० २ । जलसेचनम् । दधिसक्तून् । **कृत्वा** । विधाय । **तिर्यम्** । **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति तॄ प्लवनसंतरणयोः—असुन् । गुणविषये ईर् । तरतीति तिरः । **तत्र साधुः** (पा० ४ । ४ । ९८) इति यत् । **अव्ययानां च०** (वा० पा० ६।४।१४४) इति टिलोपः । तरणे रोगजये समर्थम् । रोगतिरस्कारे कुशलम् । **पीवस्पाकम्** । **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति पीव स्थौल्ये—असुन् । पचतेः करणे—घञ् । पीवः स्थौल्यं मेदो वा रोगविशेषः पच्यते येन तम् । **उदारथिम्** । **उद्यर्त्तेश्चित्** (उ० ४ । ८८) इति उत्+ ऋ गतौ—घथिन् । छान्दसो दीर्घः । उदरथिम् । उद्गमयितारम् जाठराग्नेरुद्दीपयितारम् । **क्षुधा** । बुभुक्षया । **किल** । तिरस्कारेण । निश्चयेन । **त्वा** । **सुपां सुपो भवन्ति** (वा० पा० ७।१।३९)[1] इति चतुर्थ्यर्थे द्वितीया, त्वदर्थम् । तवनिवारणायेत्यर्थः । **दुष्टनो** । दुर्-तनो । हे शरीरदूषक ! **जक्षिवान्** । अदेर्लिटः क्वसुः ।

---

१. ऋत इद्धातोः (७ । १ । १००) ॥ सम्पा० ॥

(उदारथिम्) जाठर अग्नि वढ़ाने वाले (करम्भम्) जल सेचन [वा दही सत्तुओं] को (कृत्वा) बनाकर (क्षुधा) भूख के कारण (जक्षिवान्=यः जक्षिवान् तम्) जिसने खा लिया, उसको (सः = स त्वम्) उस तूने (न) नहीं (रूरुपः) मूर्छित किया है ॥ ३ ॥

भावार्थः—जल सेचन और सत्तुओं के सेवन से विषैले रोगों का नाश होता है ॥ ३ ॥

वि ते मदं मदावति शरमिव पातयामसि ।
प्र त्वा चरुमिव येषन्तं वचसा स्थापयामसि ॥ ४ ॥

वि । ते । मदम् । मदऽवति । शरम्ऽइव । पातयामसि ।
प्र । त्वा । चरुम्ऽइव । येषन्तम् । वचसा । स्थापयामसि ॥४॥

भाषार्थः—(मदावति) हे मूर्छा करने वाली [विष पीड़ा] (ते) तेरे (मदम्) मद्यपन को (शरमिव) तीर के समान (वि) अलग (पातयामसि = ०—मः) हम फेंके देते हैं । और (येषन्तम्) खदबदाते हुये (चरुमिव) चरुये [बासन] के समान (त्वा) तुझको (वचसा) वचन मात्र से [शीघ्र] (प्रस्थापयामसि=०—मः) हम हटाते हैं ॥ ४ ॥

लिट्यन्यतरस्याम् (पा० २ । ४ । ४०) इति घस्लृ आदेशः । **वस्वेकाजाद्घसाम्** (पा० ७ । २ । ६७) इति इटि कृते उपधालोपे स्थानिवद्भावाद् द्विर्वचनादिः । भक्षितवान् यः पुरुषः, तम् इति शेषः । **सः** । स त्वम् । **न** । न हि । **रूरुपः** । रुप विमोहने । ण्यन्ताल् लुङि चङि रूपम् अडभावः । अरूरुपः । अमूमुहः । मूर्छितम् अकार्षीः ॥

४—**वि** । वियोगे । **ते** । त्वदीयम् । **मदम्** । मदी हर्षग्लेपनयोः—अच् । मद्यम् । मत्तताम् । विकलताम् । **मदावति** । **शरादीनां च** (पा० ६ । ३ । १२०) इति मतौ दीर्घः । हे मूर्छाकरगुणयुक्ते विषपीडे । **शरमिव** । शॄ हिंसायाम्—अप् । चापाद् विमुक्तं तीरमिव । **वि पातयामसि** । शरीराद् विश्लेषयामः । **त्वा** । त्वाम् । **चरुमिव** । **भृमृशीङ्तॄचरि०** (उ० १ । ७) इति चर गतिभक्षणयोः उः । चर्यते भक्ष्यते अग्निना, अन्नपाकभाण्डं यथा । **येषन्तम्** । **जॄविशिभ्यां झच्**

भावार्थः—वैद्य लोग विषैली, मदकरी पीडाओं को बहुत शीघ्र प्रयत्न करके हटावें, जैसे धनुष से तीर को फेंकते अथवा अतितप्त बरतन को आग पर से हटाते हैं ॥ ४ ॥

परि ग्राम॑मिवाचि॑तं॒ वच॑सा स्थापयामसि ।
तिष्ठा॑ वृ॒क्षइ॑व॒ स्थाम्न्य॑भ्रिखाते॒ न रू॑रुपः ॥ ५ ॥

परि॑ । ग्राम॑म्ऽइव । आऽचि॑तम् । वच॑सा । स्था॒प॒या॒म॒सि॒ ।
तिष्ठ॑ । वृ॒क्षःऽइ॑व । स्थाम्नि॑ । अभ्रि॑ऽखाते । न । रू॒रु॒पः॒ ॥ ५ ॥

भाषार्थः—(आचितम्) एकत्र हुए (ग्रामम् इव) जन समूह [शत्रु वृन्द] के समान [तुझको] (वचसा) वचन मात्र से (परि स्थापयामसि = ०—मः) हम घेरते हैं । (वृक्षः इव) वृक्ष के समान (स्थाम्नि) अपने स्थान पर (तिष्ठ) ठहर । (अभ्रिखाते) हे कुद्दाल से खोदी हुई ! तूने (न) नहीं (रूरुपः) मूर्छित किया है ॥ ५ ॥

भावार्थः—विद्वान् वैद्य विचार पूर्वक उपाय के साथ विष को प्रभाव रहित करके निकाल देते हैं जैसे शूर पुरुष शत्रुसेना को घेरकर हरा देते हैं ॥ ५ ॥

(उ० ३ । १२६) इति येषृ प्रयत्ने—झच् । येषमाणम् । प्रयतमानम् अङ्गप्रत्यङ्गानि व्याप्नुवन्तम् प्रतप्तं वा । **वचसा** । वचनमात्रेण । **प्र स्थापयामसि** । दूरी कुर्मः ॥

५—**परि** । परितः सर्वतः । **ग्रामम्** । **ग्रसेरा च** (उ० १ । १४३) इति ग्रस ग्रहणे—मन्, धातोराकारः । जनसमूहम् । शत्रुवृन्दम् । **इव** । यथा । **आचितम्** । आङ् + चि—क्तः । आकीर्णम् । व्याप्तम् । **वचसा** । वचनमात्रेण । **स्थापयामसि** । दध्मः । **तिष्ठ** । स्थिता भव । **वृक्ष इव** । यथा वृक्षो निश्चलो भूत्वा । **स्थाम्नि** । **सर्वधातुभ्यो मनिन्** (उ० ४ । १४५) इति ष्ठा गतिनिवृत्तौ—मनिन् । स्वस्थाने । मूले । **अभ्रिखाते** । **सर्वधातुभ्य इन्** (उ०४।११८) इति अभ्र गतौ—इन् अपादाने । अभ्रिः काष्ठकुद्दालः । तीक्ष्णाग्रो लोहदण्डः । खनु अवदारणे—क्तः । हे खननसाधनेन अभ्रि विदारिते ओषधे । **न** । न हि । **रूरुपः** । म० ३ । अमूमुहः ॥

पवस्तैस्त्वा पर्यक्रीणन् दूर्शेभिरजिनैरुत ।
प्रक्रीरसि त्वमोषधेऽभ्रिखाते न रूरुपः ॥ ६ ॥

पवस्तैः । त्वा । परि । अक्रीणन् । दूर्शेभिः । अजिनैः । उत ।
प्रऽक्रीः । असि । त्वम् । ओषधे । अभ्रिऽखाते । न । रूरुपः ॥ ६ ॥

भाषार्थः—(त्वा) तुझसे (पवस्तैः) मंडप वा घरों के लिये, (दूर्शेभिः=दूर्शैः) वस्त्र गृहों के लिये, (उत) और (अजिनैः) चर्म के लिये (परि अक्रीणन्) उन्होंने [पुरुषों ने] व्यापार किया है। (ओषधे) हे दाहधारण करने वाली ! (त्वम्) तू (प्रक्रीः) बिकाऊ वस्तु (असि) है। (अभ्रिखाते) हे कुद्दाल से खोदी हुई ! तूने (न) नहीं (रूरुपः) मूर्छित किया है॥ ६ ॥

भावार्थः—मनुष्य अपने लाभ के लिये विष का व्यापार भी करते हैं, विद्वान् लोग अपनी योग्यता से विष को निर्बल करके रखते हैं॥ ६ ॥

अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥ ७ ॥

अनाप्ताः । ये । वः । प्रथमाः । यानि । कर्माणि । चक्रिरे ।
वीरान् । नः । अत्र । मा । दभन् । तत् । वः । एतत् । पुरः । दधे ॥ ७ ॥

६—**पवस्तैः** । पवतेः गतिकर्मा—निघ० २ । १४ । अस्माद् औणादिको अस्तप्रत्ययः । पवन्ते गच्छन्ति यत्र । मण्डपैः । गृहैः । अत्र सर्वत्र निमित्ते तृतीया । पवस्तशब्दो द्यावापृथिव्योर्वाचको दृष्टः । ऋ० १० । २७ । ७ । **त्वा** । त्वां विषरूपाम् । **परि अक्रीणन्** । डुक्रीञ् द्रव्यविनिमये—लङ् । परिक्रीतवन्तः पुरुषाः । **दूर्शेभिः** । दुर्—शो तनूकरणे—डः । दुर् दुःखं श्यतीति दूर्शम् । दूर्शैः । दूश्यैः । दूष्यैः । वस्त्रनिर्मितगृहैः । **अजिनैः** । **अर्जेरज च** (उ० २ । ४८) इति अज गतिक्षेपणयोः—इनच् । चर्मभिः । **उत** । अपि च । **प्रक्रीः** । प्रपूर्वात् क्रीणातेः कर्मणि संपदादित्वात् क्विप् । प्रकर्षेण क्रीता । **असि** । भवसि । **त्वम्** । **ओषधे** । हे तापधारिणि । अन्यद् गतम्—म० ५ ॥

भाषार्थः—(ये) जिन (प्रथमाः) प्रधान (अनाप्ताः) अत्यन्त यथार्थ ज्ञानी पुरुषों ने (वः) तुम्हारे लिये (यानि) पूजनीय (कर्माणि) कर्म (चक्रिरे) किये हैं, वे (नः) हम (वीरान्) वीरों को (अत्र) यहां पर (मा दभन्) न मारें (तत्) सो (एतत्) इस कर्म को (वः) तुम्हारे (पुरः) आगे (दधे) मैं धरता हूँ ॥ ७ ॥

भावार्थः—मनुष्य प्रयत्न करें कि जगत् हितकारी महात्मा लोग आनन्द प्राप्त करके सब की यथावत् रक्षा करते रहें ॥ ७ ॥

यह मन्त्र अ० ५ । ६ । २ । में भी है ।

सूक्तम् ॥ ८ ॥

१—७ ॥ भूतानामधिपतिर्देवता ॥ १, ३, ७ त्रिष्टुप्, शिष्टानुष्टुप् ॥

राजसूययज्ञोपदेशः—राजतिलक यज्ञ का उपदेश ॥

भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूव ।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनु मन्यतामिदम् ॥ १ ॥

भूतः । भूतेषु । पयः । आ । दधाति । सः । भूतानाम् । अधिऽपतिः । बभूव । तस्य । मृत्युः । चरति । राजऽसूयम् । सः । राजा । राज्यम् । अनु । मन्यताम् । इदम् ॥ १ ॥

७—**अनाप्ताः** । आप्लृ व्याप्तौ—क्तः । आप्ता यथार्थज्ञातारः । न सन्ति आप्ता येभ्यस्ते अनाप्ताः, अनुत्तमाः । अतिशयेन आप्ताः । **ये** । पुरुषाः । **वः** । युष्मभ्यम् । **प्रथमाः** । प्रधानाः । **यानि** । यज देवपूजासङ्गतिकरणदानेषु—ड्ः । यजनीयानि । पूज्यानि । **कर्माणि** । कर्तव्यानि । आचरणानि । **चक्रिरे** । कृतवन्तः । **वीरान्** । शूरान् । **नः** । अस्मान् । **अत्र** । अस्मिन् संसारे विषनिवारणकर्मणि वा । **मा दभन्** । दम्भु दम्भने=कपटे । मा हिंसन्तु ते शत्रवः । **तत्** । तस्मात् । **वः** । युष्माकम् । **एतत्** । क्रियमाणं कर्म । **पुरः** । पुरस्तात् । **दधे** । धारयामि ॥

भाषार्थः—(भूतः) विभूति वा ऐश्वर्य वाला पुरुष (भूतेषु) सब स्थावर जंगम पदार्थों में (पयः) दूध, अन्न जल आदि (आ) अच्छे प्रकार (दधाति) धारण करता है, (सः) वही (भूतानाम्) प्राणी और अप्राणियों का (अधिपतिः) अधिष्ठाता (बभूव) हुआ है। (मृत्युः) मृत्यु [मारणसामर्थ्य] (तस्य) उसके (राजसूयम्) राजतिलक यज्ञ में (चरति) अनुचर होता है। (सः राजा) वह राजा (इदम् राज्यम्) इस राज्य को (अनु मन्यताम्) अङ्गीकार करे ॥ १ ॥

भावार्थः— जिस प्रतापी पुरुष को विद्वान् पुरुषों ने राजा बनाया है, वह अपनी बुद्धि, नीति और वीरता से प्रजा के प्राण और धन की रक्षा करता है, और वही शिष्टों का पालन करके मृत्यु से बचाता और दुष्टों को दण्ड देकर मारता है ॥ १ ॥

अभि प्रेहि माप वेन उग्रश्चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रुवन् ॥ २ ॥

१—**भूतः** । भू सत्तायां प्राप्तौ च, यद्वा, शुद्धिचिन्तनमिश्रणेषु—क्तः । भवति विद्यते भूयते प्राप्यते वा भूतः प्राणी । भूतिवान्, ऐश्वर्यवान् राजा । **भूतेषु** । सत्तां प्राप्तेषु स्थावरजङ्गमद्रव्येषु । **पयः** । **रपेरत एच्च** (उ० ४ । १९०) इति पय गतौ, पीङ् पाने पा पाने—वा असुन् । पयः पिबतेर्वा प्यायतेर्वा—निरु० २ । ५ । पयः, रात्रिनाम—निघ० १ । ७ । उदकनाम—निघ० १ । १२ । अन्ननाम—निघ० २ । ७ । दुग्धान्नजलादि-पदार्थजातम् । **आ** । सम्यक् । **दधाति** । स्थापयति । **सः** । राजा । **भूतानाम्** । प्राणिनाम् । **अधिपतिः** । अधिष्ठाता । स्वामी । **बभूव** । **तस्य** । राज्ञः । **मृत्युः** । **भुजिमृङ्भ्यां युक्त्युकौ** (उ० ३ । २१) इति मृङ् प्राणत्यागे—त्युक् । अन्तर्भावितण्यर्थः । मृत्युर्मारयतीति सतो मृतं च्यावयतीति वा शतबलाक्षो मौद्गल्यः—निरु० ११ । ६ । मारणसामर्थ्यम्, दुष्टनिग्रहेण शिष्टपरिपालनेन च । **चरति** । अनुचरति । सेवते । **राजसूयम्** । **राजसूयसूर्य०** (पा० ३ । १ । ११४) इति राजन् + षुञ् अभिषवे—क्यप् । अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च । राजा सूयते अभिषिच्यते यत्र । राजाभिषेकयज्ञम् । **सः** । कृताभिषेकः । **राजा** । ऐश्वर्यशाली । प्रतापवान् । **राज्यम्** । **पत्यन्तपुरोहितादिभ्यो यक्** (पा० ५ । १ । १२८) इति राजन्—यक् । राज्ञः कर्म प्रजारक्षणादिकम् । **अनुमन्यताम्** । अनुजानातु । अङ्गीकरोतु । **इदम्** । प्रत्यक्षम् ॥

अभि । प्र । इहि । मा । अप । वेनः । उग्रः । चेत्ता । सपत्नऽहा ।
आ । तिष्ठ । मित्रऽवर्धन । तुभ्यम् । देवाः । अधि । ब्रुवन् ॥ २ ॥

भाषार्थः—[हे राजन्] (उग्रः) तेजस्वी, (चेत्ता) चैतन्य स्वभाव और (सपत्नहा) शत्रुनाशक तू (अभि) सब ओर से (प्रेहि) आगे बढ़, (मा अप वेन:) पीछे न हट। (मित्रवर्धन) हे मित्रों के बढ़ाने हारे ! (आ-तिष्ठ) [सिंहासन वा हाथी आदि पर] आकर बैठ। (देवा:) विजय चाहने वाले वीर विद्वानों ने (तुभ्यम्) तेरे लिये (अधिब्रुवन्) यह अनुग्रह वचन दिया है ॥ २ ॥

भावार्थः—(देवा:) मुख्य मुख्य शूर विद्वान् लोग राजा को सहाय वचन के साथ अभिनन्दन करके राजसिंहासन और हाथी आदि यान पर बिठलावें और (मित्रवर्धन) राजा माननीय पुरुषों का आदर मान करे ॥ २ ॥

आ तिष्ठन्तं परि विश्वे अभूषञ् छ्रियं वसानश्चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ ३ ॥

आऽतिष्ठन्तम् । परि । विश्वे । अभूषन् । श्रियम् । वसानः । चरति । स्वऽरोचिः । महत् । तत् । वृष्णः । असुरस्य । नाम । आ । विश्वऽरूपः । अमृतानि । तस्थौ ॥ ३ ॥

२—**अभि** । अभितः सर्वतः । **प्रेहि** । प्रगच्छ । **मा अप वेनः** । वेनतिः कान्तिकर्मा—निघ० २ । ६ । गतिकर्मा०—२ । १४ । अर्चतिकर्मा–३ । १४ । मापगच्छ । **उग्रः** । तीव्रस्वभावः । **चेत्ता** । चिती संज्ञाने–तृन् । चेतिता । ज्ञानवान् । **सपत्नहा** । अ० १ । २९ । ५ । शत्रूणां हन्ता । **आतिष्ठ** । राजासनं हस्त्यश्वादियानं च आरोह । **मित्रवर्धन** । नन्दिग्रहिपचादि० (पा० ३ । १ । १३४) इति वृधेर्ण्यन्तात्—ल्युः । हे मित्राणां वर्धयितः । **तुभ्यम् देवाः** । विजिगीषवो विद्वांसः । **अधि ब्रुवन्** । ब्रूञ् व्यक्तायां वाचि—लङ् । अधि अब्रुवन् । अधिवचनम् अनुग्रहवचनम् उच्चारितवन्तः ॥

भाषार्थः—(विश्वे) सब जनों ने (आतिष्ठन्तम्) [सिंहासन आदि पर] बैठते हुये राजा को (परि अभूषन्) सब प्रकार से अलंकृत वा प्राप्त किया है। (श्रियम्) राजलक्ष्मी को (वसानः) धारण करता हुआ, (स्वरोचिः) स्वयं प्रकाशमान वह (चरति) वर्त्तमान होता है। (वृष्णः) उस ऐश्वर्य वाले (असुरस्य) प्राणदाता का (तत्) वह (महत्) विशाल (नाम) नाम है। (विश्वरूपः) अनेक प्रकार के स्वभाव वाले उसने (अमृतानि) अनश्वर सुखों को (आ तस्थौ) प्राप्त किया है ॥ ३ ॥

भावार्थः—प्रजा गण सिंहासन पर बैठे हुये राजा को भेंट आदि देकर सेवा करें, और राजा यथायोग्य सबसे बर्त्ताव करके आनन्द प्राप्त करे ॥ ३ ॥

व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः ।
विशस्त्वा सर्वा वाञ्छन्त्वापो दिव्याः पयस्वतीः ॥ ४ ॥

व्याघ्रः । अधि । वैयाघ्रे । वि । क्रमस्व । दिशः । महीः । विशः । त्वा । सर्वाः । वाञ्छन्तु । आपः । दिव्याः । पयस्वतीः ॥ ४ ॥

---

३ - **आतिष्ठन्तम्** । सिंहासनादिकम् आरोहन्तम् । **परि** । परितः सर्वतः । **विश्वे** । विश्वे देवाः । सर्वे शूरविद्वांसः । **अभूषन्** । भूष अलंकारे—लुङ् । यद्वा, भू प्राप्तौ छान्दसो लुङि सिप् । अलंकृतवन्तः । प्राप्तवन्तः । **श्रियम्** । **क्विब् वचिप्रच्छिश्रिस्रु०** (उ० २ । ५७) इति श्रिञ् सेवायाम् - क्विप् दीर्घश्च । श्रयति पुरुषार्थिनं सा श्रीः । राजलक्ष्मीम् । सम्पत्तिम् । **वसानः** । वस आच्छादने—लटः शानच् । धारयन् । **चरति** । राज्यपालने वर्तते । **स्वरोचिः** । **वसौ रुचेः संज्ञायाम्** (उ०२।१११) इति रुच दीप्तौ अभिप्रीतौ च—इसिः । स्वयं रोचमानो दीप्यमानः । स्वरुचिः, स्वतन्त्रः । **महत्** । अधिकम् । विशालम् । **तत्** । प्रसिद्धम् । **वृष्णः** । अ० १ । १२ । १ । वर्षकस्य । ऐश्वर्ययुक्तस्य । इन्द्रस्य । **असुरस्य** । अ० १ । १० । १ । दीप्यमानस्य । प्राणप्रदस्य । शूरस्य । **नाम** । अ० १ । २४ । ३ । म्ना अभ्यासे—मनिन् । नामधेयम्, संज्ञा । **आ** । समन्तात् । **विश्वरूपः** । शत्रुमित्रकलत्रादिषु नानास्वभावः । यथायोग्यं वर्त्तमानः । **अमृतानि** । अनश्वरसुखानि । **आ तस्थौ** । आरूढवान् । प्राप्तवान् ॥

भाषार्थः—[हे राजन्] (व्याघ्रः) बाघ के समान पराक्रमी तू (वैयाघ्रे अधि) बाघ के स्वभाव में [स्थित होकर] (महीः दिशः) बड़ी दिशाओं को (वि क्रमस्व) विक्रम से जीत । (सर्वाः) सब (विशः) प्रजायें, और (दिव्याः) उत्तम (पयस्वतीः = ०—त्यः) सार वाली (आपः) जल धारायें (त्वा) तुझको (वाञ्छन्तु) चाहें ॥ ४ ॥

भावार्थः—राजा व्याघ्र के समान पराक्रमी और जल के समान उपकारी होवे, सब प्रजागण उससे प्रीति करें और राज्य में अनावृष्टि आदि न हो ॥ ४ ॥

या आपो॑ दि॒व्याः पय॑सा मद॑न्त्य॒न्तरि॑क्ष उ॒त वा॑ पृथि॒व्याम् ।
तासां॑ त्वा॒ सर्वा॑सामपाम॒भि षि॑ञ्चामि॒ वर्च॑सा ॥ ५ ॥

याः । आपः॑ । दि॒व्याः । पय॑सा । मद॑न्ति । अ॒न्तरि॑क्षे । उ॒त । वा॒ । पृ॒थि॒व्याम् । तासा॑म् । त्वा॒ । सर्वा॑साम् । अ॒पाम् । अ॒भि । सि॒ञ्चा॒मि॒ । वर्च॑सा ॥५॥

भाषार्थः—(अन्तरिक्षे) अन्तरिक्ष में की (उत वा) और भी (पृथिव्याम्) पृथिवी पर की (याः) जो (दिव्याः) दिव्य (आपः) जल धारायें (पयसा) अपने रस से (मदन्ति) [प्राणियों को] तृप्त करती हैं, (तासाम्)

४—**व्याघ्रः** । अ० ४ । ३ । १ । व्याघ्रो व्याघ्राणाद् व्यादाय हन्तीति वा निरु० ३ । १८ । लुप्तोपममेतत् । व्याघ्रवद् दुष्प्रधर्षः । **अधि** । उपरि उपविष्टः सन् । **वैयाघ्रे** । **तस्येदम्** (पा० ४ । ३ । १२०) इति व्याघ्र—अण् । **न य्वाभ्यां पदान्ताभ्यां०** (पा० ७ । ३ । ३) इति यकारात् पूर्वम् ऐच् । व्याघ्रस्यायं स्वभावस्तस्मिन् । **विक्रमस्व** । **वेः पादविहरणे** (पा० १ । ३ । ४१) इति क्रमेरात्मनेपदम् । विक्रमेण शौर्येण व्याप्नुहि विजयस्व । **दिशः** । प्राच्याद्याः । **महीः** । महतीः । **विशः** । प्रजाः । **त्वा** । त्वां राजानम् । **सर्वाः** । **वाञ्छन्तु** । वाछि इच्छायाम् । स्वामित्वेन इच्छन्तु । **आपः** । जलानि । **दिव्याः** । दिवि भवः—यत् । उत्तमगुणयुक्ताः । **पयस्वतीः** । पयस्वत्यः । सारवत्यः ।

५—**याः** । **आपः** । जलधाराः । **दिव्याः** । श्रेष्ठाः । **पयसा** । रसेन । सारेण । **मदन्ति** । मद तृप्तियोगे । तर्पयन्ति प्राणिनः । **अन्तरिक्षे** । आकाशे वर्त-

उन (सर्वासाम्) सब (अपाम्) जल धाराओं के (वर्चसा) वलदायक सार से (त्वा) तुझको (अभि षिञ्चामि) अभिषेक कराता हूं ॥ ५ ॥

भावार्थः—राजगद्दी पर बैठने के समय राजा को औषधियों के रस से मिले हुये वृष्टि, नदी, कूप आदि के उत्तम जलों से स्नान करावें, जिससे उसका शरीर पुष्ट रहे और जल के समान वह अपने प्रजा को सुख पहुंचावे ॥ ५ ॥

अभि त्वा वर्चसासिचन्नापो दिव्याः पयस्वतीः ।
यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥ ६ ॥

अभि । त्वा । वर्चसा । असिचन् । आपः । दिव्याः । पयस्वतीः ।
यथा । असः । मित्रऽवर्धनः । तथा । त्वा । सविता । करत् ॥ ६ ॥

भाषार्थः—[हे राजन् !] (त्वा) तुझको (दिव्याः) दिव्य (पयस्वतीः = ०—त्यः) सारयुक्त (आपः) जल धाराओं ने (वर्चसा) अपने बलदायक सार से (अभि असिचन्) सब प्रकार सींचा है, (यथा) जिससे तू (मित्रवर्धनः) मित्रों की वृद्धि करने वाला (असः) होवे। (सविता) सर्वप्रेरक परमेश्वर (त्वा) तुझको (तथा) वैसे गुण वाला [जैसा जल] (करत्) करे ॥ ६ ॥

भावार्थः—अभिषेक के उपरान्त सब लोग आशीर्वाद दें, हे राजन् ! तुझे यह अभिषेक वा स्नान इसलिये कराया है कि जैसे जल अन्न आदि उत्पन्न

मानाः । **उत वा** । अपि वा । **पृथिव्याम्** । भूम्याम् अवस्थिताः । **तासाम्** । तथाविधानाम् । **त्वा** । राजानम् । **सर्वासाम्** । सर्वत्र व्याप्तानाम् । **अपाम्** । जलधाराणाम् । **अभि षिञ्चामि** । अभिषेकयुक्तं करोमि । **वर्चसा** । तेजसा । बलकरेण सारेण ॥

६—**अभि असिचन्** । षिच क्षरणे—लुङ् । अभिषेकयुक्तं कृतवत्यः । **त्वा** । राजानम् । **वर्चसा** । स्वकीयेन सारेण । **आपः** । **दिव्याः** । **पयस्वतीः** । पयस्वत्यः । सारवत्यः । **यथा** । येन प्रकारेण । **असः** । अस्तेर्लेटि अडागमः । त्वं भवेः । **मित्रवर्धनः** । म० २ । मित्राणां वर्धयिता । **तथा** । तेन-प्रकारेण । जलवत्स्वभावेन । **सविता** । सर्वप्रेरको देवः परमेश्वरः । **करत्** । लेट् । कुर्यात् ॥

करके संसार का उपकार करता है, वैसे ही सर्वप्रेरक परमेश्वर के अनुग्रह से तू प्रजाप्रेरक होकर अपने हितैषी जनों की सदा उन्नति करता रहे ॥ ६ ॥

एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वन्ति महते सौभगाय।
समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्वीपिनमप्स्व१न्तः ॥७॥

एना । व्याघ्रम् । परिऽसस्वजानाः । सिंहम् । हिन्वन्ति । महते । सौभगाय ।
समुद्रम् । न । सुऽभुवः । तस्थिऽवांसम् । मर्मृज्यन्ते । द्वीपिनम् । अप्ऽसु ।
अन्तः ॥ ७ ॥

भाषार्थः—(परिषस्वजानाः) सब ओर से चिपटे हुये लोग (एना= एनम्) इस (व्याघ्रम्) व्याघ्ररूप और (सिंहम्) सिंह समान [पराक्रमी राजा] को (महते) बहुत ही (सौभगाय) बड़े ऐश्वर्य के लिये (हिन्वन्ति) तृप्त करते हैं, और (सुभुवः) सुन्दर जन्म वा बड़ी भूमिवाले पुरुष (अप्सु अन्तः) जलों के भीतर (तस्थिवांसम्) स्थित हुये, (समुद्रम् न) समुद्र के समान [गम्भीर स्वभाव] और (द्वीपिनम्) चीते [के तुल्य पराक्रमी राजा] को (मर्मृज्यन्ते) अनेक प्रकार से शुद्ध करते वा सजाते हैं ॥ ७ ॥

७—**एना** । **द्वितीयाटौस्स्वेनः** (पा० २ । ४ । ३४) इति एतच्छब्दस्य एनादेशो द्वितीयायाम्[1] । **सुपां सुलुक्**० (पा० ७ । १ । ३९) इति विभक्तेः आच् । **चितः** (पा० ६ । १ । १६३) इति चित्वाद् अन्तोदात्तः । एनम् । **व्याघ्रम्** । व्याघ्रवत् पराक्रमयुक्तम् । **परिषस्वजानाः** । ष्वञ्ज परिष्वङ्गे—लिटः कानच् । आलिङ्गन्तः । परितः संगच्छमानाः पुरुषाः । **सिंहम्** । **सिचेः संज्ञायां हनुमौ कश्च** (उ० ५ । ६२) इति षिच क्षरणे कप्रत्ययः, चस्य हकारो नुम् च । यद्वा । आद्यन्तविपर्यये । हिसि हिंसायाम्-अच् । हिनस्तीति सिंहः । पञ्चास्यः । सिंहः सहनाद्धिंसेर्वा स्याद् विपरीतस्य सम्पूर्वस्य वा हन्तेः संहाय हन्तीति वा-निरु० ३ । १८, सिंहतुल्यपराक्रमवन्तं राजानम् । **हिन्वन्ति** । हिवि प्रीणने । इदित्त्वान्नुम् । प्रीणयन्ति । तर्पयन्ति । **महते** । अधिकाय । **सौभगाय** । **सुभग मन्त्रे**[2], इति उद्गात्रादिषु पाठाद् भावे अञ् । **ञ्नित्यादिर्नित्यम्** (पा० ६ । १ । १९७) इति आद्युदात्तः ।

१. यहाँ सायणाचार्य ने जस् के स्थान में आच् आदेश लिखा है, जो कि अशुद्ध है ॥ सम्पा० ॥

२. द्र० काशि० ५ । १ । १२६ ॥ सम्पा० ॥

भावार्थः—अभिषेक विधि के समाप्त हो चुकने पर सब बड़े बड़े लोग प्रशंसा करके राजा का उत्साह बढ़ावें और अलंकार आदि से उसको यथावत् शोभायमान करें ॥ ७ ॥

सूक्तम् ९ ॥

१—१० ॥ आञ्जनं देवता ॥ १, २, ४–१० अनुष्टुप् । ३ पथ्या पङ्क्तिः ॥

ब्रह्मविद्योपदेशः—ब्रह्म विद्या का उपदेश ॥

एहिं जीवं त्रायमाणं पर्वतस्यास्यक्ष्यम् ।
विश्वेभिर्देवैर्दत्तं परिधिर्जीवनाय कम् ॥ १ ॥

आ । इहि । जीवम् । त्रायमाणम् । पर्वतस्य । असि । अक्ष्यम् ।
विश्वेभिः । देवैः । दत्तम् । परिऽधिः । जीवनाय । कम् ॥ १ ॥

भाषार्थः—(एहि) आ । (जीवम्) जीव को (त्रायमाणम्) पालता हुआ (पर्वतस्य) पूर्ति करने वाले वा अवयवों वाले मेघ के (अक्ष्यम्) व्यवहार के लिये हितकारक, (विश्वेभिः) सब (देवैः) दिव्य गुणों के साथ (दत्तम्) दिया हुआ (कम्) तू सुख स्वरूप ब्रह्म (जीवनाय) हमारे जीवन के लिये (परिधिः) परकोटा रूप (असि) है ॥ १ ॥

सुभगत्वाय । शोभनैश्वर्याय । **समुद्रम् न** । समुद्रवद् गम्भीरस्वभावम् । **सुभुवः** । सु+भू—क्विप् । शोभना भूरुत्पत्तिर्भूमिर्वा यस्य स सुभूः शोभनजन्मानः । यद्वा । शोभनभूमयः पुरुषाः । **तस्थिवांसम्** । ष्ठा गतिनिवृत्तौ—क्वसुः । स्थितवन्तम् । **मर्मृज्यन्ते** । मृजू शौचालंकारयोः । यङि निपातनादभ्यासस्य रुगागमः । पुनः पुनः, अत्यर्थं वा शोधयन्ति अलंकुर्वन्ति वा । **द्वीपिनम्** । द्वि+इ गतौ–पप्रत्ययः । द्वौ वर्णौ ईयते द्वीपं द्विवर्णं चर्म । **अत इनिठनौ** (पा० ५ । २ । ११५) इति इनिः । शार्दूलवद् अधृष्यं राजानम् । **अप्सु** । उदकेषु । **अन्तः** । मध्ये ॥

१—**एहि** । आगच्छ । **जीवम्** । **इगुपधज्ञा०** (पा० ३ । १ । १३५) इति जीव प्राणधारणे—कः । जीवति प्राणयतीति जीवः । प्राणिनम् । आत्मानम् ।

भावार्थः—परमेश्वर मेघ के समान जगत् की रक्षा करने वाला हमारे हृदयों में विराजमान होकर हमारा प्राणाधार है, ऐसा समझ कर हम पुरुषार्थ के साथ सुख प्राप्त करें ॥ १ ॥

परिपाणं पुरुषाणां परिपाणं गवामसि ।

अश्वानामर्वतां परिपाणाय तस्थिषे ॥ २ ॥

परिऽपानम् । पुरुषाणाम् । परिऽपानम् । गवाम् । असि ।

अश्वानाम् । अर्वताम् । परिऽपानाय । तस्थिषे ॥ २ ॥

भाषार्थः—तू (पुरुषाणाम्) अग्रगामी मनुष्यों का (परिपाणम्) रक्षासाधन, और (गवाम्) गौओं का (परिपाणम्) रक्षा साधन (असि) है। और (अर्वताम्) शीघ्रगामी (अश्वानाम्) घोड़ों के (परिपाणाय) पूर्ण रक्षा के लिये (तस्थिषे) तू ही स्थित हुआ है ॥ २ ॥

त्रायमाणम् । त्रैङ् पालने—शानच् । पालयन् । **पर्वतस्य । भृमृदृशियजिपर्वि०** (उ० ३ । ११०) इति पर्व पूरणे—अतच् । यद्वा । पर्वतो मेघः—निघ० १ । १० । **पर्वमरुद्भ्यां तप् वक्तव्यः** (वा० पा० ५।२।१२२) इति पर्वन्—मत्वर्थे तप् । पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा । निरु० १ । २० । इष्टपूरकस्य यद्वा अवयवयुक्तस्य मेघस्य । **असि** । भवसि । **अक्ष्यम्** । **अशेर्देवने** (उ० ३।६५) इति अशूङ् व्याप्तौ—सः । अक्षो व्यवहारः । अक्ष—यत् । अक्षाय व्यवहाराय हितम् । **विश्वेभिः** । सर्वैः । **देवैः** । दिव्यगुणैः सह । **दत्तम्** । हृदये समर्पितम् । **परिधिः** । **उपसर्गे घोः किः** (पा० ३ । ३ । ९२) इति परि+धाञ्—किः । परितो धीयते परिधिः प्राकारः । **जीवनाय** । चिरकालजीवनार्थम् । **कम्** । कचि दीप्तौ—डः । सुखस्वरूपं ब्रह्म ॥

२—**परिपाणम्** । पातेः करणे—ल्युट् । **वा भावकरणयोः** (पा० ८ । ४ । १०) इति विकल्पेन नस्य णः । परिरक्षणसाधनम् । **पुरुषाणाम्** । अ० १।१६।४ । पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य—निरु० २ । ३ । अग्रगामिनाम् । मनुष्याणाम् । **गवाम्** । धेनूनाम् । **असि** । भवसि । **अश्वानाम्** । मार्गव्यापनशीलानां तुरङ्गाणाम् । **अर्वताम्** । **स्नामदिपद्यर्त्तिपृशकिभ्यो**

भावार्थः—वह परब्रह्म कृपा करके हमसे सब पदार्थों की रक्षा कराता है, इस कारण अभिमान छोड़कर हम पुरुषार्थ करते रहें ॥ २ ॥

उतासि परिपाणं यातुजम्भनमाञ्जन । उतामृतस्य त्वं वेत्थाथो असि जीवभोजनमथो हरितभेषजम् ॥ ३ ॥

उत । असि । परिऽपानम् । यातुऽजम्भनम् । आऽअञ्जन । उत । अमृतस्य । त्वम् । वेत्थ । अथो इति । असि । जीवऽभोजनम् । अथो इति । हरितऽभेषजम् ॥ ३ ॥

भाषार्थः—(उत) और (आञ्जन) हे संसार के व्यक्त करने वाले ब्रह्म ! तू (परिपाणम्) हमारी रक्षा का साधन, (यातुजम्भनम्) पीड़ाओं का नाश करने वाला (असि) है, (उत) और (त्वम्) तू (अमृतस्य) अमृत अर्थात् मोक्ष सुख का (वेत्थ) ज्ञाता है, (अथो) और भी तू (जीवभोजनम्) जीवों का पालने वाला (अथो) और भी (हरितभेषजम्) रोग से उत्पन्न पीतरंग की औषधि (असि) है ॥ ३ ॥

भावार्थः—संसार के कर्ता धर्ता परमेश्वर के उपकारों को देखकर मनुष्य प्रयत्न पूर्वक विद्यादि सुख साधनों की प्राप्ति से मोक्षानन्द भोगें ॥ ३ ॥

वनिप (उ० ४ । ११३) इति ऋ गतिप्रापणयोः—वनिप् । **अर्वणस्त्रसावनञः** (पा० ६ । ४ । १२७) इति नकारस्य तृ=तकारः । गन्तॄणाम् । शीघ्रगामिनाम् **परिपाणाय** । परिरक्षणाय । **तस्थिषे** । ष्ठा—लिट् । स्थितं बभूविथ त्वं ब्रह्म ॥

३—**उत** । अपि च । **असि** । भवसि । **परिपाणम्** । म० २ । परिरक्षण-साधनम् । **यातुजम्भनम्** । **कृवापाजिमि०** (उ० १।१) इति यत ताडने[1]—उण् । जभि नाशने—ल्युट् । यातूनां यातनानां पीडानां नाशनम् । **आञ्जन** । आङ् पूर्वाद् अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—ल्युट् । आसमन्ताद् अनक्ति व्यनक्ति व्यक्तं करोति अव्यक्तं जगत् आञ्जनम् । तत्सम्बुद्धौ । हे यथावत् संसारस्य व्यक्तीकारक ब्रह्म । **अमृतस्य** । मोक्षस्य । परमानन्दस्य । **त्वम्** । **वेत्थ** । **विदो लटो वा** (पा०३।४।८३) इति थल् आदेशः । ज्ञाता भवसि । **अथो** । अपि च । **जीवभोजनम्** । भुज पालनाभ्यवहारयोः—ल्युट् । जीवानां जीवतां प्राणिनां पालनम्

---

१. ताडनार्थक यत धातु धातुपाठादि में नहीं है । इस विषय में हमारी का० २ पृ० २७१ की टिप्पणी देखें ॥ सम्पा० ॥

यस्याञ्जन प्रसर्पस्यङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मं वि बाधस उग्रो मध्यमशीरिव ॥ ४ ॥

यस्य । आऽअञ्जन । प्रऽसर्पसि । अंगम्ऽअंगम् । परुःऽपरुः ।
ततः । यक्ष्मम् । वि । बाधसे । उग्रः । मध्यमशीःऽइव ॥ ४ ॥

भाषार्थः—(आञ्जन) हे संसार के प्रकट करने वाले ब्रह्म ! तू (यस्य) जिसके (अङ्गमङ्गम्) अङ्ग अङ्ग में और (परुष्परुः) जोड़ जोड़ में (प्रसर्पसि) व्याप जाता है, (ततः) उस पुरुष से (यक्ष्मम्) राजरोग को (विबाधसे) तू सर्वदा हटा देता है, (इव) जैसे (उग्रः) प्रबल (मध्यमशीः) बिचौलिया पुरुष ॥ ४ ॥

भावार्थः—जो पुरुष पूर्ण भक्ति से परमात्मा को अपने रोम २ में व्यापक जानकर पुरुषार्थ करता है। परमात्मा उसके सब विघ्नों का नाश कर देता है, जैसे सद्वैद्य बड़े बड़े रोगों को, और नीति कुशल मध्यस्थ राजा आदि वादी और प्रतिवादी के टंटों को मिटा देता है ॥ ४ ॥

नैनं प्राप्नोति शपथो न कृत्या नाभि शोचनम् ।
नैनं विष्कन्धमश्नुते यस्त्वा बिभर्त्याञ्जन ॥ ५ ॥

हरितभेषजम् । हृश्याभ्यामितन् (उ० ३ । ९३) इति हृञ् हरणे—इतन्। हरति सुखमिति हरितः, भेषं रोगं जयतीति भेषजम् । भेष+जि—डः । हरितस्य रोगजनितस्य पीतवर्णस्यौषधम् । तद्वद् उपकारम् ॥

४ **यस्य** । पुरुषस्य । **आञ्जन** । हे सम्यक् संसारस्य व्यक्तीकारक ब्रह्म । **प्रसर्पसि** । प्रकर्षेण व्याप्नोषि । **अङ्गमङ्गम्** । प्रत्येकमङ्गम् । **परुष्परुः** । अर्त्तिपृवपि० (उ० २ । ११७) इति पॄ पालनपूरणयोः—उसिः । प्रत्येकपरुः । प्रत्येकग्रन्थिम् । **ततः** । तस्मात् पुरुषात् । **वि बाधसे** । विविधं निवारयसि । **यक्ष्मम्** । अ० २ । १० । ५ । राजरोगम् । क्षयम् । **उग्रः** । उद्गूर्णबलः । प्रबलः । **मध्यमशीः** । क्विप् च (पा० ३ । २ । ७६) इदि मध्यम+शीङ्-क्विप् । मध्यदेशे शेते वर्तते सः । वादिप्रतिवादिनोर्वाक्यादिविषयविमर्शपूर्वकं तत्वनिर्णयकः मध्यवेत्ता । मध्यस्थः । **इव** । यथा ॥

न । एनम् । प्र । आप्नोति । शपथः । न । कृत्या । न । अभिऽशोचनम् ।
न । एनम् । विऽस्कन्धम् । अश्नुते । यः । त्वा । बिभर्ति । आऽअञ्जन ॥५॥

भाषार्थः—(न) न तो (एनम्) इस [पुरुष] को (शपथः) क्रोध वचन, (न) न (कृत्या) हिंसा क्रिया और (न) न (अभिशोचनम्) महाशोक (प्राप्नोति) पहुंचता है, और (न) न (एनम्) इसको (विष्कन्धम्) विघ्न (अश्नुते) व्यापता है, (यः) जो [पुरुष] (आञ्जन) हे संसार को व्यक्त करने वाले ब्रह्म ! (त्वा) तुझको (बिभर्ति) धारण करता है ॥ ५ ॥

भावार्थः—जो मनुष्य शुद्ध अन्तःकरण से परमात्मा को आत्मा में स्थिर करता है, उसको आध्यात्मिक शान्ति होने से आधिभौतिक और आधिदैविक शान्ति भी मिलती है ॥ ५ ॥

असन्मन्त्राद् दुष्वप्न्याद् दुष्कृताच्छमलादुत ।
दुर्हार्दुश्चक्षुषो घोरात् तस्मान्नः पाह्याञ्जन ॥ ६ ॥

असत्ऽमन्त्रात् । दुःऽस्वप्न्यात् । दुःऽकृतात् । शमलात् । उत । दुःऽहार्दः ।
चक्षुषः । घोरात् । तस्मात् । नः । पाहि । आऽअञ्जन ॥ ६ ॥

भाषार्थः—(आञ्जन) हे संसार के व्यक्त करने वाले ब्रह्म ! तू (असन्म-

---

५—न । नहि । एनम् । पुरुषम् । प्राप्नोति । गच्छति । शपथः । शीङ्शपिरुगमि०(उ०३।११३) इति शप आक्रोशे-अथप्रत्ययः । मिथ्यापवादः । उपद्रवः । क्रोधवचनम् । कृत्या । विभाषा कृवृषोः (पा० ३ । १ । १२०) इति कृञ् हिंसायाम्—क्यप्, तुक्, टाप् च । हिंसाक्रिया । अभिशोचनम् । शुच शोके-ल्युट् । इष्टवियोगानुचिन्तनम् । चित्तविकलता । विष्कन्धम् । अ० १ । १६ । ३ । विशेषेण शोषकः । विघ्नः । अश्नुते । व्याप्नोति । यः । आत्मा । त्वा । त्वाम् । बिभर्ति । आत्मनि धारयति । आञ्जन । म० ३ । हे जगतो व्यक्तीकारक ब्रह्म ॥

६—असन्मन्त्रात् । असत्+मत्रि गुप्तभाषणे-अञ् । मन्त्रा. मननात्—

न्त्रात्) असत्य भाषण से (दुःस्वप्न्यात्) बुरी निद्रा में उठे हुए कुविचार से (दुष्कृतात्) दुष्ट कर्म से, (शमलात्) अशुद्धता से (उत) और (दुर्हार्दः) दुष्ट हृदय वाले (घोरात्) घोर वा भयानक (चक्षुषः) नेत्र से (तस्मात्) इस सबसे (नः) हमें (पाहि) बचा ॥ ६ ॥

भावार्थः—मनुष्य परमेश्वर के सहाय से प्रयत्न करें कि वे कभी मिथ्या न बोलें, स्वप्न में बुरा विचार न करें, और दुष्कर्मों से बच कर शुद्ध आचरण रक्खें तथा नेत्र आदि इन्द्रियों से कुचेष्टा न करें ॥ ६ ॥

इदं विद्वानाञ्जन सत्यं वक्ष्यामि नानृतम् ।
सनेयमश्वं गामहमात्मानं तव पूरुष ॥ ७ ॥

इदम् । विद्वान् । आऽअञ्जन । सत्यम् । वक्ष्यामि । न । अनृतम् ॥
सनेयम् । अश्वम् । गाम् । अहम् । आत्मानम् । तव । पुरुष ॥ ७ ॥

भाषार्थः—(आञ्जन) हे संसार के व्यक्त करने वाले ब्रह्म ! तेरे (इदम्) परम ऐश्वर्य को (विद्वान्) जानता हुआ मैं (सत्यम्) सत्य (वक्ष्यामि) बोलूंगा, (अनृतम्) असत्य (न) नहीं । (पूरुष = पुरुष) हे सबके अगुआ पुरुष

निरु० ७ । १२ । असत्यभाषणात् । **दुष्वप्न्यात्** । दुःस्वप्नचात् । दुर् दुष्टं स्वप्नेषु भवात् कुविचारात् । **दुष्कृतात्** । दुष्टकृतात् । पापात् । **शमलात्** । **शकिशम्योर्नित्** (उ० १ । ११२) इति शमु उपशमे-कलप्रत्ययः । अशुद्धव्यवहारात् । **उत** । अपि च । **दुर्हार्दः** । अ० २ । ७ । ५ । हार्दयतेः क्विपि णिलोपे रूपम् । दुष्टहृदययुक्तात् । **चक्षुषः** । नेत्रात् । **घोरात्** । क्रूरात् । **तस्मात्** उपर्युक्तात् सर्वस्मात् । **नः** । अस्मान् । **पाहि** । रक्ष । **आञ्जन** । म० ३ हे जगतो व्यक्तीकारक ब्रह्म ।

७—**इदम्** । **इन्देः कमिन्नलोपश्च** (उ० ४ । १५७) इति इदि परमैश्वर्ये कमिन्, नलोपः । परमैश्वर्यम् । महाप्रभुताम् । **विद्वान्** । अ० २ । १ । २ । विद ज्ञाने—शतृः । वसुरादेशः । जानन् । **सत्यम्** । यथार्थम् । **वक्ष्यामि** । वच—लृट् वदिष्यामि । **न** । नहि । **अनृतम्** । असत्यम् । **सनेयम्** । षण सम्भक्तौ—लिङ्

परमेश्वर ! (तव) तेरे [दिये हुए] (अश्वम्) घोड़े, (गाम्) गौ वा भूमि और (आत्मानम्) आत्मबल को (अहम्) मैं (सनेयम्) सेवन करूं ॥ ७ ॥

भावार्थः—मनुष्य परमेश्वर की महिमा देख कर सदा सत्य ही बोले और पुरुषार्थ पूर्वक सब पदार्थों से उपकार लेवे ॥ ७ ॥

इस मन्त्र का उत्तरार्ध ऋ० १० । ९७ । ४ और यजु० १२ । ७८ में इस प्रकार है—

सनेयमश्वं गां वासं आत्मानं तवं पूरुष ॥

हे पुरुष ! तेरे [दिये हुये] घोड़े, गौ वा भूमि वस्त्र और आत्मबल को सेवन करूं ॥

त्रयो दासा आञ्जनस्य तक्मा बलास आदहिः ।
वर्षिष्ठः पर्वतानां त्रिककुन्नाम ते पिता ॥ ८ ॥

त्रयः । दासाः । आऽअञ्जनस्य । तक्मा । बलासः । आत् । अहिः । वर्षिष्ठः । पर्वतानाम् । त्रिऽककुत् । नाम । ते । पिता ॥८॥

भाषार्थः—(तक्मा) जीवन को कष्ट देने वाला ज्वर, (बलासः) बल का गिराने वाला संनिपात, कफादि रोग, (आत्) और (अहिः) जीवों को मारने वाला सांप, (त्रयः) यह तीनों (आञ्जनस्य) संसार के व्यक्त करने वाले

संभजेयम् । **अश्वम्** । हयम् । **गाम्** । धेनुं भूमिं वा । **अहम्** । उपासकः । **आत्मानम्** । अ० १ । १८ । ३ । आत्मबलम् । पुरुषार्थम् । **तव** । तव प्रसादात् । **पूरुष** । म० २ । छान्दसो दीर्घः । हे अग्रगामिन् परमात्मन् ॥

८—त्रयः । त्रिसंख्याकाः । **दासाः** । **दंसेष्टनौ न आ च** (उ० ५ । १०) इति दसि दर्शने—टः । दंसयति पश्यतीति दासः । यद्वा । दासृ दाने—अच् । दासति ददाति आत्मानं स दासः । सेवकाः । **आञ्जनस्य** । म० ३ । जगतो व्यक्तीकारकस्य ब्रह्मणः । **तक्मा** । अ० १ । २५ । १ । कृच्छ्रजीवनकारी ज्वरः । **बलासः** । बल+असु क्षेपणे—अण् । बलमस्यति क्षिपतीति । श्लेष्मविकारः । **आत्** । अपि च । **अहिः** । अ० २।५।५। आहन्ता । सर्पः । **वर्षिष्ठः** । **प्रियस्थिर०** (पा०६।४।१५७) इति वृद्धशब्दस्य—इष्ठनि वर्षि इत्यादेशः । वृद्धतमः । **पर्वतानाम्** । म० १ । पर्ववान् पर्वतः—निरु० १ । २० । पर्ववतां लोकानाम् । **त्रिककुत्** । त्रि+

ब्रह्म के (दासाः) दास हैं। [हे आञ्जन, ईश्वर !] (वर्षिष्ठः) सबमें वृद्ध (पर्वतानाम्) अवयव वाले स्थूल लोकों का (पिता) पालनकर्त्ता, (त्रिककुत्) तीन प्रकार के [आध्यात्मिक, आधिभौतिक और आधिदैविक] सुखों का पहुंचाने वाला यद्वा तीनों लोकों वा कालों में गति वाला (ते) तेरा (नाम) नाम है ॥ ८ ॥

भावार्थः—ईश्वरीय नियम तोड़ने वाले मनुष्यों को परमेश्वर अपनी न्याय व्यवस्था से रोग आदि कष्ट देता है, और अपने आज्ञाकारियों को वह अत्यन्त सुख पहुंचाता है ॥ ८ ॥

यदाञ्जनं त्रैककुदं जातं हिमवतस्परि ।

यातूंश्च सर्वान् जम्भयत्सर्वाश्च यातुधान्यः ॥ ९ ॥

यत् । आऽअञ्जनम् । त्रैककुदम् । जातम् । हिमऽवतः । परि ।

यातून् । च । सर्वान् । जम्भयत् । सर्वाः । च । यातुऽधान्यः ॥ ९ ॥

भाषार्थः—(यत्) सबका पूजनीय वा पदार्थों की संगति करने वाला (त्रैककुदम्) तीन प्रकार के [आध्यात्मिक आदि] सुखों के पहुंचाने वाले यद्वा तीनों लोकों वा कालों में गति वाले पुरुषों का ईश्वर, (जातम्) सर्व

क + कुत् । कं, सुखम्—निघ० ३ । ६ । कवतेः गतिकर्मा—निघ० २ । १४ । कुङ् शब्दे—क्विप्, तुक् च । अन्तर्भावितण्यर्थः । आध्यात्मिकादीनि त्रीणि कानि सुखानि कावयति गमयति स त्रिककुत् । यद्वा । **मृग्रोरुतिः** (उ० १ । ९४) इति त्रि + कक गतौ—उतिः । त्रिषु लोकेषु कालेषु वा ककुद् गतिर्यस्य सः । **नाम** । संज्ञा । **ते** तव । **पिता** । सर्वस्य पाता पालयिता वा ॥

९—**यत्** । **त्यजितनियजिभ्यो डित्** (उ० १ । १३२) इति यज देवपूजा सङ्गतिकरणदानेषु—अदिः, स च डित् । यजनीयं पूजनीयम् । पदार्थानां सङ्गति कारकम् । **आञ्जनम्** । म० ३ । लोकानां व्यक्तीकारकम् ब्रह्म । **त्रैककुदम्** । **तस्येश्वरः** (पा० ५ । १ । ४२) इति बाहुलकात् त्रिककुद्—अण् । त्रिककुद् इति व्याख्यातम् म० ८ । त्रिककुदाम् आध्यात्मादित्रिप्रकारस्य सुखस्य प्रापकानां, यद्वा, त्रिषु लोकेषु कालेषु गतिवतां मनुष्याणां ईश्वरम् । **जातम्** ।

प्रसिद्ध, (हिमवतः) हिंसा वाले कर्म से (परि) पृथक् वर्तमान, (आञ्जनम्) संसार का व्यक्त करने वाला ब्रह्म (सर्वान्) सब (यातून्) पीड़ा देने वाले दुष्टों (च) और (सर्वाः) सब (यातुधान्यः =०—नीः) पीड़ा देने वाली शत्रु सेनाओं को (च) भी (जम्भयत्) नाश करने वाला है ॥ ९ ॥

भावार्थः—जो पुण्यात्मा पुरुष विद्या बल से सब प्रकार के सुखों को पहुंचाते, और तीनों द्यावापृथिवी और अन्तरिक्ष लोकों, और तीनों भूत, भविष्यत् और वर्तमान कालों के वृत्तान्त जानते हैं, वे परब्रह्म की छत्र छाया में रह कर सब विघ्नों को हटा कर आनन्द भोगते हैं ॥ ९ ॥

यदि वासि त्रैककुदं यदि यामुनमुच्यसे ।
उभे ते भद्रे नाम्नी ताभ्यां नः पाह्याञ्जन ॥ १० ॥

यदि । वा । असि । त्रैककुदम् । यदि । यामुनम् । उच्यसे । उभे इति । ते । भद्रे इति । नाम्नी इति । ताभ्याम् । नः । पाहि । आऽअञ्जन ॥१०॥

भाषार्थः—(यदि वा) चाहे तू (त्रैककुदम्) तीन प्रकार के [आध्यात्मिक आदि] सुखों के पहुंचाने वाले, यद्वा तीनों लोकों वा कालों में गति वाले पुरुषों का ईश्वर (असि) है, (यदि=यदि वा) चाहे तू (यामुनम्) यमों, नियन्ताओं, न्यायकारियों का हितकारी (उच्यसे) कहा जाता है, (उभे) दोनों (ते) तेरे (नाम्नी) नाम (भद्रे) कल्याण कारक हैं, (आञ्जन) हे

सर्वत्र प्रादुर्भूतम् । **हिमवतः** । **हन्तेर्हि च** (उ० १ । १४७) इति हन हिंसागत्योः मक्, हिरादेशः । मतुप् । हिंसायुक्तात् कर्मणः । **परि** । वर्जने । पृथग् वर्तमानम् । **यातून्** । **कृवापा०** (उ० १ । १) इति यत ताडने[1]—उण् । पीडकान् राक्षसान् । **सर्वान्** । अशेषान् । **जम्भयत्** । नाशयद् वर्तते । **सर्वाः** । **च** । **यातुधान्यः** । अ० १ । २८ । २ । शसः स्थाने जस् । यातुधानीः । पीड़ादायिनीः शत्रुसेनाः ॥

१०—**यदि वा** । अथवा । **असि** । भवसि । **त्रैककुदम्** । व्याख्यातम् म०९ । **यदि** । अथवा । **यामुनम्** । **अजियमिशीङ्भ्यश्च** (उ० ३ । ६१) इति यम नियमने—उनन् । यमयतीति यमुनः । **तस्मै हितम्** (पा० ५ । १ । ५) इति अण् ।

---

१. देखें काण्ड २ पृ० २७१ में टिप्पणी ॥ सम्पा० ॥

संसार के व्यक्त करने वाले ब्रह्म ! (ताभ्याम्) उन दोनों से (नः पाहि) हमारी रक्षा कर ॥ १० ॥

भावार्थः—मनुष्य परमेश्वर के उत्तम उत्तम गुणों का चिन्तन करके पुरुषार्थ के साथ दुष्कर्मों से बच कर सदा आनन्द भोगें ॥ १० ॥

सूक्तम् १० ॥

१—७ । शङ्खो देवता ॥ १–५ अनुष्टुप्, ६ पथ्या पङ्क्तिः ७ पञ्चपदा त्रिष्टुप् ॥

विघ्ननिवारणायोपदेशः—विघ्नों के हटाने के लिये उपदेश ।

वाताज्जातो अन्तरिक्षाद् विद्युतो ज्योतिषस्परि ।
स नो हिरण्यजाः शङ्खः कृशनः पात्वंहसः ॥ १ ॥

वातात् । जातः । अन्तरिक्षात् । विऽद्युतः । ज्योतिषः । परि ।
सः । नः । हिरण्यऽजाः । शङ्खः । कृशनः । पातु । अंहसः ॥ १ ॥

भाषार्थः—(वातात्) पवन से, (अन्तरिक्षात्) आकाश से (विद्युतः) बिजुली से, और (ज्योतिषः) सूर्य से, (परि) ऊपर (जातः) प्रकट होने वाला (सः) दुःख नाशक ईश्वर (हिरण्यजाः) सूर्यादि तेजों का उत्पन्न करने वाला, (कृशनः) सूक्ष्म रचना करने वाला, (शङ्खः) सबों का विवेचन करने वाला

यमुनेभ्यो यमेभ्यो न्यायकारिभ्यो हितम् । **उच्यसे** । त्वं कथ्यसे । **उभे** । त्रैककुदं यामुनमिति । **ते** । तव । **भद्रे** । कल्याणकरे । **नाम्नी** । नामनी, संज्ञे । **ताभ्याम्** । नामभ्याम् । **नः** । अस्मान् । **पाहि** । रक्ष । **आञ्जन** । म० ३ । हे संसारस्य व्यक्तीकारक, ब्रह्म ॥

१—**वातात्** । अ० १ । ११ । ६ । वायुसकाशात् । **जातः** । प्रादुर्भूतः । **अन्तरिक्षात्** । अ० १ । ३० । ३ । सर्वमध्ये दृश्यमानात् । आकाशात् । **विद्युतः** । **भ्राजभासधुर्विद्युतोर्जि०** (पा० ३ । २ । १७७) इति वि + द्युत दीप्तौ—क्विप् । विद्योतमानायाः । तडितः सकाशात् । **ज्योतिषः** । अ० १ । ९ । १ । दीप्यमानात् सूर्यात् । **परि** । अधि । उपरि भागे जातः । **पञ्चम्याः परावध्यर्थे** (पा० ८ । ३ । ५१) इति विसर्जनीयस्य सत्वम् । **सः** । षो अन्तकर्मणि—डः । दुःखनाशकः । विष्णुः । ईश्वरः । **नः** । अस्मान् । **हिरण्यजाः** । हिरण्यम् । अ० १ । ९ । २ । जन

वा देखने वाला, वा शान्ति देने वाला परमेश्वर (नः) हमको (अंहसः) रोग-जनक दुष्कर्म से (पातु) बचावे ॥ १ ॥

भावार्थः—परमेश्वर संसार के सब सूक्ष्म और स्थूल पदार्थों का रचने वाला और हमारे गुप्त प्रकट कर्मों का देखने और विचारने वाला है, उसका सदा ध्यान करके हम दुष्कर्मों से बचकर सत्कर्म करते रहें ॥ १ ॥

यो अग्रतो रोचनानां समुद्रादधि जज्ञिषे ।
शङ्खेन हत्वा रक्षांस्यत्रिणो वि षहामहे ॥ २ ॥

यः । अग्रतः । रोचनानाम् । समुद्रात् । अधि । जज्ञिषे ।
शङ्खेन । हत्वा । रक्षांसि । अत्रिणः । वि । सहामहे ॥ २ ॥

भाषार्थः—(यः = यः त्वम्) जो तू (रोचनानाम्) प्रकाशमान लोकों के (अग्रतः) आगे और (समुद्रात्) जल समूह समुद्र से भी (अधि) ऊपर [देश-और काल में] (जज्ञिषे) प्रकट हुआ था, [उस तुझ] (शङ्खेन) सबों के विवेचन करने वाले, वा देखने वाले, वा शान्ति देने वाले, परमेश्वर [के आश्रय]

सनखन० (पा० ३ । २ । ६७) इति जन जनने, वा जनी प्रादुर्भावे—विट् । **विड्वनो-रनुनासिकस्यात्** (पा० ६ । ४ । ४१) इति आत्त्वम् । हिरण्यानां तेजसां सूर्यादीनां सुवर्णादिधनानां च जनयिता । **शङ्खः । शमेः खः** (उ०१।१०२)इति शम आलोचने = विवेचने । यद्वा । शमो दर्शने । यद्वा । शमु उपशमे = शान्तीकरणे—खप्रत्ययः । सर्वेषां विवेचको विचारकर्त्ता दर्शको शान्तिदायको वा परमेश्वरः । **कृशनः । कॄपॄवृजि०** (उ० २ । ८१) इति कृश तनूकरणे—क्युः । कृशनं हिरण्य-म्—निघ० १ । २ । रूपम् निघ० ३ । ७ । तनूकर्ता । सूक्ष्मरचयिता । **पातु** । रक्षतु । **अंहसः । अमेर्हुक् च** (उ० ४ । २१३) इति अम रोगे गतौ च—असुन् हुक् च । पापात् ॥

२—**यः** । हे शङ्ख ! यस्त्वम् । **अग्रतः** । अग्रे । आदौ । **रोचनानाम्** । **अनुदा-त्तेतश्च हलादेः** (पा० ३ । २ । १४९) इति रुच दीप्तौ—युच् । प्रकाशमानानां नक्षत्रादीनाम् । **समुद्रात्** । जलसमूहात् । **अधि** । उपरि देशे काले च । **जज्ञिषे** । जनी—लिट् । त्वं प्रादुर्बभूविथ । **शङ्खेन** । म० १ । सर्वेषां विवेचकेन दर्शकेन,शा-

से (रक्षांसि) जिनसे रक्षा की जावे उन राक्षसों को (हत्वा) मारकर (अत्रिणः) पेटार्थियों को (वि) विविध प्रकार से (सहामहे) हम दबाते हैं ॥ २॥

भावार्थः—सर्वदा सर्वोपरि विराजमान परमेश्वर की महिमा और उपकारों को विचारकर, हम लोग कुव्यवहार से बचकर पुरुषार्थ के साथ आनन्द भोगें ॥ २ ॥

शङ्खेनामीवाममतिं शङ्खेनोत सदान्वाः ।

शङ्खो नो विश्वभेषजः कृशनः पात्वंहसः ॥ ३ ॥

शङ्खेन । अमीवाम् । अमतिम् । शङ्खेन । उत । सदान्वाः ।

शङ्खः । नः । विश्वऽभेषजः । कृशनः । पातु । अंहसः ॥ ३ ॥

भाषार्थः—(शङ्खेन) सबों के विचार करने वाले परमेश्वर से (अमीवाम्) अपनी पीड़ा और (अमतिम्) कुमति को (उत) और भी (शङ्खेन सबों के देखने वाले परमेश्वर से (सदान्वाः) सदा चिल्लाने वाली, यद्वा दानवों, दुष्टों के साथ रहने वाली निर्धनता आदि विपत्तियों को [विषहामहे म० २] [हम दवाते हैं म० २]। (शङ्खः) शान्ति देने वाला, (विश्वभेषजः सब भय का जीतने वाला, (कृशनः) सूक्ष्म रचना करने वाला परमात्मा (नः हमको (अंहसः) पाप से (पातु) बचावे ॥ ३ ॥

भावार्थः—मनुष्य जगदीश्वर के सर्वोपकारक गुणों को विचारता हुआ प्रयत्न करके दुष्कर्मों से अपनी रक्षा करे ॥ ३ ॥

न्तिदायकेन वा परमेश्वरेण । **हत्वा** । नाशयित्वा । **रक्षांसि** । अ० १ । २१ । ३ राक्षसान् । शत्रून् । **अत्रिणः** । अ० १ । ७ । ३ । अद भक्षणे-त्रिनिः । भक्षणशीलान् । उदरपोषकान् । **वि** । विशेषेण । **सहामहे** । अभिभवामः ॥

३—शङ्खेन । म० १ तथा २ । **अमीवाम्** । **इण्शीभ्यां वन्** (उ०१।१५२) इति अम रोगे–वन् । ईडागमः । टाप् । पीडाम् । रोगम् । **अमतिम्** । कुमतिम् । अज्ञानम् । **उत** । अपि च । **सदान्वाः** । अ० २ । १४ । १ । सदा नोनूयमानाः शब्दायमानाः । यद्वा । सदानवाः, दानवैः सह वर्तमाना दरिद्रतादिविपत्तीः, "विषहामहे"–इत्यनुषज्यते–म० २ । **शङ्खः** । म० १ । **नः** । अस्मान् । **विश्वभेषजः** । अ० २ । ४ । ३ । सर्वभयजेता । सर्वौषधः । **कृशनः पातु अंहसः** । व्याख्यातं म० ॥ १ ॥

दिवि जातः समुद्रजः सिन्धुतस्पर्याभृतः ।
स नो हिरण्यजाः शङ्ख आयुष्प्रतरणो मणिः ॥ ४ ॥

दिवि । जातः । समुद्रऽजः । सिन्धुतः । परि । आऽभृतः ।
सः । नः । हिरण्यऽजाः । शङ्खः । आयुःऽप्रतरणः । मणिः ॥ ४ ॥

भाषार्थः—(दिवि) सूर्यमण्डल में (जातः) प्रकट, (समुद्रजः) अन्तरिक्ष में प्रकट, (सिन्धुतः) पार्थिव समुद्र से (परि) ऊपर (आभृतः) सर्वथा पुष्टि को प्राप्त, (सः) दुःखनाशक, (हिरण्यजाः) सूर्यादि तेजों का उत्पन्न करने वाला, (शङ्खः) शान्तिकारक, (मणिः) प्रशंसा योग्य परमेश्वर (नः) हमारा (आयुष्प्रतरणः) जीवन बढ़ाने वाला है ॥ ४ ॥

भावार्थः—परमात्मा सबके ऊपर, नीचे, मध्य में विराजमान होकर अपनी न्याय व्यवस्था से हमारे उत्तम कर्मों के अनुसार हमें उत्तम फल देता है ॥ ४ ॥

समुद्राज्जातो मणिर्वृत्राज्जातो दिवाकरः ।
सो अस्मान्त्सर्वतः पातु हेत्या देवासुरेभ्यः ॥ ५ ॥

समुद्रात् । जातः । मणिः । वृत्रात् । जातः । दिवाऽकरः ।
सः । अस्मान् । सर्वतः । पातु । हेत्याः । देवऽअसुरेभ्यः ॥ ५ ॥

भाषार्थः— (वृत्रात्) ढकने वाले मेघ से (जातः) प्रकट हुये (दिवाकरः)

४—**दिवि** । द्युलोके सूर्यमण्डले । **जातः** । प्रादुर्भूतः । वर्तमानः । **समुद्रजः** । सप्तम्यां जनेर्डः (पा० ३ । २ । ९७) इति डप्रत्ययः । अन्तरिक्षे प्रत्यक्षः । **सिन्धुतः** । पार्थिवजलौघात् । **परि** । म० १ । दुःखनाशकः ईश्वरः । **आभृतः** । समन्तात् पुष्टिं प्राप्तः । **सः** । म० १ । अधि । उपरि । **नः** । अस्माकम् । अस्मभ्यम् । **हिरण्यजाः** । म० १ । तेजसां जनयिता । **शङ्खः** । म० १ । शान्तिकारकः । **आयुष्प्रतरणः** । आयुषो जीवनस्य प्रवर्धयिता । **मणिः** । अ० १ । २९ । १ । रत्नम् । प्रशंसनीयः परमेश्वरः ॥

५—**समुद्रात्** । अन्तरिक्षात् । अन्तरिक्षस्थलोकजातात् । **जातः** । प्रादु-

सूर्य [के समान] (समुद्रात्) अन्तरिक्ष से (जातः) प्रकट हुआ, (मणिः) प्रशंसा योग्य (सः) दुःखनाशक, विष्णु (अस्मान्) हमको (सर्वतः) सब ओर से (हेत्या) अपने वज्र द्वारा (देवासुरेभ्यः) देवताओं के गिराने वाले शत्रुओं से (पातु) बचावे ॥ ५ ॥

भावार्थः—जैसे सूर्य मेघ मंडल से निकल कर देदीप्यमान होता है, इसी प्रकार परमात्मा अन्तरिक्षस्थ प्रत्येक पदार्थ से विज्ञानियों को प्रकाशमान दीखता है। वह जगदीश्वर दुष्टों को दंड और शिष्टों को आनन्द देता है ॥ ५ ॥

हिरण्यानामेकोऽसि सोमात् त्वमधि जज्ञिषे । रथे त्वमसि दर्शत इषुधौ रोचनस्त्वं प्रण आयूंषि तारिषत् ॥ ६ ॥

हिरण्यानाम् । एकः । असि । सोमात् । त्वम् । अधि । जज्ञिषे । रथे । त्वम् । असि । दर्शतः । इषुऽधौ । रोचनः । त्वम् । प्र । नः । आयूंषि । तारिषत् ॥ ६ ॥

भाषार्थः—(हिरण्यानाम्) सूर्यादि तेजों के बीच तू (एकः) एक (असि) है, (त्वम्) तू (सोमात्) सूर्य लोक से (अधि) ऊपर (जज्ञिषे) प्रकट हुआ था, (त्वम्) तू (रथे) रथ में (दर्शतः) दृश्यमान और (त्वम्)

भूतः । उत्पन्नः । **मणिः** । म० ४ । प्रशंसनीयः परमेश्वरः । **वृत्रात्** । अ० २ । ५ । ३ । आवरकाद् मेघात् । **दिवाकरः** । **दिवाविभानिशा०** (पा० ३ । २ । २१) इति दिवा + कृञ् करणे—टः । दिवा दिनं करोतीति । सूर्यः । लुप्तोपममेतत् । तद्वत् प्रभातिशययुक्तः परमेश्वरः । **सः** । म० १ । दुःखनाशक ईश्वरः । **अस्मान्** । वेदानुगामिनः पुरुषान् । **सर्वतः** । सर्वस्मादुपद्रवात् । **पातु** । रक्षतु । **हेत्या** । अ० १ । १३ । ३ । वज्रम्—निघ० २ । २० । **देवासुरेभ्यः** । **असेरुरन्** (उ० १ । ४२) इति असु क्षेपणे—उरन् । अस्यति क्षिपति देवान् सोऽसुरः । देवानां धर्मात्मनाम् असुरेभ्यः क्षेपकेभ्यः सकाशात् ॥

६—**हिरण्यानाम्** । अन्धकारहरणशीलानां सूर्यादितेजसां मध्ये । **एकः** । अद्वितीयः । **असि, सोमात्** । सोमः सूर्यः, प्रसवनात्—निरु० १४ । १२ ।

तू (इषुधौ) तूणीर में (रोचनः) प्रकाशमान (असि) है। [आप] (नः) हमारे (आयूंषि) जीवनों को (प्रतारिषत्) बढ़ावें ॥ ६ ॥

भावार्थः—अद्वितीय प्रकाशस्वरूप परमात्मा सूर्यादि लोकों से काल और विस्तार में बड़ा है, वही रथारूढ़ और बाणधारी शूर को रणक्षेत्र में बल देता है, उसी जगदीश्वर के आश्रय से हम अपना जीवन धार्मिक बनाकर आनन्द भोगें ॥ ६ ॥

देवानामस्थि कृशनं बभूव तदात्मन्वच्चरत्यप्स्व१न्तः। तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय कार्शनस्त्वाभि रक्षतु ॥ ७ ॥

देवानाम् । अस्थि । कृशनम् । बभूव । तत् । आत्मनऽवत् । चरति । अप्ऽसु । अन्तः । तत् । ते । बध्नामि । आयुषे । वर्चसे । बलाय । दीर्घायुऽत्वाय । शतऽशारदाय । कार्शनः । त्वा । अभि । रक्षतु ॥ ७ ॥

भाषार्थः—(कृशनम्) सूक्ष्म रचना करने वाला ब्रह्म (देवानाम्) दिव्य गुणों और प्रकाशमान पदार्थों का (अस्थि) प्रकाशक (बभूव) हुआ था।

सूर्यलोकात्। **त्वम्** । **अधि** । उपरि देशे काले च। **जज्ञिषे** । प्रादुर्बभूविथ। **रथे** । **हनिकुषिनीरमिकाशिभ्यः क्थन्** (उ० २। २) इति रमु क्रीडायाम् क्थन्। रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद् विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा रपतेर्वा रसतेर्वा—निरु० ९।११। रमणीये याने। रथारूढे, इत्यर्थः। **त्वम् असि। दर्शतः** । **भृमृदृशि०** (उ० ३। ११०) इति दृशिर् प्रेक्षणे—अतच्। दृश्यमानः। **इषुधौ** । अ० ३। २३। २। बाणाधारे। तूणीरे। **रोचनः** । रोचमानः। दीप्यमानः। **नः** । अस्माकम्। **आयूंषि** । जीवनानि। **प्रतारिषत्** । अ० २। ४। ६। लेटि रूपम्। प्रवर्धयेत्, भवान् इति शेषः ॥

७—**देवानाम्** । दिव्यगुणानां प्रकाशमानानां पदार्थानां च। **अस्थि** । **असिसञ्जिभ्यां क्थिन्** (उ० ३। १५४) इति असु क्षेपणे। यद्वा। अस गतिदीप्त्यादानेषु—क्थिन्। प्रदीपकं प्रकाशकम्। **कृशनम्** । म० १। सूक्ष्मकारकं

(तत्) विस्तृत ब्रह्म (अप्सु अन्तः) अन्तरिक्ष के भीतर [ठहरे हुये] (आत्मन्वत्) आत्मा वाले जगत् में (चरति) विचरता है। [हे प्राणी !] (तत्) उस ब्रह्म को (ते) तेरे (आयुषे) लाभ के लिये, (वर्चसे) तेज वा यश के लिये (बलाय) बल के लिये, और (शतशारदाय) सौ शरद ऋतुओं वाले (दीर्घायुत्वाय) चिरकाल जीवन के लिये [अन्तः करण के भीतर] (बध्नामि) मैं बांधता हूं। (कार्शनः) अनेक सुवर्णादि धनों और तेजों वाला परमेश्वर (त्वा) तुझको (अभि) सब प्रकार (रक्षतु) पाले ॥ ७ ॥

भावार्थः—विश्वकर्मा ब्रह्म ने बुद्धि आदि गुण और मनुष्य शरीर आदि दिव्य पदार्थ रचे हैं, वही सबमें रम कर जीवन शक्ति दे रहा है, उसी को मनुष्य हृदय में धारण करके पुरुषार्थ के साथ यशस्वी होकर आनन्द भोगें ॥ ७ ॥

इति द्वितीयोऽनुवाकः ।

ब्रह्म । **तत्** । विस्तृतम् ब्रह्म । **आत्मन्वत्** । आत्मन्—मतुप् । **मादुपधायाश्च०** (पा० ८ । २ । ९) इति वत्वम् । **अनो नुट्** (पा० ८ । २ । १६)इति नुट् । सात्मकं स्थावरजङ्गमात्मकं जगत् । **चरति** । गच्छति व्याप्नोति । **अप्सु** । अन्तरिक्षे—निघ० १ । ३ । **तत् ते**......**शतशारदाय** । व्याख्यातम्—अ० १ । ३५ । १ । **तत्** । प्रसिद्धम् । **ते** । तव । **बध्नामि** । धारयामि । **आयुषे** । आयाय । लाभाय । **वर्चसे** । तेजसे । यशसे । **बलाय** । पराक्रमाय । **दीर्घायुत्वाय** । चिरकालजीवनाय । **शतशारदाय** । शतशरदृतुयुक्ताय । शतसंवत्सरयुक्ताय । **कार्शनः** । कृशनः—म० १ । कृशनं हिरण्यम्—निघ० १ । २ । रूपम्—निघ० ३ । ७ । **तस्येदम्** (पा० ४ । ३ । १२०) इति कृशन—अण् । कृशनानि हिरण्यानि सुवर्णादिधनानि तेजांसि च यस्य स कार्शनः । **त्वा** । प्राणिनम् । **अभि** । सर्वतः । **रक्षतु** । । पालयतु ॥

अथ तृतीयोऽनुवाकः

सूक्तम् ११ ॥

१–१२ ॥ अनड्वान् देवता ॥ १–६ त्रिष्टुप्, ७ षट्पदा त्रिष्टुप्, ८–१२ अनुष्टुप् ॥

ब्रह्मविद्या पुरुषार्थश्चोपदिश्येते । ब्रह्मविद्या और पुरुषार्थ का उपदेश ॥

अनड्वान् दाधार पृथिवीमुत द्यामनड्वान् दाधारोर्व१न्तरिक्षम्। अनड्वान् दाधार प्रदिशः षडुर्वीरनड्वान् विश्वं भुवनमा विवेश ॥ १ ॥

अनड्वान् । दाधार । पृथिवीम् । उत । द्याम् । अनड्वान् । दाधार । उरु । अन्तरिक्षम् । अनड्वान् । दाधार । प्रऽदिशः । षट् । उर्वीः । अनड्वान् । विश्वम् । भुवनम् । आ । विवेश ॥ १ ॥

भाषार्थः—(अनड्वान्) प्राण जीविका पहुंचाने वाले परमेश्वर ने (पृथिवीम्) पृथिवी (उत) और (द्याम्) सूर्य को (दाधार) धारण किया था। (अनड्वान्) प्राण और जीविका पहुँचाने वाले परमेश्वर ने (उरु) चौड़े (अन्तरिक्षम्) मध्य लोक वा आकाश को (दाधार) धारण किया था। (अनड्वान्) प्राण और जीविका पहुंचाने वाले परमेश्वर ने (षट्) पूर्वादि, नीचे और उपकारी छह (उर्वीः) चौड़ी (प्रदिशः) महादिशाओं को (दाधार) धारण किया था। (अनड्वान्) प्राण और जीविका पहुँचाने वाले परमेश्वर ने (विश्वं भुवनम्) सब जगत् में (आ विवेश) सब प्रकार प्रवेश किया था ॥ १ ॥

१—**अनड्वान्** । सर्वधातुभ्योऽसुन् (उ० ४ । १८९) इति अन प्राणने-असुन् । 'अनो वायुरनितेरपि वोपमार्थे स्यादनस इव शकटादिव, अनः शकटमानद्धमस्मिंश्चीवरमनितेर्वा स्याज्जीवनकर्मण उपजीवन्त्येनन्मेघोऽप्यन एतस्मादेव'—निरु० ११ । ४७ । अनः प्राणं जीवनं वायुं मेघं शकटं वहति वा गमयतीति विग्रहे । अनसि वहेः क्विप् अनसो डश्च[1] (दश०उ०९।१०७) इति वहेः क्विप्, अनसः डश्चान्ता-

[1] दशपादी उणादि का पाठ 'वहेः क्विनसो डश्च' है। सूत्र का यह पाठ अम०को० रामाश्रमी टीका (अम० को० टी० २ । ६ । ५६) का है ॥ सम्पा० ॥

भावार्थः—पुनरुक्ति निश्चय द्योतक है, अर्थात् एक परमात्मा ही सब जीवन साधन देकर सब पदार्थों को रचता है। सब मनुष्य भक्ति पूर्वक उसकी अपार महिमा को विचार कर सदा पुरुषार्थ करें ॥ १ ॥

अनड्वानिन्द्रः स पशुभ्यो वि चष्टे त्रयाञ्छक्रो विमिमीते अध्वनः। भूतं भविष्यद् भुवना दुहानः सर्वा देवानां चरति व्रतानि ॥ २ ॥

अनड्वान्। इन्द्रः। सः। पशुऽभ्यः। वि। चष्टे। त्रयान्। शक्रः। वि। मिमीते। अध्वनः। भूतम्। भविष्यत्। भुवना। दुहानः। सर्वा। देवानाम्। चरति। व्रतानि ॥ २ ॥

भाषार्थः—(सः) वह (इन्द्रः) परम ऐश्वर्य वाला (अनड्वान्) प्राण और जीविका पहुंचाने वाला परमेश्वर (पशुभ्यः) व्यक्त वाणी वाले और अव्यक्त वाणी वाले जीवों के लिये (वि) विविध प्रकार से (चष्टे) देखता है (शक्रः) वह समर्थ परमात्मा (त्रयान्) तीन अवयव [भूमि सूर्य और अन्तरिक्ष] वाले

देशः। **वचिस्वपियजादीनां किति** (पा० ६।१।१५) इति यजादित्वात् संप्रसारणम्। अनडुह् स् इति स्थिते। [1]आम्नुम्सुलोपेषु कृतेषु संयोगान्तलोपेन हकारलोपः। अनसः प्राणस्य जीवनस्य च वाहकः प्रापकः परमेश्वरः। **दाधार**। तुजादित्वाद् अभ्यासदीर्घत्वम्। धृतवान्। **पृथिवीम्**। भूमिम्। **उत**। अपि च। **द्याम्**। प्रकाशमानं सूर्यम्। **उरु**। विस्तीर्णम्। **अन्तरिक्षम्**। मध्यलोकम्। **प्रदिशः**। महादिशाः। **षट्**। प्राच्यादिनीचोच्चषट्संख्याकाः। **उर्वी**। विस्तीर्णाः। **विश्वं भुवनम्**। सर्वं जगत्। **आ विवेश**। सर्वतः प्रवृष्टवान् ॥

२—**अनड्वान्**। म० १। अनसः प्राणस्य जीवनस्य च वाहकः। **इन्द्रः**। परमैश्वर्यवान्। **सः**। प्रसिद्धः। **पशुभ्यः**। अ० २।२६।१। व्यक्तवाग्भ्योऽव्यक्तवाग्भ्यो जीवेभ्यः—निरु० ११।२९। तेषां हिताय। **वि**। विविधम्। **चष्टे**। चक्षिङ् व्यक्तायां वाचि दर्शने च। चष्टे पश्यतिकर्मा—निघ० ३। ११। पश्यति कथयति वा। **त्रयान्**। **संख्याया अवयवे तयप्** (पा० ५।२।४२) इति तयप्। **द्वित्रिभ्यां तयस्यायज्वा** (पा०५।२।४३) इति तयस्य अयच्। त्र्यवयववान्। **शक्रः**।

१. चतुरनडुहोरामु० (७।१।९८) से आम् आगम तथा सावनडुहः (७।१।८२) से नुम् आगम हुआ ॥ सम्पा० ॥

(अध्वनः) मार्गों को (वि) विशेष करके (मिमीते) नापता है। (भूतम्) भूत, (भविष्यत्) भविष्यत् और (भुवना = ०-नि) लोकों वा वर्त्तमान वस्तुओं, को (दुहानः) परिपूर्ण करता हुआ वह (देवानाम्) इन्द्रियों के (सर्वा व्रतानि) सब कामों को (चरति) सिद्ध करता है ॥ २ ॥

भावार्थः—परमेश्वर संसार के कर्मों का साक्षी होकर तीनों लोकों और तीनों कालों की सुधि रखता, और देखना आदि सब काम करता है ॥ २ ॥

इन्द्रो॑ जा॒तो म॑नु॒ष्ये॑ष्व॒न्तर्घ॒र्मस्त॒प्तश्च॑रति॒ शोशु॑चानः। सु॒प्र॒जाः सन्त्स उ॑दा॒रे न स॑र्ष॒द्यो नाश्नी॒याद॑न॒डुहो॑ विजा॒नन् ॥ ३ ॥

इन्द्रः॑। जा॒तः। म॒नु॒ष्ये॑षु। अ॒न्तः। घ॒र्मः। त॒प्तः। च॒र॒ति॒। शोशु॑चानः। सु॒ऽप्र॒जाः। सन्। सः। उ॒त्ऽआ॒रे। न। स॒र्ष॒त्। यः। न। अ॒श्नी॒यात्। अ॒न॒डुहः॑। वि॒ऽजा॒नन् ॥ ३ ॥

भाषार्थः—(तप्तः) तपते हुये (घर्मः) सूर्य के समान (शोशुचानः) अत्यन्त प्रकाशमान (इन्द्रः) परमेश्वर (मनुष्येषु अन्तः) मननशील मनुष्यों के

शक्तः समर्थः। **वि** । विशेषेण । **मिमीते** । माङ् माने शब्दे च । **भृञामित्** (पा० ७।४।७६) इत्यभ्यासस्य इत्वम् । परिमितान् करोति । **अध्वनः** । अ० १।४।१। मार्गान् । **भूतम्** । गतम् । **भविष्यत्** । अनागतम् । **भुवना** । भुवनानि । लोकान् वर्तमानानि वस्तूनि वा । **दुहानः** । दुह प्रपूरणे—शानच् । प्रपूरयन् **सर्वा** । सर्वाणि । **देवानाम्** । इन्द्रियाण्यत्र देवा उच्यन्ते—निरु० १३।११। इन्द्रियाणाम् । **व्रतानि** । कर्माणि । **चरति** । करोति ॥

३—इन्द्रः । परमैश्वर्यवान् । **जातः** । प्रादुर्भूतः सन् । **मनुष्येषु** । अ० ३।४।६। मननशीलेषु । **अन्तः** । मध्ये । **घर्मः** । अ० ४।१।२। दीप्यमानः। घृणिः सूर्य इव । घर्मः, अहर्नाम—निघ० १।९। **तप्तः** । तापयुक्तः । **चरति** । संचरति । वर्तते । **शोशुचानः** । शुच दीप्तौ[1] यङन्तात् शानच् । देदीप्यमानः । **सुप्रजाः** । उत्तमान् पुत्रपौत्रभृत्यादीन् । **सन्** । अस भुवि—शतृः । विद्यमानः पुरुषः । **सः** ।

---

१. शुचिः शोचतेर्ज्वलतिकर्मणः । अयमपीतरः शुचिरेतस्मादेव । निष्षिक्तमस्मात् पापकमिति नैरुक्ताः (निरु० ६।१) इस प्रमाण से यहाँ दीप्ति अर्थ किया है। धातुवृत्ति आदि में तो शुच शोके ही पठित है। शतपथ में कहा है—ऐतौ (शुक्रश्च शुचिश्च) एव ग्रैष्मौ (मासौ) स यदेतयोर्बलिष्ठं तपति तेनो हेतौ शुक्रश्च शुचिश्च (श. ब्रा. ४।३।१।१५)। अथवा पवित्रता में दीप्ति सम्भव ही है, यह मानकर 'ईशुचिर पूतिभावे' से यहां शानच् हो सकता है ॥ सम्पा० ॥

भीतर (जातः) प्रकट होकर (चरति) विचरता है। (यः) जो पुरुष (अनडुहः) प्राण और जीविका पहुँचाने वाले परमेश्वर का (न विजानन्) विज्ञान न रखता हुआ (अश्नीयात्) भोजन करे, (सः) वह (सन्) विद्यमान पुरुष (उदारे) बड़े पद पर वर्तमान (सुप्रजाः) उत्तम प्रजा गणों को (न सर्षत्) न पावे ॥ ३ ॥

भावार्थः—परमात्मा मनुष्यादि प्राणियों में निःसन्देह प्रकाशमान है, जो अज्ञानी पुरुष उसकी महिमा को नहीं जानता, वह दुष्ट आप, और उसके साथी प्रजा गण महा दुःख भोगते हैं ॥ ३ ॥

अनड्वान् दुहे सुकृतस्य लोक ऐनं प्याययति पवमानः पुरस्तात्। पर्जन्यो धारा मरुत ऊधो अस्य यज्ञः पयो दक्षिणा दोहो अस्य ॥ ४ ॥

अनड्वान्। दुहे। सुऽकृतस्य। लोके। आ। एनम्। प्याययति। पवमानः। पुरस्तात्। पर्जन्यः। धाराः। मरुतः। ऊधः। अस्य। यज्ञः। पयः। दक्षिणा। दोहः। अस्य ॥ ४ ॥

भाषार्थः—(अनड्वान्) प्राण वा जीविका पहुंचाने वाला परमेश्वर (सुकृतस्य) पुण्य के (लोके) स्थान में (दुहे = दुग्धे) पूर्ण करता है, (पवमानः) शुद्ध करने वाला परमात्मा (पुरस्तात्) पहिले से ही (एनम्) इस

उदारे। उत्+आङ्+रा दानादानयोः—कः। यद्वा। उत्+ऋ गतिप्रापणयोः घञ्। महति पदे। उदारो दातृमहतोः, इत्यमरटीकायाम्–३।१।८। **न**। नहि। **सर्षत्**। सृ गतौ लेटि अडागमः, सिप् च। प्राप्नुयात्। **यः**। पुरुषः। **न**। नहि। **अश्नीयात्**। अश भोजने—विधिलिङ्। भक्षयेत्। **विजानन्**। म० १। प्राणस्य जीवनस्य च वाहकस्य परमेश्वरस्य। **अनडुहः**। विशेषेण ज्ञानं प्राप्नुवन् ॥

४—**अनड्वान्**। म० १। प्राणस्य जीवनस्य वा प्रापकः परमेश्वरः। **दुहे**। लोपस्त आत्मनेपदेषु (पा० ७।१।४१) इति तलोपः। दुग्धे। इष्टं प्रपूरयति। **सुकृतस्य**। पुण्यकर्मणः। **लोके**। लोकृ दर्शने—घञ्। भुवने। गृहे। **एनम्**। इमं जीवं संसारं वा। **आ प्याययति**। प्रवर्धयति। **पवमानः**। अ० ३।३१।२। संशोधकः परमेश्वरः। **पुरस्तात्**। अग्रतः। सृष्ट्यादौ। **पर्जन्यः**। अ० १।२।१।

[जीव] को (आ प्याययति) सब प्रकार बढ़ाता है। (अस्य) इस [परमेश्वर] की (धाराः) धारण शक्तियाँ (पर्जन्यः) मेघ [के समान] हैं और (ऊधः) वहन वा ले चलने का सामर्थ्य (मरुतः) पवन [के समान] है, (अस्य) इसकी (यज्ञः) संगति क्रिया (पयः) दूध [के समान] है, और (दक्षिणा) दान शक्ति (दोहः) दोहनी [के समान] है ॥ ४ ॥

भावार्थः—वह जगदीश्वर पुण्यात्माओं की इच्छा पूर्ण करता है, और सृष्टि की आदि में वेद देकर सबकी वृद्धि करता है, और जैसे मेघ, वायु आदि पदार्थ उपकारी हैं, इसी प्रकार वह परमात्मा मेघ, पवन आदिकों का धारण करने वाला आदिमूल है ॥ ४ ॥

यस्य नेशे यज्ञपतिर्न यज्ञो नास्य दातेशे न प्रतिग्रहीता। यो विश्वजिद् विश्वभृद् विश्वकर्मा घर्मं नो ब्रूत यतमश्चतुष्पात् ॥५॥

यस्य। न। ईशे। यज्ञऽपतिः। न। यज्ञः। न। अस्य। दाता। ईशे। न। प्रतिऽग्रहीता। यः। विश्वऽजित्। विश्वऽभृत्। विश्वऽकर्मा। घर्मम्। नः। ब्रूत। यतमः। चतुःऽपात् ॥ ५ ॥

भाषार्थः—(न) न तो (यज्ञपतिः) संगतिकर्ता पुरुष, और (न) न

मेघ इव। **धाराः**। धृञ् धारणे णिच्—अङ्, टाप्। धार्य्यते यया। धारणशक्तयः। **मरुतः**। अ० १। २०। १। वायुरिव। **ऊधः**। **श्वेः सम्प्रसारणं च** (उ० ४। १९३) इति वह–असुन्। धातोः सम्प्रसारणे कृते दीर्घत्वं धकारश्चान्तादेशः। वहनसामर्थ्यम्। **अस्य**। अनडुहः परमेश्वरस्य। **यज्ञः**। संगतिकरणम्। **पयः**। दुग्धमिव। **दक्षिणा**। **द्रुदक्षिभ्यामिनन्** (उ० २। ५०) इति दक्ष वृद्धौ शीघ्रार्थे च—इनन्। टाप्। दक्षिणा दक्षतेः समर्द्धयतिकर्मणः, दक्षिणो हस्तो दक्षतेरुत्साहकर्मणो दाशतेर्वा स्याद् दानकर्मणः—निरु० १। ७। दानशक्तिः। **दोहः**। दुह प्रपूरणे—घञ्। दोहनपात्रमिव ॥

५—**यस्य**। घर्मस्य। **अधीगर्थदयेशां कर्मणि** (पा० २। ३। ५२) इति

(यज्ञः) संगतिकर्म (यस्य) जिस [परमेश्वर] का (ईशे = ईष्टे) ईश्वर (न) न तो (दाता) दाता, (न) न (प्रतिग्रहीता) ग्रहणकर्ता (अस्य) इ का (ईशे) ईश्वर है, (यः) जो (विश्वजित्) सबका जीतने वाला, (वि भृत्) सबका पोषण करने वाला, (विश्वकर्मा) सब काम करने वाला, (यतमः) जौन सा (चतुष्पात्) चारों दिशाओं में स्थित वा गति वाला (घर्मम्) उस प्रकाशमान सूर्यसदृश परमात्मा को (नः) हमें, [हे ऋषियो] (ब्रूत) बताओ ॥ ५ ॥

भावार्थः—उस परमात्मा का शासक कोई अन्य नहीं है, वह सर्वश मान्, सर्वरक्षक, सर्वव्यापक, प्रकाशस्वरूप है। उसकी उपासना और अन्वेष से सब मनुष्य अपनी उन्नति करें ॥ ५ ॥

येन॑ दे॒वाःस्व॑रारुरु॒हुर्हि॒त्वा शरी॑रम॒मृत॑स्य॒ नाभि॑म्। ते गेष्म सु॒कृत॑स्य॑ लो॒कं घ॒र्मस्य॑ व्र॒तेन॒ तप॑सा यश॒स्यवः॑ ॥६

येन॑। दे॒वाः। स्वः॑। आ॒ऽरु॒रु॒हुः। हि॒त्वा। शरी॑रम्। अ॒मृत॑स्य। नाभि॑म्। तेन॑। गे॒ष्म॒। सु॒ऽकृत॑स्य॑। लो॒कम्। घ॒र्मस्य॑। व्र॒तेन॑। तप॑सा। य॒श॒स्यवः॑ ॥६

कर्मणि षष्ठी। **न**। नहि। **ईशे**। **लोपस्त आत्मनेपदेषु** (पा० ७। १। ४१ ईष्टे। शासिता भवति। **यज्ञपतिः**। यजमानः, सङ्गतिकर्ता। **यज्ञः**। संगतिक्रिया **दाता**। दानशीलः। **प्रतिग्रहीता**। दानस्य स्वीकर्ता। **यः**। अनड्वान्। घर्मः **विश्वजित्**। विश्वस्य जेता। **विश्वभृत्**। सर्वस्य भर्ता पोषयिता वा। **विश्वकर्मा** विश्वं सर्वं कर्म कर्तव्यं व्यापारो यस्य। सर्वव्यापारकर्ता। **घर्मम्**। म० ३। दीप्यमानम्। आदित्यरूपम्। अनड्वाहं परमात्मानम्। **नः**। अस्मभ्यम्। **ब्रूत** कथयत। उपदिशत। **यतमः**। **वा बहूनां जातिपरिप्रश्ने डतमच्** (पा०५।३।९३ इति यत्—डतमच्। बहूनां मध्ये निर्द्धारित एकः। एषां मध्ये यः। **चतुष्पात्** पद स्थैर्ये, गतौ च—घञ्। इति पादः। **संख्यासुपूर्वस्य** (पा० ५। ४। १४०) इ बहुव्रीहेः पादान्तस्य लोपः। चतसृषु दिक्षु पादः स्थितिर्गतिर्वा यस्य सः ॥

भाषार्थः—(येन) जिस [परमात्मा] के द्वारा (देवाः) व्यवहार कुशल पुरुष (शरीरम्) नाशमान शरीर [देह अभिमान] (हित्वा) छोड़ कर (अमृतस्य) अमरपन के (नाभिम्) केन्द्र (स्वः) स्वर्ग को (आरुरुहुः) चढ़े थे । (तेन) उसी [ईश्वर] के सहारे से (यशस्यवः) यश चाहने वाले हम लोग (घर्मस्य) दीप्यमान सूर्य के [समान] (व्रतेन) कर्म और (तपसा) सामर्थ्य से (सुकृतस्य) पुण्य के (लोकम्) लोक [परमात्मा] को (गेष्म) खोजें ॥ ६ ॥

भावार्थः—जैसे पूर्वज महात्मा परमात्मा की भक्ति से मोक्ष सुख पाकर अमर अर्थात् कीर्तिमान हुये हैं, उसी प्रकार हम परमेश्वर की आज्ञा पाल कर संसार में उपकार करके यशस्वी होवें, जैसे सूर्य अपने तेज से वृष्टि दान और आकर्षण आदि करके लोक का उपकार करता है ।। ६ ॥

इन्द्रो रूपेणाग्निर्वहेन प्रजापतिः परमेष्ठी विराट् । विश्वानरे अक्रमत वैश्वानरे अक्रमतानडुहचक्रमत । सोऽदृंहयत सोऽधारयत ॥ ७ ॥

इन्द्रः । रूपेण । अग्निः । वहेन । प्रजाऽपतिः । परमेऽस्थी । विऽराट् । विश्वानरे । अक्रमत । वैश्वानरे । अक्रमत । अनडुहि । अक्रमत । सः । अदृंहयत । सः । अधारयत ॥ ७ ॥

६—**येन** । अनडुहा । परमेश्वरेण । **देवाः** । व्यवहारिणः पुरुषाः । **स्वः** । अ० २ । ५ । २ । स्वर्गम् । देवालयम् । **आरुरुहुः** । आरूढवन्तः । **हित्वा** । ओहाक् त्यागे—क्त्वा । त्यक्त्वा । **शरीरम्** । अ० २ । १२ । ८ । शीर्यमाणं देहम् । देहाभिमानमित्यर्थः । **अमृतस्य** । अमरणस्य । मोक्षसुखस्य । **नाभिम्** । अ० १ । १३ । ३ । मध्यस्थानम् । केन्द्रम् । **तेन** । अनडुहा । **गेष्म** । गेषृ अन्विच्छायाम्-लोटि छान्दसं रूपम् । गेषामहै । अन्विच्छाम । अन्वेषणेन प्राप्नुवाम । **सुकृतस्य** । पुण्यस्य । **लोकम्** । गृहम् । **घर्मस्य** । म० ३ । प्रकाशमानस्य । आदित्यस्य । **व्रतेन** । वरणीयेन कर्मणा । **तपसा** । ऐश्वर्येण । **यशस्यवः** । सुप आत्मनः क्यच् (पा० ३ । १ । ८) इति यशस्—क्यच् । **क्याच्छन्दसि** (पा० ३ । २ । १७०) इति उप्रत्ययः । यशः कीर्तिमात्मन इच्छन्तः ॥

भाषार्थः—(प्रजापतिः) उत्पन्न पदार्थों का रक्षक, (परमेष्ठी) ऊंचे स्थान पर ठहरने वाला, (विराट्) विशेष प्रकाशमान, (अग्निः) व्यापक वा अग्निरूप (इन्द्रः) सूर्य (रूपेण) अपने रूप से और (वहेन) चलाने के सामर्थ्य से (विश्वानरे) सबके नायक परमात्मा में (अक्रमत) प्रविष्ट हुआ, (वैश्वानरे) सब नायकों के हितकारी परमेश्वर में (अक्रमत) प्राप्त हुआ, (अनडुहि) जीवन पहुँचाने वाले जगदीश्वर में (अक्रमत) प्रविष्ट हुआ है। (सः) उस [जगदीश्वर] ने [सूर्य को] (अदृंहयत) दृढ़ किया और (सः) उसने ही (अधारयत) धारण किया है ॥ ७ ॥

भावार्थः—सूर्य अर्थात् सूर्य आदि बड़े बड़े लोक अपने आकर्षण आदि शक्तियों के साथ सर्वनियन्ता जगदीश्वर में स्थित हैं, वही उनका धारण पोषण करता है। उसी की उपासना हम सदा करें ॥ ७ ॥

मध्यमेतदनडुहो यत्रैष वह आहितः ।
एतावदस्य प्राचीनं यावान् प्रत्यङ् समाहित ॥ ८ ॥

मध्यम् । एतत् । अनडुहः । यत्र । एषः । वहः । आऽहितः ।
एतावत् । अस्य । प्राचीनम् । यावान् । प्रत्यङ् । सम्ऽआहितः ॥ ८ ॥

भाषार्थः—(अनडुहः) जीविका पहुंचाने वाले परमात्मा का (एतत्)

७—**इन्द्रः** । ऐश्वर्यवान् सूर्यः । **रूपेण** । तेजसा । **अग्निः** । व्यापकः । अग्निरूपः । **वहेन** । वहनसामर्थ्येन । आकर्षणेन । **प्रजापतिः** । प्रजानां प्रजातानां पदार्थानां पालकः । **परमेष्ठी** । अ० १।७।२ । परमे प्रधानस्थाने स्थितः । **विराट्** । राजृ दीप्तौ—क्विप् । विशेषेण दीप्यमानः । **विश्वानरे** । विश्व+नृ नये—अच् । **नरे संज्ञायाम्** (पा० ६।३।१२९) इति दीर्घः । सर्वनायके परमेश्वरे । **अक्रमत** । अक्रामत संक्रान्तवान् प्राप्तवान् । **वैश्वानरे** । अ० १ । १० । ४ । विश्वनरेभ्यः सर्वनायकेभ्यो हिते परमात्मनि । **अनडुहि** । म० १ । जीवनप्रापके परमेश्वरे । **सः** । अनड्वान् । **अदृंहयत** । दृढमकरोत् । **अधारयत** । धृतवान् ॥

८—**मध्यम्** । अ० १ । ३३ । २ । द्वयोरन्तरालम् । गोलस्य मध्यस्थानम् ।

यह [स्थान वा काल] (मध्यम्) मध्य है (यत्र) जहां (एषः) यह (वहः) [आकर्षित] भार (आहितः) धरा हुआ है। (अस्य) सर्वव्यापक वा सर्वरक्षक विष्णु का (एतावत्) उतना ही (प्राचीनम्) प्राचीन काल वा देश है, (यावान्) जितना (प्रत्यङ्) आगामी काल वा देश (समाहितः) सिद्ध है ॥ ८ ॥

भावार्थः--परमेश्वर की सर्वव्यापकता और नित्यता को विचार कर मनुष्य सावधानी से प्रयत्न करता रहे ॥८॥

यो वेदा॑नडु॒हो दोहा॑न्त्स॒प्तानु॑पदस्वतः ।

प्र॒जां च॑ लो॒कं चा॑प्नोति॒ तथा॑ सप्तऋ॒षयो॑ विदुः ॥९॥

यः । वेद॑ । अ॒न॒डुहः॑ । दोहा॑न् । स॒प्त । अनु॑पऽदस्वतः । प्र॒ऽजाम् ।

च॒ । लो॒कम् । च॒ । आ॒प्नो॒ति॒ । तथा॑ । स॒प्त॒ऽऋ॒षयः॑ । वि॒दुः ॥ ९ ॥

भाषार्थः—(यः) जो कोई (अनडुहः) जीवन पहुंचाने वाले परमेश्वर के (दोहान्) पूर्ति के प्रवाहों को (सप्त) नित्य संबन्ध वाले और (अनुपदस्वतः) अक्षय (वेद) जानता है, वह (प्रजाम्) प्रजा (च) और (लोकम्) लोक (च) भी (आप्नोति) पाता है, (तथा) ऐसा (सप्तऋषयः) सात व्यापन शील वा दर्शनशील, [अर्थात् त्वचा, नेत्र, कान, जिह्वा, नाक, मन और बुद्धि, अथवा दो कान, दो नथने, दो आंख और मुख यह सात छिद्र] (विदुः) जानते हैं [प्रत्यक्ष करते हैं] ॥ ९ ॥

एतत् । दृश्यमानं सर्वम् । **अनडुहः** । म० १ । जीवनप्रापकस्य परमेश्वरस्य । **यत्र** । यस्मिन् स्थाने । **एषः** । अयम् । **वहः** । वहनीयः पदार्थो भारो वा । **आहितः** । धा—क्तः । स्थापितः । **एतावत्** । एतत्परिमाणयुक्तम् । **अस्य** । अतति सर्वं व्याप्नोतीति अः । अत सातत्यगमने—डः । यद्वा अवति रक्षतीति अव रक्षणे डः । अः विष्णुः । सर्वव्यापकस्य सर्वरक्षकस्य वा परमेश्वरस्य । **प्राचीनम्** । **विभाषाञ्चेरदिक्स्त्रियाम्** (पा० ५ । ४ । ८) इति स्वार्थे खः । खस्य ईनादेशः । प्राक् पूर्वः कालो देशो वा । **यावान्** । यत्परिमाणवान् । **प्रत्यङ्** । प्रति+अञ्चु—क्विन् । पश्चिमकालः । पश्चिमदेशः । **समाहितः** । निष्पन्नः ॥

९—यः । यः पुरुषः । **वेद** । वेत्ति । **अनडुहः** । म० १ । प्राणप्रापकस्य । **दोहान्** । म० ४ । पूर्तिप्रवाहान् । **सप्त** । सप्यशूभ्यां तुट् च (उ० १ । १५७)

भावार्थः—विज्ञानी पुरुष जीवनदाता परमेश्वर के सर्वव्यापी और अनन्त कोश को अपनी ज्ञानेन्द्रियों, कर्मेन्द्रियों, मन और बुद्धि द्वारा साक्षात् करके अपना आत्मिक और शारीरिक बल बढ़ाते हैं ॥ ९ ॥

पद्भिः सेदिमवक्रामन्निरां जङ्घाभिरुत्खिदन् ।
श्रमेणानड्वान् कीलालं कीनाशश्चाभि गच्छतः ॥ १० ॥

पत्ऽभिः । सेदिम् । अवऽक्रामन् । इराम् । जङ्घाभिः । उत्ऽखिदन् । श्रमेण । अनड्वान् । कीलालम् । कीनाशः । च । अभि । गच्छतः ॥ १० ॥

भाषार्थः—(कीनाशः) निन्दित कर्म का नाश करने वाला (अनड्वान्) जीवन पहुंचाने वाला परमेश्वर, (श्रमेण) परिश्रम से (अभिगच्छतः) चलते

इति षप समवाये—कनिन् अथवा क्तप्रत्ययः । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति विभक्तिलोपः । समवेतान् । नित्यसम्बद्धान् । अथवा, सप्तपुत्रं सप्तमपुत्रं सपर्णपुत्रमिति वा सप्त सृप्ता सङ्ख्या सप्तादित्यरश्मयः । निरु० ४ । २६ । इति यास्कवचनात् सूर्यरश्मिवत् परस्परसंयुक्तान् । **अनुपदस्वतः** । दसु उपक्षये—असुन्, मतुप् । अक्षयान् । **प्रजाम्** । पुत्रपौत्रभृत्यादिकम् । **च** । समुच्चये । अवधारणे । **लोकम्** । संसारम् । संसारराज्यम् । **आप्नोति** । लभते । **तथा** । तेनैव प्रकारेण । **सप्तऋषयः** । सप्त समवेताः । **इगुपधात् कित्** (उ० ४ । १२०) इति ऋषी गतौ दर्शने च—इन् । **ऋत्यकः** (पा० ६ । १ । १२८) इति प्रकृतिभावः । सप्त ऋषयः प्रतिहिताः शरीरे । य० ३४ । ५५ । सप्त ऋषयः षडिन्द्रियाणि विद्या सप्तमी । निरु० १२ । ३७ । कः सप्त खानि वितर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम् । अ० १० । २ । ६ । त्वक्चक्षुःश्रवणरसनाघ्राणमनोबुद्धयः । अथवा । शीर्षण्यानि सप्तच्छिद्राणि । **विदुः** । जानन्ति । प्रत्यक्षीकुर्वन्ति ॥

१०—**पद्भिः** । पद स्थैर्ये गतौ च—क्विप् । स्वस्थितिभिः । **सेदिम्** । क्किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात् (वा० पा० ३ । २ । १७१) इति

फिरते पुरुष के (सेदिम्) विषाद को (पद्भिः) अपनी स्थितियों से (अव-क्रामन्) दबाता हुआ, (च) और (जङ्घाभिः) अपनी अत्यन्त व्याप्तियों से [उसके] (कीलालम्) बन्ध के निवारण, अर्थात् (इराम्) अन्न को (उत्-खिदन्) उत्पन्न करता हुआ [वर्तमान है] ॥ १० ॥

भावार्थः—उद्योगी पुरुष सब स्थानों में परमेश्वर रचित पदार्थों से अन्नादि प्राप्त करके आनन्द भोगते हैं ॥ १० ॥

द्वादश वा एता रात्रीर्व्रत्या आहुः प्रजापतेः ।
तत्रोप ब्रह्म यो वेद तद् वा अनडुहो व्रतम् ॥ ११ ॥

द्वादश । वै । एताः । रात्रीः । व्रत्याः । आहुः । प्रजाऽपतेः ।
तत्र । उप । ब्रह्म । यः । वेद । तत् । वै । अनडुहः । व्रतम् ॥ ११ ॥

भाषार्थः—(द्वादश) बारह (एताः) प्राप्ति योग्य (रात्रीः) विषय ग्रहण करने वाली और विज्ञान देने वाली मन बुद्धि सहित पांच ज्ञानेन्द्रियों और

षद्लृ विशरणगत्यवसादनेषु—किः । अवसादनम् । दरिद्रताम् । **अवक्रामन्** । अवाङ्मुखी कुर्वन् । **इराम्** । **ऋज्रेन्द्रा०** (उ० २ । २८) इति इण् गतौ—रन्,गुणा-भावः । अन्नम्—निघ० २ । ७ । **जङ्घाभिः** । **अच् तस्य जङ्घ च** (उ०५।३१) इति जनी प्रादुर्भावे—अच्, जङ्घ इत्यादेशः । प्रादुर्भावैः । यद्वा । **अन्येष्वपि दृश्यते** (पा० ३ । २ । १०१) इति हन हिंसागत्योः—यङ्लुगन्तात्—डप्रत्ययः । अतिवेग-गतिभिः । अत्यन्तव्याप्तिभिः । **उत्खिदन्** । खिद दैन्ये, परिघाते । उत्पूर्वात् खिद उत्पादने—शतृ । उत्पादयन् वर्तते । **श्रमेण** । श्रमु, तपसि, आयासे, खेदे च–घञ् । आयासेन । प्रयत्नेन । **अनड्वान्** । म० १ । जीवनप्रापकः । **कीलालम्** । कील बन्धने—घञ्+अल वारणपर्याप्तिभूषासु—अण् । बन्धनिवारणम् । अमृतम् । जीवनसाधनम् । **कीनाशः** । अ० ३ । १७ । ५ कुकुत्सितं नाशयतीति । कोः कीति आदेशः । निन्दितकर्मनाशकः परमेश्वरः । **अभि गच्छतः** । अभितो गच्छतः पुरुषस्य ॥

११—द्वादश । द्वे च दश च । **वै** । वा गतौ—डै । निश्चयेन । **एताः** । **हसिमृग्रिण्वा०** (उ० ३ । ८६) इति इण् गतौ—तन् । प्राप्तव्याः । **रात्रीः** ।

पांच कर्मेन्द्रियों को (प्रजापतेः) प्रजापालक परमात्मा के (व्रत्याः) व्रतयो[ग्य]
(वै) निश्चय करके [वे विज्ञानी] (आहुः) बताते हैं । (तत्र) उन [म[न]
बुद्धि सहित इन्द्रियों] में (यः) गतिशील पुरुषार्थी पुरुष (अनडुहः) जीव[न]
पहुँचाने वाले परमेश्वर के (तत्) विस्तृत (ब्रह्म) वेद विज्ञान और (व्रतम्)
व्रत को (वै) निश्चय करके (उप) आदर से (वेद) जानता है ॥ ११ ॥

भावार्थः—मन बुद्धि और इन्द्रियों से योगी पुरुषार्थी लोग परमात्मा [के]
गुण कर्म स्वभाव को जान कर संसार में उन्नति करते हैं ॥ ११ ॥

दुहे सायं दुहे प्रातर्दुहे मध्यं दिनं परि ।
दोहा ये अस्य संयन्ति तान् विद्मानुं पदस्वतः ॥१२॥

दुहे । सायम् । दुहे । प्रातः । दुहे । मध्यंदिनम् । परि । दोहाः । ये । । अस्य । सम्ऽयन्ति । तान् । विद्म । अनुपऽदस्वतः ॥ १२ ॥

भाषार्थः—वह [परमेश्वर] (सायम्) सायंकाल में (परि) सब ओ[र]
से (दुहे = दुग्धे) पूर्ण करता है । (प्रातः) प्रातः काल (दुहे) पूर्ण करता है
(मध्यंदिनम्) मध्याह्न में (दुहे) पूर्ण करता है । (अस्य) सर्वव्यापक [के]

राशदिभ्यां त्रिप् (उ०४।६७) इति रा दानादानयोः-त्रिप् । विषयग्रहीतॄणि विज्ञा[न]
-दातॄणि मनोबुद्धिसहितानि पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि च । **व्रत्याः**
व्रतं व्याख्यातम्—अ० २ । ३० । २ । व्रत—यत् । व्रतहिताः । कर्मयोग्याः । **आहुः**
ब्रूञ् व्यक्तायां वाचि—लट् । ब्रुवन्ति विज्ञानिनः । **प्रजापतेः** । प्रजापालक[स्य]
अनडुहः । **तत्र** । रात्रिषु । **उप** । आदरेण । **ब्रह्म** । अ० १।८।४। वेदविज्ञानम्
यः । या प्रापणे-डः । याता । **वेद** । वेत्ति । **तत्** । त्यजितनि० (उ० १।१३[२]
इति तनु विस्तारे-अदिः । विस्तृतम् । **अनडुहः** । म०१। प्राणप्रापकस्य परमेश्वरस्य
व्रतम् । वरणीयं कर्म ॥

१२—**दुहे** । लोपस्त आत्मनेपदेषु (पा० ७ । १ । ४१) इति तलोपः
दुग्धे प्रपूरयति अनड्वान् । **सायम्** । षो अन्तकर्मणि—णम्, युगागमः । दिनान्ते
प्रातः । प्रातत्तेररन् (उ० ५ । ५९) इति प्र+अत सातत्यगमने—अरन्

सर्वरक्षक विष्णु के (ये) जो (दोहाः) पूर्त्ति प्रवाह (संयन्ति) बटुरते रहते हैं (तान्) उनको (अनुपदस्वतः) अक्षय (विद्म) हम जानते हैं ॥ १२ ॥

भावार्थः—परमेश्वर का सदा अक्षय भण्डार है। ऐसा जानकर मनुष्य विज्ञान पूर्वक आगे बढ़ता रहे ॥ १२ ॥

सूक्तम् १२ ॥

१—७ ॥ धाता देवता । १ गायत्री, २—५ अनुष्टुप्, ६ पदपङ्क्तिः, ७ बृहती छन्दः ॥

स्वदोषनिवारणायोपदेशः—अपने दोष मिटाने का उपदेश ॥

रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी ।

रोहयेदमरुन्धति ॥ १ ॥

रोहणी । असि । रोहणी । अस्थ्नः । छिन्नस्य । रोहणी ।

रोहय । इदम् । अरुन्धति ॥ १ ॥

भाषार्थः—[हे मानुषी प्रजा तू] (छिन्नस्य) टूटी (अस्थ्नः) हड्डी की (रोहणी) पूरनेवाली (रोहणी) रोहिणी वा लाक्षा [के समान] (रोहणी) पूरने वाली शक्ति (असि) है। (अरुन्धति) हे रोक न डालने वाली शक्ति तू ! (इदम्) ऐश्वर्य (रोहय) सम्पूर्ण कर ॥ १ ॥

प्रभातकाले। **मध्यंदिनम्** । राजदन्तादित्वात् मध्यशब्दस्य पूर्वत्वम्। पृषोदरादित्वात् नकारागमः। दिनस्य मध्यम्। मध्याह्नम्। **परि** । परितः। सर्वतः। **दोहाः** । पूर्तिप्रवाहाः। **अस्य** । म० ८। सर्वव्यापकस्य सर्वरक्षकस्य वा विष्णोः परमेश्वरस्य। **संयन्ति** । इण् गतौ। संगच्छन्ते। **तान्** । दोहान्। **विद्म** । विदो लटो वा (पा० ३।४।८३) इति मसो मादेशो वा। विद्मः। जानीम। **अनुपदस्वतः** । म० ९। क्षयरहितान् ॥

१—**रोहणी** । रुह प्रादुर्भावे-णिच्-ल्युट्, ङीप्। रोहयित्री पूरयित्री शक्तिः। **नित्यवीप्सयोः** (पा० ८।१।४) इति द्विर्वचनम्। **असि** । भवसि। **अस्थ्नः** । अ० १।२३।४। मांसाभ्यन्तरस्थस्य धातुविशेषस्य। **छिन्नस्य** ।

भावार्थः—बुद्धिमान् पुरुष विज्ञान पूर्वक अपने आत्मिक और शारीरिक दोषों को मिटावे जैसे सद्वैद्य रोहिणी वा लाक्षा [लाख वा लाह] आदि औषधि से रोगों को निवृत्त करता है ॥ १ ॥

सायण भाष्य में (रोहणी) पद के स्थान में [रोहिणी] मानकर "लाक्षा" अर्थ किया है ॥

यत् ते रिष्टं यत् ते द्युत्तमस्ति पेष्ट्रं त आत्मनि ।
धाता तद् भद्रया पुनः सं दधत् परुषा परुः ॥ २ ॥

यत् । ते । रिष्टम् । यत् । ते द्युत्तम् । अस्ति । पेष्ट्रम् । ते । आत्मनि ।
धाता । तत् । भद्रया । पुनः । सम् । दधत् । परुषा । परुः ॥ २ ॥

भाषार्थः—[हे मनुष्य !] (यत्) जो कुछ (ते) तेरा (रिष्टम्) टूटा हुआ और (यत्) जो (ते) तेरा (द्युत्तम्) जलता हुआ, और जो (ते) तेरे (आत्मनि) शरीर में (पेष्ट्रम्) पिसा हुआ (अस्ति) है । (धाता) पोषण करने वाला वैद्य (भद्रया) कल्याण करने वाली क्रिया से (तत् परुः) उस जोड़ को (परुषा) दूसरे जोड़ से (पुनः) फिर (सं दधत्) सन्धि कर देवे ॥ २ ॥

भिन्नस्य । **रोहणी** । व्युत्पत्तिः पूर्ववत् । रोहणी एव रोहिणी, ओषधिविशेषः । तत्पर्यायाः शब्दकल्पद्रुमे । कटुंभरा । सोमवल्कः । सोमवृक्षः । सायणमते तु रोहिणी लाक्षा नामौषधिविशेषः । **रोहय** । प्ररोहय । पूरय । **इदम्** । **इन्देः कमिन्नलोपश्च** (उ० ४।१५७) इति इदि परमैश्वर्ये—कमिन् । परमैश्वर्यम् । **अरुन्धति** । नञ् + रुधिर् आवरणे—शतृ, ङीप् । हे अरोधनशीले । हे अवारयित्रि शक्ते ॥

२—**यत्** । अङ्गम् । **ते** । तव । **द्युत्तम्** । द्योतते, ज्वलतिकर्मा—निघ० १ । १६ । द्योतितम् । प्रज्वलितम् । **अस्ति** । **पेष्ट्रम्** । **सर्वधातुभ्यः ष्ट्रन्** (उ० ४।१५९) इति पिषॢ संचूर्णने-ष्ट्रन् । पिष्टम् । चूर्णितम् । **आत्मनि** । शरीरे । **धाता** । पोषयिता पुरुषः । **तत्** । सर्वमङ्गम् । **भद्रया** । कल्याण्या क्रियया

भावार्थः—विचारवान् पुरुष आप ही अपने दोषों का वैद्य होता है ॥ २ ॥

सं ते मज्जा मज्ज्ञा भवतु समु ते परुषा परुः ।
सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु ॥ ३ ॥

सम् । ते । मज्जा । मज्ज्ञा । भवतु । सम् । ऊँ इति । ते । परुषा । परुः । सम् । ते । मांसस्य । विऽस्रस्तम् । सम् । अस्थि । अपि । रोहतु ॥ ३ ॥

भाषार्थः—[हे विद्वान्] (ते) तेरे (मज्जा) हाड़ की मींग (मज्ज्ञा) हाड़ की मींग से (संभवतु) मिल जावे (उ) और (ते परुः) तेरा जोड़ (परुषा) जोड़ से (सम् = संभवतु) मिल जावे । (ते) तेरे (मांसस्य) मांस का (विस्रस्तम्) हटा हुआ अंश (सम् = सं रोहतु) जुड़ जावे, और (अस्थि) हाड़ (अपि) भी (संरोहतु) जुड़ कर ठीक हो जावे ॥ ३ ॥

भावार्थः—मनुष्य अपने चंचल मन को ज्ञान प्राप्ति में ऐसा जोड़ दे जैसे वैद्य विचलित अवयवों को जोड़ देता है ॥ ३ ॥

मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु ।
असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ॥ ४ ॥

मज्जा । मज्ज्ञा । सम् । धीयताम् । चर्मणा । चर्म । रोहतु । असृक् । ते । अस्थि । रोहतु । मांसम् । मांसेन । रोहतु ॥ ४ ॥

पुनः । अवधारणे । द्वितीयवारे । **संदधत्** । संदधातु । संयुनक्तु । **परुषा** । पर्वणा । **परुः** । पर्व । अन्यत् पूर्ववत् ॥

३—**ते** । तव । **मज्जा** । अ० १ । ११ । ४ । अस्थिमध्यस्थस्नेहः । **मज्ज्ञा** । अस्थिस्नेहेन । **संभवतु** । संयुक्तो भवतु । **उ** । अपि । **परुषा** । पर्वणा । **परुः** । पर्व । **मांसस्य** । मन ज्ञाने धृतौ च—सप्रत्ययः । रक्तजधातुविशेषस्य । **विस्रस्तम्** । वि+स्रन्सु अवस्रंसने—क्तः । विचलितो भागः । **अस्थि** । शरीरस्थधातुविशेषः । अपि । **सं रोहतु** । संहितं भवतु ॥

भाषार्थः—(मज्जा) हाड़ की मींग (मज्ज्ञा) हाड़ की मींग (सं धीयताम्) मिल जावे, (चर्म) चाम (चर्मणा) चाम के साथ (रोहतु) जम जावे। (ते) तेरा (असृक्) रुधिर और (अस्थि) हाड़ (रोहतु) जमे और (मांसम्) मांस (मांसेन) मांस के साथ (रोहतु) जमे ॥ ४ ॥

भावार्थः—मन्त्र ३ के समान ॥ ४ ॥

लोम लोम्ना सं कल्पया त्वचा सं कल्पया त्वचम् ।
असृक् ते अस्थि रोहतु छिन्नं सं धेह्योषधे ॥ ५ ॥

लोम । लोम्ना । सम् । कल्पय । त्वचा । सम् । कल्पय । त्वचम् ।
असृक् । ते । अस्थि । रोहतु । छिन्नम् । सम् । धेहि । ओषधे ॥५॥

भाषार्थः—(ओषधे) हे ताप नाशक ओषधि [के समान मनुष्य !] (लोम) रोम को (लोम्ना) रोम के साथ (संकल्पय) जमा दे, (त्वचम्) त्वचा को (त्वचा) त्वचा के साथ (संकल्पय) जोड़ दे, (ते) तेरा (असृक्) रुधिर और (अस्थि) हाड़ (रोहतु) उगे, (छिन्नम्) टूटा अंग भी (संधेहि) अच्छे प्रकार मिला दे ॥ ५ ॥

भावार्थः—मनुष्य ईश्वर विचार से अपने दोषों की चिकित्सा करे जैसे वैद्य औषधि से करते हैं ॥ ५ ॥

४—**मज्जा** । अस्थिस्नेहः । **मज्ज्ञा** । अस्थिस्नेहेन । **सं धीयताम्** । संहिता संयुक्तो भवतु । **चर्मणा** । **सर्वधातुभ्यो मनिन्** (उ० ४ । १४५) इति चर गतौ— मनिन् । शरीरावरणम् । **चर्म** । [1]त्वचा । **रोहतु** । प्ररूढं भवतु संयुज्यताम् । **असृक्** । असु क्षेपणे—ऋजिप्रत्ययः । अस्यते क्षिप्यते इतस्ततो नाडीभिः रुधिरः । अन्यत् सुगमम् ॥

५—**लोम** । अ० २ । ३३ । ७ । देहजातं केशाकारं द्रव्यम् । रोम । **लोम्ना** । रोम्णा । **संकल्पय** । संक्लृप्तं पुनः स्वस्थानगतं कुरु । संयोजय । **त्वचा** । चर्मणा । **त्वचम्** । चर्म । **छिन्नम्** । भिन्नमङ्गम् । **सं धेहि** । संहितं संश्लिष्टं व्यापारक्षमं कुरु । अन्यत् पूर्ववत् ॥

---

१. द्र० टि० अ० २ । २५ । ३ ॥ सम्पा० ॥

स उत्तिष्ठ प्रेहि प्र द्रव रथः सुचक्रः सुपविः सुनाभिः ।
प्रति तिष्ठोर्ध्वः ॥ ६ ॥

सः । उत् । तिष्ठ । प्र । इहि । प्र । द्रव । रथः । सुऽचक्रः । सुऽपविः । सुऽनाभिः । प्रति । तिष्ठ । ऊर्ध्वः ॥ ६ ॥

भाषार्थः—(सः = स त्वम्) सो तू (उत्तिष्ठ) उठ, (प्रेहि) आगे बढ़, (सुचक्रः) सुन्दर पहिये वाले, (सुपविः) दृढ़ नेमि वा पुट्ठी वाले, (सुनाभिः) सुन्दर मध्य छिद्र वाले (रथः) रथ [के समान] (प्र द्रव) वेग से चल और (ऊर्ध्वः) ऊंचा होकर (प्रति तिष्ठ) प्रतिष्ठित हो ॥ ६ ॥

भावार्थः—मनुष्य प्रयत्न पूर्वक आगे बढ़कर प्रतिष्ठा प्राप्त करे जैसे उत्तम शिल्पी का बनाया हुआ सुदृढ़ रथ अन्य रथों से आगे निकल जाता है ॥ ६ ॥

यदि कर्तं पतित्वा संशश्रे यदि वाश्मा प्रहृतो जघान ।
ऋभू रथस्येवाङ्गानि सं दधत् परुषा परुः ॥ ७ ॥

यदि । कर्तम् । पतित्वा । सम्ऽशश्रे । यदि । वा । अश्मा । प्रऽहृतः । जघान । ऋभुः । रथस्यऽइव । अङ्गानि । सम् । दधत् । परुषा । परुः ॥ ७ ॥

भाषार्थः—(यदि) यदि (कर्तम्) कटारी आदि हथियार ने (पतित्वा)

६—**सः** । तादृशो विचारवान् त्वम् । **उत्तिष्ठ** । उद्गच्छ । सावधानो भव । **प्रेहि** । प्रकर्षेण गच्छ । **प्रद्रव** । प्रधाव । **रथः** । हनिकुषिनीरमि० (उ०२। २) इति रमु क्रीडायाम्, वा रंहतेर्गतिकर्मणः क्थन् । रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद् विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा रपतेर्वा रसतेर्वा—निरु० ९ । ११ । वेगवान् । स्यन्दनो यथा । **सुचक्रः** । सुदृढैश्चक्रैर्युक्तः । **सुपविः** । सुदृढः पविर्नेमिश्चक्रधारा यस्य स तथोक्तः । **सुनाभिः** । दृढया नाभ्या, अक्षच्छिद्रेण युक्तः । **प्रति तिष्ठ** । प्रतिष्ठितो भव । **ऊर्ध्वः** । उत्थितः सन् ॥

७—**यदि** । पक्षान्तरे । सम्भावनायाम् । **कर्तम्** । कृती छेदने-घञ् ।

गिर कर (संशश्रे) काट दिया है, (यदि वा) अथवा (प्रहृतः) फें... हुये (अश्मा) पत्थर ने (जघान) चोट लगाई है। (ऋभुः) बुद्धिमा... पुरुष (रथस्य अङ्गानि इव) रथ के अंगों के समान (परुः) एक जोड़े... (परुषा) दूसरे जोड़ से (सं दधत्) मिला देवे ॥ ७ ॥

भावार्थः—बुद्धिमान् पुरुष अपने विचलित मन को इस प्रकार ठीक क... जैसे चिकित्सक चोट को, और शिल्पी टूटे रथ को फिर जोड़कर सुधार लेते हैं ॥...

सूक्तम् १३ ॥

१—७ ॥ आत्मा देवता ॥ अनुष्टुप् छन्दः ॥

स्वास्थ्यरक्षोपदेशः—स्वास्थ्य रक्षा का उपदेश ।

उत दे॑वा॒ अव॑हितं॒ देवा॒ उन्न॑यथा॒ पुन॑ः ।
उ॒ताग॑श्च॒क्रुषं॑ दे॒वा देवा॑ जी॒वय॑था॒ पुन॑ः ॥ १ ॥

उ॒त । दे॒वाः । अव॑ऽहितम् । देवा॑ः । उत् । न॒य॒थ॒ । पुन॑ः । उ॒त । आग॑ः । च॒क्रुष॑म् । दे॒वाः । देवा॑ः । जी॒वय॑थ । पुन॑ः ॥ १ ॥

भाषार्थः—(देवाः) हे व्यवहार कुशल (देवाः) विद्वान् लोगो ! (अव... हितम्) अधोगत पुरुष को (उत) अवश्य (पुनः) फिर (उन्नयथ) तुम उ... हो (उत) और भी, (देवाः) हे दानशील (देवाः) महात्माओ ! (आग...

कर्तकं छेदकमायुधम् । कर्त्तरी । कृपाणी । **पतित्वा** । अधः प्राप्य । **संश...** शॄ हिंसायाम्—लिट् । संशृणाति स्म । संहिनस्ति स्म । **यदि वा** । अपि वा । **अश्मा** । प्रस्तरः । **प्रहृतः** । प्रक्षिप्तः । **जघान** । हन—लिट् । हतवान् । **ऋभुः** ... अ० १ । २ । ३ । मेधावी—निघ० ३ । १५ । **रथस्य** । **इव** । यथा । **अङ्गानि** ... अक्षचक्रेषायुगादीनि । **सं दधत्** । संदधातु । संयोजयतु । **परुषा** ... पर्वान्तरेण । **परुः** । पर्व ॥

१—उत । निश्चयेन । **देवाः** । हे व्यवहारकुशलाः । **अव हितम्** ... अव परिभवे + धाञ्—क्तः । अधोधृतम् । अवनीतं पुरुषम् । **देवाः** । दिव्यगुणव... विद्वांसः । **उन्नयथ** । उन्नतं कुरुथ । **पुनः** । **उत** । अपि च । **आगः** ...

अपराध (चक्रुषम्) करने वाले प्राणी को (पुनः) फिर (जीवयथ) तुम जिलाते हो ॥ १ ॥

भावार्थः—महात्मा लोग स्वभाव से ही अधोगत पुरुषों को ऊंचा करते और मृतक समान अपराधियों को पाप से छुड़ा कर उनका जीवन सुफल कराते हैं। मनुष्य सत्पुरुषों के सत्संग से अपने आत्मिक और शारीरिक दोषों को त्याग कर जीवन सुधारें ॥१॥

इस सूक्त के मन्त्र १—५, ७ ऋग्वेद १० । १३७ के म० १—५, ७ कुछ भेद से हैं।

द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।

दक्षं ते अन्य आवातु व्य१न्यो वातु यद्रपः ॥ २ ॥

द्वौ । इमौ । वातौ । वातः । आ । सिन्धोः । आ । पराऽवतः ।

दक्षम् । ते । अन्यः । आऽवातु । वि । अन्यः । वातु । यत् । रपः ॥ २ ॥

भाषार्थः—(इमौ) यह (द्वौ) दोनों (वातौ) पवन, अर्थात् प्राण और अपान वायु (आसिन्धोः) बहने वाले इन्द्रियदेश तक और (आ परावतः) बाहिर दूर स्थान तक (वातः) चलते रहते हैं। (अन्यः) एक [प्राण वायु] (ते) तेरा (दक्षम्) वृद्धि करने वाले बल को (आवातु) बह कर लावे और (अन्यः) दूसरा [अपान वायु] (यत् रपः) जो दोष है उसे (विवातु) बहकर निकाल देवे ॥ २ ॥

आगोऽपराधे च (उ० ४ । २१२) इति इण् गतौ असुन् आगादेशः । अपराधम् **चक्रुषम्** । करोतेर्लिटः क्वसुः । अमि भत्वाभावेऽपि छान्दसं वसोः संप्रसारणम् । चकृवांसम् । कृतवन्तं पुरुषम् । **देवाः** । हे दानशीलाः । **देवाः** । महात्मानः । **जीवयथ** । जीवनवन्तं कुरुथ ॥

२—**द्वौ** । **इमौ** । दृश्यमानौ । **वातौ** । पवनौ । प्राणापानौ । **वातः** । वा गतिगन्धनयोः । गच्छतः,संचरतः । **आसिन्धोः** । मर्यादायामाकारः । स्यन्दनशील-नाडीदेशपर्यन्तम् । **आ परावतः** । शरीराद् बाह्यदेशपर्यन्तम् । **दक्षम्** । दक्ष वृद्धौ—अच् । वृद्धिकरं बलम् । **ते** । तव । **अन्यः** । एकः प्राणवायुः । **आवातु** ।

भावार्थः— मनुष्य शुद्ध स्थान में शुद्ध वायु के सेवन से प्राण वायु के सञ्चार द्वारा शरीर का बल बढ़ाकर और अपान से पसीना आदि मल दोष नाश करके स्वस्थ रहें ॥ २ ॥

आ वांत वाहि भेषजं वि वांत वाहि यद् रपः ।
त्वं हि विश्वभेषज देवानां दूत ईयसे ॥ ३ ॥

आ । वात । वाहि । भेषजम् । वि । वात । वाहि । यत् । रपः ।
त्वम् । हि । विश्वऽभेषज । देवानाम् । दूतः । ईयसे ॥ ३ ॥

भाषार्थः—(वात) हे वायु (भेषजम्) स्वास्थ्य को (आ वाहि) बह कर ला और, (वात) हे वायु (यत् रपः=यत् रपः तत्) जो दोष है उसे (विवाहि) बह कर निकाल दे (हि) क्योंकि (विश्वभेषज) हे सर्वरोग-नाशक वायु ! (त्वम्) तू (देवानाम्) इन्द्रियों, विद्वानों और सूर्यादि लोकों के बीच (दूतः) चलने वाला वा दूत [समान सन्देश पहुंचाने वाला] होकर (ईयसे) फिरता रहता है ॥ ३ ॥

भावार्थः—वायु के संचार से शरीर का मल निकलकर स्वास्थ्य मिलता है और तार, विमान, ताप, वृष्टि आदि का संचार होता है ॥ ३ ॥

आगमयतु । **अन्यः** । द्वितीयोऽपानवायुः । **वि वातु** । विगमयतु । निवारयतु । **यत्** । **रपः** । रप व्यक्तायां वाचि—असुन् । रपो रिप्रमिति पापनामनी भवतः—निरु० ४ । २१ । पापम् दोषम् ॥

३—**वात** । हे वायो ! **आ वाहि** । आवह । आगमय । **भेषजम्** । तस्येदम् (पा० ४ । ३ । १२०) इति भिषज्—अण् । निपातनाद् गुणः । भिषजो वैद्यस्येदम् । स्वास्थ्यम् । **वि वाहि** । विगमय । विनाशय । **यत्** । यत्किञ्चित् । **रपः** । पापम् । दोषः । **हि** । यस्मात् कारणात् । **विश्वभेषज** । भेषं भयं जयतीति । जि—डः । सर्वव्याधिनिवर्तक वायो ! **देवानाम्** । इन्द्रियाणां विदुषां सूर्यादीनां च मध्ये । **दूतः** । दुतनिभ्यां दीर्घश्च (उ० ३ । ९०) इति दु गतौ उपतापे वा—कर्त्तरि क्तः । गन्ता । यद्वा दूतवत्सन्देशहरः । **ईयसे** । ईङ् गतौ—श्यन् । संचरसि ॥

त्राय॑न्तामि॒मं दे॒वास्त्राय॑न्तां म॒रुतां॑ ग॒णाः ।
त्राय॑न्तां॒ विश्वा॑ भू॒तानि॒ यथा॒यम॑र॒पा अस॑त् ॥ ४ ॥

त्राय॑न्ताम् । इ॒मम् । दे॒वाः । त्राय॑न्ताम् । म॒रुता॑म् । ग॒णाः । त्राय॑न्ताम् । विश्वा॑ । भू॒तानि॑ । यथा॑ । अ॒यम् । अ॒र॒पाः । अस॑त् ॥ ४ ॥

भाषार्थः—(देवाः) इन्द्रियां (इमम्) इस [जीव] की (त्रायन्ताम्) रक्षा करें, और (मरुताम्) पवनों [श्वास प्रश्वासों] के (गणाः) प्रवाह (त्रायन्ताम्) रक्षा करें। और (विश्वा = ०—नि) सब (भूतानि) पृथिवी, जल, तेज, वायु और आकाश, पांच तत्त्व (त्रायन्ताम्) रक्षा करें, (यथा) जिससे (अयम्) यह [प्राणी] (अरपाः) दोष रहित (असत्) रहे ॥४॥

भावार्थः—मनुष्य इन्द्रियों के शोधन और श्वास प्रश्वास के यथावत् प्राणायाम से पंच भूतों को सम रख कर सदा हृष्ट पुष्ट रहें ॥ ४ ॥

आ त्वा॑गमं॒ शंता॑तिभि॒रथो॑ अरि॒ष्टता॑तिभिः ।
दक्षं॑ त उ॒ग्रमाभा॑रिषं॒ परा॒ यक्ष्मं॑ सुवामि ते॒ ॥ ५ ॥

आ । त्वा॒ । अ॒ग॒म॒म् । शंता॑तिऽभिः । अथो॒ इति॑ । अ॒रि॒ष्टता॑तिऽभिः । दक्ष॑म् । ते॒ । उ॒ग्रम् । आ । अ॒भा॒रि॒ष॒म् । परा॑ । यक्ष्म॑म् । सु॒वा॒मि॒ । ते॒ ॥ ५ ॥

४—**त्रायन्ताम्** । रक्षन्तु । **इमम्** । प्राणिनम् । **देवाः** । इन्द्रियाणि । **मरुताम्** । वायूनां श्वासप्रश्वासानाम् । **गणाः** । समूहाः । प्रवाहाः । **विश्वा** । विश्वानि सर्वाणि । **भूतानि** । पृथिव्यप्तेजोवाय्वाकाशानि । **यथा** । येन प्रकारेण । **अयम्** । देहस्थो जीवः । **अरपाः** । न विद्यन्ते रपांसि पापानि यस्मिन्निति बहुव्रीहौ । **नञ्सुभ्याम्** (पा० ६।२।१७२) इति उत्तरपदान्तोदात्तत्त्वम् । अपापः । निर्दोषः । **असत्** । लेट् । भवेत् ॥

भाषार्थः—[हे प्राणी !] (त्वा) तुझको (शन्तातिभिः) शान्तिदायक कर्मों से (अथो) और भी (अरिष्टतातिभिः) अहिंसाकारक कर्मों से (आगमम्) मैं प्राप्त हुआ हूं। (ते) तेरे लिये (उग्रम्) उग्र (दक्षम्) वृद्धिकारक बल (आ अभारिषम्) मैं लाया हूं, [उससे] (ते) तेरे (यक्ष्मम्) महारोग को (परा सुवामि) दूर हटाता हूं ॥ ५ ॥

भावार्थः—मनुष्य श्वास प्रश्वास और पंच भूतों की यथावत् समझ और ब्रह्मचर्य आदि शुभ कर्मों द्वारा दुष्कर्मों से बच कर बलवान् धनवान् और नीरोग होवे ॥ ५ ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥ ६ ॥

अयम् । मे । हस्तः । भगऽवान् । अयम् । मे । भगवत्ऽतरः । अयम् । मे । विश्वऽभेषजः । अयम् । शिवऽअभिमर्शनः ॥ ६ ॥

भाषार्थः—(अयम्) यह (मे) मेरा (हस्तः) [बायां] हाथ (भगवान्) भाग्यवान् है, और (अयम्) यह (मे) मेरा [दायां हाथ] (भगवत्तरः) अधिक भाग्यवान् है। (अयम्) यह (मे) मेरा [हाथ] (विश्वभेषजः) सर्व रोगनाशक, और (अयम्) यह (शिवाभिमर्शनः) छूने में मंगल दायक है ॥ ६ ॥

५—**त्वा** । त्वां प्राणिनम् । **आगमम्** । गमेर्लुङि रूपम् । आगतवान् प्राप्तवानस्मि । **शंतातिभिः** । **शिवशमरिष्टस्य करे** (पा० ४ । ४ । १४३) इति करणेऽर्थे तातिल् प्रत्ययः । **लिति**(पा०६।१।१९३)इति प्रत्ययात् पूर्वस्य उदात्तत्वम्। शंकरैः सुखकरैः कर्मभिः । **अथो** । अपि च । **अरिष्टतातिभिः** । पूर्ववत् तातिल् उदात्तत्वं च । अरिष्टम् अहिंसा । तत्करैः श्रेयोहेतुभिः कर्मभिः । **दक्षम्** । वृद्धिकरं बलम् । **ते** । तुभ्यम् । **उग्रम्** । उद्गूर्णम् । तीव्रम् । **आ अभारिषम्** । हस्य भकारः । आहार्षम् । आहृतवानस्मि । आनैशम् । **यक्ष्मम्** । महारोगम् । **परा सुवामि** । षू प्रेरणे, तौदादिकः । पराङ्मुखं प्रेरयामि । **ते** । तव ।

६—**अयम्** । दृश्यमानो वामहस्तः । **मे** । मदीयः । **हस्तः** । करः । **भगवान्** । भाग्यवान् । समर्थः । **अयम्** । दक्षिणहस्तः । **भगवत्तरः** । वामहस्तात्

भावार्थः—मनुष्य श्वास प्रश्वास और पंच भूतों के परिज्ञान से स्पर्श द्वारा रोगों का निदान करके शरीर को रोग रहित और पुष्ट करे ॥ ६ ॥

यह मन्त्र ऋग्वेद में है—म० १० । सू० ६० । म० १२ ।

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि मृशामसि ॥ ७ ॥

हस्ताभ्याम् । दशऽशाखाभ्याम् । जिह्वा । वाचः । पुरःऽगवी । अनामयित्नुऽभ्याम् । हस्ताभ्याम् । ताभ्याम् । त्वा । अभि । मृशामसि ॥ ७ ॥

भाषार्थः—(दशशाखाभ्याम्) दश शाखा वाले (हस्ताभ्याम्) दोनों हाथों के द्वारा (जिह्वा) जिह्वा (वाचः) वाणी की (पुरोगवी) आगे ले चलने वाली है। (ताभ्याम्) उन (अनामयित्नुभ्याम्) आरोग्य देने वाले (हस्ताभ्याम्) दोनों हाथों से (त्वा) तुझको (अभि मृशामसि) हम छूते हैं ॥ ७ ॥

भावार्थः—मनुष्य प्राण अपान और पंच भूत परीक्षा द्वारा दस अंगुलियों से दस इन्द्रियों और दस दिशाओं का ज्ञान प्राप्त करके दुःख की निवृत्ति और सुख की प्रवृत्ति करें ॥ ७ ॥

अधिकभाग्यवान् । **विश्वभेषजः** । सर्वरोगनिवर्तकः । **शिवाभिमर्शनः** । मङ्गलस्पर्शयुक्तः । सुखस्पर्शः ॥

७—हस्ताभ्याम् । कराभ्याम् । **दशशाखाभ्याम्** । दश अङ्गुलयः शाखाभूता ययोस्तादृशाभ्याम् । **जिह्वा** । रसना । **वाचः** । वाण्याः । **पुरोगवी** । गोरतद्धितलुकि (पा० ५।४।९२) इति पुरस्+गो समासे टच्, स्त्रियां ङीप्, अन्तर्गतण्यर्थः । पुरो अग्रे गौर्गमयित्री । **अनामयित्नुभ्याम्** । अनामय-इत्नुच् । अनामयशीलाभ्याम् । आरोग्यहेतुभ्याम् । **त्वा** । त्वां प्राणिनम् । **अभि मृशामसि** । इदन्तो मसि (पा० ७ । १ । ४६) इति मसः स्थाने मसि । अभितः स्पृशामः ॥

सूक्तम् १४ ॥

१-६ ॥ अग्निर्देवता ॥ १, ५-७ त्रिष्टुप् । २, ४ अनुष्टुप् । ३ प्रस्तारपङ्क्तिः । ८ पञ्चपदा जगती, ६ जगती ॥

ब्रह्मप्राप्त्युपदेशः—ब्रह्म की प्राप्ति का उपदेश ॥

अजो ह्य१ग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्र आयन् तेन रोहान् रुरुहुर्मेध्यासः ॥१॥

अजः । हि । अग्नेः । अजनिष्ट । शोकात् । सः । अपश्यत् । जनितारम् । अग्रे । तेन । देवाः । देवताम् । अग्रे । आयन् । तेन । रोहान् । रुरुहुः । मेध्यासः ॥ १ ॥

भाषार्थः—(अजः) अजन्मा, वा गतिशील, अज अर्थात् जीवात्मा (शोकात्) दीप्यमान (अग्नेः) सर्वव्यापक अग्नि अर्थात् परमेश्वर से (हि) ही (अजनिष्ट) प्रकट हुआ । (सः) उस [जीवात्मा] ने (अग्रे) पहिले से वर्तमान (जनितारम्) अपने जनक [परमात्मा] को (अपश्यत्) देखा । (तेन) उस [ज्ञान] से (देवाः) देवताओं ने (अग्रे) पहिले काल में (देवताम्) देवतापन (आयन्) पाया (तेन) उससे ही (मेध्यासः) मेधावी वा पवित्रस्वभाव पुरुष (रोहान्) चढ़ने योग्य पदों पर (रुरुहुः) चढ़े ॥ १ ॥

१—**अजः** । न जायते यः । नञ्+जन-डः । यद्वा, अज गतिक्षेपणयोः, अच् । अजन्मा । गतिशीलः । जीवात्मा—इति शब्दस्तोममहानिधिः । **हि** । निश्चयेन । **अग्नेः** । अगि गतौ—निः । सर्वव्यापकात् परमेश्वरात् । **अजनिष्ट** । प्रादुरभूत् । **शोकात्** । शुच शौचे, शोके च—घञ् । दीप्यमानात्—इति महीधरः य० १३ । ५१ । **सः** । अजः । जीवात्मा । **अपश्यत्** । दृष्टवान् । **जनितारम्** । जनयितारं स्वो-त्पादकं प्रजापतिम् अग्निम् । **अग्रे** । सृष्टेः प्राग् वर्तमानम् । **तेन** । जनयितृज्ञानेन । **देवाः** । विद्वांसः । महात्मानः । **देवताम्** । तस्य भावस्त्वतलौ (पा० ५ । १

भावार्थः—मनुष्य आदि पिता जगदीश्वर से अपना शरीर और सामर्थ्य पाकर अपने जन्म और वंश का गौरव बढ़ाते हैं, जैसे पूर्वज महात्माओं ने परमात्मा की महिमा पहचान कर मोक्ष आदि उच्च पद पाये हैं ॥ १ ॥

यह मन्त्र कुछ भेद से यजुर्वेद १३ । ५१ में है ॥

क्रमध्वमग्निना नाकमुख्यान् हस्तेषु बिभ्रतः ।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम् ॥ २ ॥

क्रमध्वम् । अग्निना । नाकम् । उख्यान् । हस्तेषु । बिभ्रतः ।
दिवः । पृष्ठम् । स्वः । गत्वा । मिश्राः । देवेभिः । आध्वम् ॥ २ ॥

भाषार्थः—[हे वीरो !] (उख्यान्) पके हुये आहारों को (हस्तेषु) हाथों में (बिभ्रतः) भरे हुये तुम (अग्निना) अग्नि अर्थात् परमेश्वर के सहारे से [अथवा अपने शरीर की उष्णता वा बल से] (नाकम्) पूर्ण सुख (क्रमध्वम्) पराक्रम से प्राप्त करो। और (देवेभिः) विद्वानों के साथ (मिश्राः) मिलते हुये तुम (दिवः) व्यवहार के (पृष्ठम्) सींचने वा बढ़ाने वाले अथवा पीठ के समान सहायक (स्वः) सुखस्वरूप परमात्मा को (गत्वा) प्राप्त होकर (आध्वम्) बैठो ॥ २ ॥

---

११९) इति तल् । देवभावम् । दिव्यगुणताम् । **अग्रे** । अस्मत्पूर्वकाले वर्त्तमानाः । **आयन्** । इण् गतौ—लङ् । प्राप्नुवन् । **रोहान्** । रुह-घञ् । आरोहणीयान् सुखलोकान् । **रुरुहुः** । आरूढवन्तः । **मेध्यासः** । **उगवादिभ्यो यत्** (पा० ५ । १ । २) इति मेधा—यत् । असुगागमः । मेधायै हिताः । मेध्याः । मेधाविनः । पवित्राः पुरुषाः ॥

२—**क्रमध्वम्** । पराक्रमेण प्राप्नुत । **अग्निना** । परमेश्वरसहायेन । यद्वा स्वशरीरस्थेन उष्णत्वेन । **नाकम्** । अकेन दुःखेन रहितं पूर्णसुखम् । **उख्यान्** । **शूलोखाद्यत्** (पा० ४ । २ । १७) इति उखा—"संस्कृतं भक्षाः"—इत्यर्थे यत् । उखायां पाकपात्रे संस्कृतान् आहारान् । **हस्तेषु** । करेषु, दानाय । **बिभ्रतः** । धरन्तः । **दिवः** । व्यवहारस्य । **पृष्ठम्** । **तिथपृष्ठगूथ०** (उ० २ । १२) इति पृषु सेचने—थक् । सेचकं वर्धकम् । यद्वा पृष्ठवत् सहायकम् । **स्वः** । सुखस्वरूपं

भावार्थः—मनुष्य परमेश्वर की अपार सृष्टि में पुरुषार्थ पूर्वक परोपकार के लिये अन्न प्राप्त करें और विद्वानों से व्यवहार शिक्षा पाकर आनन्द भोगें ॥ २ ॥

यह मन्त्र कुछ भेद से य० १७ । ६५ में है ॥

पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम् । दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ॥ ३ ॥

पृष्ठात् । पृथिव्याः । अहम् । अन्तरिक्षम् । आ । अरुहम् । अन्तरिक्षात् । दिवम् । आ । अरुहम् । दिवः । नाकस्य । पृष्ठात् । स्वः । ज्योतिः । अगाम् । अहम् ॥ ३ ॥

भाषार्थः—(अहम्) मैं (पृथिव्याः) पृथिवी के (पृष्ठात्) पृष्ठ से (अन्तरिक्षम्) मध्य लोक, आकाश को (आ अरुहम्) चढ़ गया (अन्तरिक्षात्) आकाश लोक से (दिवम्) सूर्य लोक को (आ अरुहम्) मैं चढ़ गया । (नाकस्य) सुख देने हारे (दिवः) प्रकाशमान सूर्य लोक के (पृष्ठात्) पृष्ठ से (अहम्) मैंने (स्वः) सुख स्वरूप और (ज्योतिः) ज्योति स्वरूप परमात्मा को (अगाम्) प्राप्त किया ॥ ३ ॥

भावार्थः—योगी पुरुष विद्याभ्यास और योगाभ्यास से पृथिवी, अन्तरिक्ष

परमात्मानम् । **गत्वा** । प्राप्य । **मिश्राः** । मिश्रिताः । मिलिताः संन्तः । **देवेभिः** । देवैः । विद्वद्भिः । **आध्वम्** । आस उपवेशने—लोट् । उपविशत ॥

३—**पृष्ठात्** । तलात् । **पृथिव्याः** । भूमेः । **अहम्** । विद्वान् योगी जनः । **अन्तरिक्षम्** । आकाशम् । **आ अरुहम्** । रुह—लुङ् । आरूढवान् । **अन्तरिक्षात्** । आकाशात् । **दिवम्** । प्रकाशमानं सूर्यम् । **दिवः** । सूर्यस्य । **नाकस्य** । सुखनिमित्तस्य अन्धकारनाशकत्वात् । **पृष्ठात्** । उपरिभागात् । **स्वः** । सुखस्वरूपम् ।

और सूर्य लोक में खोजता हुआ तुरीय अर्थात् इन तीनों से चौथे आनन्दघन, ज्योतिः स्वरूप परब्रह्म को प्राप्त करके ब्रह्मानन्द में मग्न हो जाता है ॥ ३ ॥

यह मन्त्र कुछ भेद से यजु० १७।६७ में है ॥

स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥ ४ ॥

स्वः । यन्तः । न । अप । ईक्षन्ते । आ । द्याम् । रोहन्ति । रोदसी इति । यज्ञम् । ये । विश्वतःऽधारम् । सुऽविद्वांसः । विऽतेनिरे ॥ ४ ॥

भाषार्थः--(ये) जो (सुविद्वांसः) बड़े विद्वान् योगी जन (द्याम्) अन्तरिक्ष और (रोदसी) सूर्य और पृथिवी लोक तक (आरोहन्ति) चढ़ते हैं, और जिन्होंने (विश्वतोधारम्) सब प्रकार से धारण शक्ति वाले (यज्ञम्) देव अर्थात् ब्रह्म के पूजन को (वितेनिरे) फैलाया है, वे ही योगी पुरुष (यन्तः न) चलते फिरते उद्योगी पुरुषों के समान (स्वः) सुख स्वरूप परब्रह्म को (अपेक्षन्ते) हृदय से चाहते हैं ॥ ४ ॥

भावार्थः--जो विद्वान् योगी जन संसार के सब पदार्थों के विज्ञानी होकर परमात्मा की महिमा को विचारते हैं, वे ही उससे प्रीति करके आत्मबल पाकर यशस्वी होते हैं ॥ ४ ॥

यह मंत्र यजुर्वेद में है–य० १७ म० ६८ ॥

ज्योतिः । ज्योतिः स्वरूपं परमात्मानम् । **अगाम्** । इण् गतौ—लुङ् । आगमम् । प्राप्तवान् ॥

४—**स्वः** । सुखस्वरूपं परब्रह्म । **यन्तः** । गच्छन्तः । उद्योगिनः पुरुषाः । **न** । इव—निरु० ३ । १५ । **अप ईक्षन्ते** । अप+ईक्ष दर्शने । आकाङ्क्षन्ति । समालोकन्ते ते सुविद्वांसः । **द्याम्** । अन्तरिक्षम् । **आ रोहन्ति** । आरूढा भवन्ति ये सुविद्वांसः । **रोदसी** । द्यावापृथिव्यौ च । **यज्ञम्** । देवस्य परब्रह्मणः पूजनम् । **ये** । **विश्वतोधारम्** । सर्वतो धाराभिर्धारणशक्तिभिर्युक्तम् । **सुविद्वांसः** । सुष्ठु विशेषेण कर्म प्रकारं जानन्तः, पण्डिताः, योगिनः । **वितेनिरे** । तनु—लिट् । विस्तारितवन्तः ॥

अग्ने प्रेहि॑ प्रथ॒मो दे॒वता॑नां॒ चक्षु॑र्दे॒वाना॑मु॒त मानु॑षाणाम् ।
इय॑क्षमाणा॒ भृगु॑भिः स॒जोषा॑ः स्व॒र्यन्तु॒ यज॑मानाः स्व॒स्ति ॥५॥

अग्ने॑ । प्र । इ॒हि॒ । प्र॒थ॒मः । दे॒वता॑नाम् । चक्षुः॑ । दे॒वाना॑म् । उ॒त । मानु॑षाणाम् । इय॑क्षमाणाः । भृगु॑ऽभिः । स॒ऽजोषा॑ः । स्वः॑ । य॒न्तु॒ । यज॑मानाः । स्व॒स्ति ॥ ५ ॥

भाषार्थः—(अग्ने) हे ज्ञानस्वरूप परमात्मन् ! (प्रेहि) प्राप्त हो, तू (देवतानाम्) सब विद्वानों में (प्रथमः) पहिला और (देवानाम्) सूर्य आदि लोकों का (उत) और भी (मानुषाणाम्) मनुष्य जातियों का (चक्षुः) नेत्र [के समान देखने वाला] है । (इयक्षमाणाः) संगति चाहने वाले (भृगुभिः) परिपक्व विज्ञानी वेदज्ञ ब्राह्मणों के साथ (सजोषाः) एक सी प्रीति करते हुये, (यजमानाः) दानशील यजमान लोग (स्वः) सुख स्वरूप परब्रह्म और (स्वस्ति) कल्याण को (यन्तु) प्राप्त होवें ॥ ५ ॥

भावार्थः परमात्मा सबका आदि गुरु है वही सबका साक्षी और नियन्ता है, पुरुषार्थी सदाचारी पुरुष विज्ञानी महात्माओं के सत्संग से ब्रह्मज्ञान की प्राप्ति करके परमगति प्राप्त करें ॥ ५ ॥

यह मन्त्र कुछ भेद से यजुर्वेद में है—य० १७ । ६९ ॥

५—**अग्ने** । हे सर्वज्ञ परमात्मन् ! । **प्रेहि** । प्रगच्छ । अस्मान् प्राप्नुहि । **प्रथमः** । आदिमः । मुख्यः । **देवतानाम्** । देव—स्वार्थे तल् । देवानां विदुषाम् । **चक्षुः** । नेत्रवद् द्रष्टा । **देवानाम्** । सूर्यादिलोकानाम् । **उत** । अपि च । **मानुषाणाम्** । **मनोर्जातावञ्यतौ षुक् च** (पा० ४ । १ । १६१) इति मनु—अञ् षुगागमः । मनुष्यजातीनाम् । **इयक्षमाणाः** । यजेः सन् । **सन्यतः** (पा० ७ । ४ । ७९) इति अभ्यासाकारस्य इकारः,आदिवर्ण लोपश्छान्दसः । यियक्षमाणाः । यष्टुं संगन्तुमिच्छन्तः । **भृगुभिः** । अ० २ । ५ । ३ । परिपक्वविज्ञानैः अनूचानब्राह्मणैः । **सजोषाः** । जुषी प्रीतिसेवनयोः—घञ् । समानस्य सभावः । समानप्रीतयः । प्रीतिमन्तः । **स्वः** । सुखस्वरूपं परब्रह्म । **यन्तु** । प्राप्नुवन्तु । **यजमानाः** । यज—शानच् । दानशीलाः । **स्वस्ति** । कल्याणं च ॥

अजमनज्मि पयसा घृतेन दिव्यं सुपर्णं पयसं बृहन्तम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ॥६॥

अजम् । अनज्मि । पयसा । घृतेन । दिव्यम् । सुऽपर्णम् । पयसम् । बृहन्तम् । तेन । गेष्म । सुऽकृतस्य । लोकम् । स्वः । आऽरोहन्तः । अभि । नाकम् । उत्ऽतमम् ॥ ६ ॥

भाषार्थः—(दिव्यम्) दिव्य गुण वाले, (सुपर्णम्) बड़े पूर्ण शुभ लक्षण वाले (पयसम्) गतिमान् वा उद्योगी (बृहन्तम्) बड़े बली (अजम्) जीवात्मा को (घृतेन) प्रकाशमान (पयसा) ज्ञान से (अनज्मि) मैं [मनुष्य] संयुक्त करता हूं । (तेन) उस [ज्ञान] से (उत्तमम्) उत्तम (नाकम्) दुःख रहित (स्वः) सुखस्वरूप परब्रह्म को (अभि = अभिलक्ष्य) लख कर (आरोहन्तः) चढ़ते हुये हम (सुकृतस्य लोकम्) पुण्य लोक को (गेष्म) खोजें ॥ ६ ॥

भावार्थः—मनुष्य परमात्मा की दी हुई अद्भुत शक्तियों से अपना ज्ञान बढ़ावे, और उस आनन्दस्वरूप जगत्पति की अनन्त महिमा को खोजता हुआ निरन्तर उन्नति करके मोक्ष पद प्राप्त करे ॥ ६ ॥

६—**अजम्** । म० १ । अजनशीलम् जीवात्मानम् । **अनज्मि** । अञ्जू व्यक्ति-म्रक्षणकान्तिगतिषु । म्रक्षयामि । मिश्रयामि । **पयसा** । पय गतौ-असुन् । ज्ञानेन । **घृतेन** । घृ क्षरणदीप्त्योः सेचने च-क्तः । प्रकाशमानेन । **दिव्यम्** । प्रकाशार्हम् । मनोहरम् । **सुपर्णम्** । पॄ पालनपूरणयोः-नः । शोभनानि पर्णानि पूर्णानि शुभलक्षणानि यस्य तम्-यथा दयानन्दभाष्ये य० १७-७२ । **पयसम्** । अत्यविचमि० (उ० ३।११७) इति पय गतौ—असच् । गतिशीलम् । उद्योगिनम् । **बृहन्तम्** । महान्तं बलिनम् । **तेन** । उक्तप्रकारेण । **गेष्म** । अ० ४।११।६ । अन्विच्छाम । **सुकृतस्य** । शुभकर्मणः । **लोकम्** । अ० ४।११।६ । स्थानम् । **स्वः** । सुखस्वरूपं परब्रह्म । **आरोहन्तः** । रुह-शतृ । अधिरोहन्तः । **अभि** । अभिलक्ष्य । **नाकम्** । दुःखशून्यम् । **उत्तमम्** । सर्वोत्कृष्टम् ॥

१. वस्तुतः पय गतौ से औणादिक असुन् प्रत्यय करके पयस् शब्द निष्पन्न हो जाता है । किन्तु उपर्युक्त दोनों स्थलों में स्वरभेद होने से 'पयसम्' यहाँ बाहुलक से पय धातु मान कर असच् प्रत्यय करते हैं । जिससे चितः (६ । १ । १६३) से अन्तोदात्त हो जाये ॥ सम्पा० ॥

पञ्चौदनं पञ्चभिरङ्गुलिभिर्दर्व्योद्धर पञ्चधैतमोदनम् । प्राच्यां दिशि शिरो अजस्य धेहि दक्षिणायां दिशि दक्षिणं धेहि पार्श्वम् ॥ ७ ॥

पञ्चऽओदनम् । पञ्चऽभिः । अङ्गुलिऽभिः । दर्व्या । उत् । हर । पञ्चऽधा । एतम् । ओदनम् । प्राच्याम् । दिशि । शिरः । अजस्य । धेहि । दक्षिणायाम् । दिशि । दक्षिणम् । धेहि । पार्श्वम् ॥ ७ ॥

भाषार्थः—(एतम्) इस (पञ्चधा) पांच प्रकार पर (पञ्चौदनम्) पांच भूतों से सींचे हुये (ओदनम्) वृद्धि करने वाले आत्मा को (पञ्चभिः) विस्तृत (अङ्गुलिभिः) चेष्टाओं के साथ (दर्व्या) विदारण वा पृथक् करण शक्ति से (उद्धर=उत्हर) ऊपर ला, (प्राच्याम्) अपने से पूर्व वा सन्मुख (दिशि) दिशा में (अजस्य) जीवात्मा का (शिरः) शिर (धेहि) धर, (दक्षिणायाम् दिशि) दक्षिण दिशा में (दक्षिणम्) दाहिने (पार्श्वम्) कक्षा के नीचे भाग को (धेहि) धर ॥ ७ ॥

७—**पञ्चौदनम्** । कनिन् युवृषितक्षि० (उ० १ । १५६) इति पचि व्यक्तीकरणे विस्तारे च-कनिन् । **उन्देर्नलोपश्च** (उ० २ । ७६) इति उन्दी क्लेदने-युच् । ओदनो मेघः-निघ० १ । १० । ओदनमुदकदानं मेघम्-निरु० ६ । ३४ । पंचभिर्भूतैः ओदनः सेचनं यस्य तम् । **पंचभिः** । विस्तृताभिः । **अङ्गुलिभिः** । **ऋतन्यञ्जि०** (उ० ४ । २) इति अङ्ग पदे=चेष्टायाम्-उलिप्रत्ययः । अंगुलयः कस्मादग्रगामिन्यो भवन्तीति वाग्रगालिन्यो भवन्तीति वाग्रकारिण्यो भवन्तीति वाग्रसारिण्यो भवन्तीति वाङ्कना भवन्तीति वाञ्चना भवन्तीति वापि वाभ्यञ्चनादेव स्युः । निरु० ३ । ८ । चेष्टाभिः । **दर्व्या** । **दृदभ्यां विन्** (उ० ४ । ५३) इति दृ विदारणे विन्, ङीष् । विदारणशक्त्या । **उद् हर** । उद्धृत्य स्थापय । **पंचधा** । पंचप्रकारेण विभज्य । **एतम्** । आ—इण्-क्तः । आगतं दृश्यमानं वा । **ओदनम्** । व्याख्यातम् । सेचनसमर्थं यद्वा, अन्नवद् वृद्धिकरम् आत्मानम् । **प्राच्याम्** । अ० ३ । २६ । १ । स्वस्थानात् पूर्वस्याम् । स्वाभिमुखी भूतायाम् । **दिशि** । दिशायाम् । **शिरः** । अ० २।२५।२ । मस्तकम् । **अजस्य** । म०१ । अजन-

भावार्थः—पंच भूत निर्मित स्थूल शरीर में सूक्ष्म शरीर वाला आत्मा इन्द्रियों सहित रहता है। योगी विवेक दृष्टि द्वारा आत्मा को स्थूल शरीर से पृथक् करे, और आत्मा के सूक्ष्म अवयवों को मन्त्र ७ व ८ के अनुसार स्थापित करके मन्त्र ९ के अनुसार मोक्ष फल प्राप्त करे ॥ ७ ॥

प्रतीच्यां दिशि भसदमस्य धेह्युत्तरस्यां दिश्युत्तरं धेहि पार्श्वम्। ऊर्ध्वायां दिश्यजस्यानूकं धेहि दिशि ध्रुवायां धेहि पाजस्यमन्तरिक्षे मध्यतो मध्यमस्य ॥ ८ ॥

प्रतीच्याम्। दिशि। भसदम्। अस्य। धेहि। उत्तरस्याम्। दिशि। उत्तरम्। धेहि। पार्श्वम्। ऊर्ध्वायाम्। दिशि। अजस्य। अनूकम्। धेहि। दिशि। ध्रुवायाम्। धेहि। पाजस्यम्। अन्तरिक्षे। मध्यतः। मध्यम्। अस्य ॥८॥

भाषार्थः—[हे मनुष्य !] (प्रतीच्याम्) पश्चिम वा पीछे वाली (दिशि) दिशा में (अस्य) इस [जीवात्मा] के (भसदम्) दीप्ति वा कटि भाग को (धेहि) धर, (उत्तरस्याम्) उत्तर वा बाईं (दिशि) दिशा में (उत्तरम्) बायें (पार्श्वम्) कक्षा के नीचे भाग को (धेहि) धर। (ऊर्ध्वायाम्) ऊपर वाली (दिशि) दिशा में (अजस्य) जीवात्मा की (अनूकम्) रीढ़ को (धेहि)

शीलस्य जीवात्मनः। **धेहि**। धर। **दक्षिणायाम्**। दक्षिणस्याम्। **पार्श्वम्**। **स्पृशेः श्वणशुनौ पृ च** (उ० ५। २७) इति स्पृश संस्पर्शने श्वण्, धातोः पृ इत्यादेशः। कक्षयोरधोभागम् ॥

८—**प्रतीच्याम्**। अ० ३। २६। ३। पश्चिमायाम् पश्चात् स्थितायाम्। **दिशि**। दिशायाम्। **भसदम्**। **शृदृभसोऽदिः** (उ० १। १३०) इति भस भर्त्सनदीप्त्योः-अदिः। कटिप्रदेशं जघनं वा। **अस्य**। अजस्य। **धेहि**। स्थापय। **उत्तरस्याम्**। उदीच्याम्। वामभागवर्तमानायाम्। **उत्तरम्**। वामभागस्थम्। **पार्श्वम्**। म० ७। **ऊर्ध्वायाम्**। अ० ३। २६। ६। उपरि वर्तमानायाम्। **अजस्य**। म० १। जीवात्मनः। **अनूकम्**। अनु+उच समवाये

धर, (ध्रुवायाम्) स्थिर (दिशि) दिशा में (अस्य) इसके (पाजस्यम्) बल देने वाले उदर को, और (अन्तरिक्षे) आकाश में (मध्यतः) बीचोबीच (मध्यम्) मध्य भाग को (धेहि) धर ॥ ८ ॥

भावार्थः—मन्त्र ७ देखो ॥८॥

शृतमजं शृतया प्रोर्णुहि त्वचा सर्वैरङ्गैः संभृतं विश्वरूपम् । स उत् तिष्ठेतो अभि नाकमुत्तमं पद्भिश्चतुर्भिः प्रति तिष्ठ दिक्षु ॥ ९ ॥

शृतम् । अजम् । शृतया । प्र । ऊर्णुहि । त्वचा । सर्वैः । अङ्गैः । सम्ऽभृतम् । विश्वऽरूपम् । सः । उत् । तिष्ठ । इतः । अभि । नाकम् । उत्ऽतमम् । पत्ऽभिः । चतुःऽभिः । प्रति । तिष्ठ । दिक्षु ॥ ९ ॥

भाषार्थः—[हे मनुष्य !] (विश्वरूपम्) संपूर्ण रूप से (सर्वैः) सब (अङ्गैः) अंगों के साथ (संभृतम्) भले प्रकार पुष्ट, और (शृतम्) परिपक्व [दृढ़ ज्ञानी] (अजम्) जीवात्मा को (शृतया) परिपक्व (त्वचा) विस्तृत शक्ति से (प्र) भले प्रकार (ऊर्णुहि) ढक ले । (सः) सो तू (इतः) यहां से (उत्तमम्) सर्वोत्तम (नाकम्) सुख स्वरूप परब्रह्म को (अभि = अभिलक्ष्य) लखकर (उत् तिष्ठ) उठ, और (चतुर्भिः पद्भिः) धर्म, अर्थ, काम, मोक्ष चार पदार्थों के सहित (दिक्षु) सब दिशाओं में (प्रतितिष्ठ) प्रतिष्ठित हो ॥ ९ ॥

घञर्थे कः । न्यङ्क्वादीनां च (पा० ७ । ३ । ५३) इति कुत्वम् । पृष्ठवंशम् । **ध्रुवायाम्** । अ० २ । २६ । ४ । स्थिरायाम् । अधस्तात् । **पाजस्यम्** । पाज इति बलनाम-निघ० २ । ९ । पाजसे हितम् । बलकरमङ्गम् । उदरम् । **अन्तरिक्षे** । आकाशे । **मध्यतः** । मध्यभागे । **मध्यम्** । शरीरमध्यभागम् । **अस्य** । निर्दिष्टस्य ॥

९—**शृतम्** । श्रा वा श्रै पाके-क्तः । शृतं पाके (पा० ६ । १ । २७) इति शृभावः । पक्वम् । परिपक्वज्ञानम् । **अजम्** । म० १ । जीवात्मानम् । **शृतया** । परिपक्वया । दृढया । **प्र ऊर्णुहि** । ऊर्णुञ् आच्छादने । प्रकर्षेणाच्छादय । **त्वचा** । तनोतेरनश्च वः (उ० २ । ६३) इति तनु विस्तारे-चिक्, अनश्च वः यद्वा, त्वच

भावार्थः—मनुष्य उपरोक्त रीति से पंच भूत और जीवात्मा के विवेक से पक्का ज्ञानी होकर सब प्रकार पुष्ट और परमात्मा में लवलीन होकर धर्म, अर्थ, काम, मोक्ष, की प्राप्ति से संसार भर में प्रतिष्ठावान् होता है ।। ९ ।।

सूक्तम् १५ ।।

१-१६ ।। पर्जन्यो देवता ।। १-३,-५ जगती, ४, ७, ८, १३-१५ अनुष्टुप्, ६, १०, ११, १६ त्रिष्टुप् १२ जगती ज्योतिष्मती ।।

वृष्टेः प्रार्थना गुणाश्चोपदिश्यन्ते—वृष्टि की प्रार्थना और गुणोंका उपदेश ।।

समुत्पतन्तु प्रदिशो नभस्वतीः समभ्राणि वातजूतानि यन्तु । महऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु ॥ १ ॥

सम्ऽउत्पतन्तु । प्रऽदिशः । नभस्वतीः । सम् । अभ्राणि । वातऽजूतानि । यन्तु । महाऽऋषभस्य । नदतः । नभस्वतः । वाश्राः । आपः । पृथिवीम् । तर्पयन्तु ॥ १ ॥

भाषार्थः—(नभस्वतीः = ०—त्यः) बादल से छायी हुई (प्रदिशः) दिशायें (समुत्पतन्तु) भले प्रकार उदय हों, (वातजूतानि) पवन से चलाये गये (अभ्राणि) जल भरे बादल (संयन्तु) छा जावें । (महऋषभस्य) बड़े

संवरणे—क्विप् । विस्तृतशक्त्या । ज्ञानावरणेन वा । **सर्वैः** । अशेषैः । **अङ्गैः** । अवयवैः । **संभृतम्** । सम्यक् पुष्टम् । **विश्वरूपम्** । यथा तथा । सर्वरूपेण । सर्वाकारेण । **सः** । तादृशः परिपक्वज्ञानः । **उत् तिष्ठ** । उद्गच्छ । **इतः** । अस्माद् देशात् । **अभि** । अभिलक्ष्य । **नाकम्** । दुःखरहितं परब्रह्म । **उत्तमम्** । श्रेष्ठम् । **पद्भिः** । पद स्थैर्ये गतौ च—क्विप् । धर्मार्थकाममोक्षाख्यैः पदार्थैः । **चतुर्भिः** । **प्रतितिष्ठ** । प्रतिष्ठितो भव । **दिक्षु** । सर्वासु दिशासु ।।

१—**समुत्पतन्तु** । सम्यग् उद्गच्छन्तु । उद्यन्तु । **प्रदिशः** । प्रकृष्टाः दिशः । **नभस्वतीः** । नभः—म० ३ । **वा छन्दसि** (पा० ६ । १ । १०६) इति पूर्वसवर्णदीर्घः । नभस्वत्यः । मेघवत्यः । **अभ्राणि** । अभ्र गतौ—पचाद्यच् (पा० ३ । १ ।

गमन शील (नदतः) गरजते हुये (नभस्वतः) आकाश में छाये [बादल] की (वाश्राः) धड़ धड़ाती (आपः) जल धारायें (पृथिवीम्) पृथिवी को (तर्पयन्तु) तृप्त करें ॥ १ ॥

भावार्थः—पवन द्वारा वर्षा होने से दिशायें निर्मल और पृथिवी अन्न आदि पदार्थ उत्पन्न करने योग्य हो जाती है, इसी प्रकार मनुष्य उपकारी बनें ॥ १ ॥

समीक्षयन्तु तविषाः सुदानवोऽपां रसा ओषधीभिः सचन्ताम् । वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तामोषधयो विश्वरूपाः ॥ २ ॥

सम् । ईक्षयन्तु । तविषाः । सुऽदानवः । अपाम् । रसाः । ओषधीभिः । सचन्ताम् । वर्षस्य । सर्गाः । महयन्तु । भूमिम् । पृथक् । जायन्ताम् । ओषधयः । विश्वऽरूपाः ॥ २ ॥

भाषार्थः—(तविषाः) विशाल गुण वाले (सुदानवः) बड़े दान करने वाले [मेघ, हमें वृष्टि] (समीक्षयन्तु) दिखावें, (अपाम्) जल के (रसाः) रस (ओषधीभिः) अन्नादि ओषधियों से (सचन्ताम्) एक सम हो जावें । (वर्षस्य)

---

१३४) यद्वा, अप्—भृञ्—कः । अपो जलानि बिभ्रति धारयन्तीति मेघाः । **वात-जूतानि** । जु वेगे—क्तः, दीर्घत्वम् । वायुना प्रेरितानि । **संयन्तु** । संगच्छन्ताम् । **महऋषभस्य** । **ऋषिवृषिभ्यां कित्** (उ० ३ । १२३) इति ऋषी गतौ—अभच् स च कित् । महागतिशीलस्य । **नदतः** । गर्जतः । **नभस्वतः** । आकाश-स्थस्य मेघस्य । **वाश्राः** । **स्फायितञ्चिवञ्चि०** (उ० २ । १३) इति वाश्रृ शब्दे-रक् । शब्दायमानाः । **आपः** । जलधाराः । **पृथिवीम्** । भूमिम् । **तर्पयन्तु** । तृप्ताम् ओषधिप्ररोहणसमर्थां कुर्वन्तु ॥

२—**समीक्षयन्तु** । ईक्ष दर्शने, णिच् । संदर्शयन्तु अस्मान् वृष्टिम् । **तविषाः** । **तवेर्णिद्वा** (उ० १ । ४८) इति तु गति वृद्धिहिंसासु—टिषच् । तविषो महन्नाम निघ० ३।३ । महान्तः । **सुदानवः** । **दाभाभ्यां नुः** (उ० ३ । ३२) इति दा—नुः । शोभनदानाः मेघाः । **अपाम्** । उदकानाम् । **रसाः** । श्रेष्ठगुणाः । **ओष-धीभिः** । व्रीहियवादिभिः । अन्नैः । **सचन्ताम्** । षच समवाये । समवयन्तु ।

वर्षा की (सर्गाः) धारायें (भूमिम्) भूमि को (महयन्तु) समृद्ध करें, (विश्वरूपाः) नाना रूप वाली (ओषधयः) चावल, यवादि ओषधें (पृथक्) नाना प्रकार से (जायन्ताम्) उत्पन्न होवें ॥ २ ॥

भावार्थः—जैसे मेघों की वर्षा से सब लोग आनन्द पाते हैं, वैसे ही मनुष्य विद्वानों के सत्संग से लाभ उठावें ॥ २ ॥

समीक्षयस्व गायतो नभांस्यपां वेगासः पृथगुद् विजन्ताम् ।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तां वीरुधो विश्वरूपाः॥ ३॥

सम् । ईक्षयस्व । गायतः । नभांसि । अपाम् । वेगासः । पृथक् । उत् । विजन्ताम् । वर्षस्य । सर्गाः । महयन्तु । भूमिम् । पृथक् । जायन्ताम् । वीरुधः । विश्वऽरूपाः ॥ ३ ॥

भाषार्थः—[हे ईश्वर !] (गायतः) गान करने वाले लोगों को (नभांसि) बादलों का (समीक्षयस्व) दर्शन करा। (अपाम्) जल के (वेगासः) प्रवाह (पृथक्) नाना प्रकार से (उद् विजन्ताम्) उमड़ कर चलें। (वर्षस्य) वर्षा की (सर्गाः) धारायें (भूमिम्) भूमि को (महयन्तु) समृद्ध करें, (विश्व-

---

वर्षस्य । वृष्टिजलस्य । **सर्गाः** । सृज्यमानाः प्रवाहाः । **महयन्तु** । महि वृद्धौ । वर्धयन्तु । समर्धयन्तु । **भूमिम्** । पृथिवीम्, भूमिस्थपदार्थानित्यर्थः । **पृथक्** । नानाप्रकारेण जातिभेदेन । **जायन्ताम्** । उत्पद्यन्ताम् । **ओषधयः** । व्रीहियवाद्याः । **विश्वरूपाः** । नानाविधाः ॥

३—समीक्षयस्व । द्विकर्मकः । सन्दर्शय । **गायतः** । स्तुवतो लोकान् । **नभांसि** । **नहेर्दिवि भश्च** (उ० ४ । २११) इति णह बन्धने-असुन् हस्य भः । यद्वा णभ हिंसायाम्-असुन् । नभ उदकम्-निघ० १।१२ । नभ आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां प्रणयोऽपि वा । भन एव स्याद् विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता-निरु० २ । १४ । अभ्राणि । **अपाम्** । उदकानाम् । **वेगासः** । वेगाः प्रवाहाः । **पृथक्** । भिन्नभिन्नप्रकारेण । **उद् विजन्ताम्** । ओविजी भयसंचलनयोः । उच्चलन्तु । **वीरुधः** । विरोहणशीला आरण्या ओषधिवनस्पतयः । अन्यत् पूर्ववत् ॥

रूपाः) नाना रूप (वीरुधः) झाड़ लतायें (पृथक्) नाना प्रकार से (जायन्ताम्) उपजें ॥ ३ ॥

भावार्थः—मन्त्र २ के समान है ॥ ३ ॥

गुणास्त्वोप॑ गायन्तु मारु॑ताः पर्जन्य घोषिणः पृथ॑क् ।
सर्गा॑ वर्षस्य वर्ष॑तो वर्ष॑न्तु पृथिवीमनु॑ ॥ ४ ॥

गुणाः । त्वा । उप॑ । गायन्तु । मारु॑ताः । पर्ज॑न्य । घोषिणः । पृथ॑क् । सर्गाः । वर्षस्य॑ । वर्ष॑तः । वर्ष॑न्तु । पृथिवीम् । अनु॑ ॥ ४ ॥

भाषार्थः—(पर्जन्य) हे मेघ ! (घोषिणः) आनन्द ध्वनि करने वाले (मारुताः) ऋत्विज् लोगों के (गणाः) समूह (त्वा) तेरा (पृथक्) नाना प्रकार से (उप) आदर पूर्वक (गायन्तु) गान करें। (वर्षतः) बरसते हुये (वर्षस्य) वृष्टि जल की (सर्गाः) धारायें (पृथिवीम्) पृथिवी पर (अनु) अनुकूल (वर्षन्तु) बरसें ॥ ४ ॥

भावार्थः—वृष्टि से अन्न आदि यज्ञ के पदार्थ उत्पन्न होते और याजक गण वृष्टि के गुणों को गा गाकर आनन्द मनाते हैं ॥ ४ ॥

उदी॑रयत मरुतः समुद्रतस्त्वेषो अर्को नभ उत् पातयाथ ।
महऋषभस्य नद॑तो नभ॑स्वतो वाश्रा आप॑ः पृथिवीं त॑र्पयन्तु ॥ ५ ॥

४—**गणाः** । समूहाः । **त्वा** । त्वाम् । **उप गायन्तु** । उप आदरेण स्तुवन्तु । **मारुताः** । मरुतः—अ० १ । २० । १ । ऋत्विजः-निघ० ३।१८ । मरुत्—अण् । ऋत्विक्संबन्धिनः । **पर्जन्य** । अ० १ । २ । १ । हे सेचक, मेघ ! **घोषिणः** । आनन्दघोषयुक्ताः । **पृथक्** । नानात्वेन । **सर्गाः** । प्रवाहाः । **वर्षस्य** । वृष्टिजलस्य । **वषतः** । सिञ्चतः । **वर्षन्तु** । आर्द्रीकुर्वन्तु । **पृथिवीम्** । **अनु** ।

उत् । ई॒रय॒त॒ । म॒रु॒तः॒ । स॒मु॒द्र॒तः॑ । त्वे॒षः॑ । अ॒र्कः॑ । नभः॑ । उत् । पा॒त॒या॒थ॒ । म॒हा॒ऽऋ॒ष॒भस्य॑ । नद॑तः । नभ॑स्वतः । वा॒श्राः॑ । आप॑ः । पृ॒थि॒वीम् । त॒र्प॒य॒न्तु॒ ॥५॥

भाषार्थः—(मरुतः) हे वायुवेगो ! (अर्कः=अर्कस्य) सूर्य के (त्वेषः= त्वेषेण) प्रकाश द्वारा (नभः) जल को (समुद्रतः) समुद्र से (उदीरयत) उठाओ और (उत् पातयाथ) ऊपर ले जाओ। (मह ऋषभस्य) बड़े गमन-शील, (नदतः) गरजते हुये, (नभस्वतः) आकाश में छाये [बादल] की (वाश्राः) धड़धड़ाती (आपः) जल धारायें (पृथिवीम्) पृथिवी को (तर्पयन्तु) तृप्त करें ॥ ५ ॥

भावार्थः—जल, पवन और प्रकाश द्वारा पृथिवी से मेघमंडल में चढ़ता और फिर पृथिवी पर बरसकर अनेक पदार्थ उपजाता है, इसी प्रकार सज्जन पुरुष विज्ञान से परिपूर्ण होकर संसार में विद्या फैलाते हैं ॥ ५ ॥

अ॒भि क्र॑न्द स्त॒नया॒र्दयो॑द॒धिं भूमिं॑ पर्जन्य॒ पय॑सा॒ सम॑ङ्धि ।
त्वया॑ सृ॒ष्टं ब॑हु॒लमैतु॑ व॒र्षमा॑शारै॒षी कृ॑श॒गु॒रे॑त्वस्त॑म् ॥ ६ ॥

अ॒भि । क्र॒न्द॒ । स्त॒नय॑ । अ॒र्दय॑ । उ॒द॒ऽधिम् । भूमि॑म् । प॒र्ज॒न्य॒ । पय॑सा । सम् । अ॒ङ्धि॒ । त्वया॑ । सृ॒ष्टम् । ब॒हु॒लम् । आ । ए॒तु॒ । व॒र्षम् । आ॒शा॒र॒ऽए॒षी । कृ॒श॒ऽगुः । ए॒तु॒ । अस्त॑म् ॥ ६ ॥

भाषार्थः—(पर्जन्य) हे मेघ ! तू (अभि) सब ओर (क्रन्द) गड़गड़ कर, (स्तनय) गरज, (उदधिम्) समुद्र को (अर्दय) हिला दे, (भूमिम्) भूमि को

५—**उदीरयत** । ऊर्ध्वं प्रेरयत जलम् । **मरुतः** । वायुवेगाः । **समुद्रतः** । पार्थिवसमुद्रात् । **त्वेषः** । त्विष दीप्तौ—घञ् । **सुपां सुलुक्**० (पा० ७ । १ । ३९) इति तृतीयायां प्रथमा । त्वेषेण । प्रकाशेन । **अर्कः** । अर्क स्तवने तापे च—अच् । षष्ठ्यर्थे प्रथमा । सूर्यस्य । **नभः** । म० ३ । उदकम् । **उत् पातयाथ** । पत गतौ—णिच् लेट् । उद्गमयत । अन्यद् गतम्—म० १ ॥

६—**अभि** । अभितः । **क्रन्द** । शब्दं कुरु । **स्तनय** । घोषय । गर्ज । **अर्दय** ।

(पयसा) जल से (सम्‌अङ्‌धि) भरदे। (त्वया) तुझ करके (सृष्टम्) भेजा हुआ (बहुलम्) बहुत पदार्थ लाने वाला (वर्षम्) वृष्टि जल (ऐतु) आवे, (आशारैषी) शरण चाहने वाला, (कृशगुः) दुबली गौ बैल वाला किसान (अस्तम्) अपने घर (एतु) जावे ॥ ६ ॥

भावार्थः—पृथिवी पर वृष्टि होने से अनेक पदार्थ उपजते हैं, तब किसान आनन्द पूर्वक थके दुर्बल पशुओं को चराकर घर ले जाते हैं ॥ ६ ॥

सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुद्भिः प्रच्युता मेघा वर्षन्तु पृथिवीमनु ॥ ७ ॥

सम् । वः । अवन्तु । सुऽदानवः । उत्साः । अजगराः । उत । मरुत्ऽभिः । प्रऽच्युताः । मेघाः । वर्षन्तु । पृथिवीम् । अनु ॥७॥

भाषार्थः—[हे मनुष्यो !] (सुदानवः) महा दानी, (अजगराः) अजगर [समान स्थूल आकार वाले] (उत्साः) स्रोते (वः) तुम्हें (उत) अत्यन्त करके (सम्) यथावत् (अवन्तु) तृप्त करें। (मरुद्भिः) पवन से (प्रच्युताः) चलाये गये (मेघाः) मेघ (पृथिवीम्) पृथिवी पर (अनु) अनुकूल (वर्षन्तु) बरसें ॥ ७ ॥

भावार्थः—मनुष्य मेह के समान परस्पर उपकार करें ॥ ७ ॥

पीडय। **उदधिम्** । जलधिम् । **भूमिम्** । **पर्जन्य** । हे मेघ । **पयसा** । वृष्टिजलेन। **सम् अङ्‌धि** । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु । समक्तां संसिक्तां कुरु । **त्वया** । **सृष्टम्** । प्रेरितम् । **बहुलम्** । अ० ३ । १४ । ६ । बहूनर्थान् लातीति, बहु+ला दानादानयोः—कः । बहुपदार्थप्रापकम् । **आ एतु** । आगच्छतु । **वर्षम्** । वृष्टिजलम् । **आशारैषी** । शॄ वायुवर्णनिवृत्तेषु (वा० पा० ३।३।२१) इति आङ्+शॄ हिंसायाम्—घञ् । आशृणाति दुःखम् आशारः शरणम् । आशारमिच्छतीति, इष—णिनि । शरणेच्छुः । **कृशगुः** । **गोस्त्रियोरुपसर्जनस्य** (पा०१।२।४८) इति ह्रस्वः। कृशाःदुर्बलाःगावः पशवो यस्यतथाविधिःकर्षकः। **एतु**। गच्छतु । **अस्तम्**। **हसिमृग्रिण्०** (उ० ३ । ८६) अस गतिदीप्त्यादानेषु—तन् । गृहम्—निघ०३।४॥

७—**सम्** । सम्यक् । एकीभूय । **वः** । युष्मान् हे जनाः । **अवन्तु** । तर्पयन्तु । **सुदानवः** । म० २ । महादातारः । **उत्साः** । अ० १ । १५ । ३ । स्रोतां-

आशामाशां वि द्योततां वाता वान्तु दिशोदिशः ।
मरुद्भिः प्रच्युता मेघाः संयन्तु पृथिवीमनु ॥ ८ ॥

आशाम्ऽआशाम् । वि । द्योतताम् । वाताः । वान्तु । दिशःऽदिशः । मरुत्ऽभिः । प्रऽच्युताः । मेघाः । सम् । यन्तु । पृथिवीम् । अनु ॥ ८ ॥

भाषार्थः—(वाताः) पवनें (दिशोदिशः) दिशा दिशा से (द्योतताम्) दीप्यमान (आशाम्-आशाम्) प्रत्येक दिशा को (वि) विविध प्रकार से (वान्तु) चलें। (मरुद्भिः) पवनों से (प्रच्युताः) चलाये गये (मेघाः) मेह (पृथिवीम्) पृथिवी पर (अनु) अनुकूल (संयन्तु) उमड़ कर आवें ॥८॥

भावार्थः—जैसे मेह पवन द्वारा एक देश से दूसरे देश में वरसते हैं वैसे ही मनुष्य प्रयत्न करके देश देशान्तरों में वेद विद्या फैलावें ॥८॥

आपो विद्युदभ्रं वर्षं सं वोऽवन्तु सुदानव उत्सा अजगरा उत । मरुद्भिः प्रच्युता मेघाः प्रावन्तु पृथिवीमनु ॥९॥

आपः । विऽद्युत् । अभ्रम् । वर्षम् । सम् । वः । अवन्तु । सुऽदानवः । उत्साः । अजगराः । उत । मरुत्ऽभिः । प्रऽच्युताः । मेघाः । प्र । अवन्तु । पृथिवीम् । अनु ॥ ९ ॥

सि । कूपाः—निघ० ३ । २३ । **अजगराः** । अज+गॄ निगरणे-अच् । अजान् गतिशीलान् जन्तून् गिरन्ति भक्षयन्ति ये । बृहत्सर्पाः । तद्वत् स्थूलाकाराः । **उत** । अत्यर्थम् । एव । **मरुद्भिः** । वायुभिः । **प्रच्युताः** । प्रेरिताः । **मेघाः** । मिह सेचने-अच्, कुत्वम् । वारिवाहाः । **वर्षन्तु** । सिंचन्तु । **पृथिवीम्** । **अनु** । अनुकूले ॥

८—**आशामाशाम्** । दिशंदिशम् आश्रित्य । **द्योतताम्** । भृमृदृशि० (उ० ३ । ११०) इति द्युत दीप्तौ-अतच्, टाप् । द्योतमानाम्, दीप्यमानाम् । **वाताः** । पवनाः । **वि वान्तु** । विविधं संचरन्तु । **दिशोदिशः** । सर्वस्या अपि दिशः सकाशात् । **संयन्तु** । संगता भवन्तु । **अनु** । अनुलक्ष्य । अन्यद् यथा म० ७ ॥

भाषार्थः—(आपः) जल धारायें, (विद्युत्) बिजुली, (अभ्रम्) जल से भरा मेह (वर्षम्) बरसा और (सुदानवः) महादानी, (अजगराः) अजगर [समान स्थूल आकार वाले] (उत्साः) स्रोते (वः) तुम्हें (उत) अत्यन्त करके (सम्) यथावत् (अवन्तु) तृप्त करें। (मरुद्भिः) पवनों से (प्रच्युताः) चलाये गये (मेघाः) मेह (पृथिवीम्) पृथिवी को (अनु) अनुकूल (प्र) भले प्रकार (अवन्तु) तृप्त करें ॥९॥

भावार्थः—जैसे जल, बिजुली आदि मिलकर जगत् का उपकार करते हैं, वैसे ही मनुष्य परस्पर मिलकर संसार का सुधार करें ॥९॥

मन्त्र ७ व ८ का मिलान करो ॥

अपामग्निस्तनूभिः संविदानो य ओषधीनामधिपा बभूव। स नो वर्षं वनुतां जातवेदाः प्राणं प्रजाभ्यो अमृतं दिवस्परि ॥१०॥

अपाम् । अग्निः । तनूभिः । सम्ऽविदानः । यः । ओषधीनाम् । अधिऽपाः । बभूव । सः । नः । वर्षम् । वनुताम् । जातऽवेदाः । प्राणम् । प्रऽजाभ्यः । अमृतम् । दिवः । परि ॥ १० ॥

भाषार्थः—(यः) जो (अग्निः) अग्नि [सूर्य ताप] (अपाम्) जलों के (तनूभिः) विस्तारों से (संविदानः) मिलता हुआ (ओषधीनाम्) चावल, यवादियों का (अधिपाः) विशेष पालन कर्ता (बभूव) हुआ है। (सः) वह (जातवेदाः) धनों का उत्पन्न करने वाला, वा उत्पन्न पदार्थों में सत्ता वाला अग्नि (नः प्रजाभ्यः) हम प्रजाओं के लिये (दिवः) अन्तरिक्ष से (परि) सब

९—**आपः** । जलधाराः । **विद्युत्** । तडित् । **अभ्रम्** । उदकपूर्णो मेघः । **वर्षम्** । वृष्टिजलम् । **प्र** । प्रकर्षेण । अन्यद् यथा म० ७ ॥

१०—**अपाम्** । जलानाम् । **अग्निः** । सूर्यतापः । **तनूभिः** । विस्तारैः । कणैः । **संविदानः** । संगच्छमानः । **यः** । **ओषधीनाम्** । व्रीहियवादीनाम् । **अधिपाः** । अधि+पा रक्षणे-विच् । विशेषरक्षकः । **बभूव** । **सः** । तादृशोऽग्निः । **नः** । अस्मभ्यम् । **वर्षम्** । वृष्टिजलम् । **वनुताम्** । प्रयच्छतु । **जातवेदाः** । अ० १ । ७ । २ । वेदः=धनम्-निघ० २ । १० । जातानि वेदांसि धनानि यस्मात्, यद्वा

और (वर्षम्) बरसा, (प्राणम्) प्राण और (अमृतम्) अमृत [मरण से बचाव का साधन] (वनुताम्) देवे ॥ १० ॥

भावार्थः—जैसे सूर्य जल को खैंच लेकर फिर बरसा कर सब प्राणियों का जीवन आधार होता है, वैसे ही मनुष्य विद्या और धन प्राप्त करके संसार का उपकार करें ॥ १० ॥

प्रजापतिः सलिलादा समुद्रादाप ईरयन्नुदधिमर्दयाति ।
प्रप्यायतां वृष्णो अश्वस्य रेतोऽर्वाङेतेन स्तनयित्नुनेहि ॥११॥

प्रजाऽपतिः । सलिलात् । आ । समुद्रात् । आपः । ईरयन् । उदऽधिम् । अर्दयाति । प्र । प्यायताम् । वृष्णः । अश्वस्य । रेतः । अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि ॥ ११ ॥

भाषार्थः—(प्रजापतिः) प्रजापालक सूर्य (सलिलात्) व्यापक (समुद्रात्) आकाश से (आपः=अपः) जल (आ ईरयन्) भेजता हुआ (उदधिम्) [पार्थिव] समुद्र को (अर्दयाति) दबावे [जल खैंचे] । (अश्वस्य) व्यापक (वृष्णः) बरसने वाले मेघ का (रेतः) जल (प्रप्यायताम्) अच्छे प्रकार बढ़े । [हे पर्जन्य ! तू] (एतेन) इस (स्तनयित्नुना) गर्जन के साथ (अर्वाङ्) सन्मुख (आ इहि) आ ॥ ११ ॥

भावार्थः—मन्त्र १० के समान है ॥ ११ ॥

इस मन्त्र का चौथा पाद 'अर्वाङेतेन....' ऋ० ५ । ८३ । ६ का तीसरा पाद है ।

जातेषु पदार्थेषु वेदः सत्ता यस्य स तथाभूतः । **प्राणम्** । जीवनम् । **प्रजाभ्यः** । सृष्टिपदार्थेभ्यः । **अमृतम्** । नास्ति मृतं मरणं यस्मात् । अमरणम् । **दिवः** । अन्तरिक्षात् । **परि** । परितः ॥

११—प्रजापतिः । प्रजानां पालयिता वृष्टिप्रदः सूर्यः । **सलिलात्** । सलिकल्यनि० (उ० १ । ५४) इति षल गतौ—इलच् । व्यापनशीलात् । **आ** । समन्तात् । **समुद्रात्** । अन्तरिक्षात्—निघ० १ । ३ । **आपः** । **सुपां सुलुक्०**

अपो निषिञ्चन्नसुरः पिता नः श्वसन्तु गर्गरा अपां वरुणाव नीचीरपः सृज। वदन्तु पृश्निबाहवो मण्डूका इरिणानु ॥१२॥

अपः। निऽसिञ्चन्। असुरः। पिता। नः। श्वसन्तु। गर्गऽराः। अपाम्। वरुण। अव। नीचीः। अपः। सृज। वदन्तु। पृश्निऽबाहवः। मण्डूकाः। इरिणा। अनु ॥ १२ ॥

भाषार्थः—(नः) हमारा (पिता) पालन करने वाला (असुरः) प्राण दाता मेघ (अपः) जल धारायें (निषिञ्चन्) उंडेलता हुआ [वर्तमान हो]। (अपाम्) जल के (गर्गराः) गड़गड़ाते हुये गगरे (श्वसन्तु) श्वास लेवें। (वरुण) हे वरणीय मेघ ! (अपः) जलधाराओं को (नीचीः) नीचे की ओर (अव सृज) छोड़ दे। (पृश्निबाहवः) छोटी २ भुजा वाले (मण्डूकाः) शोभा बढ़ाने वाले वा डुबकी लगाने वाले मेंढके (इरिणा=इरिणानि) ऊसर भूमियों को (अनु=अनुहाय) छोड़कर (वदन्तु) ध्वनि करें ॥ १२ ॥

भावार्थः—बरसा होने पर जैसे मेंढकों में फिर प्राण आ जाते हैं इसी प्रकार अनेक पदार्थ उगकर आनन्द दायक होते हैं ॥ १२ ॥

इस मन्त्र का पहिला पाद 'अपो. . .नः' (ऋ० ५।८३।६) का चौथा पाद है ॥

(पा० ७। १। ३९) इति शसः स्थाने जस्। अपः। उदकानि। **ईरयन्**। प्रेरयन्। **उदधिम्**। जलधिम्। **अर्दयाति**। अर्दयतेर्लेटि आडागमः। अर्दयतु। रश्मिभिर्जलादानेन पीडयतु। **प्रप्यायताम्**। प्रवर्धताम्। **वृष्णः**। वर्षकस्य मेघस्य। **अश्वस्य**। व्यापकस्य। **रेतः**। **स्रुरीभ्यां तुट् च** (उ० ४। २०२) इति रि गतौ रीङ् स्रवणे—असुन्, तुट् च। उदकम्—निघ० १। १२। **अर्वाङ्**। अभिमुखः सन्। **एतेन**। पूर्वोक्तेन। **स्तनयित्नुना**। **स्तनिहृषिपुषि०** (उ० ३। २९) इति स्तन देवशब्दे—इत्नुच्। गर्जनेन सह। **आ—इहि**। आगच्छ हे पर्जन्य ॥

१२—**अपः**। जलानि। **निषिञ्चन्**। न्यग्भावेन नितरां वा वर्षयन्। **असुरः**। अ० १। १०। १। असून् प्राणान् रातीति। असु+रा दाने—कः। प्राणप्रदः। मेघः—निघ० १। १०। **पिता**। पालकः। **नः**। अस्माकम्। **श्वसन्तु**। उच्छ्वसिता भवन्तु। **गर्गराः**। **मुदिग्रोर्गग्गौ** (उ० १। १२८) इति गॄ शब्दे—गप्र-

१. भाष्यकार की व्युत्पत्ति अनुसार यहाँ विवृति दिखाई है। सायणाचार्य ने यहाँ शब्दानुकृति माना है अतः 'गर्गराः' ऐसा पदपाठ रखा है ॥ सम्पा० ॥

सं॒व॒त्स॒रं श॑शया॒ना ब्रा॑ह्म॒णा व्र॑तचा॒रिणः॑ ।
वाचं॑ प॒र्जन्य॑जिन्वितां॒ प्र म॒ण्डूका॑ अवादिषुः ॥ १३ ॥

स॒म्ऽव॒त्स॒रम् । श॒श॒या॒नाः । ब्रा॒ह्म॒णाः । व्र॒त॒ऽचा॒रिणः॑ ।
वाच॑म् । प॒र्जन्य॑ऽजिन्विताम् । प्र । म॒ण्डूकाः॑ । अ॒वा॒दि॒षुः ॥ १३ ॥

भाषार्थः—(संवत्सरम्) बोलने के समय तक (शशयानाः) शयन करने वाले (मण्डूकाः) शोभा बढ़ाने वाले वा डुबकी लगाने वाले मेंडुके, (व्रतचारिणः) व्रतधारी (ब्राह्मणाः) ब्राह्मणों के समान, (पर्जन्यजिन्विताम्) मेंह से तृप्त की हुई (वाचम्) वाणी को (प्र) अच्छे प्रकार (अवादिषुः) बोलें ॥ १३ ॥

भावार्थः—जैसे वेदज्ञानी पुरुष वेदों में मौन [मनन] व्रत साधकर सत्य ज्ञान से तृप्त होकर संसार में उपदेश करते हैं, इसी प्रकार मेंडुके वृष्टि होने से संतुष्ट होकर बोलते हैं ॥ १३ ॥

यह मन्त्र ऋ० ७ । १०३ । १ में और निरुक्त ९ । ६ में भी व्याख्यात है ॥

त्ययः । गर्ग+रा-कः । गर्गं शब्दं रान्ति ददतीति । शब्दं कुर्वाणः कलसाः जलपात्राणि । प्रवाहाः । **अपाम्** । उदकानाम् । **वरुण** । हे वरणीय जलेश मेघ । **नीचीः**। न्यग्भावं गताः । **अपः** । वृष्टिधाराः । **अव** । नीचैः । **सृज** । त्यज । **वदन्तु** । ध्वनिं कुर्वन्तु । **पृश्निबाहवः** । स्वल्पभुजयुक्ताः । **मण्डूकाः** । **शलिमण्डिभ्यामूकण्** (उ० ४ । ४२) इति मडि भूषायाम्-ऊकण् । यद्वा टुमस्जो शुद्धौ ऊकण्, जकारस्य डकारे नुमि ष्टुत्वम् । मण्डयन्ति भूषयन्ति जलाशयं निमज्जन्ति जले वा । मण्डूका मज्जूका मज्जनान्मदतेर्वा मोदतिकर्मणो मन्दतेर्वा तृप्तिकर्मणो मण्डयतेरिति वैयाकरणा मण्ड एषामोक इति वा मण्डो मदेर्वा मुदेर्वा—निरु० ९ । ५ । मण्डनशीलाः । मज्जनस्वभावाः । मज्जूकाः । **भेकाः** । **इरिणा** । **अर्तेः किरिच्च** (उ० २ । ५१) इति ऋ गतिप्रापणयोः—इनन्, शेर्लोपः । इरिणानि । ऊषरभूमीः । **अनु** । हीने । विहाय ॥

१३—संवत्सरम् । **संपूर्वाच्चित्** (उ० ३ । ७२) इति बाहुलकात् सम्+वद व्यक्तायां वाचि—सरन् प्रत्ययः, स च चित् । चित्वादन्तोदात्तः । सम्यग् वदनपर्यन्तम् वर्षारम्भपर्यन्तम् इत्यर्थः । **शशयानाः** । शिश्यानाः शयानाः । शयनशीलाः । निद्रालवः । **ब्राह्मणाः** । अ० २।६।३ । वेदपाठिनः । ब्रह्मज्ञानिनो यथा ।

---

१. शेश्छन्दसि बहुलम् (पा० ६।१।७०) से शिलोप होता है ॥ सम्पा० ॥

उप प्रवद मण्डूकि वर्षमा वद तादुरि ।
मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः ॥ १४ ॥

उपऽप्रवद । मण्डूकि । वर्षम् । आ । वद । तादुरि ।
मध्ये । ह्रदस्य । प्लवस्व । विऽगृह्य । चतुरः । पदः ॥ १४ ॥

भाषार्थः—(मण्डूकि) हे शोभा बढ़ाने वाली वा डुबकी लगाने वाली मेंडुकी ! (उप प्रवद) पास आकर बोल, (तादुरि) हे तैरने वाली वा उतने [शरीर जितना] उदरवाली (वर्षम्) वर्षा को (आवद) बुला (ह्रदस्य) पोखर के (मध्ये) बीच में (चतुरः) चारों (पदः) पदों को (विगृह्य) फैला कर (प्लवस्व) तैर ॥ १४ ॥

भावार्थः—जैसे मेंडुकी वर्षा होने पर आनन्द से जल के भीतर तैरती फिरती है, ऐसे ही ब्रह्मज्ञानी लोग ब्रह्मविद्या में मग्न होकर विचरते हैं ॥ १४ ॥

यह मन्त्र निरुक्त ९ । ७ में उदाहृत है ॥

खण्वखा३इ खैमखा३इ मध्ये तदुरि ।
वर्षं वनुध्वं पितरो मरुतां मन इच्छत ॥ १५ ॥

खण्वखा३इ । खैमखा३इ । मध्ये । तदुरि ।
वर्षम् । वनुध्वम् । पितरः । मरुताम् । मनः । इच्छत ॥ १५ ॥

व्रतचारिणः । व्रत+चर-णिनिः । कृतसंयमाः । **वाचम्** । वाणीम् । **पर्जन्यजिन्विताम्** । जिवि प्रीणने-क्तः । पर्जन्येन प्रीतां तर्पिताम् । **प्र** । प्रकर्षेण । **मण्डूकाः** । म० १२ । मज्जूकाः । भेकाः । **अवादिषुः** । वद—लुङ् । अवोचन् ।

१४—उपप्रवद । उपेत्य प्रकृष्टं घोषं कुरु । **मण्डूकि** । मण्डूक, म० १२ स्त्रियां ङीष् । हे मण्डनशीले । निमज्जनस्वभावे । भेकि । **वर्षम्** । वृष्टिम् । **आवद** । आभाषय । **तादुरि** । तरणशीले ! अथवा तावत् उदरि ! यावच्छरीरं तावदेवोदरं तस्याः—इति दुर्गाचार्यो निरुक्तटीकायाम्—९ । ७ । दर्दुरि इत्यस्यैव छान्दसं रूपम् । **मद्गुरदर्दुरौ** (उ० १ । ४०) इति दॄ विदारणे—उरच्, निपातनात् साधुः । दृणाति भूमिं कर्णौ वा स दर्दुरः । ङीष् । हे दर्दुरि ! मण्डूकि ! **मध्ये** । मध्यदेशे । **ह्रदस्य** । ह्राद अव्यक्ते शब्दे-अच् । पृषोदरादित्वात् ह्रस्वत्वम् । जलाशयस्य । **प्लवस्व** । प्रतर । **विगृह्य** । प्रसार्य । **चतुरः** । **पदः** । पादान् ॥

भाषार्थः—(खण्वखा ३ इ=खण्वखे) हे खनती में लंगड़ाने वाली (खैमखा ३ इ=खैमखे) हे कष्ट में ठहरी हुई (तदुरि=दर्दुरि) हे [भूमि वा कान] फोड़ने वाली दादुरी ! (मध्ये) [जल के] भीतर वर्तमान ! और (पितरः) हे पालन करनेवाले विद्वान् किसान आदि लोगो ! (वर्षम्) वर्षा का (वनुध्वम्) सेवन करो (मरुताम्) याजकों के (मनः) मन को (इच्छत) चाहो [प्रसन्न करो] ॥ १५ ॥

भावार्थः—वृष्टि होने से अन्न आदि पदार्थों की उत्पत्ति से सब प्राणी मेंडुकी के समान प्रसन्न होते हैं। और यज्ञादि उत्तम कर्मों में प्रवृत्त होते हैं ॥१५॥

महान्तं कोशमुदचाभि षिंच सविद्युतं भवतु वातु वातः।
तन्वतां यज्ञं बहुधा विसृष्टा आनन्दिनीरोषधयो भवन्तु ॥१६॥

महान्तम् । कोशम् । उत् । अच । अभि । सिञ्च । सऽविद्युतम् । भवतु । वातु । वातः । तन्वताम् । यज्ञम् । बहुऽधा । विऽसृष्टाः । आऽनन्दिनीः । ओषधयः । भवन्तु ॥ १६ ॥

१५—**खण्वखा३ इ=खण्वखे । अशूप्रुषि** (उ० १ । १५१) इति खनु अवदारणे—क्वन् । णत्वं छान्दसम् । खजि गतिवैकल्ये—डः । टाप् । **एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ** (पा० ८ । २ । १०७) इति एकारं विगृह्य अकारस्य प्लुतः। खण्वे खनने छिद्रे खञ्जति सा खण्वखा, तत्सम्बुद्धौ खण्वखे। हे बिले पङ्गुगते ! **खैमखा३ इ=खैमखे । अर्त्तिस्तुसुहु०** (उ० १ । १४०) इति खै स्थैर्ये-खनने, हिंसायां चेति शब्दकल्पद्रुमः—ततो मन् प्रत्ययः, स च णित्। पुनः खै—ड, टाप् । खैमे हिंसायां कष्टे खायति तिष्ठति सा खैमखा। हे कष्टस्थिते। **तदुरि** । म० १४ ! हे दर्दुरि ! मण्डूकि। **वर्षम्** । वृष्टिम् । **वनुध्वम्** । वन सम्भक्तौ । सेवध्वम् । **पितरः** । हे पालयितारो विद्वांसो यूयं च। **मरुताम्** । ऋत्विजाम्—निघ० ३ । १८ । दोषनाशकानां याजकानाम् । **मनः** । चित्तम् । **इच्छत** । कामयध्वम् ॥

भाषार्थ—[हे परमात्मन् !] (महान्तम्) बड़े (कोशम्) धन भण्डार को (उत् अच) ऊंचा कर, (अभि) सब ओर से (सिञ्च) बरसा दे। (सविद्युतम्) समान विविध प्रकाशित [जगत्] (भवतु) होवे। (वातः) वायु (वातु) [अनुकूल] चले। (बहुधा, अनेक प्रकार से (विसृष्टाः) फैली हुई (ओषधयः) चावल, यव आदि ओषधें (यज्ञम्) यज्ञ को (तन्वताम्) फैलावें, और (आनन्दिनीः = ०—न्यः) आनन्द युक्त (भवन्तु) होवें ॥ १६ ॥

भावार्थ—परमात्मा के अनुग्रह से मनुष्य प्रयत्न पूर्वक धन संचय करें और वायु, वृष्टि आदि से उपकार लेकर यज्ञ अर्थात् अनेक विज्ञान युक्त कर्मों को फैलावें और अन्न आदि पदार्थ को पुष्टिकारक करें ॥ १६ ॥

इस मन्त्र का प्रथम पाद 'महान्तं...षिञ्च' ऋ० ५। ८३। ८ में है।

इति तृतीयोऽनुवाकः ॥

अथ चतुर्थोऽनुवाकः

सूक्तम् १६ ॥

१-९ ॥ वरुणो देवता । १ अनुष्टुप्, २-६ त्रिष्टुप् ७ जगती, ८, ९ त्रिपदा त्रिष्टुप् ॥

वरुणस्य सर्वव्यापकतोपदिश्यते—वरुण की सर्वव्यापकता का उपदेश ॥

बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति ।
यस्तायन्मन्यते चरन्त्सर्वं देवा इदं विदुः ॥ १ ॥

बृहन् । एषाम् । अधिऽस्थाता । अन्तिकात्ऽइव । पश्यति । यः । तायत् । मन्यते । चरन् । सर्वम् । देवाः । इदम् । विदुः ॥१॥

१६—**महान्तम्** । विशालम् । **कोशम्** । कुश श्लेषणे-घञ् । हिरण्यादिस्थापनगृहम् । मेघम्-निघ० १ । १० । **उत् अच** । अञ्चु गतौ । ऊर्ध्वं प्राप्नुहि । उत्थापय । **अभि** । अभितः । **षिञ्च** । वर्षय । **सविद्युतम्** । स+वि+द्युत दीप्तौ—कः । समानं विविधं प्रकाशितं जगत् । **भवतु** । **वातु** । अनुकूलं संचरतु । **वातः** । पवनः । **तन्वताम्** । विस्तारयन्तु । **यज्ञम्** । यजनीयं कर्म । **बहुधा** । नानाप्रकारेण । **विसृष्टाः** । उत्पन्नाः । विस्तीर्णाः । **आनन्दिनीः** । आनन्द-इनि, ङीप् । आनन्दिन्यः । हर्षयुक्ताः । **ओषधयः** । व्रीहियवतरुगुल्मादयः ॥

भाषार्थः—(एषाम्) इन [लोकों] का (बृहन्) बड़ा (अधिष्ठाता) अधिष्ठाता [वह वरुण] (अन्तिकात् इव) समीप में वर्तमान सा (पश्यति) देखता है, (यः) जो [वरुण] (तायत्) विस्तार वा पालन (चरन्) करता हुआ (सर्वम्) सब जगत् को (मन्यते) जानता है। (देवाः) व्यवहार में कुशल देवता लोग (इदम्) यह बात (विदुः) जानते हैं ॥ १ ॥

भावार्थः—परमात्मा सर्व नियन्ता, सर्वज्ञाता, सर्वस्रष्टा और सर्वरक्षक है, इस बात को ऋषि महात्मा साक्षात् करते हैं ॥ १ ॥

यस्तिष्ठ॑ति॒ चर॑ति॒ यश्च॒ वञ्च॑ति॒ यो नि॒लाय॒ं चर॑ति॒ यः प्र॒तङ्क॑म् ।
द्वौ सं॑नि॒षद्य॒ यन्म॒न्त्रये॑ते॒ राजा॒ तद्वे॑द॒ वरु॑णस्तृ॒तीयः॑ ॥ २ ॥

यः । तिष्ठ॑ति । चर॑ति । यः । च॒ । वञ्च॑ति । यः । नि॒ऽलाय॑न् । चर॑ति । यः । प्र॒ऽतङ्क॑म् । द्वौ । स॒म्ऽनि॒षद्य॑ । यत् । म॒न्त्रये॑ते॒ इति॑ । राजा॑ । तत् । वे॒द॒ । वरु॑णः । तृ॒तीयः॑ ॥ २ ॥

भाषार्थः—(यः) जो पुरुष (तिष्ठति) खड़ा होता है, वा (चरति) चलता है, (च) और (यः) जो पुरुष (वञ्चति) ठगी करता है, और (यः) जो (निलायन्) भीतर घुस कर, और (यः) जो (प्रतङ्कम्) बाहिर निकल कर

१—**बृहन्** । महान् । **एषाम्** । दृश्यमानानां लोकानाम् । **अधिष्ठाता** । नियन्ता । **अन्तिकात्** । इव समीपदेशाद् यथा । **पश्यति** । अवलोकयति । **यः** । वरुणः । **तायत्** । **वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च** (उ० २ । ८४) इति तायृ सन्तानपालनयोः—अति । विस्तारम् । पालनम् । **मन्यते** । जानाति । **चरन्** । चर गतिभक्षणयोः शतृः । कुर्वन् सन् । **सर्वम्** । सरणशीलं जगत् । **देवाः** । व्यवहारकुशलाः विद्वांसः । **इदम्** । निर्दिष्टं वृत्तम् । **विदुः** । विदन्ति । जानन्ति । साक्षात् कुर्वन्ति ॥

२—**यः** । पुरुषः । **तिष्ठति** । स्थितो भवति । **चरति** । गच्छति । **वञ्चति** । प्रतारयति । वञ्चनं करोति । **निलायन्** । नि+ली श्लेषणे द्रवीकरणे च—शतृः । निलीनः अदृश्यः सन् । **चरति** । आचरति । **प्रतङ्कम्** । प्र+तकि कृच्छ्रजीवने—णमुल् ।

(चरति) काम करता है और (द्वौ) दो जने (संनिषद्य) एक साथ बैठकर (यत्) जो कुछ (मन्त्रयेते) कानाफूसी करते हैं, (तृतीयः) तीसरा (राजा) राजा (वरुणः) वरणीय वा दुष्टनिवारक वरुण परमेश्वर (तत्) उसे (वेद) जानता है ॥ २ ॥

भावार्थः—परमेश्वर प्राणियों के गुप्त से गुप्त कर्मों को सर्वथा जानता और उनका यथावत् फल देता है ॥ २ ॥

उतेयं भूमिर्वरुणस्य राज्ञ उतासौ द्यौर्बृहती दूरेअन्ता ।
उतो समुद्रौ वरुणस्य कुक्षी उतास्मिन्नल्प उदके निलीनः ॥३॥

उत । इयम् । भूमिः । वरुणस्य । राज्ञः । उत । असौ । द्यौः । बृहती । दूरेऽअन्ता । उतो इति । समुद्रौ । वरुणस्य । कुक्षी इति । उत । अस्मिन् । अल्पे । उदके । निऽलीनः ॥ ३ ॥

भाषार्थः—(इयम् भूमिः) यह भूमि (उत) भी, (उत) और (असौ) वह (बृहती) बड़ा, (दूरे अन्ता) [पृथिवी से] दूर गति वाला (द्यौः) प्रकाशमान सूर्य (वरुणस्य राज्ञः) वरुण राजा का है, (उतो) और भी [पृथिवी और आकाश के] (समुद्रौ) दोनों समुद्र (वरुणस्य) वरुण की (कुक्षी) दो कोखें हैं, (उत) और वह (अस्मिन्) इस (अल्पे) थोड़े से (उदके) जल में भी (निलीनः) लीन हो रहा है ॥ ३ ॥

प्रकृष्टगमनं बहिर्गमनं प्राप्य । **द्वौ** । यौ पुरुषौ । **संनिषद्य** । सहोपविश्य । **यत्** । यत्किञ्चित् कार्यम् । **मन्त्रयेते** । मन्त्रि गुप्तभाषणे । रहसि गुप्तं भाषेते । **राजा** । ईश्वरः । **सर्वम्** । **वेद** । वेत्ति । **वरुणः** । वरणीयो दुष्टानां निवारको वा । **तृतीयः** । **त्रेः संप्रसारणं च** (पा० ५ । २ । ५५) इति त्रेः तीयः, संप्रसारणं च । त्रयाणां पूरकः ॥

३—उत । अपि । **इयम्** । दृश्यमाना । **भूमिः** । **वरुणस्य** । सर्वश्रेष्ठस्य परमेश्वरस्य । **राज्ञः** । ईश्वरस्य । समर्थस्य । **असौ** । विप्रकृष्टा । **द्यौः** । प्रकाशमानः सूर्यलोकः । **बृहती** । महती । **दूरेअन्ता** । **दुरीणो लोपश्च** (उ० २ । २०) इति दुर् + इण् गतौ—रक् । इति दूरम्[1] । **हसिमृग्रिण्वामि०** (उ० ३ । ८६) इति

१. यहाँ रो रि (८ । ३ । १४) से दुर् के रेफ का लोप तथा द्रलोपे पूर्वस्य० (६ । ३ । १११) से दीर्घ होता है ॥ सम्पा० ॥

भावार्थः—वरुण परमात्मा की ईश्वरता बड़ों से बड़े और छोटों से छोटे पदार्थों में है, अर्थात् यह स्थूल और सूक्ष्म जगत् उसी के आकर्षण, धारण, संयोग, वियोग सामर्थ्य में स्थित है। उसकी उपासना करके सब मनुष्य अपनी उन्नति करें ॥ ३ ॥

उत यो द्यामतिसर्पात् परस्तान्न स मुच्यातै वरुणस्य राज्ञः।
दिव स्पशः प्र चरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम्॥४॥

उत। यः। द्याम्। अतिऽसर्पात्। परस्तात्। न। सः। मुच्यातै। वरुणस्य। राज्ञः। दिवः। स्पशः। प्र। चरन्ति। इदम्। अस्य। सहस्रऽअक्षाः। अति। पश्यन्ति। भूमिम् ॥ ४ ॥

भाषार्थः—(उत) और (यः) जो [दुष्ट] (परस्तात्) दूर देश में (द्याम्) सूर्य लोक को (अतिसर्पात्) पार करके चुपके से रेंग जावे, (सः) वह पुरुष (वरुणस्य राज्ञः) वरुण राजा की (न मुच्यातै) मुक्ति न पा सके। (दिवः) प्रकाशमान (अस्य) इस [वरुण] के (स्पशः) बन्धन सामर्थ्य (इदम्)

अम गत्यादिषु-तन्। अन्तो अततेः-निरु० ४।२५। पृथिव्या दूरे अन्तं गमनं यस्याः सा। **उतो**। अपि च। **समुद्रौ**। अन्तरिक्षभूमिस्थौ जलधी। **कुक्षी**। लुषि-कुषिशुषिभ्यः क्सिः (उ० ३।१५५) इति कुष निष्कर्षे-क्सिः। उदरस्य दक्षिणवाम-पार्श्वौ यथा। **अस्मिन्**। निकटस्थे। **अल्पे**। अल वारणपर्य्याप्तिभूषासु-पप्रत्ययः। लेशमात्रे। **उदके**। जले। **निलीनः**। अन्तर्हितः ॥

४—उत। अपि च। **यः**। दुष्टः। **द्याम्**। सूर्यलोकम्। **अतिसर्पात्**। सृप—लेट्। अतिक्रम्य सर्पेत् गुप्तं गच्छेत्। **परस्तात्**। दिक्शब्देभ्यः सप्तमी-पञ्चमी (पा० ५। ३। २७) इति पर-अस्तातिः। परस्सन् दूरे देशे। **न**। नहि। **सः**। पुरुषः। **मुच्यातै**। मुचेः कर्मणि लेटि आडागमः। **वैतोऽन्यत्र** (पा० ३। ४। ९६) इति ऐकारः। मुक्तिं प्राप्नुयात्। **वरुणस्य**। वरणीयस्य। परमेश्वरस्य। **राज्ञः**। ईश्वरस्य। **दिवः**। प्रकाशमानस्य। **स्पशः**। स्पश बाधनस्पर्शनयोः-क्विप्। बाधमानाः। बन्धाः। पाशाः। **प्र चरन्ति**। प्रकर्षेण गच्छन्ति। **इदम्**।

इस [जगत्] में (प्र चरन्ति) चलते रहते हैं, [उनको] (सहस्राक्षाः) सहस्र प्रकार की दृष्टि वा व्यवहार वाले पुरुष (भूमिम् अति) भूमि के पार (पश्यन्ति) देखते हैं ॥ ४ ॥

भावार्थः—चाहे कोई दुष्कर्म करके कहीं छिप जावे, तो भी वह वरुण परमेश्वर के अखंड दण्ड से नहीं बच सकता। वह अपनी करनी का फल इस जन्म वा परजन्म में अवश्य पाता है ॥ ४ ॥

सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् परस्तात्। संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि मिनोति तानि ॥ ५ ॥

सर्वम्। तत्। राजा। वरुणः। वि। चष्टे। यत्। अन्तरा। रोदसी इति। यत्। परस्तात्। सम्ऽख्याताः। अस्य। निऽमिषः। जनानाम्। अक्षान्ऽइव। श्वऽघ्नी। नि। मिनोति। तानि ॥ ५ ॥

भाषार्थः—(राजा वरुणः) राजा वरुण (तत् सर्वम्) वह सब (वि चष्टे) देखता रहता है, (यत्) जो कुछ (रोदसी अन्तरा) सूर्य और भूमि के बीच में और (यत्) जो कुछ (परस्तात्) परे है। (जनानाम्) मनुष्यों के (निमिषः) पलक मारने (अस्य) इस [वरुण] के (संख्याताः) गिने हुये

दृश्यमानं जगत्। **अस्य**। वरुणस्य। **सहस्राक्षाः**। अ० ३। ११। ३। सहस्र+अक्षि-षच्। यद्वा। सहस्र+अक्ष। सहस्राणि बहूनि अक्षीणि दर्शनसामर्थ्यानि, अथवा, अक्षा व्यवहारा येषां ते तथाभूताः। बहुदर्शकाः बहुव्यवहारशीलाः पुरुषाः। **अति**। अतीत्य। **पश्यन्ति**। साक्षात्कुर्वन्ति तान् स्पशः। **भूमिम्**। भूलोकम् ॥

५—**सर्वम् तत्**। सकलं वृत्तम्। **राजा वरुणः**। समर्थः परमेश्वरः। **विचष्टे**। अ० ४। ११। २। विशेषेण पश्यति। **यत्**। **रोदसी अन्तरा**। द्यावापृथिव्योर्मध्ये। **परस्तात्**। म० ४। दूरदेशे। **संख्याताः**। परिगणिताः। **अस्य**। वरुणस्य। **निमिषः**। मिष स्पर्द्धायाम्–क्विप्। निमेषाः। चक्षुषः स्पन्दनकालाः।

हैं, वह (तानि) हिंसा कर्मों को (नि मिनोति) गिरा देता है (श्वघ्नी इव) जैसे धन हारने वाला जुआरी (अक्षान्) पासों को [गिरा देता है] ॥ ५ ॥

भावार्थः—वरुण सर्वज्ञ सर्वनियन्ता है, वह दुष्टों को दण्ड देकर ऐसे गिरा देता है जैसे हारा जुआरी निर्धन होकर क्रोध से पासे आदि पटक देता है। यहां गिराने मात्र में दृष्टान्त है ॥ ५ ॥

ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः ।
छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु ॥६॥

ये । ते । पाशाः । वरुण । सप्तऽसप्त । त्रेधा । तिष्ठन्ति । विऽसिताः । रुशन्तः । छिनन्तु । सर्वे । अनृतम् । वदन्तम् । यः । सत्यऽवादी । अति । तम् । सृजन्तु ॥ ६ ॥

भाषार्थः—(वरुण) हे दुष्ट निवारक परमेश्वर ! (सप्तसप्त = सप्त-सप्ताः) सात धाम [पृथिवी, जल, अग्नि, वायु, विराट् अर्थात् स्थूल जगत्, परमाणु और प्रकृति] से सम्बन्ध वाले, (त्रेधा) तीन प्रकार से [भूत, भविष्यत् और वर्त्तमान काल में] (विषिताः) फैले हुए (रुशन्तः) [दुष्टों वा दोषों

जनानाम् । प्राणिनाम् । **अक्षान्** । **अशेर्देवने** (उ० ३ । ६५) इति अशूङ् व्याप्तौ-सः । द्यूतसाधनानि । **इव** । यथा । **श्वघ्नी** । **कर्मणि हनः** (पा० ३ । २ । ८६) स्व + हन—णिनिः । सस्य शः । श्वघ्नो कितवो भवति, स्वं हन्ति स्वं पुनराश्रितं भवति-निरु० ५ । २२ । स्वहा, स्वघाती । धननाशकः । द्यूतकारकः । **निमिनोति** । डुमिञ् प्रक्षेपणे । नीचैः क्षिपति । **तानि** । तर्द हिंसायाम्—डः । तर्दनानि । हिंसनानि ॥

६—**ये** । **ते** । तव । **पाशाः** । अ० १ । ३१ । २ । बन्धनानि । **वरुण** । परमेश्वर । **सप्तसप्त** । **सप्यशूभ्यां तुट् च** (उ० १ । १५७) इति षप समवाये-कनिन् तुट् च । षप—क्तः । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति विभक्तेर्लुक् मध्यपदलोपश्च । सप्तसप्ताः । सप्तधामभिः पृथिवीजलाग्निवायुविराट्परमा—णुप्रकृतिभिः समवेताः समृद्धाः—यथा 'पृथिव्याः सप्त धामभिः' ऋ० १ । २२ ।

को] नाश करते हुये (ये) जो (ते) तेरे (पाशाः) फांस वा जाल (तिष्ठन्ति) स्थित हैं। (सर्वे) वे सब [फांस] (अनृतं वदन्तम्) मिथ्या बोलने वाले को (छिनन्तु) छिन्न भिन्न करें, और (यः) जो (सत्यवादी) सत्यवादी है (तम्) उसको (अति) सत्कार पूर्वक (सृजन्तु) छोड़ें ॥ ६ ॥

भावार्थः—वह परमात्मा प्रत्येक वस्तु और काल में व्यापक होकर दुष्टों को यथावत् दण्ड और शिष्टों को यथावत् आनन्द देता है ॥ ६ ॥

शतेन पाशैरभि धेहि वरुणैनं मा ते मोच्यनृतवाङ् नृचक्षः।
आस्तां जाल्म उदरं श्रंशयित्वा कोश इवाबन्धः परिकृत्यमानः॥७॥

शतेन। पाशैः। अभि। धेहि। वरुण। एनम्। मा। ते। मोचि। अनृतऽवाक्। नृऽचक्षः। आस्ताम्। जाल्मः। उदरम्। श्रंशयित्वा। कोशःऽइव। अबन्धः। परिऽकृत्यमानः॥ ७॥

भाषार्थः—(वरुण) हे दुष्टनिवारक परमेश्वर ! (शतेन) सौ (पाशैः) फांसों से (एनम्) इस [मिथ्यावादी] को (अभि धेहि) बांध ले, (नृचक्ष) हे मनुष्यों के देखने वाले ! (अनृतवाक्) मिथ्यावादी पुरुष (ते) तेरी (मा मोचि) मुक्ति न पावे। (जाल्मः) नीच अन्यायी (उदरम्) युद्ध कर्म को (श्रंशयित्वा=

१६। इत्यत्र दयानन्दभाष्ये। **त्रेधा**। त्रिप्रकारं भूतभविष्यत्वर्तमानकालेषु। **तिष्ठन्ति**। वर्त्तन्ते। **विषिताः**। षिञ् बन्धने-क्तः। विविधं बद्धाः। विस्तृताः। **रुशन्तः**। दुष्टान्। दोषान् वा हिंसन्तः। **छिनन्तु**। छिन्दन्तु। **सर्वे**। पाशाः। **अनृतम्**। असत्यम्। **वदन्तम्**। कथयन्तम्। **यः**। **सत्यवादी**। सत्यवक्ता। **तम्**। **अति**। अत सातत्यगमने-इन्। पूजायाम्। उत्कर्षे। **सृजन्तु**। त्यजन्तु, मुञ्चन्तु।

७ **शतेन**। बहुभिः। **पाशैः**। दण्डबन्धनैः। **अभि धेहि**। अभिपूर्वो दधातिर्बन्धने। बधान। **वरुण**। हे दुष्टनिवारक। **एनम्**। अनृतवादिनम्। **ते**। तव। **मा मोचि**। मुक्तिं न प्राप्नुयात्। **अनृतवाक्**। मिथ्यावादी। **नृचक्षः**। चक्षेर्बहुलं शिच्च (उ० ४। २३३) नृ+चक्षिङ् दर्शने[1]-असुन्। हे नृणां मनुष्याणां साध्वसाधुचरित्राणां द्रष्टः। **आस्ताम्**। तिष्ठतु। **जाल्मः**। जल अपवारणे-मप्रत्ययः।

१—धातुपाठादि में चक्षिङ् व्यक्तायां वाचि पढ़ा है। यहाँ 'दर्शन' अर्थ 'अयं दर्शनकर्मा च' इस माधवीय धातुवृत्ति के प्रमाण से दिखाया है ॥ सम्पा० ॥

स्रंसयित्वा) नीचे गिरा कर (परिकृत्यमानः) कटी हुई, (अबन्धः) अपने से छुटी (कोशः इव) फूल की कली के समान (आस्ताम्) बैठा रहे ॥ ७ ॥

भावार्थः—सर्वशक्तिमान् परमेश्वर के दण्ड से कोई मिथ्यावादी नहीं छूट सकता, और अधर्मी दुष्ट, धर्मात्माओं के सन्मुख ऐसा गिर जाता है, जैसे फूल की अधखिली कली अधिक पवन आदि के कारण गिरकर कुम्हला जाती है ॥ ७ ॥

यः स॑मा॒म्यो॑ ३॒ वरु॑णो॒ यो व्या॒म्यो॑ ३॒ यः सं॑दे॒श्यो॑ ३॒ वरु॑णो॒ यो वि॑दे॒श्यः॑ । यो दै॒वो वरु॑णो॒ यश्च॒ मानु॑षः ॥ ८ ॥

यः । स॒म्ऽआ॒म्यः॑ । वरु॑णः । यः । वि॒ऽआ॒म्यः॑ । यः । स॒म्ऽदे॒श्यः॑ । वरु॑णः । यः । वि॒ऽदे॒श्यः॑ । यः । दै॒वः । वरु॑णः । यः । च॒ । मानु॑षः ॥ ८ ॥

भाषार्थः—(वरुणः) वरुण परमेश्वर (यः) व्यापक, (समाम्यः) समान सेवनीय, (यः) सर्वनियन्ता और (व्याम्यः) पीड़ा रहित है, (वरुणः) वरुण ही (यः) यत्नशील, (संदेश्यः) समान देशीय, (यः) संयोग और वियोग

जालयति दूरी करोति हितज्ञानमिति । पामरः, क्रूरः । **उदरम्** । **उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च** (उ० ५ । १९) इति उद्+दृ विदारणे–अच् । उदो दस्य लोपः । उद्विदारणं युद्धम् । **श्रंशयित्वा** । स्रंसु अवस्रंसने=अधः पतने णिचि क्त्वा, सकारस्य शकारः । स्रंसयित्वा । अधः पातयित्वा । **कोशः** । कुश संश्लेषणे–घञ् । कोशोऽस्त्री कुड्मले, इत्यमरः–३ । ३ । २१८ । कुड्मलः । विकाशोन्मुखकलिका । **इव** । यथा । **अबन्धः** । बन्धेन शाखासंयोगतन्तुना विश्लिष्टः । **परिकृत्यमानः** । कृती छेदने–कर्मणि यक्, शानच्, मुक् च । परिच्छिद्यमानः ॥

८—**यः** । या प्रापणे–डः । व्यापकः । **समाम्यः** । **ऋहलोर्ण्यत्** (पा० ३ । १ । १२४) इति सम्+अम गत्यादिषु–ण्यत् । सम्यग् आम्योः भजनीयः सेवनीयः । **वरुणः** । वरणीयः सर्वश्रेष्ठः । **यः** । यम्–डः । नियन्ता । **व्याम्यः** । वि+अम रोगे भावे ण्यत् । विगतम् आम्यं पीडनं यस्मात् सः । पीडारहितः । आनन्दस्वरूपः । **यः** । यती प्रयत्ने–डः । **संदेश्यः** । **दिगादिभ्यो यत्** (पा० ४ । ३ । ५४) इति देश-यत् । समानदेशे भवः । **यः** । यु मिश्रणामिश्रणयोः–डः । यविता संयोक्ता वियोक्ता च । **विदेश्यः** । पूर्ववद्–यत् । विदेशे भवः । **यः** । यज देवपू-

करने वाला, (विदेश्यः) विदेशीय है। (वरुणः) वरुण ही (यः) पूजनीय, (दैवः) दिव्य गुण वालों में वर्त्तमान, (च) और (यः) दाता, और (मानुषः) मनन शील मनुष्यों में वर्त्तमान है ॥ ८ ॥

भावार्थः—मनुष्य सर्वान्तिर्यामी परमेश्वर की महिमा भले प्रकार जानकर अपने आत्मा की उन्नति करें ॥ ८ ॥

तैस्त्वा सर्वैरभि ष्यामि पाशैरसावामुष्यायणामुष्याः पुत्र । तानु ते सर्वाननु संदिशामि ॥ ९ ॥

तैः । त्वा । सर्वैः । अभि । स्यामि । पाशैः । असौ । आमुष्यायण । अमुष्याः । पुत्र । तान् । ऊँ इति । ते । सर्वान् । अनुऽसंदिशामि ॥ ९ ॥

भाषार्थः—(असौ=असौ त्वम्) वह तू (आमुष्यायण) हे अमुक पिता के पुत्र ! और (अमुष्याः पुत्र) हे अमुक माता के पुत्र ! (त्वा) तुझको (तैः सर्वैः) उन सब (पाशैः) नियम बन्धनों से (अभि ष्यामि) मैं [वरुण] बांधता हूँ, और (तान् सर्वान्) उन सबों को (उ) अवश्य (ते) तेरे लिये (अनुसंदिशामि) समीप से समझाता हूं ॥ ९ ॥

भावार्थः— परमेश्वर ने वेद द्वारा स्पष्ट दिखा दिया है कि सत्कर्म सुख के और दुष्कर्म दुःख के मूल हैं। इसलिये मनुष्य दुष्कर्मों को छोड़कर सत्कर्म करके आनन्द भोगें ॥ ९ ॥

जासङ्गतिकरणदानेषु—डः। पूजनीयः। **दैवः**। **देवाद् यञञौ** (वा०पा०४।१।८५) इति देव—अञ्। देवेषु दिव्यगुणवत्सु भवः। **यः**। यज दाने—डः। दाता। **च**। समुच्चये। **मानुषः**। अं० ४। १४। ५। मनुष्येषु मननशीलेषु भवः ॥

९—**तैः**। सुप्रसिद्धैः। **त्वा**। त्वां मनुष्यम्। **सर्वैः**। **अभि ष्यामि**। अभिपूर्वकः षो बन्धने। बध्नामि, अहं वरुणः। **पाशैः**। बन्धैः। **असौ**। स त्वम्। **आमुष्यायण**। अमुष्य, अदस् इत्यस्य षष्ठी, फक्, षष्ठ्या अलुक्। हे अमुष्यपुरुषस्य पुत्र। हे प्रख्यातकुलोद्भव। **अमुष्याः**। स्त्रियाम् अदस्—षष्ठी। अमुकजनन्याः। **पुत्र**। **तान्**। **सर्वान्**। पाशान्। **उ**। अवश्यम्। **ते**। तुभ्यम्। **अनुसंदिशामि**। दिश अतिसर्जने। अनु सामीप्येन विज्ञापयामि निरूपयामि ॥

सूक्तम् १७ ॥

१-८ ॥ ओषधिर्वापामार्गो देवता ॥ अनुष्टुप् छन्दः ॥

राजलक्षणोपदेशः—राजा के लक्षणों का उपदेश ॥

ईशानां त्वा भेषजानामुज्जेष आ रभामहे ।
चक्रे सहस्रवीर्यं सर्वस्मा ओषधे त्वा ॥ १ ॥

ईशानाम् । त्वा । भेषजानाम् । उत्ऽजेषे । आ । रभामहे ।
चक्रे । सहस्रऽवीर्यम् । सर्वस्मै । ओषधे । त्वा ॥ १ ॥

भाषार्थः—[हे राजन् !] (ईशानाम्) समर्थ (भेषजानाम्) भय निवारक पुरुषों में (त्वा) तेरा (उज्जेषे) [शत्रुओं को] जीतने के लिये (आरभामहे) हम आश्रय लेते हैं । (ओषधे) हे ताप नाशक [वा अन्न आदि ओषधि के समान उपकारक !] (सर्वस्मै) सब जनों के लिये (त्वा) तुझे (सहस्रवीर्यम्) सहस्रों सामर्थ्य वाला (चक्रे) उस [परमात्मा] ने बनाया है ॥ १ ॥

भावार्थः—मनुष्य पुरुषार्थियों में महा पुरुषार्थी पुरुष को अपना प्रधान बनावें और उससे अपनी रक्षा का सहारा लें ॥ १ ॥

सत्यजितं शपथयावनीं सहमानां पुनः सराम् ।
सर्वाः समह्वयोषधीरितो नः पारयादिति ॥ २ ॥

सत्यऽजितम् । शपथऽयावनीम् । सहमानाम् । पुनःऽसराम् ।
सर्वाः । सम् । अह्वि । ओषधीः । इतः । नः । पारयात् । इति ॥२॥

१—**ईशानाम्** । ईश ऐश्वर्ये—कः । ईश्वराणां समर्थानाम् । **त्वा** । त्वां राजानम् । **भेषजानाम्** । भेष + जि जये-डः । भेषस्य भयस्य जेतॄणां मध्ये । **उज्जेषे** । **तुमर्थे सेसेनसे०** (पा० ३ । ४ । ९) इति जिधातोः-सेप्रत्ययः । उज्जेतुं निवारयितुं शत्रून् । **आरभामहे** । आङ्पूर्वको रभ स्पर्शे । संस्पृशामः । आश्रयामः । **चक्रे** । स परमेश्वरः कृतवान् । **सहस्रवीर्यम्** । अपरिमितसामर्थ्ययुक्तम् । **सर्वस्मै** । सर्वजनहिताय । **ओषधे** । हे दाहनाशक ! अन्नाद्योषधिवद् उपकारक । **त्वा** । त्वाम् ॥

भाषार्थः—(सत्यजितम्) सत्य से जीने वाली, (शपथयावनीम्) शाप वा क्रोध वचन हटाने वाली, (सहमानाम्) शत्रुओं को हराने वाली, और (पुनः सराम्) बारंबार आगे बढ़ाने वाली सेना को, और (सर्वाः) सब (ओषधीः) ताप नाश करने वाली प्रजाओं को (सम् अह्वि) यथावत् मैंने आवाहन किया है, (इतः) इस [कठिन कर्म] से (नः) हमें (पारयात्) वह [पुरुषार्थी] पार लगावे, (इति) इस अभिप्राय से ॥ २ ॥

भावार्थः—प्रजा प्रतिनिधि सब हितकारी सेना और प्रजा गणों को बुला कर शत्रुओं से बचने के लिये राजा बनाने का प्रयोजन प्रकाशित करे ॥ २ ॥

या शशाप शपनेन याघं मूरमादधे ।

या रसस्य हरणाय जातमारेभे तोकमत्तु सा ॥ ३ ॥

या । शशाप । शपनेन । या । अघम् । मूरम् । आऽदधे ।

या । रसस्य । हरणाय । जातम् । आऽरेभे । तोकम् । अत्तु । सा ॥ ३ ॥

भाषार्थः—(या) जिस [शत्रुसेना] ने (शपनेन) शाप [कुवचन] से (शशाप) कोसा है और (या) जिसने (अघम्) दुःख देने वाली (मूरम्) मूल को (आदधे) जमा लिया है, और (या) जिसने (रसस्य) रस के (हर-

---

२—**सत्यजितम्** । जि-क्विप्, तुक् । सत्येन जयशीलाम् । **शपथयावनीम्** । यु मिश्रणामिश्रणयोः-णिच्,ल्युट्,ङीप्। शपथस्य आक्रोशस्य क्रोधवचनस्य पृथक्कर्त्रीं नाशयित्रीम् । **सहमानाम्** । अभिभवशीलाम् । **पुनः सराम्** । पुनः पुनः सरति प्रवर्तते सा तां सेनां प्रजां वा । **सर्वाः** । **सम्** । सम्यक् । **अह्वि** । अह्वे आहूतवानस्मि । **ओषधीः** । तापनिवारिकाः प्रजाः । **इतः** । अस्मात् कठिनकर्मणः । **नः** । अस्मान् । **पारयात्** । पार कर्मसमाप्तौ । अस्मत्कर्तव्यं समापयेत् । पारं गमयेत् स राजा । **इति** । अनेन हेतुना ॥

३—अयं मन्त्रो व्याख्यातः—अ० १ । २८ । ३ । इह शब्दार्थो दीयते । **या** । शत्रुसेना । **शशाप** । अनिष्टकथनं कृतवती । **शपनेन** । शापेन कुवचनेन । **अघम्** । दुःखकरम् । **मूरम्** । लस्य रः । मूलं प्रतिष्ठाम् । **आदधे** । परिजग्राह । **रसस्य** । सारस्य । आनन्दस्य । **हरणाय** । नाशनाय । **आरेभे** । आलेभे स्पृष्टवती । **तोकम्** । वर्धनम् । सन्तानम् । **अत्तु** । भक्षयतु । **सा** । शत्रुसेना ॥

णाय) हरण के लिए (जातम्) [हमारे] समूह को (आरेभे) छुआ है, (सा) वह [शत्रुसेना] (तोकम्) अपनी बढ़ती वा संतान को (अत्तु) खा लेवे ॥ ३ ॥

भावार्थः—जल शत्रु सेना दुर्वचन बोलती और उपद्रव मचाती बढ़ती आवे, युद्ध कुशल सेनापति उनमें भेद डाल दे कि वह लोग अपने संतान अर्थात् इष्ट मित्रों को ही नाश कर दें ॥ ३ ॥

यह मन्त्र पहले अ० १ । २८ । ३ में आ चुका है ॥

यां ते॑ च॒क्रुरा॒मे पात्रे॒ यां च॒क्रुर्नी॑ललोहि॒ते ।
आ॒मे मां॒से कृ॒त्यां यां च॒क्रुस्तया॑ कृत्या॒कृतो॒ जहि ॥ ४ ॥

याम् । ते॒ । च॒क्रुः । आ॒मे । पात्रे॑ । याम् । च॒क्रुः । नील॒ऽलो॒हि॒ते । आ॒मे । मां॒से । कृ॒त्याम् । याम् । च॒क्रुः । तया॑ । कृ॒त्या॒ऽकृतः॑ । ज॒हि॒ ॥ ४ ॥

भाषार्थः—[हे राजन् !] (याम्) जिस [हिंसा] को (ते) तेरे (आमे) भोजन में, वा (पात्रे) पानी में (चक्रुः) उन्होंने [हिंसाकारियों ने] किया है, (याम्) जिसको [तेरे] (नीललोहिते = नीलरोहिते) नीलों अर्थात् निधियों की उत्पत्ति में (चक्रुः) उन्होंने किया है। (याम्) जिस (कृत्याम्) हिंसा को [तेरे] (आमे) चलने में वा (मांसे) ज्ञान काल वा मांस में (चक्रुः)

४—**याम्** । कृत्याम् । **ते** । तव । **चक्रुः** । कृतवन्तः ते कृत्याकृतः । **आमे** । अम गतिभोजनादिषु-घञ् । भोजने । **पात्रे । दादिभ्यश्छन्दसि** (उ० ४ । १७०) इति पा पाने-त्रन् । पाने जलभाजने वा । **नीललोहिते** । नि नितराम् इलन्ति प्राप्नुवन्ति यं स नीलो निधिः कोशः । नि+इल प्रेरणे-कः । **रुहेश्च लो वा** (उ० ३ । ९४) इति रुह बीजजन्मनि, प्रादुर्भावे च-इतन्, रस्य लः । निधीनां प्रादुर्भावे, उत्पत्तौ । **आमे** । अम गतौ—घञ् । गमने । **मांसे । मनेर्दीर्घश्च** (उ० ३ । ६४) इति मन ज्ञाने, अर्च्चे, गर्वे, धृतौ-सप्रत्ययः, दीर्घश्च । मन्यते ज्ञायते ध्रियते वानेन तन्मांसम् । ज्ञाने । मांसः कालः, कीटः—इति शब्दकल्पद्रुमः । काले । यद्वा रक्तजधातुविशेषः । **कृत्याम्** । अ० ४ । ९ । ५ । हिंसाक्रियाम् । विपत्तिम् । **तया** । कृत्यया । **कृत्याकृतः** । कृत्या+डुकृञ् करणे-क्विप् तुक् । हिंसाकारिणः पुरुषान् हन-लोट् । नाशय ॥

उन्होंने किया है, (तया) उस [हिंसा] के कारण (कृत्याकृतः) हिंसाकारियों को (जहि) नाश कर दे ॥ ४ ॥

भावार्थः—जो दुष्कर्मी राजा के खान, पान, धनसंचय, मार्ग, तथा सत्य सत्य जानने, वा काल के सुप्रयोग एवं शरीर में विपत्ति डालें, राजा उनको यथावत् दंड देकर नाश कर दे ॥ ४ ॥

दौष्वप्न्यं दौर्जीवित्यं रक्षो अभ्वमराय्यः ।
दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि ॥ ५ ॥

दौःऽस्वप्न्यम् । दौःऽजीवित्यम् । रक्षः । अभ्वम् । अराय्यः ।
दुःऽनाम्नीः । सर्वाः । दुःऽवाचः । ताः । अस्मत् । नाशयामसि ॥ ५ ॥

भाषार्थः—(दौष्वप्न्यम्) नींद में बेचैनी, (दौर्जीवित्यम्) जीवन का कष्ट, (अभ्वम्) बड़े (रक्षः) राक्षस, (अराय्यः) अनेक अलक्ष्मियों और (दुर्णाम्नीः) दुष्ट नाम वाली (दुर्वाचः) कुवाणियों, (ताः सर्वाः) इन सब को (अस्मत्) अपने से (नाशयामसि) हम नाश करें ॥ ५ ॥

भावार्थः—राजा ऐसी नीति चलावे कि प्रजागण बाहिर भीतर से निश्चिन्त होकर सुख की नींद सोवें, उद्यमी होकर आनन्द भोगें, चोर डाकू आदिकों से निर्भय रहें, धन की वृद्धि करें और विद्या बल से कलह छोड़कर परस्पर उन्नति करने में लगे रहें ॥ ५ ॥

५—**दौष्वप्न्यम्** । दुर्+स्वप्न-ष्यञ् । बाह्याभ्यन्तरकारणैः स्वप्नावसादं निद्राभङ्गम् । **दौर्जीवित्यम्** । दुर्+जीवित-ष्यञ् । दुर्जीवनत्वम् । **रक्षः** । राक्षसम् । **अभ्वम्** । अशूप्रुषि० (उ० १ । १५१) इति अभि शब्दे-क्वन्, नलोपः । अभ्वो महन्नाम-निघ० ३ । ३ महद् । अतिभयकरम् । **अराय्यः** । अ० २ । १४ । ३ । शसि जस् । अरायीः । अलक्ष्मीः । विपत्तीः । **दुर्णाम्नीः** । दुर्+नामन्-ङीप् दुष्टनामोपेताः । **सर्वाः** । दुर्वाचः । दुष्टवाणीः । **ताः** । **अस्मत्** । अस्मत्सकाशात् । **नाशयामसि** । नाशयामः ॥

क्षुधामारं तृष्णामारमगोतामनपत्यताम् ।
अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥ ६ ॥

क्षुधाऽमारम् । तृष्णाऽमारम् । अगोताम् । अनपऽत्यताम् ।
अपामार्ग । त्वया । वयम् । सर्वम् । तत् । अप । मृज्महे ॥ ६ ॥

भाषार्थः—(क्षुधामारम्) भूख से मरना, (तृष्णामारम्) पियास से मरना, (अगोताम्) गौओं की हानि, और (अनपत्यताम्) बच्चों का अभाव, (तत् सर्वम्) इस सबको, (अपामार्ग) हे सर्वसंशोधक ! [वा अपामार्ग औषध के समान उपकारी राजन् !] (त्वया) तेरे साथ (वयम्) हम (अप मृज्महे) शोधते हैं ॥ ६ ॥

भावार्थः—राजा के सुप्रबन्ध से सूखा के समय भी अन्न, जल, गौ, बैल आदि की बहुतायत से मनुष्य यथावत् बढ़ते रहते हैं ॥ ६ ॥

"अपामार्ग" का अर्थ सर्वथा संशोधक है, और एक औषध भी है, जिससे कफ, बवासीर, खुजली, उदर रोग और विष रोग का नाश होता है ॥

तृष्णामारं क्षुधामारमथो अक्षपराजयम् ।
अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥ ७ ॥

तृष्णाऽमारम् । क्षुधाऽमारम् । अथो इति । अक्षऽपराजयम् ।
अपामार्ग । त्वया । वयम् । सर्वम् । तत् । अप । मृज्महे ॥७॥

६—**क्षुधामारम्** । मृञ्—घञ् । क्षुत्पीडया मरणम् । **तृष्णामारम्** । पिपासया मरणम् । **अगोताम्** । गवाम् अभावम् । **अनपत्यताम्** । अपत्यानां राहित्यम् । **अपामार्ग** । अप+आङ्+मृजू शौचालंकारयोः—घञ् । हे सर्वथा संशोधक । हे अपामार्गौषधवद् उपकारिन् ! अपामार्गपर्य्यायाः—'अपामार्गः शैखरिको धामार्गवमयूरकौ'—इत्यमरः, २ । ४ । ८८ । अस्यगुणाः—कफार्शः कण्डूदरामयविषरोगनाशित्वम्—इति शब्दकल्पद्रुमः । **त्वया** । राज्ञा । **वयम्** । प्रजागणाः । **सर्वम्** । **तत्** । एतत् । **अपमृज्महे** । अपमार्जयामः, शोधयामः, विनाशयामः इत्यर्थः ॥

भाषार्थः—(तृष्णामारम्) पियास से मरना, (क्षुधामारम्) भूख से मरना, (अथो) और भी (अक्षपराजयम्) व्यवहारों वा इन्द्रियों की हार, (तत् सर्वम्) इस सबको (अपामार्ग) हे सर्व संशोधक राजन् ! (त्वया) तेरे साथ (वयम् अपमृज्महे) हम शोधते हैं ॥ ७ ॥

भावार्थः—राजा के उत्तम प्रबन्ध से न तो जल, अन्न और दैनिक काम काज की हानि, और न शरीर और आत्मा की दुर्बलता होती है ॥ ७ ॥

अपामार्ग ओषधीनां सर्वासामेक इद् वशी ।
तेन ते मृज्म आस्थितमथ त्वमगदश्चर ॥ ८ ॥

अपामार्गः । ओषधीनाम् । सर्वासाम् । एकः । इत् । वशी ।
तेन । ते । मृज्मः । आऽस्थितम् । अथ । त्वम् । अगदः । चर ॥ ८ ॥

भाषार्थः—(अपामार्गः) सब दोषों का शोधने वाला परमेश्वर (सर्वासाम्) सब (ओषधीनाम्) तापनाशक अन्न आदि पदार्थों का (एकः इत्) एक ही (वशी) वश में रखने वाला है । (तेन) उस [के आश्रय] से [हे राजन् !] (ते) तेरे (आस्थितम्) उपस्थित [भय] को (मृज्मः) हम शोधते हैं, (अथ) इस लिये (त्वम्) तू (अगदः) नीरोग होकर (चर) विचर ॥ ८ ॥

भावार्थः—प्रजागण कहते हैं—"परमात्मा सब संसार का स्वामी है, उसी सहारे से हम आप पर यह राज्य भार रखते हैं, आप भी उसी के सहारे से निश्चिन्त होकर अपना कर्तव्य करें" ॥ ८ ॥

७—**अथो** । अपि च । **अक्षपराजयम्** । अक्षू व्याप्तौ–पचाद्यच् घञ् वा । यद्वा । **अशेर्देवने** (उ० ३ । ६५) इति अशूङ् व्याप्तौ-सप्रत्ययः । अक्षाणां व्यवहाराणाम् इन्द्रियाणां वा पराजयं पराभवम् । अन्यत् पूर्ववत् ॥

८—**अपामार्गः** । म० ६ । सर्वदोषशोधकः परमेश्वरः । **ओषधीनाम्** । तापनाशयित्रीणाम् अन्नादिपदार्थानाम् । **सर्वासाम्** । अशेषाणाम् । **एकः** । अद्वितीयः । **इत्** । एव । **वशी** । वशयिता । **तेन** । अपामार्गेण परमेश्वरेण । **ते** । तव । **मृज्मः** । मार्जयामः शोधयामः । **आस्थितम्** । आपतितं राज्यभाररूपं भयम् । **अथ** । अनन्तरम् । **त्वम्** । राजन् । **अगदः** । अगद[1] नीरोगत्वे च–अच् । रोगशून्यः स्वस्थः । **चर** । चिरकालं वर्त्तस्व ॥

---

१. कण्ड्वा० ग० ३६ ॥ सम्पा० ॥

सूक्तम् १८ ॥

१-८ ॥ अपामार्गो देवता ॥ अनुष्टुप् छन्दः ॥

राजधर्मोपदेशः—राजा के धर्म का उपदेश ॥

समं ज्योतिः सूर्येणाह्ना रात्री समावती ।
कृणोमि सत्यमूतयेऽरसाः सन्तु कृत्वरीः ॥ १ ॥

समम् । ज्योतिः । सूर्येण । अह्ना । रात्री । समऽवती ।
कृणोमि । सत्यम् । ऊतये । अरसाः । सन्तु । कृत्वरीः ॥ १ ॥

भाषार्थः—(ज्योतिः) ज्योति (सूर्येण समम्) सूर्य के साथ साथ और (रात्री) रात्रि (अह्ना समावती) दिन के साथ वर्तमान है, [ऐसे ही] मैं (सत्यम्) सत्यकर्म को (ऊतये) रक्षा के लिये (कृणोमि) करता हूं, (कृत्वरीः = कृत्वर्यः) कतरने वाली विपत्तियां (अरसाः) नीरस (सन्तु) हो जावें ॥ १ ॥

भावार्थः—जैसे प्रकाश के साथ सूर्य का और दिन के साथ रात्रि का नित्य सम्बन्ध है, ऐसे ही मनुष्य का सत्य के साथ नित्य सम्बन्ध है। इससे राजा और प्रजा सदा सत्य में प्रवृत्त होकर मिथ्या कामों की विपत्तियों से बचें ॥ १ ॥

यो देवाः कृत्यां कृत्वा हरादविदुषो गृहम् ।
वत्सो धारुरिव मातरं तं प्रत्यगुप पद्यताम् ॥ २ ॥

१—**समम्** । सह वर्तमानम् । **ज्योतिः** । प्रभामण्डलम् । **सूर्येण** । आदित्येन । **अह्ना** । दिवसेन । **रात्री** । अ० २।८।२ । निशा । **समावती** । सम-मतुप् । छान्दसो दीर्घः । समं समानं वर्तमाना । **कृणोमि** । करोमि । **सत्यम्** । यथार्थं कर्म । **ऊतये** । रक्षणार्थम् । **अरसाः** । निर्बलाः । **सन्तु** । भवन्तु । **कृत्वरीः** । कृती छेदने-क्वरप् । **इण्नशूजिसर्त्तिभ्यः क्वरप्** (पा० ३ । २ । १६३) इति कृती छेदने-क्वरप् । **टिड्ढाणञ्०** (पा० ४ । १ । १५) इति ङीप् । पूर्वसवर्णदीर्घः । कर्तनशीलाः । विपत्तयः । बाधाः ॥

यः । देवाः । कृत्याम् । कृत्वा । हरात् । अविदुषः । गृहम् ।
वत्सः । धारुःऽइव । मातरम् । तम् । प्रत्यक् । उप । पद्यताम् ॥ २ ॥

भाषार्थः--(देवाः) हे विद्वानों ! (यः) जो पुरुष (कृत्याम्) हिंसा (कृत्वा) करके (अविदुषः) अजान मनुष्य के (गृहम्) घर को (हरात्) हर लेवे। वह दुष्कर्म (प्रत्यक्) लौट कर (तम्) उसी [दुष्कर्मी] को (उप पद्यताम्) जा मिले (इव) जैसे (धारुः) दूध पीने वाला (वत्सः) बछड़ा (मातरम्) अपने माता [गौ के पीछे पीछे दौड़ता है] ॥२॥

भावार्थः—दुष्ट मनुष्य को उसकी दुष्टता का दण्ड राजप्रबन्ध वा ईश्वर व्यवस्था से अवश्य पहुंचता है, जैसे छोटा बछड़ा अनेक गौओं में से अपनी ही माता को चिपट जाता है ॥२॥

अमा कृत्वा पाप्मानं यस्तेनान्यं जिघांसति ।
अश्मानस्तस्यां दुग्धायां बहुलाः फट् करिक्रति ॥३॥

अमा । कृत्वा । पाप्मानम् । यः । तेन । अन्यम् । जिघांसति ।
अश्मानः । तस्याम् । दुग्धायाम् । बहुलाः । फट् । करिक्रति ॥३॥

भाषार्थः—(यः) जो पुरुष (तेन अमा) चोर वा म्लेच्छ के साथ होकर (पाप्मानम्) पाप कर्म (कृत्वा) करके (अन्यम्) दूसरे को (जिघांसति) मारना चाहे, (बहुलाः) वृद्धि करने वाले (अश्मानः) व्यापनशील वा

२—यः । शत्रुः । **देवाः** । हे विद्वांसः । **कृत्याम्** । हिंसाम् । **कृत्वा** । विधाय । **हरात्** । लेटि आडागमः । हरेत् । **अविदुषः** । अजानानस्य । **गृहम्** । गेहम् । **वत्सः** । वदनशीलः । गोशिशुः । **धारुः** । दाधेट्सिशदसदो रुः (पा० ३।२।१५९) इति धेट् पाने-रुः । स्तनपानकर्त्ता । **इव** । यथा । **मातरम्** । जननीम् । **तम्** । दुष्टम् । **प्रत्यक्** । प्रतिनिवृत्य । **उप पद्यताम्** । उप गच्छतु ॥

३—**अमा** । अम गत्यादिषु-क्विप्, टा । सह । **कृत्वा** । **पाप्मानम्** । अ० ३।३१।१। पाति यस्मात् स पाप्मा पापम् । **यः** । शत्रुः । **तेन** । तर्द हिंसायाम्-डः । तर्दति हिनस्तीति तः । चौरः, म्लेच्छः । चौरेण । पामरेण । **अन्यम्** । सत्कर्माणम् । **जिघांसति** । हन्तुमिच्छति । **अश्मानः** । अ० १।२।२। व्यापनशीलाः पाषा-

पाषाण के समान दृढ़स्वभाव पुरुष (तस्याम्) उस [दुष्क्रिया] के (दग्धायाम्) भस्म किये जाने पर (फट्) [उस दुष्ट का] नाश (करिक्रति) कर डालें ॥ ३ ॥

भावार्थः—स्त्री पुरुष दुष्टों से मिल कर लोगों में उपद्रव मचावें, राजपुरुष अनुसन्धान करके उन दोनों को यथावत् दण्ड देवें ॥ ३ ॥

सहस्रधामन् विशिखान् विग्रीवाञ् छायया त्वम् ।
प्रति स्म चक्रुषे कृत्यां प्रियां प्रियावते हर ॥ ४ ॥

सहस्रऽधामन् । विऽशिखान् । विऽग्रीवान् । शायय । त्वम् ।
प्रति । स्म । चक्रुषे । कृत्याम् । प्रियाम् । प्रियऽवते । हर ॥ ४ ॥

भाषार्थः—(सहस्रधामन्) हे सहस्रों धारण, पोषण और दान वाले राजन् ! (त्वम्) तू (विशिखान्) विरुद्ध प्रकार से सोने वाले, वा विरुद्ध गति वाले, (विग्रीवान्) विरुद्ध प्रकार से खाने वाले, [दुष्टों] को (शायय) सुला दे [गिरा दे] । (कृत्याम्) दुष्क्रिया (चक्रुषे) करने वाले पुरुष को (प्रति) प्रत्यक्ष (स्म) अवश्य [वैसी ही दण्ड पीडा] (हर) पहुंचा [जैसे] (प्रियाम्) प्रिया, भार्या को (प्रियावते) उसके स्वामी के पास [प्रत्यक्ष पहुँचाते हैं] ॥ ४ ॥

णवद् दृढस्वभावा वा राजपुरुषाः । **तस्याम्** । पूर्वोक्तायां कृत्यायाम्—म० २ । **दग्धायाम्** । भस्मीकृतायां नष्टायां सत्याम् । **बहुलाः** । अ० ३ । १४ । ६ । वृद्धिशीलाः । **फट्** । त्रिफला विशरणे—क्विप् । डलयोरैक्यम् । तस्य विशीर्णम् । **करिक्रति** । करोतेर्यङ्लुगन्तात् लेटि । **रुग्रिकौ च लुकि** (पा० ७ । ४ । ९१) इति अभ्यासस्य रिगागमः । पुनः पुनः कुर्वन्तु ॥

४—**सहस्रधामन्** । **सर्वधातुभ्यो मनिन्** (उ० ४ । १४५) इति डुधाञ् धारणपोषणयोः—मनिन् । हे असंख्यातधारणपोषणदानयुक्त राजन् ! **विशिखान्** । **शीङो ह्रस्वश्च** (उ० ५ । २४) इति शीङ् स्वप्ने—खः, ह्रस्वो गुणाभावश्च । यद्वा, शिखि गतौ—कः, नलोपः । विरुद्धनिद्रान् । विरुद्धगतीन् । **विग्रीवान्** । **शेवायहजिह्वाग्रीवा०** (उ०१।१५४) इति गॄ निगरणे—वन् । ग्री इत्यादेशः । विरुद्धं निगरणशीलान् भक्षकान् दुष्टान् । **शायय** । शीङ् स्वप्ने—णिच् । स्वापय ।

भावार्थः—राजा अनेक प्रकार से प्रजा का रक्षण आदि करता हुआ दुष्टों को दण्ड पहुंचावे, जैसे भूली भटकी स्त्री को उसके स्वामी के पास प्रत्यक्ष पहुंचा देते हैं ॥ ४ ॥

अनयाहमोषध्या सर्वाः कृत्या अदूदुषम् ।
यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ॥ ५ ॥

अनया । अहम् । ओषध्या । सर्वाः । कृत्याः । अदूदुषम् ।
याम् । क्षेत्रे । चक्रुः । याम् । गोषु । याम् । वा । ते । पुरुषेषु ॥५॥

भाषार्थः—(अहम्) मैंने (अनया ओषध्या) इस ओषधिरूप [तापनाशक तुझ राजा] के साथ (सर्वाः कृत्याः) सब हिंसाओं को (अदूदुषम्) खंडित कर दिया है, (याम्) जिस [हिंसा] को (क्षेत्रे) खेत में, अथवा (याम्) जिसको (गोषु) गौओं में (वा) अथवा (याम्) जिसको (ते) तेरे (पुरुषेषु) पुरुषों में (चक्रुः) उन लोगों ने किया था ॥ ५ ॥

भावार्थः—जो दुष्ट लोग प्रजा को किसी प्रकार से सतावें, प्रजा गण और राजपुरुष मिलकर दुष्टों का नाश करें ॥ ५ ॥

यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् ।
चकार भद्रमस्मभ्यमात्मने तपनं तु सः ॥ ६ ॥

यः । चकार । न । शशाक । कर्तुम् । शश्रे । पादम् । अङ्गुरिम् ।
चकार । भद्रम् । अस्मभ्यम् । आत्मने । तपनम् । तु । सः ॥ ६ ॥

निद्रापय । पातय । **त्वम् प्रति** । प्रत्यक्षम् । **स्म** । अवश्यम् । **चक्रुषे** । करोतेः क्वसुः । कृतवते पुरुषाय । **कृत्याम्** । हिंसां दुष्क्रियाम् । **प्रियाम्** । प्रीञ् तर्पणे-कः, टाप् । भार्य्या यथा । **प्रियावते** । प्रियया भार्यया तद्वते । **हर** । प्रापय = दण्डपीडां प्रापय ॥

५—अनया ओषध्या । अनेन ओषधिरूपेण तापनाशकेन राज्ञा सह । **अहम्** । प्रजागणः । **सर्वाः** । **कृत्याः** । हिंसाः । **अदूदुषम्** । दुषेर्ण्यन्तात् लुङि चङि रूपम् । दूषितवान् खण्डितवानस्मि । **याम्** । कृत्याम् । **क्षेत्रे** । शस्यवपनयोग्ये प्रदेशे । **चक्रुः** । कृतवन्तः शत्रवः । **गोषु** । गोषु मध्ये । **वा** । अथवा । **ते** । तव । **पुरुषेषु** । मनुष्येषु ॥

भाषार्थः—(यः) जिस दुष्ट ने (कर्तुम्) हिंसा को (चकार) किया था, वह (न शशाक) समर्थ न था, उसने (पादम्) अपना पैर और (अंगुरिम्) अंगुरी (शश्रे) तोड़ ली। (सः) उसने (अस्मभ्यम्) हमारे लिये (भद्रम्) आनन्द, और (आत्मने) अपने लिये (तु) तो (तपनम्) तपन (चकार) कर लिया ॥ ६ ॥

भावार्थः—पापी का आत्मा दुर्बल होता है, वह दण्ड पाने से आप ही अपने हाथ पैर में कुल्हाड़ी मारता है। उससे शिष्टों को सुख और उस दुष्ट को दुःख होता है ॥६॥

अपामार्गोऽप मार्ष्टु क्षेत्रियं शपथश्च यः।
अपाह यातुधानीरप सर्वा अराय्यः ॥ ७ ॥

अपामार्गः । अप । मार्ष्टु । क्षेत्रियम् । शपथः । च । यः ।
अप । अह । यातुऽधानीः । अप । सर्वाः । अराय्यः ॥ ७ ॥

भाषार्थः—(अपामार्गः) दोषों का शोधने वाला राजा (क्षेत्रियम्) देह वा वंश के दोष को, (च) और (यः) जो कुछ (शपथः) दुर्वचन हो [उसे भी] (अप मार्ष्टु) शुद्ध कर देवे। (अह) अरे (यातुधानीः) यातना देने वाली शत्रु सेनाओं को (अप = अप मार्ष्टु) शुद्ध कर डाले, और (सर्वाः) सब (अराय्यः = अरायीः) अलक्ष्मियों को (अप = अप मार्ष्टु) शुद्ध कर डाले ॥ ७ ॥

६—**यः** । दुष्टपुरुषः । **चकार** । कृतवान् । **न** । नहि । **शशाक** । शक्तः समर्थः आसीत् । **कर्तुम्** । सितनिगमि० (उ० १ । ६९) इति कृञ् हिंसायाम्—तुन् । हिंसाम् । **शश्रे** । शॄ हिंसायाम्—लिट् । शीर्णवान् । छिन्नवान् । **पादम्** । चरणम् । **अंगुरिम्** । अ० २ । ३३ । ६ । अङ्गुलिम् । **भद्रम्** । मङ्गलम् । **अस्मभ्यम्** । प्रजागणेभ्यः । **आत्मने** । स्वस्मै । **तपनम्** । दहनं पीडनम् । **तु** । किन्तु । **सः** । दुष्कर्मी ॥

७—**अपामार्गः** । अ० ४ । १७ । ६ । सर्वथा शोधको राजा । **अप मार्ष्टु** । मृजूष् शुद्धौ । शोधयतु । अपगमयतु । **क्षेत्रियम्** । अ० २ । ८ । १ । क्षेत्र—घच् । देहे वंशे वा भवं रोगं दोषं वा । **शपथः** । क्रोशः । दुर्वचनम् । **च** । **यः** ।

भावार्थः—राजा अपनी सुनीति से प्रजा के दुःखों का नाश करके उनके स्वास्थ्य और धन की वृद्धि करे ॥ ७ ॥

अपमृज्य यातुधानानप सर्वा अराय्यः ।
अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥ ८ ॥

अपऽमृज्य । यातुऽधानान् । अप । सर्वाः । अराय्यः ।
अपामार्ग । त्वया । वयम् । सर्वम् । तत् । अप । मृज्महे ॥८॥

भाषार्थः—(यातुधानान्) पीड़ा देने वाले राक्षसों को (अपमृज्य) शोधकर, और (सर्वाः) सब प्रकार की (अराय्यः) दरिद्रताओं को (अप=अपमृज्य) शोधकर, (अपामार्ग) हे सर्वसंशोधक राजन् ! (त्वया) तेरे साथ (वयम्) हम लोग (तत् सर्वम्) उस सब [कष्ट कर्म] को (अप मृज्महे) शोधते हैं ॥ ८ ॥

भावार्थः—नीति निपुण राजा के शासन में सब प्रजागण अपने कष्टों को दूर करके आनन्द भोगते हैं ॥ ८ ॥

इस मन्त्र का उत्तरार्ध सूक्त १७ मन्त्र ६ में आया है ॥

॥ सूक्तम् १९ ॥

१—८ ॥ अपामार्गो देवता ॥ १, ३—८ अनुष्टुप्, २ पथ्या पङ्क्तिः ॥

राजधर्मोपदेशः—राजा के धर्म का उपदेश ॥

उतो अस्यबन्धुकृदुतो असि नु जामिकृत् ।
उतो कृत्याकृतः प्रजां नडमिवाच्छिन्धि वार्षिकम् ॥१॥

यः, तमपि । **अप** । अप मार्ष्टु । **अह** । विनिग्रहे । **यातुधानीः** । अ० १ । २८ । २ । पीडादायिनीः शत्रुसेनाः । **सर्वाः** । **अराय्यः** अ० ४ । १७ । ५ । अलक्ष्मीः ॥

८—अपमृज्य । सम्यक् शोधयित्वा । **यातुधानान्** । अ० १ । ७ । १ । पीडाप्रदान् । **अप** । अपमृज्य । **सर्वाः** । **अराय्यः** । म० ७ । अरायीः । अलक्ष्मीः । अन्यद् व्याख्यातं सू० १७ म० ६ ॥

उतो इति । असि । अबन्धुऽकृत् । उतो इति । असि । नु । जामिऽकृत् । उतो इति । कृत्याऽकृतः । प्रऽजाम् । नडम्ऽइव । आ । छिन्धि । वार्षिकम् ॥ १ ॥

भाषार्थः—[हे राजन्] तू (अबन्धुकृत्) अबन्धुओं का काटने वाला (उतो) भी (असि) है, (नु) और (जामिकृत्) बन्धुओं का बनाने वाला (उतो) भी (असि) है । (उतो) इससे (कृत्याकृतः) हिंसा करने वालों और (प्रजाम्) उनके सेवकों को (आछिन्धि) काट डाल, (इव) जैसे (वार्षिकम्) वर्षा में उत्पन्न (नडम्) नरकट घास को ॥ १ ॥

भावार्थः—राजा अपने उत्तम शासन से हिंसक दुष्टों का नाश करके इष्ट मित्रों में मेल बढ़ावे ॥ १ ॥

ब्राह्मणेन पर्युक्तासि कण्वेन नार्षदेन । सेनेवैषि त्विषीमती न तत्र भयमस्ति यत्र प्राप्नोष्योषधे ॥ २ ॥

ब्राह्मणेन । परिऽउक्ता । असि । कण्वेन । नार्षदेन । सेनाऽइव । एषि । त्विषिऽमती । न । तत्र । भयम् । अस्ति । यत्र । प्रऽआप्नोषि । ओषधे ॥२॥

भाषार्थः—[हे राजन् !] तू (ब्राह्मणेन) वेदज्ञानी ब्राह्मण, (कण्वेन) मेधावी, (नार्षदेन) नायकों की सभा के हितकारी पुरुष करके (पर्युक्ता) उप-

---

१—**उतो** । अपि च । **असि** । **अबन्धुकृत्** । कृती छेदने—क्विप् । अबन्धूनां शत्रूणां कर्तकश्छेदकः । **नु** । अनुनये । **जामिकृत्** । जामि इति व्याख्यातम्—अ० २ । ७ । २ । जामिः, बन्धुः—यथा सायणः—ऋ० १ । ७५ । ३ । करोतेः क्विप् । बन्धूनां कर्ता सम्पादकः । **कृत्याकृतः** । हिंसाकर्तॄन् । **प्रजाम्** । तेषां जनान् भृत्यादीन् च । **नडम्** । नल बन्धे[1] = पचाद्यच् । लस्य डत्वम् । सुच्छेद्यं तृणविशेषम् । **इव** । यथा । **आ** । समन्तात् । **छिन्धि** । भिन्धि । विदारय । **वार्षिकम्** । छन्दसि ठञ् (पा० ४ । ३ । १९) इति वर्षा—ठञ् । वर्षाकालोद्भवम् ॥

२—**ब्राह्मणेन** । वेदज्ञेन विदुषा । **पर्युक्ता** । उपदिष्टौषधिवत् । **असि** । **कण्वेन** । अ० २ । ३२ । ३ । उपदेशकेन । मेधाविना—निघ० ३ । १५ । **नार्षदेन** ।

---

१. कोषानुसारी यह अर्थ है ॥ सम्पा० ॥

दिष्ट [ओषध समान] (असि) है। (त्विषीमती) प्रकाशयुक्त (सेना) सेना, अर्थात् सूर्य की किरण पुंज के (इव) समान (एषि) तू चलता है। (तत्र) वहां पर (भयम्) भय (न अस्ति) नहीं होता, (यत्र) जहां पर (ओषधे) हे ओषधि तुल्य तापनाशक राजन् (प्राप्नोषि) तू व्यापक होता है ॥ २ ॥

भावार्थः—जैसे सद्वैद्य की बतलाई ओषधि बड़ी गुणकारी होती है और जैसे सूर्य अपनी किरणों से अन्धकार मिटाता है, वैसे ही राजा वेदज्ञानी, बुद्धिमान् नरशिरोमणि पुरुषों के उपदेशक और सत्संग से प्रतापी होकर शत्रुओं का नाश करके प्रजा को सुख देता है ॥ २ ॥

अग्रमेष्योषधीनां ज्योतिषेवाभिदीपयन् ।

उत त्रातासि पाकस्याथो हन्तासि रक्षसः ॥ ३ ॥

अग्रम् । एषि । ओषधीनाम् । ज्योतिषाऽइव । अभिऽदीपयन् । उत । त्राता । असि । पाकस्य । अथो इति । हन्ता । असि । रक्षसः ॥ ३ ॥

भाषार्थः—[हे राजन् !] (ज्योतिषा इव) अपने तेज से जैसे (अभिदीपयन्) सब ओर प्रकाश फैलाता हुआ (ओषधीनाम्) ओषधि तुल्य उपकारी पुरुषों में (अग्रम्) आगे आगे (एषि) तू चलता है। (उत) और तू (पाकस्य) पक्का (दृढ) करने योग्य अथवा रक्षा योग्य दुर्बल पुरुष का (त्राता)

नरो नायकाः सीदन्ति यत्रेति नृषत्। **तस्मै हितम्** (पा० ५। १। ५) इति नृषद्-अण्। नृणां नायकानां सभायाः हितकारकेण। **सेना इव** । यथा सेना सूर्यकिरण-समूहः। **एषि** । गच्छसि। **त्विषीमती** । **इगुपधात् कित्** (उ० ४। १२०) इति त्विष दीप्तौ-इन् 'स च कित्' ङीप्। दीप्तियुक्ता। **न** । **तत्र** । **भयम्** । भीतिः दरः। **अस्ति** । **यत्र** । **प्राप्नोषि** । व्याप्नोषि। **ओषधे** । हे ओषधिवत् तापनाशक राजन् ॥

३—अग्रम् । अग्रतः। **एषि** । गच्छसि। **ओषधीनाम्** । ओषधिसमान-हितकारकाणां मध्ये। **ज्योतिषा** । तेजसा स्वप्रतापेन। **अभि दीपयन्** । अभितः सर्वतः प्रकाशयन्। **उत** । अपि च। **त्राता** । रक्षिता। **असि** । **पाकस्य** । डुपचष् पाके-घञ्। पक्तव्यस्य दृढीकरणीयस्य। यद्वा, **इणभीकापा०** (उ० ३। ४३)

रक्षक (असि) है (अथो) और भी तू (रक्षसः) राक्षस का (हन्ता) हनन करने वाला (असि) है ॥ ३ ॥

भावार्थः—प्रतापी राजा सब उपकारी पुरुषों में अग्रगामी होकर यथावत् शासन करता है ॥ ३ ॥

यद॒दो दे॒वा असु॑राँ॒स्त्वया॒ग्रे नि॒रकु॑र्वत ।
तत॒स्त्वमध्यो॑षधेऽपामा॒र्गो अ॑जायथाः ॥ ४ ॥

यत् । अ॒दः । दे॒वाः । असु॑रान् । त्वया॑ । अग्रे॑ । निः॒ऽअकु॑र्वत ।
ततः॑ । त्वम् । अधि॑ । ओ॒ष॒धे॒ । अ॒पा॒मा॒र्गः । अ॒जा॒य॒थाः ॥ ४ ॥

भाषार्थः—(अदः) वह (यत्) जो (अग्रे) पूर्वकाल में (त्वया) तेरे साथ होकर (देवाः) देवताओं [विद्वान् शूरों] ने (असुरान्) असुरों को (निरकुर्वत) निकाल दिया है, (ततः) उसी से (ओषधे) हे ओषधि समान तापनाशक राजन् ! (त्वम्) तू (अपामार्गः) संशोधक (अधि) अधिक करके (अजायथाः) प्रकट हुआ है ॥ ४ ॥

भावार्थः—मनुष्य प्रशंसनीय काम करने से ही संसार में प्रशंसा पाते हैं ॥४॥

वि॒भि॒न्द॒ती श॒तशा॑खा वि॒भि॒न्दन् नाम॑ ते पि॒ता ।
प्र॒त्यग् वि भि॑न्धि॒ त्वं तं यो अ॒स्माँ अ॑भि॒दास॑ति ॥ ५ ॥

वि॒ऽभि॒न्द॒ती । श॒तऽशा॑खा । वि॒ऽभि॒न्दन् । नाम॑ । ते॒ । पि॒ता । प्र॒त्यक् । वि । भि॒न्धि॒ । त्वम् । तम् । यः । अ॒स्मान् । अ॒भि॒ऽदास॑ति ॥ ५ ॥

इति पा रक्षणे—कन् । रक्षणीयस्य दुर्बलस्य पुरुषस्य । **अथो** । अपि च । **हन्ता** । नाशयिता । **रक्षसः** । राक्षसस्य ॥

४—यत् । यस्मात् । **अदः** । तत् । **देवाः** । विद्वांसः शूराः । **असुरान्** । सुरविरोधिनो दुष्टान् । **त्वया** । राज्ञा । **अग्रे** । पूर्वकाले । **निरकुर्वत** । निराकृतवन्तः । निवारितवन्तः । **ततः** । तस्मात् कारणात् । **त्वम्** । **अधि** । उपरि वर्त्तमानः श्रेष्ठः सन् । **ओषधे** । हे ओषधिवत् तापनाशक राजन् ! **अपामार्गः** । दोषाणाम् अपमार्जनशीलः संशोधकः । **अजायथाः** । उत्पन्नोऽभवः ॥

भाषार्थः--[हे राजन् !] (विभिन्दती) रोगों को छिन्न भिन्न करने वाली (शतशाखा) सैकड़ों शाखा वाली [औषधि के समान] (विभिन्दन्) शत्रुओं को छिन्न भिन्न करने वाला (नाम) प्रसिद्ध (ते) तेरा (पिता) पिता है। (त्वम्) तू भी (प्रत्यक्) लौटाकर (तम्) उसको (विभिन्धि) छिन्न भिन्न करदे, (यः) जो (अस्मान्) हमको (अभिदासति) सताता रहता है ॥ ५॥

भावार्थः--शूरवीर पिता का पुत्र भी अपने पिता के तुल्य शूरवीर होकर वैरियों का नाश करता है ॥ ५ ॥

असद् भूम्याः समभवत् तद्यामेति महद् व्यचः ।
तद् वै ततो विधूपायत् प्रत्यक् कर्त्तारमृच्छतु ॥ ६ ॥

असत् । भूम्याः । सम् । अभवत् । तत् । याम् । एति । महत् । व्यचः । तत् । वै । ततः । विऽधूपायत् । प्रत्यक् । कर्त्तारम् । ऋच्छतु ॥६॥

भाषार्थः—(तत्) वह (महत्) बड़ा (व्यचः) परस्पर मिला हुआ वा फैला हुआ (असत्) अनित्य जगत् (भूम्याः) भूमि से (समभवत्) उत्पन्न हुआ है, [जो जगत्] (याम्) जिस [भूमि] को (एति) चला जाता है। (ततः) उसी कारण से (तत्) वह [दुष्ट कर्म] (वै) अवश्य (प्रत्यक्) लौटकर (कर्त्तारम्) हिंसक को (विधूपायत् संताप देता हुआ [उसको ही] (ऋच्छतु) पहुँचे ॥ ६ ॥

५—**विभिन्दती** । भिदिर् विदारणे-शतृः । रोगविदारणशीला । **शतशाखा** । बहुशाखायुक्ता यथौषधिः । **विभिन्दन्** । शत्रूणां विभेदकः । विदारणशक्तिः । **नाम** । प्रसिद्धः । **ते** । तव । **पिता** । पालकः । जनकः । **प्रत्यक्** । प्रति गमनेन प्रतिनिवार्य । **वि भिन्धि** । विदारय । **त्वम्** । हे राजन् । **तम्** । अस्मदीयं शत्रुम् । **यः** । शत्रुः । **अस्मान्** । धार्मिकान् । **अभिदासति** । दसु उपक्षये । अभितो हिनस्ति ॥

६—**असत्** । सत् नित्यम् असत् अनित्यं नश्वरं कार्यरूपं जगत् । **भूम्याः** । भूमिसकाशात् । **समभवत्** । उदपद्यत । **तत्** । असद् यत् । **याम्** । भूमिम् । **एति** । प्राप्नोति, प्रतिनिवृत्य । **महत्** । विशालम् । **व्यचः** । व्यच व्याजीकरणे सम्बन्धे-असुन् । सम्बद्धं व्याप्तम् । **तत्** । शत्रुकृतं कर्म । **वै** । अवश्यम् । **ततः** ।

भावार्थः— जैसे ईश्वर नियम से कार्य रूप स्थूल पदार्थ भूमि आदि तत्त्वों से उत्पन्न होकर फिर छिन्न भिन्न होकर भूमि आदि अपने कारणों में लौट जाते हैं, ऐसे ही राजा के दण्ड से दुष्ट की दुष्टता उसी को ही लौटती और सताती है ॥ ६ ॥

बम्बई गवर्नमेन्ट पुस्तक में टिप्पणी है कि जर्मनी के भट्ट रोथ और ह्विटनी महाशय के मत में 'याम्' के स्थान पर 'द्याम्' होना चाहिये और ग्रिफ़िथ महाशय ने भी 'द्याम्' मानकर स्वर्ग [heaven] अनुवाद किया है, परन्तु पद पाठ और सायण भाष्य में 'याम्' है, और हमारे मत में भी 'याम्' ही शुद्ध है ॥

प्रत्यङ् हि संबभूविथ प्रतीचीनफलस्त्वम् ।
सर्वान् मच्छपथाँ अधि वरीयो यावया वधम् ॥ ७ ॥

प्रत्यङ् । हि । सम्ऽबभूविथ । प्रतीचीनऽफलः । त्वम् । सर्वान् ।
मत् । शपथान् । अधि । वरीयः । यवय । वधम् ॥ ७ ॥

भाषार्थः—[हे राजन् !] (त्वम्) तू (हि) ही (प्रत्यङ्) प्रत्यक्ष होकर (प्रतीचीनफलः) प्रतिकूल गति में रहने वालों का नाश करने वाला (संबभूविथ) हुआ है, [इस कारण] (मत्) मुझसे [शत्रु के] (सर्वान्) सब (शपथान्) शापों को और (वरीयः) अधिक विस्तीर्ण (वधम्) हथियार को (अधि) अधिकार पूर्वक (यवय) पृथक् कर ॥ ७ ॥

तस्मात् कारणात् । **त्रिधूपायत्** । धूप संतापे । **गुपूधूपविच्छि०** (पा० ३ । १ । २८) इति आयप्रत्ययः स्वार्थे, ततः शतृः । संतापयत् शत्रुम् । **प्रत्यक्** । प्रतिनिवृत्य । **कर्त्तारम्** । कृञ् हिंसायाम्-तृच् । हिंसकम् । **ऋच्छतु** । गच्छतु ॥

७—प्रत्यङ् । प्रति+अञ्चु-क्विन् । प्रत्यञ्चनः । प्रतिगतः । अभिमुखः सन् । **हि** । एव । **संबभूविथ** । सम्यग् विद्यमानो बभूविथ । **प्रतीचीनफलः** । प्रत्यच्—खप्रत्ययः, ञिफला विशरणे-अच् । प्रत्यक् प्रतिगमनं तत्र भवानां फलं विशरणं नाशनं यस्मात् स तथाभूतः । प्रतिगतिभवानां शत्रूणां विदारकः । **त्वम्** । राजन् । **सर्वान्** । **मत्** । मत्तः । **शपथान्** । शापान् । शत्रुकृतानि

भावार्थः—पराक्रमी विजयी राजा शत्रुओं का नाश करके प्रजा को सुख पहुंचावे ॥ ७ ॥

शतेन मा परि पाहि सहस्रेणाभि रक्ष मा ।
इन्द्रस्ते वीरुधां पत उग्र ओज्मानमा दधत् ॥ ८ ॥

शतेन । मा । परि । पाहि । सहस्रेण । अभि । रक्ष । मा ।
इन्द्रः । ते । वीरुधाम् । पते । उग्रः । ओज्मानम् । आ । दधत् ॥ ८ ॥

भाषार्थः—[हे राजन् !] (शतेन) सौ [उपाय] से (मा) मेरा (परि पाहि) सब प्रकार पालन कर, (सहस्रेण) सहस्र साधन से (मा) मेरी (अभि) सब ओर से (रक्ष) रक्षा कर । (वीरुधां पते) हे विविध प्रकार बढ़ने वाली प्रजाओं के पालक ! (उग्रः) महाबली (इन्द्रः) परमेश्वर (ते) तुझको (ओज्मानम्) पराक्रम (आ) यथावत् (दधत्) देता हुआ वर्तमान है ॥८॥

भावार्थः—राजा अपनी प्रजा की सदा रक्षा करे वह पुरुषार्थी पुरुष परमेश्वर की न्याय व्यवस्था से सब बल पाता रहता है ॥ ८ ॥

सूक्तम् २० ॥

१-९ । ब्रह्म देवता अनुष्टुप् छन्दः ॥

ब्रह्मोपासनोपदेशः—ब्रह्म की उपासना का उपदेश ॥

आ पश्यति प्रति पश्यति परा पश्यति पश्यति ।
दिवमन्तरिक्षमाद्भूमिं सर्वं तद् देवि पश्यति ॥ १ ॥

दुर्वाक्यानि । **अधि** । अधिकृत्य । **वरीयः** । उरु—ईयसुन् । उरुतरं विस्तीर्णतरम् । **यवय** । पृथक् कुरु । **वधम्** । हननसाधनम् । आयुधम् ॥

८—**शतेन** । शतसंख्याकेन रक्षणोपायेन । **मा** । माम् । **परि** । परितः । **पाहि** । रक्ष । **सहस्रेण** । सहस्रसंख्याकेन साधनेन । **अभिरक्ष** । सर्वतः पालय । **इन्द्रः** । परमेश्वरः । **ते** । तुभ्यम् । **वीरुधाम्** । विरोहणशीलानां लतारूपाणां वा प्रजानाम् । **पते** । अधिपते । **उग्रः** । उद्गूर्णबलः । महाबली । **ओज्मानम्** । **सर्वधातुभ्यो मनिन्** (उ० ४।१४५) इति ओज बले[1]—मनिन् । बलम् । पराक्रमम् । **आ** । समन्तात् । **दधत्** । डुधाञ् धारणपोषणयोः—शतृ । ददन् प्रयच्छन् वर्तते ॥

---

१. बाहुलकात् ओज बले धातु की कल्पना की है ॥ सम्पा० ॥

आ । पश्यति । प्रति । पश्यति । परा । पश्यति । पश्यति । दिवम् । अन्तरिक्षम् । आत् । भूमिम् । सर्वम् । तत् । देवि । पश्यति ॥ १ ॥

भाषार्थः—(देवि) हे दिव्यशक्ति परमात्मन् ! तू, (तत्) विस्तार करने वाला वा विस्तीर्ण ब्रह्म आप (आ) अभिमुख (पश्यति) देखता है, (प्रति) पीछे से (पश्यति) देखता है, (परा) दूर से (पश्यति) देखता है, और (पश्यति) सामान्यतः देखता है। (दिवम्) सूर्य लोक, (अन्तरिक्षम्) मध्यलोक (आत्) और भी (भूमिम्) भूमि अर्थात् (सर्वम्) सबको (पश्यति) देखता है ॥ १ ॥

भावार्थः—वह ब्रह्म सब संसार को एक रस देखता रहता है इसलिए सब मनुष्य उसकी उपासना करके दुष्कर्मों से बचकर सत्कर्मों में प्रवृत्त रहें ॥ १ ॥

तिस्रो दिवस्तिस्रः पृथिवीः षट् चेमाः प्रदिशः पृथक् ।
त्वयाहं सर्वा भूतानि पश्यानि देव्योषधे ॥ २ ॥

तिस्रः । दिवः । तिस्रः । पृथिवीः । षट् । च । इमाः । प्रऽदिशः । पृथक् । त्वया । अहम् । सर्वा । भूतानि । पश्यानि । देवि । ओषधे ॥ २ ॥

भाषार्थः—(देवि) हे दिव्यशक्ति, (ओषधे) तापनाशक परमात्मन् ! (त्वया) तेरे सहारे से (अहम्) मैं (तिस्रः) तीनों (दिवः) सूर्य लोकों,

---

१—**आ** । अभिमुखम् । **पश्यति** । अवलोकयति । **प्रति** । प्रतिमुखम् । **परा** । दूरतः । **पश्यति** । अविशेषेण साक्षात्करोति । **दिवम्** । सूर्यलोकम् । **अन्तरिक्षम्** । मध्यलोकम् । **आत्** । अपि च । **भूमिम्** । पृथिवीम् । **सर्वम्** । सकलम् । **तत्** । **त्यजितनियजिभ्यो डित्** (उ० १ । १३२) इति तनु विस्तारे श्रद्धोपकरणयोः च इत्यनेन अदिः,स च डित् । विस्तारकं विस्तीर्णं वा,ब्रह्मनामैतत् । **देवि** । हे दिव्यशक्ते ! त्वं तद् ब्रह्म भवत् । **पश्यति** ॥

२—**तिस्रः** । उत्तममध्यमाधमरूपेण त्रिसंख्याकाः । **दिवः** । द्युलोकान् । **पृथिवीः** । भूलोकान् । **षट्** । प्राच्याद्या ऊर्ध्वाधोदिग्भ्यां सह षट्संख्याकाः ।

(तिस्रः) तीनों (पृथिवीः) भूमियों (च) और (इमाः) इन (षट्) छह (प्रदिशः) फैली हुई दिशाओं और (सर्वा) सब (भूतानि) सृष्ट पदार्थों को (पृथक्) नाना प्रकार से (पश्यानि) देखूं ॥ २ ॥

भावार्थः—मनुष्य परमेश्वर की महिमा के साथ तीन उत्तम, मध्यम और अधम प्रकार से संसार के सब पदार्थों को साक्षात् करके विज्ञान पूर्वक उनसे उपकार लेवे ॥ २ ॥

दिव्यस्य सुपर्णस्य तस्य हासि कनीनिका ।

सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधूरिव ॥ ३ ॥

दिव्यस्य । सुऽपर्णस्य । तस्य । ह । असि । कनीनिका । सा । भूमिम् । आ । रुरोहिथ । वह्यम् । श्रान्ता । वधूःऽइव ॥ ३ ॥

भाषार्थः—(तस्य) उस (दिव्यस्य) दिव्य गुण वाले (सुपर्णस्य) यथावत् पालनीय जीव की, तू (ह) अवश्य (कनीनिका) कमनीया देवी, अथवा नेत्र तारा समान (असि) है । (सा = सा त्वम्) उस तूने (भूमिम्) हृदय भूमि को (आ रुरोहिथ) प्राप्त किया है, (इव) जैसे (श्रान्ता) थकी हुई, शान्त स्वभाव, वा जितेन्द्रिय (वधूः) स्त्री (वह्यम्) अपने पाने योग्य पदार्थ को [प्राप्त करती है] ॥ ३ ॥

च । **इमाः** । परिदृश्यमानाः । **प्रदिशः** । प्रकृष्टाः दिशाः । **पृथक्** । नानारूपेण । **त्वया** । ब्रह्मणा सहायेन । **अहम्** । उपासकः । **सर्वा** । सर्वाणि । **भूतानि** । भूतजातानि । **पश्यानि** । साक्षात्करवाणि । **देवि** । हे दिव्यशक्ते । **ओषधे** । हे अन्नाद्योषधिवत् तापनाशक परमात्मन् ॥

३—दिव्यस्य । दिव्यस्वभावस्य । **सुपर्णस्य** । पॄ पालनपूरणयोः—नः । सुष्ठु यथावत् पालनीयस्य जीवस्य । **तस्य** । प्रसिद्धस्य । **ह** । प्रसिद्धौ । **असि** । **कनीनिका** । कनी दीप्तिकान्तिगतिषु—ईन्, कन्, टाप्, अत इत्वम् । कमनीया । यद्वा, चक्षुस्तारावत् प्रदर्शिका । **सा** । सा त्वं देवी । **भूमिम्** । योगिनो हृदयभूमिम् । **आ रुरोहिथ** । आरूढवती, प्राप्तवती । **वह्यम्** । अघ्न्यादयश्च (उ० ४ । ११२) इति वह—यक् । यद्वा । **वह्यं करणम्** (पा० ३ । १ । १०२) इति वह—यत् । प्रापणीयं पदार्थं स्थानं वा । **श्रान्ता** । श्रमु तपसि खेदे च—क्तः । अध्वश्रमयुक्ता । श्रान्ता । जितेन्द्रिया । **वधूः** । **वहेर्धश्च** (उ० १ । ८३) इति वह

भावार्थः—जैसे जैसे योगी समाधि लगाकर परमात्मा की महिमा देखता है वैसे वैसे ही परमात्मा उसके हृदय में दृढ़ भूमि होता है, जैसे जितेन्द्रिय स्त्री वा पुरुष ठिकाने पर पहुँचकर ठहर जाता है ॥ ३ ॥

तां मे सहस्राक्षो देवो दक्षिणे हस्त आ दधत् ।

तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः ॥ ४ ॥

ताम् । मे । सहस्रऽअक्षः । देवः । दक्षिणे । हस्ते । आ । दधत् ।

तया । अहम् । सर्वम् । पश्यामि । यः । च । शूद्रः । उत । आर्यः ॥ ४ ॥

भाषार्थः—(सहस्राक्षः) असंख्य दर्शन शक्ति वाला अथवा सहस्रों व्यवहारों वाला (देवः) प्रकाश स्वरूप परमात्मा (दक्षिणे) प्रवृद्ध (हस्ते) प्रकाश के निमित्त (ताम्) उपकारशक्ति (मे) मुझको (आ) सब ओर से (दधत्) दान कर रहा है, (तया) उस [उपकारशक्ति] से (अहम्) मैं (सर्वम्) सबको (पश्यामि) देखता हूँ, (यः च) जो कोई (शूद्रः) शोचनीय शूद्र अर्थात् मूर्ख (उत) अथवा (आर्यः) प्राप्त करने योग्य आर्य अर्थात् विद्वान् [ब्राह्मण, क्षत्रिय वा वैश्य] हो ॥ ४ ॥

प्रापणे—ऊप्रत्ययः, हस्य धः । वहति सुखानि । यद्वा । बन्ध—ऊः, नलोपः, बध्नाति प्रेम्णा या । नारी, स्त्री । **इव** । यथा ॥

४—**ताम्** । तनु विस्तारे,श्रद्धोपकरणयोः च-डः। टाप् । विस्तृतिम् । उपकृतिम् । **मे** । मह्यम् । **सहस्राक्षः** । अ० ४ । १६ । ४ । बहुदर्शकः । बहुव्यवहारवान् । असंख्यदर्शनः । **देवः** । प्रकाशदानादिगुणयुक्तः परमेश्वरः । **दक्षिणे** । अ० ४ । ११ । ४ । समर्थे । प्रवृद्धे । **हस्ते** । **हसिमृग्रिण्०** (उ० ३ । ८६) इति हसे[१] विकाशे—तन् । विकाशे । प्रकाशे । निमित्ते । **आ** । समन्तात् । **दधत्** । ददद् वर्तते । **तया** । विस्तृत्या । **अहम्** । उपासकः । **सर्वम्** । शूद्रमार्यश्च । **पश्यामि** । साक्षात्करोमि निर्णयामि । **यः** । **च** । पक्षान्तरे । **शूद्रः** । **शुचेर्दश्च** (उ० २ ।

---

१. धातुपाठादि में 'हसे हसने' धातु पठित है । हास में मुख का विकास ही होता है यह मानकर ऐसा अर्थ दिखाया है । निरुक्त में 'हस्तो हन्तेः प्राशुर्हनने' (निरु० १।७) ऐसा कहकर हस्त शब्द 'हन हिंसागत्योः' से सिद्ध किया है, क्योंकि निरुक्त अर्थ को प्रधान मानकर निर्वचन करता है, इस विषय में निरुक्त २।१ के "अर्थनित्यः परीक्षेत । केनचिद्वृत्तिसामान्येन" सिद्धान्त द्रष्टव्य है । इस प्रकार यास्काचार्य के इस महत्त्वपूर्ण बात को न समझकर जिन काशीनाथ जी राजवाड़े आदि ने यास्क के निर्वचनों को मूर्खतापूर्ण कहा है वह सब व्यर्थ प्रलाप है ॥ सम्पा० ॥

भावार्थः—सर्व व्यवहार कुशल, सर्वद्रष्टा, सर्वनियन्ता जगदीश्वर की दी हुई उपकारशक्ति द्वारा मनुष्य सब मनुष्यों और पदार्थों का यथावत् विवेक करके संसार की उन्नति करें ॥ ४ ॥

आविष्कृणुष्व रूपाणि मात्मानमपं गूहथाः ।
अथो सहस्रचक्षो त्वं प्रति पश्याः किमीदिनः ॥ ५ ॥

आविः । कृणुष्व । रूपाणि । मा । आत्मानम् । अप । गूहथाः । अथो इति । सहस्रचक्षो इति सहस्रऽचक्षो । त्वम् । प्रति । पश्याः । किमीदिनः ॥ ५ ॥

भाषार्थः—(रूपाणि) [पदार्थों के] रूपों अर्थात् बाहिरी आकार को (आविष्कृणुष्व) प्रकट कर दे, (आत्मानम्) [वस्तुओं के] आत्मा अर्थात् भीतरी स्वभाव को (मा अप गूहथाः) गुप्त मत रख (अथो) और भी (सहस्रचक्षो) हे असंख्य दर्शन शक्ति वाले परमात्मन् ! (त्वम्) तू (किमीदिनः) अब क्या, यह क्या हो रहा है, ऐसे गुप्त कर्म करने वाले को लुतरे लोगों को (प्रति) प्रत्यक्ष (पश्याः) देख ले ॥ ५ ॥

भावार्थः—मनुष्य पदार्थों के आकार और गुण को स्थूल और सूक्ष्म रीति से पहचान कर दोषों से बचे और दूसरों को बचावें ॥ ५ ॥

---

१९) इति शुच शोके—रक्, चस्य दः, धातोर्दीर्घश्च । शोचनीयः मूर्खः । उत । विकल्पे । **आर्यः** । **ऋहलोर्ण्यत्** (पा० ३ । १ । १२४) इति ऋ गतौ–ण्यत् । अर्त्तुं प्राप्तुं योग्यः । । पूज्यः, श्रेष्ठः, विद्वान् । ब्राह्मणः । क्षत्रियो वैश्यो वा । महाकुलकुलीनार्यसभ्यसज्जनसाधवः–इत्यमरः, २ । ७ । ३ ॥

५—**आविष्कृणुष्व** । प्रकटी कुरु । प्रकाशय । **रूपाणि** । **खष्पशिल्पशष्प०** (उ० ३ । २८) इति रु शब्दे–पप्रत्ययः, दीर्घश्च । यद्वा, रूप रूपक्रियायाम् करणे वा–अच् । पदार्थानां बाह्याकारान् । **मा अप गूहथाः** । गुहू संवरणे । संवृतम् । आच्छादितं मा कार्षीः । **आत्मानम्** । अ० १ । १८ । ३ । पदार्थानां सूक्ष्मस्वभावं सारं तत्त्वं वा । **अथो** । अपि च । **सहस्रचक्षो** । **भृमृशीङ्**० (उ० १ । ७)इति चक्षिङ् व्यक्तायां वाचि दर्शने च–उः । हे बहुदर्शनशक्ते परमात्मन् । **त्वम्** । **प्रति** । प्रत्यक्षम् । **पश्याः** । दृशेर्लेटि आडागमः । अवलोकय । **किमीदिनः** । अ० १ । ७ । १ । किमिदानीं वर्तते किमिदं वर्तते–इत्येवमन्वेषमाणान् पिशुनान् राक्षसान् ॥

दुर्शयं मा यातुधानान् दुर्शयं यातुधान्य॑ः ।
पिशाचान्त्सर्वान् दर्शयेति त्वा रंभ ओषधे ॥ ६ ॥

दुर्शयं । मा । यातुऽधानान् । दुर्शयं । यातुऽधान्यः । पिशाचान् ।
सर्वान् । दुर्शय । इति । त्वा । आ । रभे । ओषधे ॥ ६ ॥

भाषार्थः—[हे परमात्मन् !] (यातुधानान्) यातना देने वाले दोषों को (मा) मुझे (दर्शय) दिखा, (यातुधान्यः = ०-नीः) महापीडा देने वाली कुवासनाओं को (दर्शय) दिखा। (सर्वान्) सब (पिशाचान्) मांस खाने वाले विघ्नों को (दर्शय) दिखा, (ओषधे) हे तापनाशक परमेश्वर ! (इति) इसके लिये (त्वा) तेरा (आरभे) मैं सहारा लेता हूं ॥ ६ ॥

भावार्थः—मनुष्य की बाहिरी कुचेष्टायें और भीतरी कुवासनायें उसकी उन्नति के महाविघ्न हैं। इसलिये वह विवेक पूर्वक उनका संशोधन करे ॥ ६ ॥

कुश्यपस्य चक्षुरसि शुन्याश्चं चतुरक्ष्याः ।
वीध्रे सूर्यमिव सर्पन्तं मा पिशाचं तिरस्करः ॥ ७ ॥

कुश्यपस्य । चक्षुः । असि । शुन्याः । च । चतुःऽअक्ष्याः ।
वीध्रे । सूर्यम्ऽइव । सर्पन्तम् । मा । पिशाचम् । तिरः । करः ॥ ७ ॥

भाषार्थः—[हे परमात्मन् !] तू (कश्यपस्य) रस पीने वाले सूर्य का (च) और (चतुरक्ष्याः) पूर्वादि चार प्रकार से व्याप्ति वाली (शुन्याः) बढ़ी हुई दिशा का (चक्षुः) देखने वाला ब्रह्म (असि) है। (पिशाचम्) मांस

६—**दर्शय** । आविष्कारय, प्रकाशय । **मा** । माम् । **यातुधानान्** । पीडाप्रदान् दोषान् । **यातुधान्यः** । यातुधानीः । पीडाप्रदायिकाः कुवासनाः । **सर्वान्** । **पिशाचान्** । अ० १ । १६ । ३ । पिशितस्य मांसस्य भक्षकान् महादुःखदायिनो विघ्नान् । **इति** । एवमर्थम् । **त्वा** । त्वां परमात्मानम् । **आरभे** । आलभे । स्पृशामि । धारयामि ॥

७—**कश्यपस्य** । अ० २ । ३७ । ७ । कश्यं जलरसं पिबतीति, तस्य, सूर्यस्य । **चक्षुः** । दर्शकं ब्रह्म । **असि** । **शुन्याः** । **श्वनुक्षन्पूषन्०** (उ० १ ।

खाने वाले [पीडादायक] विघ्न को (मा तिरस्कर) गुप्त मत रख [प्रकाश करदे] (वीध्रे) विशेष चमकने के समय अर्थात् मध्याह्न में (सर्पन्तम्) चलते हुये (सूर्यमिव) सूर्य को जैसे [नहीं छिपा सकते] ॥ ७ ॥

भावार्थः—परमात्मा इस सब विशाल संसार को सर्वथा देखता है, और सबके दोषों को इस प्रकार जानता है, जैसे दोपहर के सूर्य को। इससे सब मनुष्य दोषों को त्याग कर सदा सुख से रहें ॥ ७ ॥

उदग्रभं परिपाणाद् यातुधानं किमीदिनम्।
तेनाहं सर्वं पश्याम्युत शूद्रमुतार्यम् ॥ ८ ॥

उत् । अग्रभम् । परिऽपानात् । यातुऽधानम् । किमीदिनम् ।
तेन । अहम् । सर्वम् । पश्यामि । उत । शूद्रम् । उत । आर्यम् ॥८॥

भाषार्थः—(परिपाणात्) रक्षास्थान [अपने हृदय देश] से (यातुधानम्) पीड़ा देने हारे (किमीदिनम्) पिशुन रूप अपने दोष को (उत अग्रभम्) मैंने पकड़ लिया है। (तेन) उसी से (अहम्) मैं (सर्वम्) सबको (पश्यामि) देखता हूं, (उत) जो कोई (शूद्रम्) शोचनीय शूद्र अर्थात् मूर्ख, (उत) अथवा (आर्यम्) प्राप्त करने योग्य आर्य अर्थात् विद्वान् [ब्राह्मण क्षत्रिय वा वैश्य] हो ॥ ८ ॥

---

१५९) इति टुओश्वि गतिवृद्ध्योः—कनिन्, नान्तत्वात् ङीप्। व्याप्तायाः प्रवृद्धायाः दिशायाः। **चतुरक्ष्याः**। चतुर्+अक्षू व्याप्तौ—इन्। पूर्वादि दिग्रूपेण चतुर्विधानि अक्षीणि व्यापनानि यस्याः सा चतुरक्षी तस्याः। चतुर्विधव्यापनशीलायाः। **वीध्रे**। **वाविन्धेः** (उ० २।२६) इति वि+ञिइन्धी दीप्तौ—क्रन्। विशेषदीप्तिकाले। **मध्याह्ने**। **सूर्यमिव**। **सर्पन्तम्**। गच्छन्तम्। **पिशाचम्**। पिशितभक्षकं विघ्नम्। **मा तिरस्करः**। करोतेर्माङि लुङि। **कृमृदृरुहिभ्यश्छन्दसि** (पा० ३।१।५९) इति च्लेः अङ् आदेशः। अन्तर्हितं मा कार्षीः। सर्वथा प्रकाशय—इत्यर्थः॥

८—**उत् अग्रभम्**। उत्कर्षेण अग्रहं गृहीतवानस्मि वशीकृतवानस्मि। **परिपाणात्**। परिरक्षणस्थानात्। हृदयदेशात्। **यातुधानम्**। यातनाप्रदम्।

भावार्थः—जितेन्द्रिय पुरुष आत्मदोष के निवारण और बुरे भले के विवेक से शिवसंकल्पी होकर अविद्या का नाश और विद्या का प्रकाश करके सुखी होता है ॥ ८ ॥

इस मन्त्र के उत्तरार्ध के लिये मन्त्र ४ देखो ॥

यो अन्तरिक्षेण पतति दिवं यश्चातिसर्पति ।
भूमिं यो मन्यते नाथं तं पिशाचं प्र दर्शय ॥ ९ ॥

यः । अन्तरिक्षेण । पतति । दिवम् । यः । च । अतिऽसर्पति ।
भूमिम् । यः । मन्यते । नाथम् । तम् । पिशाचम् । प्र । दर्शय ॥९॥

भाषार्थः—(यः) जो [उपद्रवी] (अन्तरिक्षेण) मध्यवर्ती हृदय अवकाश द्वारा (पतति) नीचे गिरता है, (च) और (यः) जो (दिवम्) व्यवहार वा प्रकाश को (अतिसर्पति) लाँघकर रेंगता है, और (यः) जो (भूमिम्) अपनी सत्ता को [अहंकार से] (नाथम्) ईश्वर (मन्यते) मानता है, (तम्) उस (पिशाचम्) मांसभक्षक, दुःखदायक, आत्मा को (प्रदर्शय) तू दिखा दे ॥ ९ ॥

भावार्थः—जो मनुष्य मनोविकार से वेद मर्यादा छोड़ कुकर्मी बन जाता है, वह मनुष्य ईश्वर भक्ति से अपने अविद्यादि दोषों को छोड़कर सुखी होवे ॥ ९ ॥

इति चतुर्थोऽनुवाकः ॥

किमीदिनम् । म० ५ । पिशुनरूपं स्वदोषम् । **तेन** । तेन कारणेन दोषनिग्रहेण । अन्यद् व्याख्यातं म० ४ ॥

९—**यः** । आत्मदोषः । उपद्रवी जनो वा । **अन्तरिक्षेण** । मध्यवर्त्तिना हृदयावकाशेन, तत्सहायेन । **पतति** । अधोगच्छति । **दिवम्** । इगुपधज्ञा० (पा० ३ । १ । १३५) इति दिवु क्रीडाविजिगीषाव्यवहारादिषु—कप्रत्ययः । व्यवहारम् । प्रकाशम् । **यः** । **च** । **अतिसर्पति** । अतीत्य, उल्लङ्घ्य गच्छति । **भूमिम्** । अ० १ । ११ । २ । भू सत्तायाम्—मिः । सत्ताम् । **यः** । **मन्यते** । अहंकारेण जानाति । **नाथम्** । नाथृ याच्ञोपतापैश्वर्याशीःषु—अच् । प्रभुम् । ईश्वरम् । **तम्** । **पिशाचम्** । पिशिताशनम् । दुःखदायकमात्मानम् । **प्रदर्शय** । अवगमय ॥

अथ पञ्चमोऽनुवाकः ॥

सूक्तम् २१ ॥

१-७ ॥ गावो देवताः । १, ५-७ त्रिष्टुप् २-४ जगती ॥

विद्यागुणोपदेशः—विद्या के गुणों का उपदेश ॥

आ गावो॑ अग्मन्नु॒त भ॒द्रम॑क्र॒न्त्सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे ।
प्र॒जाव॑तीः पुरु॒रूपा॑ इ॒ह स्यु॒रिन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः ॥१॥

आ । गाव॑ः । अ॒ग्म॒न् । उ॒त । भ॒द्रम् । अ॒क्र॒न् । सीद॑न्तु । गो॒ऽस्थे । र॒णय॑न्तु । अ॒स्मे इति॑ । प्र॒जाऽव॑तीः । पु॒रु॒ऽरूपाः॑ । इ॒ह । स्यु॒ः । इन्द्रा॑य । पू॒र्वीः । उ॒षस॑ः । दुहा॑नाः ॥ १ ॥

भाषार्थः—(गावः) पाने वा स्तुति योग्य विद्यायें (आ अग्मन्) प्राप्त हुई हैं, (उत) और उन्होंने (भद्रम्) कल्याण (अक्रन्) किया है। वे (गोष्ठे) हमारी गोठ अर्थात् विद्यासमाज में (सीदन्तु) प्राप्त होवें और (अस्मे) हमें (रणयन्तु= रमयन्तु) सुख देवें। वे (इह) यहां समाज में (इन्द्राय) परम ऐश्वर्य वाले पुरुष के लिये (पूर्वीः) बहुत (उषसः) प्रभात वेलाओं तक (प्रजावतीः) उत्तम मनुष्यों वाली, (पुरुरूपाः) अनेक लक्षण वाली होकर (दुहानाः) [कामनाओं को] पूर्ण करती हुईं (स्युः) रहें ॥ १ ॥

१—**गावः** । **गमेर्डोः** (उ० २ । ६७) इति गम्लृ गतौ गा स्तुतौ वा—डोः । गौरिति वाङ् नाम—निघ० १ । ११ । प्रापणीया गानयोग्या वा वाचः । विद्याः । **आ अग्मन्** । **मन्त्रे घसह्वर०** (पा० २ । ४ । ८०) इति लुङि च्लेर्लुक् । अगमन् आगताः प्राप्ता अभवन् । **उत** । अपि च । **भद्रम्** । कल्याणम् । **अक्रन्** । पूर्ववत् लुङ् । अकार्षुः । **सीदन्तु** । षद्लृ गतौ । ताः प्राप्नुवन्तु । **गोष्ठे** । गावो वाचस्तिष्ठन्ति यत्र । विद्यासमाजे । **रणयन्तु** । रणाय रमणीयाय संग्रामाय—निरु० १० । ४७ । इति निर्देशात् मस्य णः । रमयन्तु । सुखयन्तु । **अस्मे** । विभक्तेः शे इत्यादेशः । अस्मान् । **प्रजावतीः** । प्रजावत्यः । प्रशस्तजनवत्यः । **पुरुरूपाः** । बहुरूपाः । नानाविधाः । **इह** । अस्मिन् गोष्ठे । **स्युः** । भवेयुः । **इन्द्राय** । परमैश्वर्ययुक्ताय

भावार्थः—विद्यायें परमेश्वर से आकर संसार को महा उपकारी हुई हैं। मनुष्य ईश्वर विद्या, शिल्प विद्या आदि अनेक विद्याओं को प्राप्त करें और 'इन्द्र' महापुरुषार्थी प्रधान पुरुष के सहायक होकर वहुत काल तक सुख भोगें ॥ १ ॥

यह सूक्त कुछ भेद से ऋग्वेद, म० ६ सू० २८ म० १—७ में है। वहाँ सूक्त के भरद्वाज वार्हस्पत्य ऋषि हैं ॥

इन्द्रो यज्वने गृणते च शिक्षत उपेद् ददाति न स्वं मुषायति। भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम्॥२॥

इन्द्रः। यज्वने। गृणते। च। शिक्षते। उप। इत्। ददाति। न। स्वम्। मुषायति। भूयःऽभूयः। रयिम्। इत्। अस्य। वर्धयन्। अभिन्ने। खिल्ये। नि। दधाति। देवऽयुम्॥ २॥

भाषार्थः—(इन्द्रः) बड़े ऐश्वर्य वाला राजा (यज्वने) यज्ञ करने वाले (च) और (गृणते) उपदेशक पुरुष को (शिक्षते) शिक्षा देता है, और (उप = उपेत्य) आदर करके (स्वम्) धन (ददाति) देता है, और (न) न (मुषायति) चुराता है, और (देवयुम्) दिव्य गुण वा विद्वानों के प्राप्त कराने

पुरुषाय। **पूर्वीः**। पुरु बहुनाम—निघ० ३। १। ततो ङीष्। पूर्वीः। बह्वीः। **उषसः। कालाध्वनोरत्यन्तसंयोगे** (पा० २। ३। ५) इति द्वितीया। उषाः—कालोपलक्षितान् दिवसान्। सर्वकालम्। **दुहानाः**। दुह प्रपूरणे—शानच्। कामान् प्रपूरयन्त्यः॥

२—**इन्द्रः**। राजा। **यज्वने। सुयजोर्ङ्वनिप्** (पा० ३। २। १०३) इति यज देवपूजासङ्गतिकरणदानेषु—ङ्वनिप्। यज्ञकर्त्रे। **गृणते**। गॄ शब्दे—शतृ। उपदेशकाय जनाय। **च। शिक्षते**। उपदिशति। **उप**। उपेत्य। **इत्**। अवधारणे। **ददाति**। सुपात्राय प्रयच्छति। **न**। निषेधे। **स्वम्**। धनम्। **मुषायति। छन्दसि शायजपि** (पा० ३। १। ८४) इति मुष स्तेये—श्नः शायच्। मुष्णाति चोरयति। **भूयोभूयः**। बहुतरम्। **रयिम्**। धनम्। **इत्। अस्य**। संसा-

वाले (रयिम्) धन को (भूयोभूयः) अधिक (इत्) ही (वर्धयन्) बढ़ाता हुआ (इत् अस्य) इस संसार के (अभिन्ने) अटूट (खिल्ये) कण कण प्राप्ति के लाभ में (निदधाति) निधि रूप से रखता है ॥ २ ॥

भावार्थः—प्रतापी राजा स्वार्थ छोड़कर विद्यादानादि में धन को व्यय करता है, विद्याबल से धन बढ़ाता हुआ संसार को बहुत लाभ पहुंचाता है ॥ २ ॥

न ता न॑शन्ति न द॑भाति तस्क॑रो नासा॑मामित्रो व्यथिरा द॑धर्षति । दे॒वांश्च॒ याभि॒र्यज॑ते॒ दद॑ाति च॒ ज्योगित् ताभिः सचते गोप॑तिः स॒ह ॥ ३ ॥

न । ताः । न॒श॒न्ति॒ । न । द॒भा॒ति॒ । तस्क॑रः । न । आ॒सा॒म् । आ॒मि॒त्रः । व्य॒थिः । आ । द॒ध॒र्ष॒ति॒ । दे॒वान् । च॒ । याभिः॑ । यज॑ते । दद॑ाति । च॒ । ज्योक् । इत् । ताभिः॑ । स॒च॒ते॒ । गोऽप॑तिः । स॒ह ॥ ३ ॥

भाषार्थः—(ताः) वे [विद्यायें] (न) नहीं (नशन्ति) नष्ट होती हैं, (न) न [उन्हें] (तस्करः) चोर (दभाति) ठगता है, (न) न (आमित्रः) पीडा देने वाला (व्यथिः) व्यथाकारी शत्रु (आसाम्) इनकी (आ दधर्षति) हँसी उड़ाता है । (च) और (गोपतिः) विद्याओं का स्वामी, वाचस्पति (याभिः)

रस्य । **वर्धयन्** । समर्धयन् । **अभिन्ने** । अच्छिन्ने । निरुपद्रवे । **खिल्ये** । खिल[1] कणश आदाने—कः । ततो यत् । कणश आदानस्थाने, अप्रहते देशे भवे सुरक्षिते लाभे । **निदधाति** । निधिरूपेण स्थापयति । **देवयुम्** । **मृगय्वादयश्च** (उ० १ । ३७) इति देव+या प्रापणे—कुः । देवानां दिव्यगुणानां विदुषां वा प्रापकम् ॥

३—न । नहि । **ताः** । गावः । विद्याः । **नशन्ति** । णश अदर्शने, छान्दसो विकरणस्य लुक् । नश्यन्ति । **दभाति** । दम्भु दम्भने=वञ्चने, लेटि आडागमः । दम्भयति दभ्नोति वञ्चति ताः । **तस्करः** । अ० ४।३।२ । उपतापकरः । चोरः । **आसाम्** । गवाम् । विद्यानाम् । **आमित्रः** । **अमेर्द्विषति चित्** (उ० ४ । १७४) इति आङ्+अम रोगे—इत्रः । आ समन्ताद् आमयति पीडयतीति सः । शत्रुः । **व्यथिः** । सर्व-

---

१. यह धातु धातुपाठादि में कहीं पठित नहीं है । वाचस्पत्यम् कोष पठित है ॥ सम्पा० ॥

जिन [विद्याओं] से (देवान्) दिव्य गुणों को (यजते) पूजता (च) और (ददाति) देता है, (ताभिःसह) उन [विद्याओं] के साथ (ज्योक् इत्) बहुत ही काल तक वह (सचते) मिला रहता है ॥३॥

भावार्थः—विद्या अक्षय कोश है। जो मनुष्य विद्याओं को सत्कारपूर्वक ग्रहण करके संसार में फैलाता है, वह यशस्वी होकर सदा आनन्द भोगता है ॥३॥

न ता अर्वा रेणुकंकाटोऽश्नुते न संस्कृतत्रमुप यन्ति ता अभि।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः॥४॥

न। ताः। अर्वा। रेणुऽकंकाटः[1]। अश्नुते। न। संस्कृतत्रम्। उप। यन्ति। ताः। अभि। उरुऽगायम्। अभयम्। तस्य। ताः। अनु। गावः। मर्तस्य। वि। चरन्ति। यज्वनः॥ ४॥

भाषार्थः—(न) न तो (अर्वा) घोड़े के समान विषयासक्त,[2] अथवा हिंसक पुरुष, और (न) न (रेणुककाटः) धूलि के कूये के समान गिर जाने वाला मनुष्य (ताः) उन [विद्याओं] को (अश्नुते) पाता है। (ताः) वे विद्यायें (संस्कृतत्रम्) संस्कृत [शुद्ध] विद्याओं के रक्षक जन को (अभि) सब ओर से (उप यन्ति) आती हैं। (ताः गावः) वे विद्यायें (तस्य) उस (यज्वनः)

धातुभ्य इन् (उ० ४। ११८) इति व्यथ भयसंचलनयोः—इन्। व्यथाजनको दुष्टः **आ दधर्षति**। धृष प्रसहने। आधर्षति आधर्षणं प्रसहनं तिरस्कारं करोति। **देवान्**। दिव्यगुणान्। **च**। **याभिः**। गोभिः। विद्याभिः। **यजते**। पूजयति। **ददाति**। प्रयच्छति। **च**। **ज्योक्**। निरन्तरम्। **इत्**। **ताभिः**। गोभिः। विद्याभिः। **सचते**। समवैति। **गोपतिः**। गवां विद्यानां स्वामी। वाचस्पतिः। **सह**। सहितः॥

४—**न**। निषेधे। **ताः**। गाः। वाचः। विद्याः। **अर्वा**। **अवद्यावमाधमार्वरेफाः कुत्सिते** (उ०५।५४) इति ऋ गतौ हिंसायां च-वन्। अर्वा, अश्वनाम। निघ० १। १४। अर्वेरणवान्-निरु० १०। ३१। निकृष्टप्रतिकृष्टार्वरेफ० इत्यमरः-३। १। ५४। ऋच्छति मार्गम्, ऋणोत्यन्यान्। अश्व इव विषयासक्तो हिंसको

१. यहाँ रेणुककाटः के अर्थ में सायणाचार्य एवं भाष्यकार के अर्थों में भिन्नता होने से पदपाठ प्रदर्शित विवृति में अन्तर है। सायणाचार्य ने स्वार्थ में रेणु से कप्रत्यय मानकर 'रेणुक' के पश्चात् विवृति दिखाई है, पर भाष्यकार ने 'कस्य जलम्' करके तीन पद माने हैं ॥सम्पा०॥

२. अश्व अत्यन्त संयमी पशु है, विषयासक्त नहीं, अतः यहाँ 'हिंसक पुरुष' अर्थ ही सङ्गत है ॥ सम्पा० ॥

देवताओं के पूजने वाले (मर्तस्य) मनुष्य के (उरुगायम्) बड़े प्रशंसनीय (अभयम्) निर्भय राज्य में (अनु) अनुकूलता से (विचरन्ति) विचरती हैं ॥४॥

भावार्थः—विषयी, अदृढ़स्वभाव, दुष्ट जन विद्या के उत्तम फल को नहीं पा सकते हैं। जितेन्द्रिय, विद्वानों के सत्कार करने वाले राजा के सुरक्षित राज्य में अनेक उत्तम विद्यायें उन्नति को प्राप्त होती हैं ॥ ४ ॥

गावो भगो गाव इन्द्रो म इच्छाद् गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जनास इन्द्र इच्छामि हृदा मनसा चिदिन्द्रम् ॥ ५ ॥

गावः । भगः । गावः । इन्द्रः । मे । इच्छात् । गावः । सोमस्य । प्रथमस्य । भक्षः । इमाः । याः । गावः । सः । जनासः । इन्द्रः । इच्छामि । हृदा । मनसा । चित् । इन्द्रम् ॥ ५ ॥

भाषार्थः—(गावः) विद्यायें ही (भगः) धन हैं, (गावः) विद्यायें (इन्द्रः) परम ऐश्वर्य हैं, (गावः) विद्यायें (प्रथमस्य) अति श्रेष्ठ (सोमस्य) सोमरस अर्थात् अमृत वा मोक्ष का (भक्षः) सेवन हैं, [इति] (मे इच्छात्)

वा कुत्सितः पुरुषः। **रेणुककाटः**। रेणु+क+काटः। अजिवृरीभ्यो निच्च (उ० ३।३८) इति री गतिरेषणयोः—नुः। इति रेणुः। कटे वर्षावरणयोः—घञ्। कस्य जलस्य काटो वर्षणं सेचनं यस्मात् स ककाटः कूपः। धूलिकूप इव पतनस्वभावः। **अश्नुते**। प्राप्नोति। **संस्कृतत्रम्**। संस्कृत+त्रैङ् पालने—कः। संस्कृतानां देववाणीनां शोभनविद्यानां रक्षकम्। **उपयन्ति**। आगच्छन्ति प्राप्नुवन्ति। **अभि**। आभिमुख्येन।। **उरुगायम्**। अ० २।१२।१। बहुप्रशंसनीयम्। **अभयम्**। निर्भयं राज्यम्। **तस्य**। विद्यारक्षकस्य। **ताः**। **अनु**। अनुकूलतया **गावः**। विद्याः। **मर्तस्य**। हसिमृग्रिण्० (उ० ३।८६) इति मृङ् प्राणत्यागे—तन्। मारयति दोषान् स मर्तः। मनुष्यस्य। **विचरन्ति**। विविधं गच्छन्ति। **यज्वनः**। म० २। याजकस्य। देवपूजकस्य ॥

५—गावः। वाचः। विद्याः। **भगः**। भजनीयं धनम्—निघ० २।१०। **इन्द्रः**। परमैश्वर्याः सन्ति। **मे**। मम। **इच्छात्**। इषु इच्छायां लेटि आडागमः। इच्छा भवेत्-इति। **सोमस्य**। ऐश्वर्यवतो अमृतस्य मोक्षस्य। **प्रथमस्य**।

[यह] मेरी इच्छा हो। (जनासः) हे मनुष्यो! (इमाः) ये (याः) जो (गावः) विद्यायें हैं, (सः) सो ही (इन्द्रः) परम ऐश्वर्य हैं। (इन्द्रम्) परम ऐश्वर्य की (चित्) ही (हृदा) हृदय अर्थात् आत्मा और (मनसा) विज्ञान के साथ (इच्छामि) मैं चाह करता हूं ॥५॥

भावार्थः—मनुष्य विद्याओं को धन, ऐश्वर्य और मोक्ष का मुख्य साधन जानकर पूर्ण श्रद्धा से प्राप्त करें ॥५॥

यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम्।
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ॥६॥

यूयम्। गावः। मेदयथ। कृशम्। चित्। अश्रीरम्। चित्। कृणुथ। सुऽप्रतीकम्। भद्रम्। गृहम्। कृणुथ। भद्रऽवाचः। बृहत्। वः। वयः। उच्यते। सभासु ॥ ६ ॥

भाषार्थः—(गावः) हे विद्याओ! (यूयम्) तुम (कृशम्) दुर्बल से (चित्) भी, (अश्रीरम्) श्रीरहित निर्धन से (चित्) भी (मेदयथ) स्नेह करती हो और (सुप्रतीकम्) बड़ी प्रतीति वाला वा बड़े रूप वाला (कृणुथ) बना देती हो। (भद्रवाचः) हे कल्याणी विद्याओ! (गृहम्) घर को (भद्रम्)

अतिश्रेष्ठस्य। **भक्षः।** **वृतॄवदिवचि॰** (उ० ३। ६२) इति भज सेवायाम्–सः। सेवनम्। भोगः। **इमाः। याः। गावः। सः।** स एव। **इन्द्रः।** ऐश्वर्यम्। **जनासः।** हे जनाः। विद्वांसः। **इच्छामि।** अहं कामये। **हृदा।** हृदयेन। आत्मना। **मनसा।** विज्ञानेन। **चित्।** अपि। एव। **इन्द्रम्।** विद्यारूपम् ऐश्वर्यम् ॥

६—**यूयम्। गावः।** हे विद्याः। **मेदयथ।** ञिमिदा स्नेहने–णिच्। स्नेहयथ। आप्याययथ। **कृशम्। अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः** (पा० ८। २। ५५) इति कृश तनूकरणे—क्तप्रत्ययान्तो निपात्यते। क्षीणं निर्बलम्। **चित्।** अपि। **अश्रीरम्।** रो मत्वर्थीयः अश्रीयुक्तम्। निर्धनम्। अमङ्गलम्। **कृणुथ।** कुरुथ। **सुप्रतीकम्। अलीकादयश्च** (उ० ४। २५) इति सु+प्र+इण् गतौ—

मंगलमय (कृणुथ) कर देती हो, (सभासु) विद्वानों से प्रकाशमान सभाओं में (वः) तुम्हारा ही (वयः) बल (बृहत्) बड़ा (उच्यते) बखाना जाता है ॥ ६ ॥

भावार्थः—विद्या से दुर्बल मनुष्य सबल, और निर्धन बड़ा विश्वासी और रूपवान् होता है, विद्वानों के घर में सदा आनन्द रहता, और विद्वानों की ही राजसभा और पंचायतों में बड़ाई होती है ॥ ६ ॥

प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः । मा वस्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ॥ ७ ॥

प्रजाऽवतीः । सुऽयवसे । रुशन्तीः । शुद्धाः । अपः । सुऽप्रपाने । पिबन्तीः । मा । वः । स्तेनः । ईशत । मा । अघऽशंसः । परि । वः । रुद्रस्य । हेतिः । वृणक्तु ॥ ७ ॥

भाषार्थः—[हे मनुष्य प्रजाओ !] (प्रजावतीः) उत्तम सन्तान वाली, (सुयवसे) सुन्दर यव आदि अन्न वाले [घर] में [अन्न] (रुशन्तीः) खाती हुई, और (सुप्रपाणे) सुन्दर जलस्थान में (शुद्धाः) शुद्ध (अपः) जलों को (पिबन्तीः) पीती हुई (वः) तुमको (स्तेनः) चोर (मा ईशत) वश में न करे, और (मा) न (अघशंसः) बुरा चीतने वाला, डाकू उचक्का आदि [वश में करे] ।

कीकन्, धातोस्तुट्चागमः । शोभनप्रतीतिवन्तम् । शोभनावयवम् । सुरूपम् । **भद्रम्** । कल्याणकरम् । **गृहम्** । गेहम् । **भद्रवाचः** । हे शोभना वाचो विद्याः । **बृहत्** । महत् । **वः** । युष्माकम् । **वयः** । अ० २ । १० । ३ । यौवनम् । बलम् । **उच्यते** । प्रशस्यते । **सभासु** । सह+भा दीप्तौ–अङ्, टाप्, सहस्य सः । विद्वद्भिः प्रकाशमानासु परिषत्सु ॥

७—**प्रजावतीः** । उत्तमसन्तानयुक्ताः [हे प्रजाः—इति शेषः] । **सुयवसे** । अत्यविचमि० (उ० ३ । ११७) इति सु+यु मिश्रणामिश्रणयोः–असच् । शोभनानि यवाद्यन्नानि यस्मिन्,तस्मिन् गृहे । **रुशन्तीः** । रुश हिंसायाम्-शतृः। अन्नं भक्षयन्तीः । **शुद्धाः** । निर्मलाः । **अपः** । जलानि । **सुप्रपाणे** । सुन्दरे जलपानस्थाने । **पिबन्तीः** ।

(रुद्रस्य) पीडानाशक परमेश्वर की (हेतिः) हनन शक्ति (वः) तुमको (परि) सब ओर से (वृणक्तु) त्यागे रहे ॥ ७ ॥

भावार्थः—मनुष्य विद्यायें उपार्जन करके अपनी सन्तानों को उत्तम शिक्षा देते हुये और अन्न जल आदि का सुप्रबन्ध करते हुये सदा हृष्ट पुष्ट बुद्धिमान् और धर्मनिष्ठ रहें जिससे उन्हें न चोर आदि सता सके और न परमेश्वर दण्ड देवे ॥ ७ ॥

'मा वस्तेन ईशत माघशंꣳसः' इतना मन्त्रांश य० १ । १ और 'परि नो रुद्रस्य हेतिर्वृणक्तु' यह मन्त्रांश य० १६ । ५० में है ॥

सूक्तम् २२ ॥

१–७ ॥ इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

संग्रामजयायोपदेशः—संग्राम में जय के लिये उपदेश ॥

इममिन्द्र वर्धय क्षत्रियं म इमं विशामेकवृषं कृणु त्वम् ।
निरमित्रानक्ष्णुह्यस्य सर्वांस्तान् रन्धयास्मा अहमुत्तरेषु ॥१॥

इमम् । इन्द्र । वर्धय । क्षत्रियम् । मे । इमम् । विशाम् । एकऽवृषम् । कृणु । त्वम् । निः । अमित्रान् । अक्ष्णुहि । अस्य । सर्वान् । तान् । रन्धय । अस्मै । अहम्ऽउत्तरेषु ॥ १ ॥

पानं कुर्वतीः । **वः** । युष्मान् । **स्तेनः** । चोरः । **व स्तेन** । खर्परे शरि वा लोपो वक्तव्यः (वा० पा० ८ । ३ । ३६) इति विसर्गलोपः । **मा ईशत** । मा ईशिष्ट । अधिकारे वशे न करोतु । **मा** । मा ईशत । **अघशंसः** । अघ पापकरणे–पचाद्यच्, शसि इच्छायाम्–अच् । अघं पापं शंसति इच्छतीति यः । अनिष्टचिन्तकः । **परि** । सर्वतः । **वः** । युष्मान् । **रुद्रस्य** । रुद्+रस्य । रुदिर् अश्रुविमोचने–क्विप्, इति रुत् पीडा । रुङ् गतिरेषणयोः–डः । रुदं पीडां रवते नाशयतीति रुद्रः, [1]तस्य दुःखनाशकस्य परमेश्वरस्य । **हेतिः** । **ऊतियूतिजूति०** (पा० ३ । ३ । ९७) इति हन हिंसागत्योः–क्तिन् । हन्यते ताडयते अनया । हननशक्तिः । **वृणक्तु** । वृजी वर्जने । वर्जयतु । त्यजतु ॥

---

१. रुद्र शब्द की इस व्युत्पत्ति में क्लिष्ट कल्पना करनी पड़ती है। पापिनो रोदयतीति रुद्रः परमेश्वरः ऐसा विग्रह करके रोदेर्णिलुक् च (उ० २ । २२) से ण्यन्त रुदिर् धातु से रक् प्रत्यय करने पर अर्थ की भी असङ्गति नहीं होती है ॥ सम्पा० ॥

भाषार्थः—(इन्द्र) हे परमेश्वर ! (त्वम्) तू (इमम्) इस (क्षत्रियम्) राज्य करने में चतुर राजा को (मे) मेरे लिये (वर्धय) बढ़ा, और (इमम्) इसको (विशाम्) मनुष्यों का (एकवृषम्) अद्वितीय प्रधान अर्थात् सार्वभौम शासक (कृणु) बना। (अस्य) इसके (सर्वान्) सब (अमित्रान्) वैरियों को (निरक्षणुहि) निर्बल करदे, और (तान्) उन्हें (अस्मै) इसके लिये (अहमुत्तरेषु) मैं ऊंचा होता हूं, मैं ऊंचा होता हूं ऐसे कथन स्थान रणक्षेत्रों में (रन्धय) नाश कर वा वश में कर ॥ १ ॥

भावार्थः—प्रजागण सर्वश्रेष्ठ पुरुष को राजा बनावें जो परमेश्वर में विश्वास करके युद्ध भूमि में शत्रुओं को मारकर प्रजा को सुखी रक्खे ॥ १ ॥

सायणाचार्य ने "अहमुत्तरेषु" पद को पदपाठ के विरुद्ध "अहम् उत्तरेषु" ऐसे दो पद मानकर व्याख्या की है ॥

एमं भज ग्रामे अश्वेषु गोषु निष्टं भज यो अमित्रो अस्य ।
वर्ष्म क्षत्राणामयमस्तु राजेन्द्र शत्रुं रन्धय सर्वमस्मै ॥ २ ॥

आ । इमम् । भज । ग्रामे । अश्वेषु । गोषु । निः । तम् । भज । यः । अमित्रः । अस्य । वर्ष्म । क्षत्राणाम् । अयम् । अस्तु । राजा । इन्द्र । शत्रुम् । रन्धय । सर्वम् । अस्मै ॥ २ ॥

१—**इमम्** । अस्माकं मध्ये वर्त्तमानम् । **इन्द्र** । हे परमैश्वर्यवन् परमात्मन् । **वर्धय** । समर्धय । **क्षत्रियम्** । **क्षत्राद् घः** (पा० ४ । १ । १३८) इति क्षत्र-घः । क्षत्रे राष्ट्रे साधुम् । राजानम् । **मे** । मह्यम् । **विशाम्** । विश प्रवेशने-क्विप् । विशः, मनुष्यनाम-निघ० २ । ३ । मनुष्याणाम् । प्रजानाम् । **एकवृषम्** । वृषु सेचने, प्रजननैश्वर्ययोः-कः । अद्वितीयप्रधानम् । एकवीरम् । सार्वभौमम् । **कृणु** । कुरु । **त्वम्** । **अमित्रान्** । अ० १ । १९ । २ पीडकान् शत्रून् । **निः अक्षणुहि** । अक्षू व्याप्तौ । निर्गतव्याप्तिकान् निर्बलान् कुरु । **अस्य** । राज्ञः । **सर्वान्** । तान् तथाविधान् शत्रून् । **रन्धय** । रध हिंसासंराध्योः । **रधिजभोरचि** (पा० ७ । १ । ६१) इति नुमागमः । रध्यतिर्वशगमने-निरु० १०।४० । नाशय । वशीकुरु । **अस्मै** । राज्ञे । **अहमुत्तरेषु** । अहम्+उत्तरेषु । अहमुत्तरो भवामि अहमुत्तरो भवामि इति कथनं यत्र । परस्परोत्कर्षाय योधानां धावनकर्मसु । महासंग्रामेषु ॥

भाषार्थः—(इमम्) इसको (ग्रामे) ग्राम में, (अश्वेषु) घोड़ों में, और (गोषु) गौ आदिकों में (आभज) भाग्यवान् कर और (यः) जो (अस्य) इसका (अमित्रः) बैरी है, (तम्) उसको (निर्भज) अलग करदे। (अयम्) यह (राजा) राजा (क्षत्राणाम्) क्षत्रियों का (वर्ष्म) मस्तक [समान ऊंचा] (अस्तु) होवे। (इन्द्र) हे परम ऐश्वर्य वाले इन्द्र भगवान्! (अस्मै) इसके लिये (सर्वम्) सब (शत्रुम्) शत्रु को (रन्धय) वश में कर ॥२॥

भावार्थः—राजा परमेश्वर में श्रद्धा रखता हुआ अपनी प्रजा, सेना, और गौ आदि पशुओं की रक्षा करता हुआ अपने सब शत्रुओं का नाश करके क्षत्रियों का शिरोमणि बने ॥ २ ॥

अयमस्तु धनपतिर्धनानामयं विशां विश्पतिरस्तु राजा ।
अस्मिन्निन्द्र महि वर्चांसि धेह्यवर्चसं कृणुहि शत्रुमस्य ॥३॥

अयम् । अस्तु । धनऽपतिः । धनानाम् । अयम् । विशाम् । विश्पतिः । अस्तु । राजा । अस्मिन् । इन्द्र । महि । वर्चांसि । धेहि । अवर्चसम् । कृणुहि । शत्रुम् । अस्य ॥ ३ ॥

भाषार्थः—(अयम्) यह (धनानाम्) बहुत प्रकार के धनों का (धनपतिः) धनपति (अस्तु) होवे। (अयम्) यह (राजा) राजा (विशाम्) बहुत प्रजाओं का (विश्पतिः) प्रजापति (अस्तु) होवे। (इन्द्र) हे परमेश्वर!

२—**इमम्** । राजानम् । **आ भज** । भज सेवाविश्राणनयोः । समन्तात् सेवस्व । भागं देहि । **ग्रामे** । अ० ४ । ७ । ५ । वसतौ । **अश्वेषु** । तुरङ्गेषु । **गोषु** । धेन्वादिपशुषु । **तम्** । शत्रुम् । **निर्भज** । निर्भक्तं वियुक्तं कुरु । **यः** । **अमित्रः** । पीडकः शत्रुः । **अस्य** । राज्ञः । **वर्ष्म** । अ० ३ । ४ । २ । उन्नतस्थानम् । शिरोवदुन्नतः । **क्षत्राणाम्** । अ० २ । १५ । ४ । क्षतस्त्रायकाणां क्षत्रियाणां मध्ये । **अस्तु** । **राजा** । **इन्द्र** । हे परमैश्वर्यवन् परमात्मन् । **शत्रुम्** । रिपुम् । **रन्धय** । म० १ । वशीकुरु । **सर्वम्** । **अस्मै** । राजहिताय ॥

३—**अयम्** । **अस्तु** । **धनपतिः** । धनानां निधीनां पालकः । **धनानाम्** । बहुविधधनानाम् । **विशाम्** । बहुप्रजानाम् । **विश्पतिः** । प्रजापालकः । **राजा** । **अस्मिन्** । राजनि । **इन्द्र** । हे परमात्मन् । **महि** । सर्वधातुभ्य इन् (उ० ४ ।

(अस्मिन्) इस राज्य में (महि = महीनि) बड़े बड़े (वर्चांसि) तेजों को (धेहि) धारण कर, (अस्य) इसके (शत्रुम्) बैरी को (अवर्चसम्) निस्तेज (कृणुहि) कर दे ॥ ३ ॥

भावार्थः—राजा परमेश्वर के अनुग्रह से पुरुषार्थ पूर्वक बहुत धन एकत्र करके प्रजा की रक्षा करे, और महा प्रतापी होकर शत्रुओं को वश में रक्खे ॥ ३ ॥

अस्मै द्यावापृथिवी भूरि वामं दुहाथां घर्मदुघे इव धेनू । अयं राजा प्रिय इन्द्रस्य भूयात् प्रियो गवामोषधीनां पशूनाम् ॥४॥

अस्मै । द्यावापृथिवी इति । भूरि । वामम् । दुहाथाम् । घर्मदुघे इवेतिघर्मदुघेऽइव । धेनू । इति । अयम् । राजा प्रियः । इन्द्रस्य । भूयात् । प्रियः । गवाम् । ओषधीनाम् । पशूनाम् ॥ ४ ॥

भाषार्थः—(द्यावापृथिवी) हे सूर्य और पृथिवी तुम दोनों ! (अस्मै) इस राजा के लिये (घर्मदुघे) यज्ञ की पूर्ति करने वाली (धेनू इव) दो गौओं के समान (भूरि) बहुत (वामम्) उत्तम धन (दुहाथाम्) पूर्ण करो । (अयम्) यह (राजा) राजा (इन्द्रस्य) परमेश्वर का (प्रियः) प्रिय (गवाम्) विद्याओं का, (ओषधीनाम्) सब अन्नों का और (पशूनाम्) दोपाये और चौपाये जीवों का (प्रियः) प्रिय (भूयात्) होवे ॥ ४ ॥

---

११८) इति मह पूजायाम्—इन् । **सुपां सुलुक्०** (पा० ७।१।३९) इति शसः सुः । महीनि महान्ति । **वर्चांसि** । तेजांसि । **धेहि** । धारय । **अवर्चसम्** । अतेजस्कम् । **कृणुहि** । कुरु । **शत्रुम्** । **अस्य** ॥

४—अस्मै । राज्ञे । **द्यावापृथिवी** । हे द्यावापृथिव्यौ । सूर्यभूलोकौ । तत्रस्थपदार्थाः, इत्यर्थः । **भूरि** । प्रभूतम् । **वामम्** । **अर्तिस्तुसुहु०** (उ० १ । १४०) इति वा गतिगन्धनयोः—मन् । यद्वा । **इषियुधीन्धि०** (उ० १ । १४५) इति वन सम्भक्तौ शब्दे च—मक् । नस्य आकारः । प्रशस्यम्—निघ० ३ । ८ । धनम् । **दुहाथाम्** । दुग्धम् । प्रपूरयतम् । **घर्मदुघे** । घर्म + दुघे । घर्म इति

भावार्थः—राजा सूर्य पृथिवी आदि सब लोकों और पदार्थों से विज्ञान पूर्वक उपकार लेकर धन संचय करे, और अनेक विद्याओं और अन्नों और सब प्राणियों की वृद्धि करके सुख प्राप्त करे ॥ ४ ॥

युनज्मि त उत्तरावन्तमिन्द्रं येन जयन्ति न पराजयन्ते ।
यस्त्वा करदेकवृषं जनानामुत राज्ञामुत्तमं मानवानाम् ॥ ५ ॥

युनज्मि । ते । उत्तरऽवन्तम् । इन्द्रम् । येन । जयन्ति । न । पराऽजयन्ते । यः । त्वा । करत् । एकऽवृषम् । जनानाम् । उत । राज्ञाम् । उत्ऽतमम् । मानवानाम् ॥ ५ ॥

भाषार्थः—[हे राजन् !] (ते !) तेरे लिये (उत्तारावन्तम्) अत्यन्त उत्तम गुण वाले (इन्द्रम्) परमेश्वर को (युनज्मि) मैं संयुक्त करता हूं, (येन) जिसके साथ [शूर जन] (जयन्ति) जय पाते हैं, और (न) कभी नहीं (पराजयन्ते) हारते हैं । (यः) जो (त्वा) तुझको (जनानाम्) मनुष्यों के बीच (एकवृषम्) अद्वितीय प्रधान, और (मानवानाम्) मनन शील अथवा माननीय (राज्ञाम्) राजाओं में (उत्तामम्) अति श्रेष्ठ (करत्) करे ॥ ५ ॥

व्याख्यातम्—अ० ४ । १ । २ । **दुहः कब्घश्च** (पा० ३ । २ । ७०) इति दुह प्रपूरणे-कप्, हस्य घश्च । टाप् । घर्मस्य यज्ञस्य प्रपरयित्र्यौ यज्ञाय दोग्ध्र्यौ । इव । यथा । **धेनू** । गावौ । **अयम्** । **राजा** । **प्रियः** । हृद्यः । तर्पकः । **इन्द्रस्य** । परमेश्वरस्य । **गवाम्** । वाणीनाम् । विद्यानाम् । **ओषधीनाम्** । व्रीहियवादिसस्यानाम् । **पशूनाम्** । द्विपाच्चतुष्पदां प्राणिनाम् ॥

५—**युनज्मि** । योजयामि । **ते** । तुभ्यम् । **उत्तरावन्तम्** । छान्दसो दीर्घः । अत्युत्कृष्टगुणयुक्तम् । **इन्द्रम्** । परमात्मानम् । **येन** । इन्द्रेण सह । **जयन्ति** । शूरा जयं प्राप्नुवन्ति । **न** । निषेधे । **पराजयन्ते** । **विपराभ्यां जेः** (पा० १।३। १९) इति आत्मनेपदम् । शत्रुभ्यः सकाशात् पराभवं प्राप्नुवन्ति । **यः** । इन्द्रः । **त्वा** । त्वां राजानम् । **करत्** । करोतेर्लेट् । **लेटोऽडाटौ** (पा० ३ । ४ । ९४)

भावार्थः—विद्वान् पुरुष राजा को परमेश्वर का उपदेश करें, जिसके आश्रय से वह राजा धीर वीर होकर प्रजा का पालन करे और उत्तमों में उत्तम राजा हो ॥ ५ ॥

उत्त॑र॒स्त्वमध॑रे ते स॒पत्ना॒ ये के च॑ राजन् प्रति॑शत्रवस्ते ।
एक॒वृ॒ष इन्द्र॑सखा जिगी॒वाञ्छ॑त्रूय॒ताममा भ॑रा॒ भोज॑नानि ॥६॥

उत्त॑रः । त्वम् । अध॑रे । ते॒ । स॒ऽपत्नाः॑ । ये । के । च॒ । रा॒जन् । प्रति॑ऽशत्रवः । ते॒ । एक॒ऽवृ॒षः । इन्द्र॑ऽसखा । जि॒गी॒वान् । श॒त्रु॒ऽय॒ताम् । आ । भ॒र॒ । भोज॑नानि ॥ ६ ॥

भाषार्थः—[राजन् !] हे राजन् ! (त्वम्) तू (उत्तरः) अधिक ऊंचा हो, (च) और (ये के) जो कोई (ते) तेरे (प्रतिशत्रवः) प्रतिकूलवर्ती शत्रु और (ते) तेरे (सपत्नाः) साथ झगड़ने वाले हैं, [वे] (अधरे) नीचे होवें। (इन्द्रसखा) परमेश्वर का मित्र, (जिगीवान्) विजयी और (एकवृषः) अद्वितीय प्रधान तू (शत्रुयताम्) शत्रुओं जैसे आचरण वाले मनुष्यों के (भोजनानि) भोगों के साधन, धन धान्यों को (आभर) लाकर भर दे ॥ ६ ॥

इति अडागमः । **इतश्च लोपः परस्मैपदेषु** (पा० ३ । ४ । ९७) इति इकारलोपः । कुर्यात् । **एकवृषम्** । म० १ । अद्वितीयं सुखसेचकं सार्वभौमम् । **जनानाम्** । शूरजनानाम् । **उत** । अपि च । **राज्ञाम्** । क्षत्रियाणाम् । **उत्तमम्** । मुख्यं सर्वश्रेष्ठं प्रजापरिपालनशौर्यादिगुणैरुत्कृष्टम् । **मानवानाम्** । **तस्येदम्** (पा० ४ । ३ । १२०) इति मनु—अण् । मननशीलानाम् । यद्वा । **छन्दसीवनिपौ च** (वा० पा० ५ । २ । १०९) इति मान—वप्रत्ययो मत्वर्थे । मान्यानाम् ॥

६—**उत्तरः** । ऊर्ध्वतरः । **त्वम्** । राजन् । **अधरे** । नीचाः । **ते** । त्वदीयाः । **सपत्नाः** । अ० १ । ९ । २ । सहपतित्ववन्तः । शत्रवः । **ये के च राजन्** । **प्रतिशत्रवः** । प्रतिकूलवर्तिनो वैरिणः । **एकवृषः** । म० १ । अद्वितीयशासकः । **इन्द्रसखा** । इन्द्रेण परमेश्वरेण सखित्वयुक्तः । **जिगीवान्** । जि जये+क्वसुः । **सन्लिटोर्जेः** (पा० ७ । ३ । ५७) इत्यभ्यासादुत्तरस्य कुत्वम् । छान्दसो दीर्घः । जयशीलः । **शत्रुयताम्** । अ० ३ । १ । ३ । शत्रु—क्यच्,—शतृः । शत्रुवदाचरताम् ।

भावार्थः—राजा प्रतिकूलवर्ती सब शत्रुओं को परमेश्वर के सहाय से जीतकर सर्वथा निर्बल करे और प्रजा को सुख देवे ॥ ६ ॥

सिंहप्रतीको विशो अद्धि सर्वा व्याघ्रप्रतीकोऽव बाधस्व शत्रून् ।
एकवृष इन्द्रसखा जिगीवाञ्छत्रूयतामा खिदा भोजनानि ॥७॥

सिंहऽप्रतीकः । विशः । अद्धि । सर्वाः । व्याघ्रऽप्रतीकः । अव । बाधस्व । शत्रून् । एकऽवृषः । इन्द्रऽसखा । जिगीवान् । शत्रुऽयताम् । आ । खिद । भोजनानि ॥ ७ ॥

भाषार्थः—[हे राजन् !] (सिंहप्रतीकः) सिंह तुल्य पराक्रमी तू (सर्वाः) सब [शत्रुओं को] (विशः) मनुष्यों को (अद्धि) खाले, (व्याघ्रप्रतीकः) व्याघ्र समान झपट कर (शत्रून्) दुष्ट वैरियों को (अव बाधस्व) हटा दे । (इन्द्रसखा) परमेश्वर का मित्र, (जिगीवान्) विजयी और (एकवृषः) अद्वितीय प्रधान तू (शत्रूयताम्) शत्रु जैसे आचरण वाले मनुष्यों के (भोजनानि) भोगों के साधन धन धान्यों को (आ खिद) छीन ले ॥ ७ ॥

भावार्थः—राजा पूर्ण पराक्रम से शत्रुओं की सेनाओं और शत्रुओं का नाश करे और सब प्रकार से विजय प्राप्त करके उन्हें अपने आधीन रक्खे ॥७॥

आ भरा । छान्दसो दीर्घः । आनीय धर । **भोजनानि** । **ल्युट् च** (पा० ३ । ३ । ११५) इति भुज पालनाभ्यवहारयोः—ल्युट् । भोगसाधनानि धान्यानि धनानि च ॥

७—**सिंहप्रतीकः** । सिंह इति । गतम्—अ० ४ । ८ । ७ । **अलीकादयश्च** (उ०४।२५) इति प्रति + इण् गतौ-कीकन् । प्रतीयते स प्रतीकः । प्रतीतिःख्यातिः । सिंहतुल्यपराक्रमः । **विशः** । प्रजाः, शत्रूणाम् । **अद्धि** । अद भक्षणे-लोट् । भुङ्क्ष्व नाशय । **सर्वाः** । सकलाः । **व्याघ्रप्रतीकः** । व्याघ्रवदाक्रमणशीलः । **अव बाधस्व** । निवारय । **शत्रून्** । शातयितॄन् । हिंसकान् । **आ खिद** । खिद दैन्ये परिघातने च । आङ्पूर्वः खिदिः आच्छेदने । आच्छिन्धि । अपहरेत्यर्थः । अन्यत् व्याख्यातं म० ६ ॥

सूक्तम् २३ ॥

१-७ ॥ अग्निर्देवता । १, २, ५, ७, पादत्रयं जगती, अन्तिमोऽनुष्टुप्, ३ त्रिष्टुब् ज्योतिष्मती, ४ अनुष्टुप्, ६ पूर्वार्धस्त्रिष्टुप्, उत्तरोऽनुष्टुप् ॥

कष्टनिवारणायोपदेशः—कष्ट हटाने के लिये उपदेश ॥

अग्नेर्मन्वे प्रथमस्य प्रचेतसः पाञ्चजन्यस्य बहुधा यमिन्धते । विशोविशः प्रविशिवांसमीमहे स नो मुञ्चत्वंहसः ॥ १ ॥

अग्नेः । मन्वे । प्रथमस्य । प्रऽचेतसः । पाञ्चऽजन्यस्य । बहुऽधा । यम् । इन्धते । विशःऽविशः । प्रविशिऽवांसम् । ईमहे । सः । नः । मुञ्चतु । अंहसः ॥-१ ॥

भाषार्थः—(प्रथमस्य) सबसे पहिले वर्तमान, (प्रचेतसः) बड़े ज्ञान वाले (पाञ्चजन्यस्य) पांच भूतों से उत्पन्न मनुष्य आदि के हितकारक (अग्नेः) सर्वव्यापक अग्नि, अर्थात् परमेश्वर का (मन्वे) मैं मनन करता हूँ, (यम्) जिसको [ऋषि लोग] (बहुधा) बहुत प्रकार से (इन्धते) प्रकाशित करते हैं (विशोविशः) सब प्रवेश स्थानों में (प्रविशिवांसम्) प्रवेश करने वाले परमेश्वर को (ईमहे) हम पहुंचते हैं । (सः) वह (नः) हमें (अंहसः) पीड़ा से (मुञ्चतु) छुड़ावे ॥ १ ॥

१—**अग्नेः** । सर्वव्यापकस्य परमेश्वरस्य । **मन्वे** । मनु अवबोधने । मननं करोमि । **प्रथमस्य** । आद्यस्य । मुख्यस्य । **प्रचेतसः** । प्रकृष्टज्ञानस्य । **पाञ्चजन्यस्य** । पञ्चजनाः, इति मनुष्यनाम—निघ० २ । ३ । पञ्चभिर्भूतैर्जाताः, इत्यर्थः । **तस्मै हितम्** (पा० ५ । १ । ५) इति पञ्चजन-ञ्यः । पञ्चजनेभ्यो मनुष्येभ्यो हितस्य । **बहुधा** । बहुप्रकारेण । **यम्** । अग्निम् । **इन्धते** । दीपयन्ति प्रकाशयन्ति । **विशोविशः** । विश प्रवेशने—क्विप् । सर्वप्रवेशस्थानानि । सर्वाः प्रजाः । **प्रविशिवांसम्** । विश प्रवेशने । छान्दसं रूपम् । प्रविविशिवांसम् । प्रविष्टवन्तम् । **ईमहे** । ईङ् गतौ । प्राप्नुमः । याचामहे—निघ० ३ । १९ । **सः** ।

भावार्थः—सबके आदि कारण, सर्वज्ञ, सर्वहितकारक, सर्वव्यापक परमेश्वर की महिमा विचारते हुए मनुष्य पुरुषार्थ करके अधर्म को छोड़कर धर्म में प्रवृत्त होकर आनन्द भोगें ॥ १ ॥

यथा हव्यं वहसि जातवेदो यथा यज्ञं कल्पयसि प्रजानन् ।
एवा देवेभ्यः सुमतिं न आ वह स नो मुञ्चत्वंहसः ॥ २ ॥

यथा । हव्यम् । वहसि । जातऽवेदः । यथा । यज्ञम् । कल्पयसि । प्रऽजानन् । एव । देवेभ्यः । सुऽमतिम् । नः । आ । वह । सः । नः । मुञ्चतु । अंहसः ॥ २ ॥

भाषार्थः—(जातवेदः) हे उत्पन्न पदार्थों के जानने वाले परमेश्वर ! (यथा) जिस प्रकार से (हव्यम्) देने वा खाने योग्य अन्न को (वहसि) तू पहुंचाता है, (यथा) जिस प्रकार से (यज्ञम्) पूजनीय कर्म को (प्रजानन्) अच्छे प्रकार जानता हुआ (कल्पयसि) तू रचता है। (एव) वैसे ही (देवेभ्यः) दिव्य गुणों के लिये (सुमतिम्) सुमति (नः) हमें (आवह) पहुंचा, (सः) वह (नः) हमें (अंहसः) पीड़ा से (मुञ्चतु) छुड़ावे ॥ २ ॥

भावार्थः—परमेश्वर ने पुष्टिकारक और सुखदायक अन्न सूर्य आदि पदार्थ उत्पन्न करके हम पर बड़ा उपकार किया है; उसके गुणों को जानकर विज्ञानपूर्वक अपनी धार्मिक बुद्धि बढ़ावें और दुष्कर्मों से पृथक् रहकर जीवन लाभ उठावें ॥ २ ॥

अग्निः । **नः** । अस्मान् । **मुञ्चतु** । मोचयतु वियोजयतु । **अंहसः** । अ० २ । ४ । ३ । **अमेर्हुक्च** (उ० ४ । २१३) इति अम रोगे, असुन्, हुक् च । रोगात् । पीडकात् कष्टात् ॥

२—**यथा** । येन प्रकारेण । **हव्यम्** । अ० ३ । ३ । ४ । हु दानादनयोः-यत् । दातव्यं भोक्तव्यं वान्नम् । **वहसि** । प्रापयसि । **जातवेदः** । अ० १ । ७ । २ । जातानामुत्पन्नानां वेदितः । **यज्ञम्** । यजनीयं पूजनीयं कर्म । **कल्पयसि** । विरचयसि । **प्रजानन्** । प्रकर्षेणावगच्छन् । **एव** । एवम् । तथा । **देवेभ्यः** । दिव्यगुणानां प्राप्तये । **सुमतिम्** । धार्मिकां बुद्धिम् । **नः** । अस्मान् । **आवह** । द्विकर्मकः । प्रापय । अन्यद् गतम्—म० १ ॥

यामन्यामन्नुपयुक्तं वहिष्ठं कर्मन्कर्मन्नाभगम् । अग्निमीडे रक्षोहणं यज्ञवृधं घृताहुतं स नो मुञ्चत्वंहसः ॥ ३ ॥

यामन्ऽयामन् । उपऽयुक्तम् । वहिष्ठम् । कर्मन्ऽकर्मन् । आऽभगम् । अग्निम् । ईडे । रक्षःऽहनम् । यज्ञऽवृधम् । घृतऽआहुतम् । सः । नः । मुञ्चतु । अंहसः ॥ ३ ॥

भाषार्थः—(यामन् यामन्) प्रत्येक गति वा उद्योग में (उपयुक्तम्) उपयोग किये, (कर्मन् कर्मन्) प्रत्येक कर्म में (आभगम्) अच्छे प्रकार से भक्ति योग्य, (वहिष्ठम्) अतिबली, (रक्षोहणम्) राक्षसों के हनन करनेहारे, (यज्ञवृधम्) पूजनीय कर्म के बढ़ाने वाले, (घृताहुतम्) प्रकाश के भलीभाँति देनेवाले, (अग्निम्) सर्वज्ञ अग्नि, परमात्मा की (ईडे) मैं स्तुति करता हूं । (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ।। ३ ।।

भावार्थः—जो मनुष्य प्रत्येक कर्म में परमात्मा का ध्यान करके उद्योग करते हैं, वही बाहिरी और भीतरी शत्रुओं को हटाकर संसार में सुख भोगते हैं ।। ३ ।।

३—**यामन्, यामन्** । **सर्वधातुभ्यो मनिन्** (उ० ४ । १४५) इति या प्रापणे—मनिन् । सप्तम्याः लुक् । यामनि यामनि । सर्वस्यां गतौ । **उपयुक्तम्** । उपयोगीभूतम् । **वहिष्ठम्** । **तुश्छन्दसि** (पा० ५ । ३ । ५९) इति वोढृ—इष्ठन् । **तुरिष्ठेमेयस्सु** (पा० ६ । ४ । १५४) इति तृलोपः । वोढृतमम् । अतिशयेन प्रापकम् । बलिष्ठम् । **कर्मन्, कर्मन्** । डुकृञ् करणे—मनिन् । सप्तम्याः लुक् । सर्वस्मिन् कर्मणि । **आभगम्** । आभक्तव्यम् । आसेव्यम् । **अग्निम्** । सर्वज्ञं परमात्मानम् । **ईडे** । ईड स्तुतौ । अग्निमीडेऽग्निं याचामीडिरध्येषणाकर्मा पूजाकर्मा वा–निरु० ७ । १५ । स्तौमि । **रक्षोहणम्** । रक्षस्+हन हिंसागत्योः-क्विप् । रक्षसां हन्तारम् । **यज्ञवृधम्** । यज्ञस्य पूजनीयकर्मणो वर्धयितारम् । **घृताहुतम्** । घृत+आङ्–हुदानादनयोः-क्विप्, तुक् च । घृतस्य प्रकाशस्य सम्यग् दातारम् । अन्यत् पूर्ववत् म० १ ।।

सुजातं जातवेदसमग्निं वैश्वानरं विभुम् ।
हव्यवाहं हवामहे स नो मुञ्चत्वंहसः ॥ ४ ॥

सुऽजातम् । जातऽवेदसम् । अग्निम् । वैश्वानरम् । विऽभुम् ।
हव्यऽवाहम् । हवामहे । सः । नः । मुञ्चतु । अंहसः ॥ ४ ॥

भाषार्थः—(सुजातम्) बड़े प्रसिद्ध, (जातवेदसम्) उत्पन्न पदार्थों के जानने वाले अथवा धन प्राप्त कराने हारे (वैश्वानरम्) सब नरों [नायकों] के हित करने वाले, (विभुम्) सर्वशक्तिमान् (हव्यवाहम्) उत्तम अन्न पहुंचाने वाले (अग्निम्) सर्वव्यापक परमेश्वर को (हवामहे) हम पुकारते हैं, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥४॥

भावार्थः—परमेश्वर के गुण और कर्मों को जानकर मनुष्य अपना सामर्थ्य बढ़ावें और परस्पर उपकार करके आनन्दित रहें ॥४॥

येन ऋषयो बलमद्योतयन् युजा येनासुराणामयुवन्त मायाः ।
येनाग्निना पणीनिन्द्रो जिगाय स नो मुञ्चत्वंहसः ॥ ५ ॥

येन । ऋषयः । बलम् । अद्योतयन् । युजा । येन । असुराणाम् । अयुवन्त । मायाः । येन । अग्निना । पणीन् । इन्द्रः । जिगाय । सः । नः । मुञ्चतु । अंहसः ॥ ५ ॥

भाषार्थः—(येन) जिस (युजा) मित्र परमेश्वर के साथ (ऋषयः)

४—सुजातम् । जनी प्रादुर्भावे—क्तः । सुप्रसिद्धम् । जातवेदसम् । म० २ । जातानां वेदितारम् । धनस्य जनयितारं प्रापकम् । अग्निम् । सर्वव्यापकम् । वैश्वानरम् । अ० १ । १० । ४ । सर्वेषां नराणां नायकानां हितम् । विभुम् । विप्रसंभ्योड्वसंज्ञायाम् (पा० ३ । २ । १८०) इति वि+भु-डुः । सर्वगतम् । प्रभुम् । हव्यवाहम् । हव्यं वहतीति । हव्य+वह· अण् । अन्नप्रापकम् । हवामहे । आह्वयामः । अन्यद् गतम् म० १ ॥

५—येन । अग्निना परमेश्वरेण । ऋषयः । अ० २ । ६ । १ । ऋषिर्द-

ऋषि लोगों ने (बलम्) बल (अद्योतयन्) प्रकाशित किया है, और (येन) जिसके साथ (असुराणाम्) असुरों की (मायाः) मायाओं [छलों] को (अयुवन्त) हटाया है। और (येन) जिस (अग्निना) सर्वव्यापक परमेश्वर के साथ (इन्द्रः) बड़े ऐश्वर्य वाले पुरुष ने (पणीन्) कुव्यवहारी मनुष्यों को (जिगाय) जीता है, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ ५ ॥

भावार्थः—जिस परमात्मा का आश्रय लेकर सूक्ष्मदर्शी महात्माओं ने सत्य का प्रकाश और असत्य का नाश किया है और जिसपर विश्वास करके प्रतापी मनुष्यों ने दुष्टों को जीता है, उसी परमात्मा की शरण लेकर हम विघ्नों को हटा कर सुख पावें ॥ ५ ॥

येन देवा अमृतमन्वविन्दन् येनौषधीर्मधुमतीरकृण्वन्।
येन देवाः स्व १ राभरन्त्स नो मुञ्चत्वंहसः ॥ ६ ॥

येन। देवाः। अमृतम्। अनुऽअविन्दन्। येन। ओषधीः। मधुऽमतीः। अकृण्वन्। येन। देवाः। स्वः। आऽअभरन्। सः। नः। मुञ्चतु। अंहसः ॥ ६ ॥

भाषार्थः—(येन) जिसके द्वारा (देवाः) विद्वान् देवताओं ने (अमृतम्)

र्शनात्—निरु० २। ११। साक्षात्कृतधर्म्माणः। सन्मार्गदर्शकाः। अतीन्द्रियार्थदर्शिनः। **बलम्**। सामर्थ्यम्। **अद्योतयन्**। द्युत दीप्तौ—णिचि लङि रूपम्। अदीपयन्। **युजा**। सख्या, मित्रेण सह। **असुराणाम्**। सुरविरोधिनाम्। खलानाम्। **अयुवन्त**। यु मिश्रणामिश्रणयोः—आत्मनेपदं छान्दसम्। अयुवन्। पृथक् कृतवन्तः। **मायाः**। **माछाशसिभ्यो यः** (उ० ४।१०९) इति माङ् माने—यः। टाप्। प्रज्ञाः—निघ० ३। ९। छलानि। मिथ्याजालान्। **अग्निना**। परमात्मना। **पणीन्**। **सर्वधातुभ्य इन्** (उ० ४। ११८) इति पण व्यवहारे स्तुतौ च—इन्। पणिर्वणिग्भवति पणिः पणनात्—निरु० २। १७। कुव्यवहारिणः पुरुषान्। **इन्द्रः**। परमैश्वर्यवान् पुरुषः। **जिगाय**। जि जये—लिट्। जितवान्। अन्यत् पूर्ववत् म० १॥

६—**येन**। अग्निना परमेश्वरेण। **देवाः**। विद्वांसः। **अमृतम्**। अमरत्वम्।

अमरपन [मृत्यु से छुटकारा अर्थात् मोक्ष वा कीर्ति] को (अनु--अविन्दन्) अनन्तर पाया है, और (येन) जिसके आश्रय से (ओषधीः) यव आदि पदार्थों को (मधुमतीः) मधुर रस वाली (अकृण्वन्) बनाया है, और (येन) जिसके द्वारा (देवाः) देवताओं ने (स्वः) स्वर्ग अर्थात् महा आनन्द (आ अभरन्) यथावत् धारण किया है, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ ६ ॥

भावार्थः—जिस परमेश्वर की महिमा से महापुरुषों ने पुरुषार्थ करके अमरपन अर्थात् सुन्दर नाम प्राप्त किया है, और सांसारिक पदार्थों से विज्ञान पूर्वक उपकार लेकर अत्यन्त सुख पाया है, उसी जगदीश्वर के आश्रय से हम भी उद्योग करके दुःख से छूटें ॥ ६ ॥

यस्येदं प्रदिशि यद् विरोचते यज्जातं जनितव्यं च केवलम् ।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वंहसः ॥ ७ ॥

यस्य । इदम् । प्रऽदिशि । यत् । विऽरोचते । यत् । जातम् । जनितव्यम् । च । केवलम् । स्तौमि । अग्निम् । नाथितः । जोहवीमि । सः । नः । मुञ्चतु । अंहसः ॥ ७ ॥

भाषार्थः—(केवलम्) केवल (यस्य) जिस परमेश्वर के (प्रदिशि) शासन में (इदम्) यह [जगत्] है, अर्थात् (यत्) जो कुछ (विरोचते) चमकता है और (यत्) जो कुछ (जातम्) उत्पन्न हुआ है (च) और (जनि-

---

मोक्षम् । **अनु—अविन्दन्** । विद्लृ लाभे—लङ् । अनुक्रमेण अलभन्त । **ओषधीः** । व्रीहियवाद्यास्तरुगुल्माद्याश्च । **मधुमतीः** । मधुररसयुक्ताः । **अकृण्वन्** । अकुर्वन् । **स्वः** । स्वर्गं सुखम् । **आ—अभरन्** । डुभृञ् धारणपोषणयोः—लङ् सम्यग् अधारयन् । अलभन्तेत्यर्थः । अन्यत् पूर्ववत् ॥

७—**यस्य** । अग्नेः परमेश्वरस्य । **इदम्** । परिदृश्यमानं जगत् । **प्रदिशि** । प्रदेशने । प्रशासने । **यत्** । **विरोचते** । विविधं दीप्यते । **यत्** । **जातम्** । उत्पन्नम् । **जनितव्यम्** । जनयितव्यम् । जनिष्यमाणम् । **च** । समुच्चये । **केव-**

तव्यम्) उत्पन्न होगा। (नाथितः) मैं भक्त (अग्निम्) उस सर्वव्यापक परमेश्वर को (स्तौमि) सराहता हूं और (जोहवीमि) बारंबार पुकारता हूं। (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥७॥

भावार्थः—जगत्पिता परमेश्वर की आज्ञा में यह सब जगत् वर्तमान है, उसी की प्रार्थना उपासना करके मनुष्य अपने विघ्नों को हटाकर सदा धर्म में प्रवृत्त होकर प्रसन्न रहें ॥७॥

सूक्तम् २४ ॥

१-७ ॥ इन्द्रो देवता। १, ४ पादत्रयं जगती, अन्तिमोऽनुष्टुप्, २, ३, ५-७ पादत्रयं त्रिष्टुप्, अन्तिमोऽनुष्टुप् ॥

सर्वसुखप्राप्त्युपदेशः—पूर्ण सुख पाने का उपदेश ॥

इन्द्रस्य मन्महे शश्वदिदस्य मन्महे वृत्रघ्न स्तोमा उप मेम आगुः। यो दाशुषः सुकृतो हवमेति स नो मुञ्चत्वंहसः ॥१॥

इन्द्रस्य। मन्महे। शश्वत्। इत्। अस्य। मन्महे। वृत्रऽघ्नः। स्तोमाः। उप। मा। इमे। आ। अगुः। यः। दाशुषः। सुऽकृतः। हवम्। एति। सः। नः। मुञ्चतु। अंहसः ॥ १ ॥

भाषार्थः—(इन्द्रस्य) परम ऐश्वर्य वाले परमात्मा का (मन्महे) हम मनन करते हैं, (शश्वत् इत्) सदा ही (अस्य) इस (वृत्रघ्नः) शत्रुनाशक

लम्। अ० ३। १८। २। निश्चितम्। अनन्यसाधारणम्। **स्तौमि**। प्रशंसामि। **अग्निम्**। सर्वव्यापकं परमेश्वरम्। **नाथितः**। तदस्य संजातं तारकादिभ्य इतच् (पा० ५। २। ३६) इति नाथ-इतच्। नाथःस्वामी संजातो यस्य स नाथितः। नाथवान्। भक्तः। **जोहवीमि**। अ० २। १२। ३। पुनः पुनराह्वयामि। अन्यद् व्याख्यातम् म० १ ॥

१—**इन्द्रस्य**। परमैश्वर्ययुक्तस्य परमात्मनः। **मन्महे**। मनुमहे। मननं कुर्मः। **शश्वत्**। सर्वदा। **इत्**। निश्चयेन। **अस्य**। इन्द्रस्य। **वृत्रघ्नः**। अ० १।

वा अन्धकार निवारक का (मन्महे) हम मनन करते हैं। (इमे) ये (स्तोमाः) स्तुति के ज्ञान (मा) मुझको (उप आ अगुः) प्राप्त हुये हैं। (यः) जो परमेश्वर (दाशुषः) दानशील और (सुकृतः) सुकर्मी पुरुष के (हवम्) आवाहन को (एति) प्राप्त होता है, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ १ ॥

भावार्थः—परमेश्वर के गुणों को नित्य गाते हुए हम लोग पाप से बचकर धर्म प्रचार करें ॥ १ ॥

य उग्रीणामुग्रबाहुर्ययुर्यो दानवानां बलमारुरोज ।
येन जिताः सिन्धवो येन गावः स नो मुञ्चत्वंहसः ॥ २ ॥

यः । उग्रीणाम् । उग्रऽबाहुः । ययुः । यः । दानवानाम् । बलम् । आऽरुरोज । येन । जिताः । सिन्धवः । येन । गावः । सः । नः । मुञ्चतु । अंहसः ॥ २ ॥

भाषार्थः—(यः) जो (ययुः) शीघ्रगामी परमात्मा (उग्रीणाम्) प्रचण्ड सेनाओं की (उग्रबाहुः) भुजाओं को प्रचण्ड करने वाला है, (यः) जिसने (दानवानाम्) छेदनशील राक्षसों का (बलम्) बल (आरुरोज) तोड़ दिया है, (येन) जिस परमेश्वर करके (सिन्धवः) जल और (येन)

---

२१ । १ । शत्रुनाशकस्य । अन्धकारनिवारकस्य । **स्तोमाः** । **अर्तिस्तुसुहु०** (उ० १।१४०) ष्टुञ् स्तुतौ-मन् । स्तोत्राणि । **उप** । समीपे । **मा** । मां सेवकम् । **इमे** । वक्ष्यमाणाः । **आ अगुः** । इण् गतौ-लुङ् । आगमन् । **यः** । इन्द्रः । **दाशुषः** । **दाश्वान् साह्वान् मीढ्वांश्च** (पा० ६ । १ । १२) इति दाशृ दाने-क्वसौ निपात्यते । दानशीलस्य । **सुकृतः** । शोभनकर्मणः । धार्मिकस्य पुरुषस्य । **हवम्** । अ० १ । १५ । २ । आह्वानम् । **एति** । गच्छति प्राप्नोति । अन्यद् व्याख्यातम् ॥

२—**यः** । इन्द्रः । **उग्रीणाम्** । **षिद्गौरादिभ्यश्च** (पा० ४ । १ । ४१) इति उग्र-ङीष् । उग्रस्वभावानां प्रजानां सेनानां वा । **उग्रबाहुः** । उग्रा बाहवो यस्मात् स तथाभूतः । अतिशयेन बलदाता इत्यर्थः । **ययुः** । **यो द्वे च** (उ० १ । २१) इति या प्रापणे-उप्रत्ययः, द्वित्वं च । शीघ्रगामी । **दानवानाम्** । दो

जिस करके (गावः) वायु, सूर्य, और भूलोक (जिताः) जीते गये हैं, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥२॥

भावार्थः—जिस परमेश्वर ने सब विघ्नों का नाश करके जल पृथिवी आदि पदार्थों को उपकारी बनाया है, उसी की उपासना से हम सामर्थ्य बढ़ाकर क्लेशों से बचें ॥ २ ॥

यश्चर्षणिप्रो वृषभः स्वर्विद् यस्मै ग्रावाणः प्रवदन्ति नृम्णम् । यस्याध्वरः सप्तहोता मदिष्ठः स नो मुञ्चत्वंहसः ॥३॥

यः । चर्षणिऽप्रः । वृषभः । स्वःऽवित् । यस्मै । ग्रावाणः । प्रऽवदन्ति । नृम्णम् । यस्य । अध्वरः । सप्तऽहोता । मदिष्ठः । सः । नः । मुञ्चतु । अंहसः ॥ ३ ॥

भाषार्थः—(यः) जो परमेश्वर (चर्षणिप्रः) उद्योगी पुरुषों का मनोरथ पूरा करने वाला, (वृषभः) सुख की वर्षा करने वाला, श्रेष्ठ और (स्वर्वित्) स्वर्ग अर्थात् मोक्ष प्राप्त कराने हारा है। और (यस्मै) जिसके [आज्ञा पालन के] लिये (ग्रावाणः) शास्त्र वेत्ता पण्डित जन (नृम्णम्) बल वा धन (प्रवदन्ति) बताते हैं। (यस्य) जिसका (अध्वरः) सन्मार्गदर्शक वा हिंसारहित

अवखण्डने-ल्युट् इति दानं = छेदनम्, ततः **छन्दसीवनिपौ च** (वा० पा० ५।२।१०९) इति-वप्रत्ययो मत्वर्थे। छेदनशीलानां राक्षसानाम्। **बलम्**। सामर्थ्यम्। **आ-रुरोज**। रुजो भङ्गे-लिट्। सर्वतो बभञ्ज। **येन**। इन्द्रेण। **जिताः**। वशीकृताः। **सिन्धवः**। स्यन्दनशीलानि जलानि। **गावः**। गच्छतीति गौः। वायुसूर्यभूलोकाः। अन्यद्गतम् ॥

३—**यः**। इन्द्रः। **चर्षणिप्रः**। **अर्तिसृधृ०** (उ० २। १०२) इति चर गतौ-अनिः, षुगागमश्च। यद्वा। **कृषेरादेश्च चः**[1] (उ० २। १०४) इति कृष विलेखने-अनिः, आदेश्च चः। चर्षणयो मनुष्याः-निघ० २। ३। **आतोऽनुपसर्गे कः** (पा० ३। २। ३) इति प्रा पूरणे-कः। मनुष्याणां मनोरथपूरकः। **वृषभः**। अ० ४। ५। १। सुखस्य वर्षकः। श्रेष्ठः। **स्वर्वित्**। अन्तर्गतण्यर्थः। स्वर्गस्य प्रापयिता। **यस्मै**। इन्द्राय। **ग्रावाणः**। अ० ३। १०। ५। गृ शब्दे-क्वनिप्

---

१. इस विषय में अ० १।५।४ पृ० २६ पर 'चर्षणीनाम्' की टिप्पणी देखें ॥ सम्पा०॥

व्यवहार (सप्तहोता) सातहोताओं से [अर्थात् विषयों के ग्रहण करने और देने वाले त्वचा, नेत्र, कान, जिह्वा, नाक, मन और बुद्धि से] साक्षात् किया हुआ (मदिष्ठः) अतिशय आनन्द दायक है, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ ३ ॥

भावार्थः—मनुष्य परमेश्वर के अनन्त सुखदायक गुणों को साक्षात् करके पुरुषार्थ पूर्वक कष्टों को नाश करके आनन्द प्राप्त करें ॥ ३ ॥

यहाँ पर 'सप्त प्राणान्' (अ० २ । १२ । ७) और 'सप्त ऋषयः' (अ० ४ । ११ । ९) इन पदों की भी व्याख्या देखो ॥

यस्य॑ व॒शास॑ ऋष॒भास॑ उ॒क्षणो॒ यस्मै॑ मी॒यन्ते॒ स्वर॑वः स्व॒र्विदे॑ ।
यस्मै॑ शु॒क्रः पव॑ते॒ ब्रह्म॑शुम्भि॒तः स नो॑ मुञ्च॒त्वंह॑सः ॥ ४ ॥

यस्य॑ । व॒शासः॑ । ऋ॒ष॒भासः॑ । उ॒क्षणः॑ । यस्मै॑ । मी॒यन्ते॑ । स्वर॑वः । स्वः॒ऽविदे॑ ।
यस्मै॑ । शु॒क्रः । पव॑ते । ब्रह्म॑ऽशुम्भितः । सः । नः॒ । मु॒ञ्च॒तु॒ । अंह॑सः ॥४॥

शास्त्रविज्ञापकाः । पण्डिताः । **प्रवदन्ति** । प्रकथयन्ति । **नृम्णम्** । णम प्रह्वत्वे-शब्दे च-पचाद्यच् । पृषोदरादित्वादाद्यन्तविपर्ययोऽलोपश्च इति नृम्ण रूपं जातम् । नृम्णं च बलं नॄन्नतम्-निरु० ११ । ९ । नॄन् नमयति प्रह्वीकरोतीति । बलम्-निघ० २ । ९ । धनम्—निघ० २ । १० । **यस्य** । इन्द्रस्य । **अध्वरः** । अ० १ । ४ । २ । सन्मार्गदाता हिंसारहितो वा व्यवहारः । **सप्तहोता** । सप्त+हु दानादनयोः—तृच् । सप्तहोता सप्तास्मै रश्मयो रसानभिसन्नामयन्ति, सप्तैनमृषयः स्तुवन्तीति वा—निरु० ११ । २३ । सप्त त्वक्चक्षुः श्रवणरसनाघ्राणमनोबुद्धयो होतारो विषयाणां ग्रहीतारो दातारः साक्षात्कर्तारो यस्य स सप्तहोता । अत्र 'सप्त प्राणान्' इत्यस्य पदस्य, अ० २ । १२ । ७ । तथा 'सप्तऋषयः' इत्यस्य पदस्य च,अ० ४ । ११ । ९ । व्याख्या द्रष्टव्या । **मदिष्ठः** । मदी हर्षे—तृच् । **तुश्छन्दसि** (पा० ५ । ३ । ५९) इति इष्ठन् । **तुरिष्ठेमेयस्सु** (पा० ६।४।१५४) इति तृलोपः । अतिशयेन मादयिता हर्षकः । अन्यत् पूर्ववत् ॥

भाषार्थः—(यस्य) जिस परमेश्वर के (वशासः) वशीभूत होकर (ऋषभासः) धर्म जानने वाले ऋषि लोग (उक्षणः) सुख की वर्षा करने वाले होते हैं, और (यस्मै) जिस (स्वर्विदे) सुख प्राप्त कराने वाले के लिये (स्वरवः) जयस्तम्भ (मीयन्ते) गाड़े जाते हैं। (यस्मै) जिसके लिये (ब्रह्मशुम्भितः) वेदों से कहा गया (शुक्रः) निर्मल सोम रस [अमृत वा मोक्षानन्द] (पवते) शुद्ध किया जाता है। (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ ४ ॥

भावार्थः—जिस परमात्मा की आज्ञा पालन से ऋषि महात्मा वेदों का उपदेश करके संसार को सुख देते हैं और शूरवीर लोग शत्रुओं पर जय पाते हैं तथा ब्रह्मज्ञानी मोक्ष सुख प्राप्त करते हैं, वही परमात्मा हमारे कष्टों को मिटावे ॥ ४ ॥

यस्य जुष्टिं सोमिनः कामयन्ते यं हवन्त इषुमन्तं गविष्टौ ।
यस्मिन्नर्कः शिश्रिये यस्मिन्नोजः स नो मुञ्चत्वंहसः ॥ ५ ॥

यस्य । जुष्टिम् । सोमिनः । कामयन्ते । यम् । हवन्ते । इषुऽमन्तम् । गोऽइष्टौ । यस्मिन् । अर्कः । शिश्रिये । यस्मिन् । ओजः । सः । नः । मुञ्चतु । अंहसः ॥ ५ ॥

४—**यस्य** । इन्द्रस्य परमेश्वरस्य । **वशासः** । असुगागमः । वशाः अधीनाः सन्तः । **ऋषभासः** । अ० ३ । ६ । ४ । असुगागमः । ऋषन्ति प्राप्नुवन्ति सर्वान् मन्त्रानिति ऋषभाः । साक्षात्कृतधर्माण ऋषयः । ऋषिर्दर्शनात्—निरु० २ । ११ । श्रेष्ठाः । **उक्षणः** । अ० ३ । ११ । ८ । उक्षाणः । बलवन्तः । **यस्मै** । इन्द्राय । **मीयन्ते** । डुमिञ् प्रक्षेपणे । स्थाप्यन्ते । **स्वरवः** । शॄस्वृस्निहि० (उ० १ । १०) इति स्वृ शब्दोपतापयोः—उः । यूपाः । जयस्तम्भाः । **स्वर्विदे** । म० ३ । स्वर्गप्रापकाय । **शुक्रः** । अ० २ । ११ । ५ । शुक्रं शोचतेर्ज्वलतिकर्मणः—निरु० ८ । ११ । निर्मलो रसवान् सोमः । **पवते** । गच्छति—निघ० २ । १४ । पूयते । **ब्रह्मशुम्भितः** । शुम्भ भाषणभासनहिंसासु—क्तः । ब्रह्मभिर्वेदैः शुम्भितो भाषितः कथितः । अन्यत् पूर्ववत् ॥

भाषार्थः—(सोमिनः) सोम अर्थात् ऐश्वर्य वाले पुरुष (यस्य) जिस परमात्मा की (जुष्टिम्) प्रीति की (कामयन्ते) कामना करते हैं, (यम्) जिस (इषुमन्तम्) दृष्टि वाले परमात्मा को (गविष्टौ) वज्रों के दान स्थान, संग्राम में [शूर लोग] (हवन्ते) पुकारते हैं। (यस्मिन्) जिसमें (अर्कः) अन्न और (यस्मिन्) जिसमें (ओजः) पराक्रम (शिश्रिये) आश्रित हुआ है, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ ५ ॥

भावार्थः—जिस परमात्मा के आश्रय से ऐश्वर्य, विजय, अन्न, और पराक्रम प्राप्त होते हैं, उसी के विश्वास पर हम पुरुषार्थ पूर्वक दुखों का नाश करें ॥ ५ ॥

यः प्रथमः कर्मकृत्याय जज्ञे यस्य वीर्यं प्रथमस्यानुबुद्धम्। येनोद्यतो वज्रोऽभ्यायताहिं स नो मुञ्चत्वंहसः ॥६॥

यः। प्रथमः। कर्मऽकृत्याय। जज्ञे। यस्य। वीर्यम्। प्रथमस्य। अनुऽबुद्धम्। येन। उत्ऽयतः। वज्रः। अभिऽआयत। अहिम्। सः। नः। मुञ्चतु। अंहसः ॥ ६ ॥

भाषार्थः—(यः) जो (प्रथमः) मुख्य परमात्मा (कर्मकृत्याय) कर्म करने वाले के हित के लिये (जज्ञे) प्रकट हुआ है, (यस्य) जिस (प्रथमस्य)

५—**यस्य**। परमात्मनः। **जुष्टिम्**। जुषी प्रीतिसेवनयोः-क्तिन्। प्रीतिम्। **सोमिनः**। सोमवन्तः। ऐश्वर्यवन्तः। **कामयन्ते**। अभिलषन्ति। **यम्**। इन्द्रम्। **हवन्ते**। आह्वयन्ति। **इषुमन्तम्**। **ईषेः किच्च** (उ० १।१३) इति ईष गतिहिंसादर्शनेषु-उः। ह्रस्वश्च। दर्शनवन्तम्। **गविष्टौ** गौरिति वज्रम् इत्याप्टे कोषः। यज देवपूजासङ्गतिकरणदानेषु-क्तिन्। गवां वज्राणां शस्त्राणामिष्टदानं यत्र। संग्रामे। **यस्मिन्**। इन्द्रे। **अर्कः**। **कृदाधारार्चिकलिभ्यः कः** (उ० ३। ४०) इति अर्च पूजायाम्-कः, अर्कः—अन्ननाम्-निघ० २। ७। अर्कमन्नं भवत्यर्चति भूतानि—निरु० ५। ४। अन्नम्। **शिश्रिये**। श्रिञ् सेवायाम्-लिट्। आश्रितो बभूव। **ओजः**। बलम्। पराक्रमः। अन्यत् पूर्ववत् ॥

६—**यः**। इन्द्रः परमेश्वरः। **प्रथमः**। मुख्यः। श्रेष्ठः। **कर्मकृत्याय**। **विभाषा कृवृषोः** (पा० ३। १। १२०) इति डुकृञ् करणे—कर्तरि क्यप् तुक् च।

श्रेष्ठ परमात्मा का (वीर्यम्) सामर्थ्य (अनुबुद्धम्) सर्वत्र जाना गया है। (येन) जिस परमात्मा करके (उद्यतः) उठाये गये (वज्रः) वज्र ने (अहिम्) हनन करने वाले शत्रु को (अभ्यायत) हनन कर दिया है, (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे ॥ ६ ॥

भावार्थः—सर्वशक्तिमान् परमेश्वर वैदिक कर्म करने वालों का सदा आनन्ददायक है, उसी शत्रुनाशक जगदीश्वर की कृपा से हम अपने दोषों को त्याग कर सदा प्रसन्न रहें ॥ ६ ॥

यः संग्रामान् नयति संयुधे वशी यः पुष्टानि संसृजति द्वयानि। स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वंहसः ॥७॥

यः । सम्ऽग्रामान् । नयति । सम् । युधे । वशी । यः । पुष्टानि । सम्ऽसृजति । द्वयानि । स्तौमि । इन्द्रम् । नाथितः । जोहवीमि । सः । नः । मुञ्चतु । अंहसः ॥७॥

भाषार्थः—(यः) जो (वशी) स्वतन्त्र परमात्मा (संग्रामान्) संग्राम करने वाले योधाओं को (युधे) युद्ध करने के लिये (संनयति) यथावत् ले चलता है, और (यः) जो (द्वयानि) दो प्रकार की [शारीरिक और आत्मिक]

कर्मणां कर्तुर्हिताय । **जज्ञे** । जातवान् । प्रादुर्बभूव । **यस्य** । **वीर्यम्** । सामर्थ्यम् । **प्रथमस्य** । श्रेष्ठस्य । **अनुबुद्धम्** । अनुज्ञातम् । **येन** । इन्द्रेण । **उद्यतः** । उद्धृतः । **वज्रः** । दण्डः । **अभ्यायत** । आङ् पूर्वाद् यमेर्लुङि च्लेः सिच् । **यमो गन्धने** (पा० १ । २ । १५) इति सिचेः कित्वात्, **अनुदात्तोपदेश०** (पा० ६ । ४ । ३७) इति अनुनासिकलोपः । **ह्रस्वादङ्गात्** (पा० ८ । २ । २७) इति सिच्लोपः । अभितः सर्वतोऽहिंसीत् । **अहिम्** । अ० २ । ५ । ५ । आहन्तारम् । क्लेशप्रदम् । अन्यत् पूर्ववत् ॥

७—यः । इन्द्रः परमेश्वरः । **संग्रामान्** । संग्राम युद्धे-पचाद्यच् । योद्धॄन् । **सन्नयति** । सम्यक् प्रापयति । **युधे** । युद्धाय । **वशी** । स्वतन्त्रः । **पुष्टानि** । पोषणानि । **संसृजति** । सम्यग् ददाति । **द्वयानि** । **संख्याया अवयवे तयप्**

(पुष्टानि) पुष्टियां (संसृजति) यथावत् देता है। (नाथितः) मैं भक्त (इन्द्रम्) परमैश्वर्य वाले परमात्मा को (स्तौमि) सराहता हूँ और (जोहवीमि) बारंबार पुकारता हूँ (सः) वह (नः) हमें (अंहसः) कष्ट से (मुञ्चतु) छुड़ावे॥७॥

भावार्थः—जो परमेश्वर सत्यवादी शूरों का जय करता है और वेद द्वारा शरीर और आत्मा को सुख देता है, उसी परमात्मा की उपासना और प्रार्थना से सब मनुष्य पुरुषार्थी होकर कष्टों को निवारें॥७॥

सूक्तम् २५ ॥

१–७ ॥ वायुसवितारौ देवते १, २, ४–६ पादत्रयं त्रिष्टुप्, अन्तिमोऽनुष्टुप्, ३ त्रिष्टुप् ७-७ बृहती छन्दः ॥

वायुसूर्यगुणोपदेशः—पवन और सूर्य के गुणों का उपदेश ॥

वायोः सवितुर्विदथानि मन्महे यावात्मन्वद् विशथो यौ च रक्षथः। यौ विश्वस्य परिभू बभूवथुस्तौ नो मुञ्चतमंहसः ॥१॥

वायोः। सवितुः। विदथानि। मन्महे। यौ। आत्मन्ऽवत्। विशथः। यौ। च। रक्षथः। यौ। विश्वस्य। परिभू इति परिऽभू। बभूवथुः। तौ। नः। मुञ्चतम्। अंहसः॥ १ ॥

भाषार्थः—(वायोः) गतिशील वा दोषनाशक पवन के और (सवितुः) सर्वप्रेरक सूर्य के (विदथानि) कर्मों को (मन्महे) हम विचारते हैं। (यौ) जो तुम (यौ) गमनशील होकर (आत्मन्वत्) आत्मा वाले जगत् (विशथः)

(पा० ५। २। ४२) इति द्वि-तयप्। **द्वित्रिभ्यां तयस्यायज्वा** (पा०५।२।४३) इति तयस्य अयच्। द्वौ अवयवौ यस्य तद्द्वयम्। द्वन्द्वानि। शारीरिकात्मिकानि। **इन्द्रम्**। परमैश्वर्यवन्तं परमात्मानम्। अन्यद् व्याख्यातम्–सू० २३ म० ७॥

१—**वायोः। कृवापा०** (उ० १। १) इति वा गतिगन्धनयोः–उण् युगागमः। गमनशीलस्य दोषनाशकस्य वा जगदाधारभूतस्य वातस्य। **सवितुः**। सर्वप्रेरकस्य सूर्यस्य। **विदथानि**। विद ज्ञाने–अथः। वेदितव्यानि कर्माणि। **मन्महे**। जानीमः। विचारयामः। **यौ**। वायुसवितारौ युवाम्। **आत्म-**

प्रवेश करते हो (च) और (रक्षथः) रक्षा करते हो, (यौ) जो तुम दोनों (विश्वस्य) सब जग के (परिभू) सहारा देने वाले (बभूवथुः) हुये हो, (तौ) वह तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥१॥

भावार्थः—वायु और सूर्य के यथावत् गुण जानकर मनुष्य आत्मिक शारीरिक और सामाजिक उन्नति करें ॥ १ ॥

यर्योः संख्याता वरिमा पार्थिवानि याभ्यां रजो युपितमन्तरिक्षे । यर्योः प्रायं नान्वानशे कश्चन तौ नो मुञ्चतमंहसः ॥ २ ॥

यर्योः । सम्ऽख्याता । वरिमा । पार्थिवानि । याभ्याम् । रजः । युपितम् । अन्तरिक्षे । यर्योः । प्रऽअयम् । न । अनुऽआनशे । कः । चन । तौ । नः । मुञ्चतम् । अंहसः ॥ २ ॥

भाषार्थः—(ययोः) जिन दोनों [वायु सूर्य] के (संख्याता) गिने हुए (पार्थिवानि) पृथिवी के (वरिमा) विस्तार हैं, (याभ्याम्) जिन दोनों करके (अन्तरिक्षे) आकाश में (रजः) जल वा जगत् (युपितम्) विमोहित किया गया [मेघ मण्डल में ताड़न शक्ति से रोका गया] है। (ययोः) जिन दोनों की

न्वत् । अ० ४ । १० । ७ । सात्मकं स्थावरजङ्गमात्मकं जगत् । जीवनशक्तियुक्तम् । **विशथः** । प्रविशथः । **यौ** । या प्रापणे-डः । यातारौ । गन्तारौ सन्तौ । रक्षथः । पालयथः । **विश्वस्य** । सर्वस्य जगतः । **परिभू** । अ० ३।२१।४। **सुपां सुलुक्**० (पा० ७।१।३९) इति पूर्वसवर्णदीर्घः । परिग्रहीतारौ । सर्वतो व्यापकौ । **बभूवथुः** । **तौ** । तथाभूतौ युवाम् । **नः** । अस्मान् । **मुञ्चतम्** । मोचयतम् । **अंहसः** । कष्टात् ॥

२— **ययोः** । वायुसवित्रोः । **संख्याता** । संख्यातानि परिगणितानि । **वरिमा** । **पृथ्वादिभ्य इमनिज् वा** (पा० ५ । १ । १२२) इति उरु-इमनिच् । **प्रियस्थिर**० (पा० ६ । ४ । १५७) इति वर् आदेशः टेर्लोपः । वरिमाणि । उरुत्वानि । महत्वानि । **पार्थिवानि** । **पृथिव्या ञाञौ** (वा० पा० ४ । १ । ८५) इति पृथिवी-अञ् । पृथिव्यां भवानि जातानि । **याभ्याम्** । वायुसवितृभ्याम् । **रजः** । अ० ४ । १ । ४ । उदकम् । जगत् । **युपितम्** । युपु विमोहने-क्तः ।

(प्रायम्) उत्तम गति को (कश्चन) कोई भी जीव (न) नहीं (अन्वानशे) पहुंचा है, (तौ) वह तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ाओ ॥२॥

भावार्थः—जगत् व्यापी वायु और सूर्य के प्रभाव से जल पृथिवी से आकाश पर और आकाश से पृथिवी पर आता है, और उनको मनुष्य जितना जितना खोजते हैं, उतना उतना ही अधिक उनका विषय जानते जाते हैं, उन वायु और सूर्य से यथावत् उपकार लेकर हम लाभ उठावें ॥२॥

तव व्रते निविशन्ते जनासस्त्वय्युदिते प्रेरते चित्रभानो। युवं वायो सविता च भुवनानि रक्षथस्तौ नो मुञ्चतमंहसः ॥ ३ ॥

तव। व्रते। नि। विशन्ते। जनासः। त्वयि। उत्ऽइते। प्र। ईरते। चित्रभानो इति चित्रऽभानो। युवम्। वायो इति। सविता। च। भुवनानि। रक्षथः। तौ। नः। मुञ्चतम्। अंहसः ॥ ३ ॥

भाषार्थः—[हे वायु] (तव) तेरे (व्रते) वरणीय नियम में (जनासः) सब जने (निविशन्ते) प्रवृत्त होते हैं, और (चित्रभानो) हे विचित्र प्रकाश वाले सूर्य! (त्वयि उदिते) तेरे उदय होने पर [कामों में] (प्रेरते) लगते हैं। (वायो) हे वायु! (च) और (सविता) हे सूर्य! (युवम्) तुम दोनों (भुवनानि) सब प्राणियों को (रक्षथः) बचाते हो, (तौ) तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ३ ॥

विमोहितम्। ताडनैर्मेघमण्डले धृतम्। **अन्तरिक्षे**। आकाशे। **प्रायम्**। एरच् (पा० ३।३।५६) इति प्र+इण् गतौ-अच्। प्रकृष्टगमनम्। **न**। निषेधे। **अन्वानशे**। अशूङ् व्याप्तौ-लिट्। अनुप्राप। अनुगन्तुं समर्थो बभूव। **कश्चन**। कोऽपि जीवः। अन्यत् पूर्ववत् ॥

३—[हे वायो]। **तव**। त्वदीये। **व्रते**। अ० २। ३०। २। वरणीये कर्मणि। नियमे। **निविशन्ते**। **नेर्विशः** (पा० १।३।१७) इति आत्मनेपदम्। नितरां वर्तन्ते। **जनासः**। जनाः। प्राणिनः। **त्वयि**। सवित्रि। **उदिते**। उदयं प्राप्ते सति। **प्रेरते**। ईर गतौ। प्रवर्तन्ते। **चित्रभानो**। हे विचित्रदीप्ते सवितः।

भावार्थः—वायुविद्या और सूर्यविद्या से उपकार लेकर मनुष्य अनेक प्रकार के लाभ उठावें ॥ ३ ॥

अपेतो वायो सविता च दुष्कृतमप रक्षांसि शिमिदां च सेधतम्।
संह्यू३'र्जया सृजथः सं बलेन तौ नो मुञ्चतमंहसः ॥ ४ ॥

अप । इतः । वायो इति । सविता । च । दुःऽकृतम् । अप । रक्षांसि । शिमिदाम् । च । सेधतम् । सम् । हि । ऊर्जया । सृजथः । सम् । बलेन । तौ । नः । मुञ्चतम् । अंहसः ॥ ४ ॥

भाषार्थः—(वायो) हे वायु (च) और (सविता) हे सूर्य ! तुम दोनों (इतः) यहां से (दुष्कृतम्) मलिन काम को (अप=अप सेधतम्) हटा दो, (रक्षांसि) निवारणीय रोगों (च) और (शिमिदाम्) कर्म छेदन करने हारी पीडा को (अप सेधतम्) निकाल दो । (हि) क्योंकि (ऊर्जया) आत्मिक पुष्टि के साथ (संसृजथः) तुम दोनों मिलाते हो और (बलेन) शारीरिक बल के साथ (सम्=संसृजथः) तुम दोनों संयुक्त करते हो (तौ) सो तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ४ ॥

भावार्थः—मनुष्य पवन और सूर्य के यथावत् सेवन और उपयोग से

युवम् । युवाम् । **वायो** । **सविता** । हे सवितः, त्वम् । **च** । **भुवनानि** । भूतजातानि । **रक्षथः** । पालयथः । अन्यत् पूर्ववत् ॥

४—अप । =अप सेधतम् । **इतः** । अस्मात्स्थानात् । **वायो** । **सविता** । हे सवितः ! **च** । समुच्चये । **दुष्कृतम्** । दुष्टं कर्म । **अप सेधतम्** । षिध गत्याम्, अन्तर्गतो णिजर्थः । अपगमयतम् । **रक्षांसि** । रक्षो रक्षितव्यमस्मात्—निरु० ४ । १८ । उपद्रवकारिणो रोगान् । **शिमिदाम्** । सर्वधातुभ्य इन् (उ० ४ । ११८) इति शमु उपशमने—इन्, आकारस्य इकारः । शिमी कर्मनाम—निघ० २ । १ । दाप् लवने—डः । टाप् । कर्मछेदिकां पीडाम् । **च** । **हि** । अवश्यम् । **ऊर्जया** । ऊर्ज बलप्राणनयोः–पचाद्यच्, टाप् । पुष्ट्या । मानसिकपराक्रमेण ।

दोषों और मलिनता को दूर करके स्वस्थ रहें और आत्मिक तथा शारीरिक बल बढ़ाकर संसार में उन्नति करें ॥ ४ ॥

र॒यिं मे॒ पोषं॑ सवि॒तोत वा॒युस्त॒नू दक्ष॒मा सु॑वतां सु॒शेव॑म् ।
अ॒य॒क्ष्मता॑तिं॒ मह॑ इ॒ह ध॑त्तं॒ तौ नो॑ मुञ्चत॒मंह॑सः ॥५॥

र॒यिम् । मे॒ । पोष॑म् । स॒वि॒ता । उ॒त । वा॒युः । त॒नू इति॑ । दक्ष॑म् । आ । सु॒व॒ताम् । सु॒ऽशेव॑म् । अ॒य॒क्ष्म॒ऽता॑तिम् । मह॑ः । इ॒ह । ध॒त्त॒म् । तौ । न॒ः । मु॒ञ्च॒त॒म् । अंह॑सः ॥ ५ ॥

भाषार्थः—(सविता) सूर्य (उत) और (वायुः) पवन (मे) मेरे लिये (तनू=तन्वाम्) अपने शरीर में वर्त्तमान (सुशेवम्) अति सुखदायक (रयिम्) धन, (पोषम्) पुष्टि और (दक्षम्) बल को (आ सुवताम्) भेजें। (इह) यहाँ पर (अयक्ष्मतातिम्) नीरोगता और (महः) तेज (धत्तम्) तुम दोनों दान करो, (तौ) सो तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ५ ॥

भावार्थः—मनुष्य वायु और सूर्य के विज्ञान से ऋद्धि, सिद्धि, बल और स्वस्थता प्राप्त करके आनन्द भोगें ॥ ५ ॥

संसृजथः । संयोजयथः । **सम्** । संसृजथः । **बलेन** । शारीरिकसामर्थ्येन । अन्यत् पूर्ववत् ॥

५—**रयिम्** । धनम् । **मे** । मह्यम् । **पोषम्** । पुष्टिं समृद्धिम् । **सविता** । सूर्यः । **उत** । अपि च । **वायुः** । पवनः । **तनू** । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति सप्तम्या लुक् । **ईदूतौ च सप्तम्यर्थे** (पा० १ । १ । १९) इति प्रगृह्यम् । तन्वाम् । स्वशरीरे वर्तमानम् । **दक्षम्** । बलम्—निघ० २ । ९ । **आसुवताम्** । षू प्रेरणे । समन्तात् प्रेरयताम् । प्रयच्छताम् । **सुशेवम्** । **इण्-शीभ्यां वन्** (उ० १ । १५२) इति शीङ् स्वप्ने-वन् । शेवं सुखम्-निघ० ३ । ६ । अतिशयेन सुखकरम् । **अयक्ष्मतातिम्** । **भावे च** (पा० ४ । ४ । १४४) इति बाहुलकात् भावे तातिल् । अयक्ष्मताम् । यक्ष्माद् राहित्यम् । आरोग्यम् । **महः** । तेजः । **इह** । अस्मिन् शरीरे । **धत्तम्** । दत्तम् । अन्यत् पूर्ववत् ॥

प्र सुमतिं सवितर्वाय ऊतये महस्वन्तं मत्सरं मादयाथः।
अर्वाग् वामस्य प्र वतो नि यच्छतं तौ नो मुञ्चतमंहसः॥६॥

प्र। सुऽमतिम्। सवितः। वायो इति। ऊतये। महस्वन्तम्। मत्सरम्। मादयाथः। अर्वाक्। वामस्य। प्रऽवतः। नि। यच्छतम्। तौ। नः। मुञ्चतम्। अंहसः॥६॥

भाषार्थः—(सवितः) हे सूर्य! (वायो) हे वायु! (ऊतये) हमारी रक्षा के लिये (सुमतिम्) सुमति और (महस्वन्तम्) तेज वाले (मत्सरम्) हर्ष को (प्र) अच्छे प्रकार (मादयाथः) तुम दोनों परिपूर्ण करो। (अर्वाक्) हमारे सन्मुख (प्रवतः) बड़ाई वाले (वामस्य) धन का (नि) नियमपूर्वक (यच्छतम्) तुम दोनों दान करो। (तौ) सो तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो॥६॥

भावार्थः—मनुष्य सूर्य और वायु के गुणों का यथावत् प्रयोग करके बुद्धि प्रताप और धन बढ़ा कर आनन्द भोगें॥६॥

उप श्रेष्ठा न आशिषो देवयोर्धामन्नस्थिरन्।
स्तौमि देवं सवितारं च वायुं तौ नो मुञ्चतमंहसः॥७॥

उप। श्रेष्ठाः। नः। आऽशिषः। देवयोः। धामन्। अस्थिरन्।

६—प्र। प्रकर्षेण। **सुमतिम्**। शोभनां बुद्धिम्। **सवितः**। हे सूर्य! **वायो**। हे पवन! **ऊतये**। रक्षणाय। **महस्वन्तम्**। तेजोवन्तम्। **मत्सरम्**। **कृधूमदिभ्यः कित्** (उ० ३। ७३) इति मदी हर्षे-सरन्। मत्सरः सोमो मन्दतेस्तृप्तिकर्मणो मत्सर इति लोभनामाभिमत्त एनेन धनं भवति—निरु० २। ५। हर्षम्। सोमम्। आनन्दरसम्। **मादयाथः**। मद तृप्तियोगे-चुरादिः। णिच्-लेट्। युवां तर्पयतं पूरयतम्। **अर्वाक्**। सन्मुखम्। **वामस्य**। धनस्य। **प्रवतः**। अ० ३। १। ४। प्रकर्षवतः। **नि**। नियमेन। **यच्छतम्**। दाण् दाने। **पाघ्राध्मा०** (पा० ७। ३। ७८) इति यच्छ आदेशः। दानं कुरुतम्। अन्यत् पूर्ववत्॥

स्तौमि । देवम् । सवितारम् । च । वायुम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ७ ॥

भाषार्थः—(देवयोः) उन दोनों देवों की [=के लिये] (श्रेष्ठाः) श्रेष्ठ (आशिषः) कामनायें (नः) हमारे (धामन्) देह में (उप अस्थिरन्) उपस्थित हुई हैं । (देवम्) दिव्य (सवितारम्) सूर्य (च) और (वायुम्) वायु की (स्तौमि) मैं स्तुति करता हूं । (तौ) सो तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ७ ॥

भावार्थः—मनुष्य सूर्य और वायु से गुण ग्रहण करने के लिये पूरी इच्छा अपने हृदय में स्थित करके प्रयत्न पूर्वक लाभ उठावें और सदा सुखी रहें ॥ ७ ॥

इति पञ्चमोऽनुवाकः ॥

अथ षष्ठोऽनुवाकः

सूक्तम् २६ ॥

१-७ ॥ द्यावापृथिव्यौ देवते ॥ सर्वत्रान्तिमः पादोऽनुष्टुप् । शेषाः पादाः–१ स्वराट् पथ्याबृहती, २-५ त्रिष्टुप्, ६, ७ बृहती ॥

द्यावापृथिव्योर्गुणोपदेशः—सूर्य और पृथिवी के गुणों का उपदेश ॥

मन्वे वां द्यावापृथिवी सुभोजसौ सचेतसौ ये अप्रथेथाम्

७—**उप** । उपसर्गः । **श्रेष्ठाः** । अतिशयेन प्रशस्ताः । **नः** । अस्माकम् । **आशिषः** । आङ्पूर्वः शासु इच्छायाम्–क्विप् । क्वौ च शास इत्वम् भवतीति वक्तव्यम् (वा० पा० ६ । ४ । ३४) इति इत्वम् । कामनाः । **देवयोः** । दानादिगुणयुक्तयोः । वायुसवित्रोः । **धामन्** । धामनि । स्थाने । देहे । **उप अस्थिरन्** । तिष्ठतेर्लुङि । **अकर्मकाच्च** (पा० १ । ३ । २६) इत्यात्मनेपदम्[1] । उपस्थिता अभवन् । **स्तौमि** । प्रशंसामि । **देवम्** । दिव्यम् । **सवितारम्** । सूर्यम् । **च** । **वायुम्** । पवनम् । अन्यत् पूर्ववत् ॥

---

१. यहाँ व्यत्यय से 'झ' के स्थान में रन् आदेश हुआ है ॥ सम्पा० ॥

अमिता योजनानि । प्रतिष्ठे ह्यभवतं वसूनां ते नो मुञ्चतमंहसः ॥ १ ॥

मन्वे । वाम् । द्यावापृथिवी इति । सुऽभोजसौ । सऽचेतसौ । ये इति । अप्रथेथाम् । अमिता । योजनानि । प्रतिस्थे इति प्रतिऽस्थे । हि । अभवतम् । वसूनाम् । ते इति । नः । मुञ्चतम् । अंहसः ॥ १ ॥

भाषार्थः—(सुभोजसौ) हे उत्तम भोग देने वाली वा पालन करने वाली (सचेतसौ) समान ज्ञान कराने वाली (द्यावापृथिवी) सूर्य पृथिवी ! (वाम्) तुम दोनों का (मन्वे) मैं मनन करता हूं, (ये) जिन तुम दोनों ने (अमिता) अगणित (योजनानि) संयोग कर्मों को (अप्रथेथाम्) प्रसिद्ध किया है और (हि) अवश्य ही (वसूनाम्) धनों की (प्रतिष्ठे) आधार (अभवतम्) हुई हो, (ते) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ १ ॥

भावार्थः—सूर्य और पृथिवी के परस्पर आकर्षण से अन्न, धन और अनेक संयोग वियोग क्रियायें प्रकट होती हैं, मनुष्य उनके गुणों का यथावत् उपयोग करके आनन्द भोगें ॥ १ ॥

१—**मन्वे** । मननं करोमि । **वाम्** । युवयोः । **द्यावापृथिवी** । हे द्यावापृथिव्यौ ! हे सूर्यभूलोकौ ! । **सुभोजसौ** । **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति भुज पालनाभ्यवहारयोः-असुन् । शोभनपालयित्र्यौ । सुष्ठु भोजयित्र्यौ । **सचेतसौ** । अ० १ । ३० । २ । समानचेतयित्र्यौ । **ये** । द्यावापृथिव्यौ । **अप्रथेथाम्** । प्रथ प्रख्याने-लङ् । प्रख्यातवत्यौ । प्रसिद्धी कृतवत्यौ । **अमिता** । माङ् माने शब्दे च-क्तः । अमितानि । अपरिमितानि, बहूनि । **योजनानि** । युजिर् योगे-ल्युट् । संयोजनानि । संयोगकर्माणि । **प्रतिष्ठे** । **आतश्चोपसर्गे** (पा० ३ । ३ । १०६) इति प्रति+ष्ठा गतिनिवृत्तौ-अधिकरणेऽङ् । आधारभूते । **हि** । अवश्यम् । **अभवतम्** । **वसूनाम्** । निवासहेतूनाम् । धननाम-निघ० २ । १० । **ते** । तथाभूते युवाम् । **नः** । अस्मान् । **मुञ्चतम्** । मोचयतम् । **अंहसः** । कष्टात् ॥

प्रतिष्ठे ह्यभवतं वसूनां प्रवृद्धे देवी सुभगे उरूची ।
द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ २ ॥

प्रतिस्थे इति प्रतिऽस्थे । हि । अभवतम् । वसूनाम् । प्रवृद्धे इति प्रऽवृद्धे । देवी इति । सुभगे इति सुऽभगे । उरूची इति । द्यावापृथिवी इति । भवतम् । मे । स्योने इति । ते इति । नः । मुञ्चतम् । अंहसः ॥ २ ॥

भाषार्थः—(प्रवृद्धे) हे बढ़ी वृद्धि वाली, (देवी) दिव्य स्वरूप (सुभगे) बड़े ऐश्वर्य वाली, (उरूची) वहुत पदार्थ प्राप्त कराने वाली तुम दोनों (हि) ही (वसूनाम्) धनों की (प्रतिष्ठे) आधार (अभवतम्) हुई हो। (द्यावा-पृथिवी) हे सूर्य और पृथिवी तुम दोनों (मे) मेरे लिये (स्योने) सुखवती (भवतम्) होओ। (ते) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ २ ॥

भावार्थः—मनुष्य सूर्य और पृथिवी के विज्ञान से अनेक ऐश्वर्य प्राप्त करके सुखी रहें ॥ २ ॥

असंतापे सुतपसौ हुवेऽहमुर्वी गम्भीरे कविभिर्नमस्ये ।
द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ ३ ॥

असंतापे इत्यसम्ऽतापे । सुऽतपसौ । हुवे । अहम् । उर्वी इति । गम्भीरे इति । कविऽभिः । नमस्ये ३ इति । द्यावा-

---

२—**प्रतिष्ठे** । म० १ । आधारभूते । **हि** । अवश्यम् । **अभवतम्** । **वसूनाम्** । धनानाम् । **प्रवृद्धे** । हे प्रकर्षेण वृद्धियुक्ते । **देवी** । हे देव्यौ दिव्यस्वरूपे । **सुभगे** । हे शोभनैश्वर्ये । **उरूची** । अ० ३ । ३ । १ । उरवो बहवः पदार्था अञ्चन्ति गच्छन्ति प्राप्नुवन्ति याभ्यां सकाशात् ते उरूच्यौ । बहुपदार्थप्रापिके । **द्यावापृथिवी** । हे सूर्यभूलोकौ ! । **भवतम्** । **मे** । मह्यम् । **स्योने** । अ० १ । ३३ । १ सुखवत्यौ । अन्यत् पूर्ववत् ॥

पृथिवी इति॑ । भव॑तम् । मे॒ । स्यो॒ने इति॑ । ते इति॑ । नः॒ । मु॒ञ्च॒तम् । अंह॑सः ॥ ३ ॥

भाषार्थः—(सुतपसौ) सुन्दर ताप रखने वाली, (असंतापे) संताप न देने वाली, (उर्वी) चौड़ी, (गम्भीरे) गहरी [शान्त स्वभाव वाली] (कविभिः) विद्वानों से (नमस्ये) नमस्कार योग्य तुम दोनों को (अहम्) मैं (हुवे) पुकारता हूँ । (द्यावापृथिवी) हे सूर्य और पृथिवी तुम दोनों (मे) मेरे लिये ......म० २ ॥ ३ ॥

भावार्थः—सूर्य के पिण्ड में ताप है जिससे पृथिवी तापयुक्त होती है। इस प्रकार दोनों के ताप से सब जगत् के पदार्थ रक्षित रहते हैं । उन दोनों के यथावत् ज्ञान से मनुष्य बुद्धिमान् होकर आनन्द प्राप्त करें ॥ ३ ॥

ये अ॒मृतं॑ बिभृ॒थो ये ह॒वींषि॒ ये स्रो॒त्या बि॑भृ॒थो ये म॑नु॒ष्या॑न् । द्यावा॑पृथिवी॒ भव॑तं मे स्यो॒ने ते नो॑ मुञ्चत॒मंह॑सः ॥ ४ ॥

ये इति॑ । अ॒मृत॑म् । बि॒भृ॒थः । ये इति॑ । ह॒वींषि॑ । ये इति॑ । स्रो॒त्याः । बि॒भृ॒थः । ये इति॑ । म॒नु॒ष्या॑न् । द्यावा॑पृथिवी॒ इति॑ । भव॑तम् । मे॒ । स्यो॒ने इति॑ । ते इति॑ । नः॒ । मु॒ञ्च॒तम् । अंह॑सः ॥४॥

भाषार्थः—(ये) जो तुम दोनों (अमृतम्) मृत्यु से बचने के साधन और (ये) जो तुम (हवींषि) देने और ग्रहण करने योग्य अन्न आदि पदार्थों को (बिभृथः) धारण करती हो, (ये) जो तुम दोनों (स्रोत्याः) जल वा

३—**असंतापे** । नास्ति संतापो याभ्याम् । असंतापकर्त्र्यौ । **सुतपसौ** । सुन्दरतापयुक्ते । शोभनैश्वर्ययुक्ते । **हुवे** । आह्वयामि । **अहम्** । जीवः । **उर्वी** । उर्व्यौ । विस्तीर्णे । **गम्भीरे** । **गभीरगम्भीरौ** (उ० ४ । ३५) इति गम्लृ गतौ-ईरन्, मस्य भः, नुम् च । गमनीये प्रापणीये । शान्तस्वभावे । महाशये । **कविभिः** । मेधाविभिः । **नमस्ये** । वन्दनीये । अन्यत् पूर्ववत् म०—२ ॥

४—**ये** । द्यावापृथिव्यौ युवाम् । **अमृतम्** । नास्तिं मृतं मरणं यस्मात् तत् । मरणाद् रक्षणसाधनम् । अन्नादिकम् । **बिभृथः** । धारयथः । **हवींषि** ।

नदियों को और (ये) जो तुम दोनों (मनुष्यान्) मनुष्यों को (बिभृथः) धारण करती हो। (द्यावापृथिवी) हे सूर्य और पृथिवी तुम दोनों (मे) मेरे लिये...म० २ ॥ ४ ॥

भावार्थः—सूर्य और पृथिवी के परस्पर आकर्षण से वृष्टि होकर अन्न आदि उत्पन्न होते हैं, जिनसे मनुष्य आदि प्राणियों को अमृत अर्थात् अन्न आदि पदार्थ मिलते हैं ॥४॥

ये उस्त्रिया बिभृथो ये वनस्पतीन् ययोर्वां विश्वा भुवनान्यन्तः। द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः॥५॥

ये इति। उस्त्रियाः। बिभृथः। ये इति। वनस्पतीन्। ययोः। वाम्। विश्वा। भुवनानि। अन्तः। द्यावापृथिवी इति। भवतम्। मे। स्योने इति। ते इति। नः। मुञ्चतम्। अंहसः॥ ५॥

भाषार्थः—(ये) जो तुम दोनों (उस्त्रियाः) गौओं को और (ये) जो तुम दोनों (वनस्पतीन्) वनस्पतियों को (बिभृथः) धारण करती हो, (ययोः वाम्) जिन तुम दोनों के (अन्तः) भीतर (विश्वा) सब (भुवनानि) लोक हैं। (द्यावापृथिवी) हे सूर्य और पृथिवी तुम दोनों (मे) मेरे लिये म० २ ॥ ५ ॥

भावार्थः—सूर्य के ताप और पृथिवी के संयोग से किरण द्वारा वृष्टि

अर्चिशुचिहु० (उ० २। १०८) इति हु दानादनयोः—इसिः। देयग्राह्यद्रव्याणि धान्यादीनि। **स्रोत्याः। स्रोतसो विभाषा ड्यड्ड्यौ** (पा० ४। ४। ११३) इति स्रोतस्–ड्यः। स्रोतसि भवाः। अपो जलानि। स्रोत्याः, नदीनाम–निघ० १। १३। **मनुष्यान्**। मननशीलान् नरान्। अन्यत् पूर्ववत्—म० २ ॥

५—**ये**। युवाम्। **उस्त्रियाः**। **स्फायितञ्चिवञ्चि०** (उ० २। १३) इति वस निवासे–रक्, सम्प्रसारणं च। वसति क्षीरादिहविरस्याम्–इति उस्रा[1]। ततः– पृषोदरादित्वात्स्वार्थे घः। उस्रियेति गोनामोत्स्राविणोऽस्यां भोगाः। निरु० ४। १९। गाः। **बिभृथः**। धारयथः। **वनस्पतीन्**। अ० १। १२। ३। वनानां सेवकानां पालकान्। वृक्षान्। **ययोः। वाम्**। युवयोः। **विश्वा**।

---

१. उस्रा यह रश्मि नामों में भी पढ़ा है। (निघ० १। ५) महर्षि दयानन्द जी ने यजु० ३५। २ में उस्त्रिया शब्द पर व्याख्यान किया है। अर्थात् उस्त्रिया वे किरणें हैं जो शरीर छूट जाने के पश्चात् जीव को कर्म फल के अनुसार गर्भ में पहुँचाती हैं। द्र०— (यजु०। द० भा० ३५। २, ३) एवं (द० भा० ३६। ६) भी द्रष्टव्य है ॥ सम्पा० ॥

होकर गौ आदि सब पशु और सब वृक्ष पुष्ट होते हैं और सब लोक उनके ही प्रभाव में ठहरे हैं ॥ ५ ॥

ये कीलालेन तर्पयथो ये घृतेन याभ्यामृते न किंचन शक्नुवन्ति । द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ ६ ॥

ये इति । कीलालेन । तर्पयथः । ये इति । घृतेन । याभ्याम् । ऋते । न । किम् । चन । शक्नुवन्ति । द्यावापृथिवी इति । भवतम् । मे । स्योने इति । ते इति । नः । मुञ्चतम् । अंहसः ॥ ६ ॥

भाषार्थः—(ये) जो तुम दोनों (कीलालेन) जाठराग्नि के निवारण करने वाले अन्न से, और (ये) जो तुम दोनों (घृतेन) जल से (तर्पयथः) तृप्त करती हो, (याभ्याम् ऋते) जिन तुम दोनों के बिना [सब प्राणी] (किम् चन) कुछ भी (न) नहीं (शक्नुवन्ति) शक्ति रखते हैं । (द्यावापृथिवी) हे सूर्य और पृथिवी (मे) मेरे लिये (स्योने) सुखवती (भवतम्) हो । (ते) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ६ ॥

भावार्थः—सूर्य और पृथिवी के प्रभाव से अन्न और जल आदि पदार्थ उत्पन्न होकर जगत् का उपकार करते हैं । उनके विज्ञान से सब मनुष्य सुखी रहें ॥ ६ ॥

विश्वानि सर्वाणि । **भुवनानि** । अ० २ । १ । ३ । लोकान् । **अन्तः** । मध्ये । अन्यत् पूर्ववत्—म० २ ॥

६—ये । युवाम् । **कीलालेन** । कील—अलेन । कील बन्धने घञ्, कः वा । अल भूषणपर्याप्तिवारणेषु—अण् । कीलं जाठराग्नेर्ज्वालामलति वारयतीति कीलालम् अन्नम्—निघ० २ । ७ । अन्नेन । **तर्पयथः** । **घृतेन** । = उदकेन-निघ० १ । १२ । **याभ्याम्** । **अन्यारादितरर्ते०** (पा० २ । ३ । २९) इति पञ्चमी । **ऋते** । विना । **न** । निषेधे । **किञ्चन** । यथा तथा । किमपि । **शक्नुवन्ति** । शक्ता भवन्ति सर्वे जनाः । अन्यत् पूर्ववत् । म० २ ॥

यन्मेदम॑भि॒शोच॑ति॒ येनं॑येन वा कृ॒तं पौरु॑षेया॒न्न दैवा॑त्।
स्तौमि॒ द्यावा॑पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मंह॑सः॥७॥

यत्। मा। इ॒दम्। अ॒भि॒ऽशोच॑ति। येनं॑ऽयेन। वा॒। कृ॒तम्। पौरु॑षेयात्। न। दैवा॑त्। स्तौमि॑। द्यावा॑पृथि॒वी इति॑। ना॒थि॒तः। जो॒ह॒वी॒मि॒। ते इति॑। नः॒। मु॒ञ्च॒त॒म्। अंह॑सः ॥ ७ ॥

भाषार्थः—(येनयेन) जिस किसी कारण से (पौरुषेयात्) पुरुष [इस शरीर] से किया हुआ (वा) अथवा (दैवात्) दैव [प्रारब्ध, पूर्वजन्म] के फल से प्राप्त हुआ (यत्) जो (इदम्) यह (कृतम्) कर्म (न) इस समय (मा) मुझको (अभिशोचति) शोक में डालता है। [इसलिये] (नाथितः) मैं अधीन होकर (द्यावापृथिवी) सूर्य और पृथिवी को (स्तौमि) सराहता हूं और (जोहवीमि) बारंवार पुकारता हूं। (ते) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ७ ॥

भावार्थः—मनुष्य पुरुषार्थ के साथ सुकर्म करके इस जन्म वा प्रारब्ध से प्राप्त हुए दुःख का नाश करके सूर्य पृथिवी आदि लोकों के उपयोग से सुख भोगें ॥ ७ ॥

सूक्तम् २७ ॥

१—७ ॥ मरुतो देवताः ॥ सर्वत्रान्तिमः पादोऽनुष्टुप्, शेषाः पादाः- १-४, ६, ७, त्रिष्टुप्, ५ बृहती छन्दः ॥

मरुतां गुणोपदेशः—पवन के गुणों का उपदेश ॥

७—**यत्**। **मा**। माम्। **इदम्**। इण् गतौ—दमुक्। पुरोवर्त्ति। **अभिशोचति**। अभितः सर्वतो दहति। **येनयेन**। येनकेन कारणेन। **वा**। अथवा। **कृतम्**। कर्म। **पौरुषेयात्**। पुरुषात्वधविकारसमूहतेनकृतेषु (वा० पा० ५। १। १०) इति पुरुष—ढञ्। पुरुषकृतोत्कर्मणः। **न**। सम्प्रत्यर्थे—निरु० ७। ३१। **दैवात्**। अ० ४। १६। ८। पूर्वजन्मार्जितात् कर्मणः। **स्तौमि**। प्रशंसामि द्यावापृथिव्यौ। **नाथितः**। अ० ४। २३। ७। नाथवान् अधीनः। **जोहवीमि**। पुनः पुनराह्वयामि। अन्यत् पूर्ववत् ॥

मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु। आशूनिव सुयमानह्व ऊतये ते नो मुञ्चन्त्वंहसः ॥ १ ॥

मरुताम् । मन्वे । अधि । मे । ब्रुवन्तु । प्र । इमम् । वाजम् । वाजऽसाते । अवन्तु । आशून्ऽइव । सुऽयमान् । अह्वे । ऊतये । ते । नः । मुञ्चन्तु । अंहसः ॥ १ ॥

भाषार्थः—(मरुताम्) दोष नाशक वायुओं का (मन्वे) मैं मनन करता हूं । (मे) मेरे लिये (अधि) अनुग्रह से (ब्रुवन्तु) बोलें और (इमम्) इस (वाजम्) बल को (वाजसाते) अन्न के सुख वा दान के निमित्त (प्र) अच्छे प्रकार (अवन्तु) तृप्त करें । (आशून् इव) शीघ्रगामी घोड़ों के समान (सुयमान्) उन सुन्दर नियम वालों को (ऊतये) अपनी रक्षा के लिये (अह्वे) मैंने पुकारा है । (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥१॥

भावार्थः—मनुष्य प्राण अपान व्यानरूप वायुओं के शोधन, सेवन, और प्राणायाम से बल और अन्न प्राप्त करके अपनी रक्षा करें ॥ १ ॥

उत्समक्षितं व्यचन्ति ये सदा य आसिञ्चन्ति रसमोषधीषु । पुरो दधे मरुतः पृश्निमातॄंस्ते नो मुञ्चन्त्वंहसः ॥२॥

१—**मरुताम्** । अ० १ । २० । १ । मारयन्ति दोषान् मरुतः । दोषनाशकानां प्राणापानव्यानरूपाणां वायूनाम् । **मन्वे** । मननं करोमि । **मे** । मह्यम् । **अधि ब्रुवन्तु** । अधिकमनुग्रहेण वदन्तु । **इमम्** । **वाजम्** । बलम्-निघ० २ । ९ । **वाजसाते** । वाजः, अन्नम्—निघ० २ । ७ । **अनुपसर्गाल्लिम्पविन्द०** (पा० ३ । १ । १३८) इति सूत्रे पठितः सातिः सौत्रो धातुः । सति सुखे-अच् । यद्वा षणु दाने-क्तः । **जनसनखनाम्०** (पा० ६ । ४ । ४२) इत्यात्वम् । वाजस्य अन्नस्य साते सुखे दाने वा निमित्तभूते सति । **प्र अवन्तु** । प्रकर्षेण तर्पयन्तु । **आशून्** । अ० २ । १४ । ६ । शीघ्रगामिनोऽश्वान् । **इव** । तथा । **सुयमान्** । शोभननियमयुक्तान् तान् मरुतः । **अह्वे** । ह्वेञ् स्पर्द्धायां शब्दे च-लुङ् । **लिपिसिचिह्वश्च** (पा० ३ । १ । ५३) इति च्लेः अङ् आदेशः । आहूतवानस्मि । **ऊतये** । रक्षायै **ते** । मरुतः । **नः** । अस्मान् । **मुञ्चन्तु** । मोचयन्तु । **अंहसः** । कष्टात् ॥

उत्सम् । अक्षितम् । विऽअचन्ति । ये । सदा । ये । आऽसिञ्चन्ति । रसम् । ओषधीषु । पुरः । दधे । मरुतः । पृश्निऽमातृन् । ते । नः । मुञ्चन्तु । अंहसः ॥ २ ॥

भाषार्थः—(ये) जो [मरुत् देवता] (सदा) सदा (अक्षितम्) अक्षय (उत्सम्) सींचने वाले जल को (व्यचन्ति) विविध प्रकार से पहुँचाते हैं, और (ये) जो (रसम्) रस को (ओषधीषु) अन्न आदि ओषधियों में (आसिञ्चन्ति) सींच देते हैं। (पृश्निमातॄन्) छूने योग्य पदार्थों को वा आकाश के नापने वाले (मरुतः) उन वायु देवताओं को (पुरो दधे) मैं सन्मुख रखता हूँ। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥ २ ॥

भावार्थः—मनुष्य वायु के गुणों में विज्ञान प्राप्त करके सदा आनन्दित रहें ॥ २ ॥

पयो धेनूनां रसमोषधीनां जवमर्वतां कवयो य इन्वथ ।
शग्मा भवन्तु मरुतो नः स्योनास्ते नो मुञ्चन्त्वंहसः ॥ ३ ॥

पयः । धेनूनाम् । रसम् । ओषधीनाम् । जवम् । अर्वताम् । कवयः । ये । इन्वथ । शग्माः । भवन्तु । मरुतः । नः । स्योनाः । ते । नः । मुञ्चन्तु । अंहसः ॥ ३ ॥

२—**उत्सम्** । अ० १।१५।३ । सेचनसाधनं जलं वा । **अक्षितम्** । क्षयरहितम् । **व्यचन्ति** । अंचु अचु गतौ याचने च, अन्तर्गतो ण्यर्थः । विविधं गमयन्ति । **ये** । मरुतः । **सदा** । सर्वदा । **आसिञ्चन्ति** । समन्तात् क्षारयन्ति वर्षयन्ति । **रसम्** । सारम् । **ओषधीषु** । व्रीहियवाद्यासु तरुगुल्मादिषु च । **पुरोदधे** । पुरस्ताद् धारयामि । भजामि । पूजयामि । **मरुतः** । दोषनाशकान् वायून् । **पृश्नि-मातॄन्** । घृणिपृश्निपार्ष्णि० (उ० ४ । ५२) इति स्पृश संस्पर्शने—निः । धातोः सलोपः । पृश्नि......द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च—निरु० २ । १४ । **ण्वुल्तृचौ** (पा० ३ । १ । १३३) इति माङ् माने—तृच् । पृश्नीनां स्पर्शनीयानां पदार्थानाम् । अथवा पृश्नेर्दिव आकाशस्य मातारो मानकर्तारः परिच्छेत्तारो ये तान् । अन्यत् पूर्ववत् ॥

भाषार्थः—(ये) जो तुम (कवयः) चलने फिरने वाले अथवा सुखाने वाले [मरुत् देवता] (धेनूनाम्) गौओं का (पयः) दूध, (ओषधीनाम्) अन्न आदि ओषधियों का (रसम्) रस और (अर्वताम्) घोड़ों का (जवम्) वेग (इन्वथ) भर देते हो। (शग्माः) शक्ति वाले (मरुतः) वे आप दोषनाशक वायु गण (नः) हमारे लिये (स्योनाः) सुखदायक (भवन्तु) होवें। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥ ३ ॥

भावार्थः—प्राण अपान आदि द्वारा सब पदार्थों में शक्ति पहुँचती है। उन वायु प्रवाहों का ज्ञान प्राप्त करके मनुष्य सदा प्रसन्न रहें ॥ ३ ॥

अपः समुद्राद् दिवमुद्वहन्ति दिवस्पृथिवीमभि ये सृजन्ति।
ये अद्भिरीशाना मरुतश्चरन्ति ते नो मुञ्चन्त्वंहसः ॥ ४ ॥

अपः। समुद्रात्। दिवम्। उत्। वहन्ति। दिवः। पृथिवीम्। अभि। ये। सृजन्ति। ये। अत्ऽभिः। ईशानाः। मरुतः। चरन्ति। ते। नः। मुञ्चन्तु। अंहसः ॥ ४ ॥

भाषार्थः—(ये) जो [वायुगण] (अपः) जल को (समुद्रात्) पार्थिव समुद्र से (दिवम्) आकाश में (उद्वहन्ति) उठाकर पहुँचाते हैं और (दिवः)

३—**पयः**। दुग्धम्। **धेनूनाम्**। अ० २।५।६। दुग्धं पाययित्रीणां गवाम्। **रसम्**। सारम्। **ओषधीनाम्**। अन्नादीनाम्। **जवम्**। ऋदोरप् (पा० ३।३।५७) इति जु वेगे[1]—अप्। वेगम्। **अर्वताम्**। अ० ४।९।२। अश्वानाम्। **कवयः**। कुङ् गतौ शब्दे च—इन्। कवतेः गतिकर्मा—निघ० २। १४। गन्तारः। शोषयितारः। **ये**। यूयं मरुतः। **इन्वथ**। इवि व्याप्तौ। इदित्वान्नुम्। व्यापयथ। स्थापयथ। **शग्माः**। अर्तिस्तुसुहु० (उ० १।१४०) इति शक्लृ—मन्। शक्तारः। समर्थाः। **भवन्तु**। **मरुतः**। वायवः। **नः**। अस्मभ्यम्। **स्योनाः**। सुखकराः। अन्यत् पूर्ववत् ॥

४—**अपः**। जलानि। **समुद्रात्**। पार्थिवसागरात्। **दिवम्**। अन्तरिक्षम्। **उत्**। ऊर्ध्वम्। **वहन्ति**। प्रापयन्ति। **दिवः**। अन्तरिक्षात्। **पृथिवीम्**।

---

१. यह सौत्र धातु है। द्र० मा० धा० पृ० २६७ ॥ सम्पा० ॥

आकाश से (पृथिवीम् अभि) पृथिवी पर (सृजन्ति) छोड़ देते हैं। और (ये) जो (ईशानाः) समर्थ (मरुतः) वायुगण (अद्भिः) जल के साथ (चरन्ति) चलते रहते हैं। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥ ४ ॥

भावार्थः—सूर्य की किरणों से मिलकर वायु गण जल आकाश में ले जाते और पृथिवी पर बरसाते हैं। उनके उपकारों को समझ कर मनुष्य आनन्द प्राप्त करें ॥ ४ ॥

ये कीलालेन तर्पयन्ति ये घृतेन ये वा वयो मेदसा संसृजन्ति। ये अद्भिरीशाना मरुतो वर्षयन्ति ते नो मुञ्चन्त्वंहसः ॥ ५ ॥

ये। कीलालेन। तर्पयन्ति। ये। घृतेन। ये। वा। वयः। मेदसा। सम्ऽसृजन्ति। ये। अत्ऽभिः। ईशानाः। मरुतः। वर्षयन्ति। ते। नः। मुञ्चन्तु। अंहसः ॥ ५ ॥

भाषार्थः—(ये) जो [मरुत्गण] (वयः) जीवन को (कीलालेन) अन्न से और (ये) जो (घृतेन) जल से (तर्पयन्ति) तृप्त करते हैं, (वा) और (ये) जो (मेदसा) मेदा अर्थात् चर्बी से (संसृजन्ति) संयुक्त करते हैं। और (ये) जो (ईशानाः) समर्थ (मरुतः) वायुगण (अद्भिः) जल से [प्राणियों को] (वर्षयन्ति) सींचते हैं। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥ ५ ॥

भूमिम्। **अभि**। अभिलक्ष्य। **ये**। मरुतः। **सृजन्ति**। त्यजन्ति। **अद्भिः**। जलैः। **ईशानाः**। ईश्वराः समर्थाः। **मरुतः**। दोषनाशका वायवः। **चरन्ति**। गच्छन्ति। अन्यद् गतम् ॥

५—**ये**। मरुतः। **कीलालेन**। अ० । ४ । २६ । ६ । अन्नेन। **तर्पयन्ति**। पोषयन्ति। **घृतेन**। उदकेन। **वा**। चार्थे। **वयः**। अ० २ । १० । ३ । वी गतौ-असुन्। अन्नम्-निघ० २ । ७। आयुः। जीवनम्। **मेदसा**। **सर्वधातुभ्योऽसुन्** (उ० ४ । १८९) इति ञिमिदा स्नेहने—असुन्। मांसप्रभवधातुविशेषेण।

भावार्थः— वायु वेग द्वारा अन्न, जल मिलकर शरीर रक्षा के लिये रक्त अस्थि आदि पदार्थ उत्पन्न होते हैं। उन वायु गणों के गुणों से हम सदा स्वस्थ और पुष्ट रहें ॥ ५ ॥

यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगार ।
यूयमीशिध्वे वसवस्तस्य निष्कृतेस्ते नो मुञ्चन्त्वंहसः ॥ ६ ॥

यदि । इत् । इदम् । मरुतः । मारुतेन । यदि । देवाः । दैव्येन । ईदृक् । आर । यूयम् । ईशिध्वे । वसवः । तस्य । निःऽकृतेः । ते । नः । मुञ्चन्तु । अंहसः ॥ ६ ॥

भाषार्थः—(देवाः) हे विजयशील (मरुतः) दोषनाशक वायुगण ! (यदि) यत्नशील (इदम्) चलता हुआ जगत् (इत्) निश्चय करके [तुम्हारे] (मारुतेन) दोषनाशक धर्म से और (दैव्येन) दिव्यपन से (ईदृक्) ऐसा (यदि) यत्नशील (आर) प्राप्त हुआ है। (वसवः) हे निवास कराने वाले ! (यूयम्) तुम (तस्य) उस जगत् के (निष्कृतेः) उद्धार के (ईशिध्वे) समर्थ होते हो। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥ ६ ॥

भावार्थः—यह सब जगत् वायु के कारण चेष्टा करता हुआ उद्योगी रहता है, उस वायु के गुणों को जान कर सब मनुष्य प्रसन्न रहें ॥ ६ ॥

वपया तुरीयधातुना। **संसृजन्ति**। संयोजयन्ति। **वर्षयन्ति**। सिञ्चन्ति प्राणिनः। अन्यत् पूर्ववत्—म० ४ ॥

६—**यदि**। सर्वधातुभ्य इन् (उ० ४। ११८) इति यती प्रयत्ने-इन् तस्य दः। यत्नशीलम्। **इत्**। अवधारणे। **इदम्**। इण् गतौ—दमुक्। एति गच्छतीति इदं जगत्। **मरुतः**। हे दोषनाशका वायवः। **मारुतेन**। **तस्येदम्** (पा० ४। ३। १२०) इति मरुत्—भावेऽण्। मरुत्वेन मरुतो दोषनाशकधर्मेण। **यदि**। यत्नशीलम्। **देवाः**। हे विजिगीषवः। **दैव्येन**। दिवि भवं दिव्यम्। ततो भावे अण्। दिव्यगुणेन। **ईदृक्**। **त्यदादिषु दृशोऽनालोचने कञ् च** (पा० ३। २। ६०) इति दृशेः क्विन्। **इदंकिमोरीश्की** (पा० ६। ३। ९०) इति इदम ईशादेशः। एवं रूपं जगद् यथा दृश्यते। **आर**। ऋ गतौ लिट्। प्राप्तं बभूव। **यूयम्**। **ईशिध्वे**। ईश्वराः समर्था भवथ। **वसवः**। हे वासयितारः प्रशस्ताः। **तस्य**। दृश्यमानस्य जगतः। **निष्कृतेः**। निस्तारस्य उद्धारस्य। अन्यत् पूर्ववत् ॥

तिग्ममनीकं विदितं सहस्वन्मारुतं शर्धः पृतनासूग्रम्।
स्तौमि मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वंहसः ॥७॥

तिग्मम्। अनीकम्। विदितम्। सहस्वत्। मारुतम्। शर्धः। पृतनासु। उग्रम्। स्तौमि। मरुतः। नाथितः। जोहवीमि। ते। नः। मुञ्चन्तु। अंहसः ॥ ७ ॥

भाषार्थः—(मारुतम्) दोषनाशक वायु गणों का (अनीकम्) सेनादल और (शर्धः) बल (पृतनासु) संग्रामों में (तिग्मम्) तीक्ष्ण, (सहस्वत्) बड़ा साहसी और (उग्रम्) बड़ा प्रचण्ड (विदितम्) विदित है। (नाथितः) अधीन मैं (मरुतः) वायु गणों को (स्तौमि) सराहता हूँ और (जोहवीमि) बारंबार पुकारता हूँ। (ते) वे (नः) हमें (अंहसः) कष्ट से (मुञ्चन्तु) छुड़ावें ॥ ७ ॥

भावार्थः—जो साहसी शूरवीर संग्रामों में अपने श्वास प्रश्वास को सावधान रखके वायु का यथावत् प्रयोग करते हैं, वे विजयी होकर आनन्द भोगते हैं ॥ ७ ॥

सूक्तम् २८ ॥

१-७ ॥ भवाशर्वौ देवते ॥ पादत्रयं त्रिष्टुप्, अन्तिमोऽनुष्टुप् ॥

परमेश्वरगुणोपदेशः—परमेश्वर के गुणों का उपदेश ॥

७—**तिग्मम्**। युजिरुचितिजां कुश्च (उ० १ । १४६) इति तिज निशाने—मक्, कुत्वं च। तीक्ष्णम्। **अनीकम्**। अनिहृषिभ्यां किच्च (उ०४।१७) इति अन प्राणने-ईकन्। सैन्यम्। **विदितम्**। प्रख्यातम्। **सहस्वत्**। बलवत्। **मारुतम्**। मरुतां सम्बन्धि। **शर्धः**। शर्द्धतिरुत्साहार्थः—असुन्। इति देवराजयज्वा निघण्टुटीकायाम्। बलम् निघ० २। ९। **पृतनासु**। अ० ३। २१। ३। संग्रामेषु। **उग्रम्**। प्रचण्डम्। अन्यत् पूर्ववत् ॥

भवाशर्वौ मन्वे वां तस्य वित्तं ययोर्वामिदं प्रदिशि यद् विरोचते। यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ १ ॥

भवाशर्वौ। मन्वे। वाम्। तस्य। वित्तम्। ययोः। वाम्। इदम्। प्रऽदिशि। यत्। विऽरोचते। यौ। अस्य। ईशाथे इति। द्विऽपदः। यौ। चतुःऽपदः। तौ। नः। मुञ्चतम्। अंहसः ॥ १ ॥

भाषार्थः—(भवाशर्वौ) हे सुख उत्पन्न करने वाले और शत्रुनाशक [परमेश्वर के गुणों !] (वाम्) तुम दोनों का (मन्वे) मैं मनन करता हूं। (तस्य) उस [जगत्] का (वित्तम्) वे तुम दोनों ज्ञान रखते हो, (ययोः-वाम्) जिन तुम दोनों के (प्रदिशि) शासन में (इदम्) यह (यत्) जो कुछ जगत् (विरोचते) प्रकाशमान है। (यौ) जो तुम दोनों (अस्य) इस (द्विपदः) दोपाये समूह के और (यौ) जो तुम दोनों (चतुष्पदः) चौपाये संसार के (ईशाथे) ईश्वर हो, (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावें ॥ १ ॥

भावार्थः—परमेश्वर सर्वजनक सर्वशासक और सर्वज्ञ है। उसकी उपासना करके सब मनुष्य सुखी रहें ॥ १ ॥

इस सूक्त में गुणों के वर्णन से गुणी अर्थात् ईश्वर का ग्रहण है ॥

१—**भवाशर्वौ**। भवत्युत्पद्यते सुखमस्मादिति भवः। सुखोत्पादको गुणः। **कॄगॄशॄदॄभ्यो वः** (उ० १। १५५) इति शॄ हिंसायाम् वः। शत्रुनाशको गुणः। भवश्च शर्वश्च भवाशर्वौ परमेश्वरस्य गुणौ। **देवताद्वन्द्वे च** (पा० ६। ३। २६) इति आनङ्। अस्मिन् सूक्ते गुणग्रहणेन गुणिग्रणम्। **मन्वे**। मननं करोमि। **वाम्**। युवयोः। **तस्य**। जगतः। **वित्तम्**। लडर्थे लोट्। वित्थः। वेदनं ज्ञानं कुरुथः। **ययोः**। **वाम्**। युवयोः। **इदम्**। दृश्यमानं गमनशीलं वा जगत्। **प्रदिशि**। प्रदेशने प्रशासने। **यत्**। यत्किञ्चित्। **विरोचते**। रुच दीप्तौ। प्रकाशते। **यौ**। **अस्य**। वर्तमानस्य। **ईशाथे**। ईश्वरौ भवथः। **द्विपदः**। पादद्वयोपेतस्य प्राणिमात्रस्य। **चतुष्पदः**। पादचतुष्टयोपेतस्य गवादेः। **तौ**। भवाशर्वौ। **नः**। अस्मान्। **मुञ्चतम्**। मोचयतम्। **अंहसः**। कष्टात् ॥

यथोरभ्यध्व उत यद् दूरे चिद् यौ विदिताविषुभृतामसिष्ठौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥२॥

ययोः । अभिऽअध्वे । उत । यत् । दूरे । चित् । यौ । विदितौ । इषुऽभृताम् । असिष्ठौ । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ २ ॥

भाषार्थः—(ययोः) जिन दोनों का [वह सब है] (यत् चित्) जो कुछ (अभ्यध्वे) समीप में (उत) और (दूरे) दूर देश में है। (यौ) जो तुम दोनों (इषुभृताम्) हिंसा कारियों के (असिष्ठौ) अत्यन्त गिराने वाले (विदितौ) विदित हो। (यौ) जो तुम दोनों (अस्य) इस (द्विपदः) दोपाये......म० १॥२॥

भावार्थः—परमेश्वर सर्व अन्तर्यामी और शत्रुनाशक है हम उसकी उपासना से सदा पुरुषार्थी रहें ॥ २ ॥

सहस्राक्षौ वृत्रहणा हुवेऽहं दूरेगव्यूती स्तुवन्नेम्युग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥३॥

सहस्रऽअक्षौ । वृत्रऽहना । हुवे । अहम् । दूरेगव्यूती इति दूरेऽगव्यूती । स्तुवन् । एमि । उग्रौ । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ३ ॥

२—**ययोः** । भवाशर्वयोः । **अभ्यध्वे** । अभि अध्वन अभ्यध्वः । उपसर्गादध्वनः (पा० ५ । ४ । ८५) इति अच् समासान्तः । समीपदेशे । **उत** । अपि । **यत् चित्** । यत्किञ्चित् । **दूरे** । दूरदेशे । **यौ** । भवाशर्वौ । **विदितौ** । प्रज्ञातौ । **इषुभृताम्** । ईष हिंसायाम्—कुः, ह्रस्वश्च । डुभृञ् धारणपोषणयोः—क्विप्—तुक् च । हिंसाधारकाणाम् । **असिष्ठौ** । तुश्छन्दसि (पा० ५ । ३ । ५९) इति असितृ-इष्ठन् । तुरिष्ठेमेयस्सु (पा० ६ । ४ । १५४) इति तृलोपः । असितृतमौ । क्षेप्तृतमौ । अन्यत् पूर्ववत्—म० १ ।।

भाषार्थः—(अहम्) मैं (स्तुवन्) स्तुति करता हुआ (उग्रौ) उग्र स्वभाव वाले, (सहस्राक्षौ) सहस्रों व्यवहारों में व्यापक रहने वाले वा दृष्टि रखने वाले, (वृत्रहणा =०—णौ) शत्रुओं वा अन्धकार के नाश करने वाले, (दूरेगव्यूती) दूर तक प्रकाश का संयोग रखने वाले, दोनों को (हुवे) मैं पुकारता हूँ और (एमि) प्राप्त होता हूं। (यौ) जो तुम दोनों (अस्य) इस (द्विपदः) दोपाये......म० १ ॥ ३ ॥

भावार्थः—परमेश्वर सर्व व्यापक, सर्वदर्शक, शत्रु वा अज्ञान नाशक और सूर्य आदि लोकों का प्रकाशक है, उसकी स्तुति उपासना करके हम सदा पुरुषार्थ करें ॥ ३ ॥

यावा॒रे॑भाथे॑ ब॒हु सा॒कमग्रे॒ प्रचेद॑स्रा॒ष्ट्रम॑भि॒भां जने॑षु ।
याव॒स्येशा॑थे द्वि॒पदो॒ यौ चतु॑ष्पद॒स्तौ नो॑ मुञ्चत॒मंह॑सः ॥ ४ ॥

यौ । आ॒रे॒भाथे॒ इत्या॑ऽरे॒भाथे॑ । ब॒हु । सा॒कम् । अग्रे॑ । प्र । च॒ । इत् । अस्रा॑ष्ट्रम् । अ॒भि॒ऽभाम् । जने॑षु । यौ । अ॒स्य । ईशा॑थे॒ इति॑ । द्वि॒ऽपदः॑ । यौ । चतुः॑ऽपदः । तौ । नः॒ । मु॒ञ्च॒त॒म् । अंह॑सः ॥ ४ ॥

भाषार्थः—(यौ) जिन तुम दोनों ने (बहु) बहुत सा जगत् (साकम्)

३—**सहस्राक्षौ** । अ० ४ । २० । ४ । बहुव्यवहारव्यापकौ । यद्वा । सर्वतोदत्तदृष्टी स्थूलसूक्ष्मविषयेऽवपि प्राप्तदर्शनौ । **वृत्रहणा** । अ० १ । २१ । १ । शत्रुनाशकौ । अन्धकारनिवारकौ । **हुवे** । आह्वयामि । **अहम्** । मनुष्यः । **दूरेगव्यूती** । दूरे + गो + यूती । **दुरीणो लोपश्च** (उ० २ । २०) इति दुर् + इण् गतौ—रक् धातुलोपश्च । इति दूरं विप्रकृष्टम् । **गमेर्डोः** (उ० २ । ६७) गम्लृ गतौ—डोः प्रत्ययः । **ऊतियूतिजूति०** (पा० ३ । ३ । ९७) इति यु मिश्रणामिश्रणयोः—क्तिन् । निपातनात् साधुः । **गोर्यूतौ छन्दसि** (वा० पा० ६ । १ । ७९) इति अव् आदेशः । रश्मयो गाव उच्यन्ते—निरु० २ । ६ । दूरे दूरदेशे गवां रश्मीनां प्रकाशानां यूतिः संयोगो ययोस्तौ । सर्वलोकप्रकाशकौ—इत्यर्थः । **स्तुवन्** । प्रशंसन् । **एमि** । प्राप्नोमि । **उग्रौ** । तीक्ष्णस्वभावौ । अन्यत् पूर्ववत् म० १ ॥

४—**यौ** । भवाशर्वौ । **आरेभाथे** । रभ राभस्ये = उपक्रमे—लुङ् । आरब्ध-

एक साथ (अग्रे) पूर्वकाल में (आरेभाथे) आरम्भ किया (च) और जिन तुम दोनों ने (इत्) ही (जनेषु) प्राणियों में (अभिभाम्) प्रतिभा अर्थात् बुद्धि को (प्र अस्राष्ट्रम्) अच्छे प्रकार उत्पन्न किया। (यौ) जो तुम दोनों (अस्य) इस (द्विपदः) दोपाये......म० १ ॥ ४ ॥

भावार्थः—परमेश्वर ने सृष्टि को उत्पन्न करके प्राणियों में इष्ट अनिष्ट और सुख दुःख जानने के लिये बुद्धि दी है, उसकी ही भक्ति से हम सदा प्रसन्न रहें ॥ ४ ॥

यथोर्वधान्नापपद्यते कश्चनान्तर्देवेषूत मानुषेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ ५॥

ययोः । वधात् । न । अपऽपद्यते । कः । चन । अन्तः । देवेषु । उत । मानुषेषु । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ५ ॥

भाषार्थः—(ययोः) जिन तुम दोनों के (वधात्) हनन सामर्थ्य से (देवेषु) प्रकाशमान सूर्य आदि लोकों (उत) और (मानुषेषु अन्तः) मनुष्यों के बीच (कश्चन) कोई भी (न) नहीं (अपपद्यते) छुटकर जाता है। (यौ) जो तुम दोनों (अस्य) इस (द्विपदः) दोपाये .....म० १ ॥ ५ ॥

भावार्थः—सर्व नियन्ता जगदीश्वर की आज्ञा पालन करके सब मनुष्य आनन्द प्राप्त करें ॥ ५ ॥

वन्तौ । **बहु** । प्रभूतं जगत् । **साकम्** । सह । **अग्रे** । आदौ । **प्र** । प्रकर्षेण । **च** । **इत्** । एव । **अस्राष्ट्रम्** । सृज विसर्गे छान्दसं लुङि रूपम् । अस्राष्ट्रम् । सृष्टवन्तौ । उत्पादितवन्तौ । **अभिभाम्** । भा क्विप् । प्रतिभां बुद्धिम् । **जनेषु** । उत्पन्नेषु प्राणिषु । अन्यत् पूर्ववत् म० १ ॥

५—**ययोः** । भवाशर्वयोः । **वधात्** । अ० १ । २० । २ । हननसामर्थ्यात् । **न** । निषेधे । **अपपद्यते** । अपेत्य गच्छति । **कश्चन** । कोऽपि । **अन्तः** । मध्ये । **देवेषु** । प्रकाशमानेषु सूर्यादिलोकेषु । **उत** । अपि च । **मानुषेषु** । अ० ४ । १४ ५ । मनुष्-अण् । मनुष्येषु । अन्यत् पूर्ववत् म० १ ॥

यः कृत्याकृन्मूलकृद् यातुधानो नि तस्मिन् धत्तं वज्रमुग्रौ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ ६ ॥

यः । कृत्याऽकृत् । मूलऽकृत् । यातुऽधानः । नि । तस्मिन् । धत्तम् । वज्रम् । उग्रौ । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ६ ॥

भाषार्थः—(यः) जो (कृत्याकृत्) हिंसाकारी, (मूलकृत्) मूल कतरने वाला और (यातुधानः) पीडा देने वाला पुरुष है, (तस्मिन्) उस पर (उग्रौ) हे उग्र स्वभाव वाले तुम दोनों (वज्रम्) वज्र (निधत्तम्) गिरावो (यौ) जो तुम दोनों (अस्य) इस (द्विपदः) दोपाये समूह के और (यौ) जो तुम दोनों (चतुष्पदः) चौपाये संसार के (ईशाथे) ईश्वर हो, (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ६ ॥

भावार्थः—परमेश्वर दुष्ट नाशक और शिष्ट रक्षक है, उसकी ही उपासना से मनुष्य बलवान् होवें ॥ ६ ॥

अधि नो ब्रूतं पृतनासूग्रौ सं वज्रेण सृजतं यः किमीदी। स्तौमि
भवाशर्वौ नाथितो जोहवीमि तौ नो मुञ्चतमंहसः ॥ ७ ॥

अधि । नः । ब्रूतम् । पृतनासु । उग्रौ । सम् । वज्रेण । सृजतम् । यः । किमीदी । स्तौमि । भवाशर्वौ । नाथितः । जोहवीमि । तौ । नः । मुञ्चतम् । अंहसः ॥ ७ ॥

६—यः । शत्रुः । **कृत्याकृत्** । अ० ४ । १७ । ४ । हिंसाकारकः । **मूलकृत्** । मूल+कृती छेदने—क्विप् । मूलकर्तकः । प्रतिष्ठाछेदकः । **यातुधानः** । अ० १ । ७ । १ । यातनाकरः । पीडाकारकः । **तस्मिन्** । यातुधाने । **निधत्तम्** । निक्षिपतम् । **वज्रम्** । अ० १।७।७। दण्डरूपम् । कुठारम् । **उग्रौ** । प्रचण्डस्वभावौ । अन्यत् पूर्ववत् म० १ ॥

भाषार्थः—(उग्रौ) हे उग्र स्वभाव वाले तुम दोनों (नः) हमसे (पृतनासु) संग्रामों में (अधि) अनुग्रह से (ब्रूतम्) बोलो और [उसको] (वज्रेण) वज्र के साथ (सम् सृजतम्) संयुक्त करो (यः) जो (किमीदी) अब क्या हो रहा है, यह क्या हो रहा है, ऐसा खोजने वाला लुतरा पुरुष है, (नाथितः) मैं अधीन होकर (भवाशर्वौ) सुख उत्पन्न करने वाले और शत्रु नाश करने वाले तुम दोनों को (स्तौमि) सराहता हूँ और (जोहवीमि) वार-वार पुकारता हूँ । (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ७ ॥

भावार्थः—मनुष्य सदाचारी और सत्यवादी होकर शत्रुओं को संग्राम में जीतें और परमेश्वर की उपासना करके सदा प्रसन्न रहें ॥ ७ ॥

सूक्तम् २९ ॥

१-७ ॥ मित्रावरुणौ देवते ॥ सर्वत्रान्तिमः पादोऽनुष्टुप्, ५-७ जगती ॥

पुरुषार्थकरणायोपदेशः—पुरुषार्थ करने का उपदेश ॥

मन्वे वां मित्रावरुणावृतावृधौ सचेतसौ द्रुह्वणो यौ नुदेथे ।
प्र सत्यावानमवथो भरेषु तौ नो मुञ्चतमंहसः ॥ १ ॥

मन्वे । वाम् । मित्रावरुणौ । ऋतऽवृधौ । सऽचेतसौ । द्रुह्वणः । यौ । नुदेथे इति । प्र । सत्यऽवानम् । अवथः । भरेषु । तौ । नः । मुञ्चतम् । अंहसः ॥ १ ॥

७—**अधिब्रूतम्** । अधिकमनुग्रहेण वदतम् । **नः** । अस्मभ्यम् । **पृतनासु** । संग्रामेषु । **वज्रेण** । **संसृजतम्** । संयोजयतम् । **यः** । पुरुषः । **किमीदी** । अ० १ । ७ । १ । किमिदानीं वर्तते किमिदं वर्तते—इत्येवमन्वेषणं कुर्वाणः । पिशुनः । **स्तौमि** । प्रशंसामि । **भवाशर्वौ** । सुखजनकशत्रुनाशकौ परमेश्वरगुणौ । **नाथितः** । अ० ४ । २३ । ७ । नाथवान् । अधीनः । **जोहवीमि** । पुनः पुनराह्वयामि । अन्यत् पूर्ववत् ॥

भाषार्थः—(ऋतावृधौ) हे सत्य के बढ़ाने वाले (सचेतसौ) समान ज्ञान कराने हारे (मित्रावरुणौ) मित्र और वरुण [प्राण और अपान अथवा दिन और रात] (वाम्) तुम दोनों का (मन्वे) मैं मनन करता हूं, (यौ) जो तुम दोनों (द्रुह्वणः) द्रोहकारियों को (नुदेथे) निकाल देते हो और (सत्यावानम्) सत्यवान् पुरुष को (भरेषु) संग्रामों में (प्र) अच्छे प्रकार (अवथः) बचाते हो। (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥१॥

भावार्थः—जो मनुष्य प्राणायाम करके श्वास प्रश्वास पर दिन रात शुभ चिन्तन करते हैं, वे सत्यवादी सत्यसंकल्पी पुरुष आत्म दोषों को त्याग कर संसार में विजय पाते और आनन्द भोगते हैं ॥१॥

सचेतसौ द्रुह्वणो यौ नुदेथे प्र सत्यावानमवथो भरेषु।
यौ गच्छथो नृचक्षसौ बभ्रुणा सुतं तौ नो मुञ्चतमंहसः ॥२॥

सऽचेतसौ । द्रुह्वणः । यौ । नुदेथे इति । प्र । सत्यऽवानम् । अवथः । भरेषु । यौ । गच्छथः । नृऽचक्षसौ । बभ्रुणा । सुतम् । तौ । नः । मुञ्चतम् । अंहसः ॥ २ ॥

१—**मन्वे** । मननं करोमि । **वाम्** । युवयोः । **मित्रावरुणौ** । अ० १।२०।२। मिनोति प्रेरयति जगत् कार्ये स मित्रः । वृणोति आच्छादयति स्वीकरोति वा स वरुणः । प्राणापानौ, दयानन्दभाष्ये-य० २।३। अहोरात्राभिमानिनौ-इतिसायणः म० २ । अहोरात्रौ । **ऋतावृधौ** । छान्दसो दीर्घः । ऋतस्य सत्यस्य वर्धयितारौ । **सचेतसौ** । अ० ४ । २६ । १ । समानचेतयितारौ । **द्रुह्वणः** । अन्येभ्योऽपि दृश्यन्ते (पा० ३ । २ । ७५) इति द्रुह जिघांसायाम्—क्वनिप् । द्रोग्धॄन् । उपद्रविणः । **यौ** । मित्रावरुणौ । **नुदेथे** । णुद प्रेरणे । दूरे प्रेरयथः । स्थानात् प्रच्यावयथः । **प्र** । प्रकर्षेण । **सत्यावानम्** । छन्दसीवनिपौ (वा० पा० ५ । २ । १०९) इति मत्वर्थीयो वनिप् । छान्दसो दीर्घः । सत्यवन्तं सत्यप्रतिज्ञं पुरुषम् । **अवथः** । रक्षथः । **भरेषु** । भृ भर्त्सने क्र्यादिः—पचाद्यच् । संग्रामेषु-निघ० २ । १७ । **तौ** । तादृशौ युवाम् । **नः** । अस्मान् । **मुंचतम्** । मोचयतम् । **अंहसः** । कष्टात् ॥

भाषार्थः—(सचेतसौ) हे समान ज्ञान कराने वाले ! (यौ) जो तुम दोनों (द्रुह्वणः) उपद्रवियों को (नुदेथे) निकाल देते हो और (सत्यावानम्) सत्यवान् पुरुष को (भरेषु) संग्रामों में (प्र) अच्छे प्रकार (अवथः) बचाते हो। (नृचक्षसौ) मनुष्यों के देखने वाले (यौ) जो तुम दोनों (बभ्रुणा) पोषण के साथ (सुतम्) उत्पन्न जगत् वा पराक्रमी वा पुत्र समान सेवक पुरुष को (गच्छथः) प्राप्त होते हो। (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ २ ॥

भावार्थः— जो मनुष्य श्वास प्रश्वास और पल पल पर दृष्टि रख कर वैदिक कर्म करते रहते हैं, वे सत्यप्रतिज्ञ पुरुष बल पराक्रम प्राप्त करके सदा प्रसन्न रहते हैं ॥ २ ॥

यावङ्गिरसमवथो यावगस्तिं मित्रावरुणा जमदग्निमत्रिम् ।
यौ कश्यपमवथो यौ वसिष्ठं तौ नो मुञ्चतमंहसः ॥ ३ ॥

यौ । अङ्गिरसम् । अवथः । यौ । अगस्तिम् । मित्रावरुणा । जमत्ऽअग्निम् । अत्रिम् । यौ । कश्यपम् । अवथः । यौ । वसिष्ठम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ३ ॥

भाषार्थः—(यौ) जो (मित्रावरुणा) मित्र और वरुण तुम दोनों (अङ्गिरसम्) उद्योगी वा ज्ञानी पुरुष को और (यौ) जो तुम दोनों (अगस्तिम्)

२—पूर्वार्द्धो व्याख्यातः—म० १ । **यौ** । मित्रावरुणौ । **गच्छथः** । प्राप्नुथः । **नृचक्षसौ** । अ० १ । ७ । ५ । हे नृणां चष्टारौ द्रष्टारौ सर्वस्यापि मानुषव्यापारस्य साक्षिणौ । **बभ्रुणा** । **कुर्भ्रश्च** (उ० १ । २२) इति डुभृञ् धारणपोषणयोः—कुः, द्वित्वं च । भरणेन पोषणेन । **सुतम्** । षु प्रसवैश्वर्ययोः—क्तः । उत्पन्नं जगत् ऐश्वर्यवन्तम् । पराक्रमिणम् । पुत्रवत्सेवकं वा । अन्यत् पूर्ववत् ॥

३—**यौ** । युवाम् । **अङ्गिरसम्** । अ० २ । १२ । ४ । गन्तारम् । उद्योगिनं ज्ञानिनं वा । **अवथः** । रक्षथः । **अगस्तिम्** । अ०२।३२।३ । अग कुटिलायां गतौ—अच् । **वसेस्तिः** (उ० ४ । १८०) इति अग+असु क्षेपणे कर्त्तरि-तिप्रत्ययः, पृषो-

वक्रगति पाप के गिरा देने वाले, (जमदग्निम्) [यज्ञ वा शिल्प सिद्धि में] प्रकाशमान अग्नि वाले और (अत्रिम्) दोष के नाश करने वाले, यद्वा निरन्तर गतिशील, यद्वा कायिक वाचिक और मानसिक तीन दोष रहित महात्मा को (अवथः) बचाते हो। (यौ) जो तुम दोनों (कश्यपम्) सोमरस पीने वाले वा सूक्ष्मदर्शी पुरुष को और (यौ) जो तुम दोनों (वसिष्ठम्) बड़े धनी और बड़े श्रेष्ठ जन को (अवथः) बचाते हो। (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ३ ॥

भावार्थः—मनुष्य (मित्रावरुणा) दिन रात अर्थात् समय, और प्राण अपान अर्थात् इन्द्रियों के यथावत् प्रयोग से ज्ञानी, शुद्ध चित्त, और सूक्ष्मदर्शी होकर सदा आनन्द भोगते हैं ॥ ३ ॥

यौ श्यावाश्वमवथो वध्र्यश्वं मित्रावरुणा पुरुमीढमत्रिम् ।
यौ विमदमवथः सप्तवध्रिं तौ नो मुञ्चतमंहसः ॥ ४ ॥

यौ । श्यावऽअश्वम् । अवथः । वध्रिऽअश्वम् । मित्रावरुणा । पुरुऽमीढम् । अत्रिम् । यौ । विऽमदम् । अवथः । सप्तऽवध्रिम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ४ ॥

भाषार्थः—(यौ) जो (मित्रावरुणा) मित्र और वरुण तुम दोनों (श्यावाश्वम्) ज्ञान में व्याप्ति रखने वाले को, (वध्र्यश्वम्) मित भोजन करने वाले

दरादित्वाद् दीर्घाभावः। अगं कुटिलगतिं पापम् अस्यति उत्पाटयतीति अगस्तिः। तथाभूतं पापनाशकं महर्षिम्। **मित्रावरुणा।** म० १। हे अहोरात्रौ प्राणापानौ वा। **जमदग्निम्।** अ० २। ३२। ३। जमन्तः प्रज्वलन्तोऽग्नयो यज्ञे शिल्पसिद्धौ वा यस्य तं महर्षिम्। **अत्रिम्।** अ० २। ३२। ३। दोषभक्षकं निरन्तरगतिशीलं वा मुनिम्। यद्वा अत्रिर्न त्रयः—निरु० ३। १७। इति कायिकवाचिकमानसिकत्रिदोषरहितं पुरुषम्। **कश्यपम्।** अ० २। ३३। ७ सोमरसपानशीलम्। यद्वा पश्यकं सूक्ष्मदर्शिनम्। **वसिष्ठम्।** वसुमत्–इष्ठन्। **विन्मतोर्लुक्** (पा० । ५। ३ ६५) इति मतुपो लुक्। वसुमत्तमम्। अतिशयेन धनवन्तम्। यद्वा वसु-इष्ठन्। सर्वश्रेष्ठम्। अन्यत् पूर्ववत् ॥

४—**यौ।** युवां मित्रावरुणौ। **श्यावाश्वम्।** **कृगृशृदृभ्यो वः** (उ० १। १५५) इति श्यैङ् गतौ—वः = श्यावः। **अशूप्रुषिलटि०** (उ० १। १५१) इति

---

१. चक्षुर्वै जमदग्निर्ऋषिः। यदेनेन जगत्पश्यति, अथो मनुते—तस्माच्चक्षुर्जमदग्निऋषिः (श० ब्रा० ८। १। २। ३) ॥ सम्पा० ॥

को, (पुरुमीढम्) बड़े धनी को और (अत्रिम्) नित्य उद्योगी को (अवथः) बचाते हो। (यौ) जो तुम दोनों (विमदम्) मदरहित वा अदीन पुरुष को और (सप्तवध्रिम्) [पाँच ज्ञानेन्द्रिय मन और बुद्धि इन] सात को संयम में रखने वाले पुरुष को (अवथः) बचाते हो। (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुंचतम्) छुड़ावो ॥ ४ ॥

भावार्थः—मनुष्य समय और प्राण के संयम से ज्ञानपूर्वक शुद्ध आहार विहार करके निरभिमानी और अदीन अर्थात् उत्साही, स्वस्थ और धनी होकर सदा आनन्दित रहते हैं ॥ ४ ॥

यौ भरद्वाजमवथो यौ गविष्ठिरं विश्वामित्रं वरुण मित्र कुत्सम्।
यौ कक्षीवन्तमवथः प्रोत कण्वं तौ नो मुञ्चतमंहसः ॥ ५ ॥

यौ। भरत्ऽवाजम्। अवथः। यौ। गविष्ठिरम्। विश्वामित्रम्। वरुण। मित्र। कुत्सम्। यौ। कक्षीवन्तम्। अवथः। प्र। उत। कण्वम्। तौ। नः। मुञ्चतम्। अंहसः ॥ ५ ॥

भाषार्थः—(यौ) जो (मित्र वरुण) मित्र और वरुण तुम दोनों

अशूङ् व्याप्तौ, अश भोजने वा—क्वन् इति अश्वः। श्यावे ज्ञाने अश्वो व्याप्तिर्यस्य तं ज्ञानव्याप्तिकम्। **अवथः**। रक्षथः। **वध्र्यश्वम्**। **अदिशदिभूशुभिभ्यः क्रिन्** (उ० ४। ६५) इति बध बन्धने भ्वा०, वा बध संयमने चुरा०—क्रिन्। बध्रौ संयमने अश्वोऽशनं भोजनं यस्य तं मितभोजिनम्। **मित्रावरुणा**। म० १। अहोरात्रौ। प्राणापानौ। **पुरुमीढम्**। मिह सेचने—क्तः। मीढं धननाम—निघ० २। १०। बहुधनयुक्तम्। **अत्रिम्**। म० ३। निरन्तरगतिशीलम्। **विमदम्**। मदी हर्षग्लेपनयोः—अच्। ग्लेपनं दैन्यम्। विगतो मदोऽहङ्कारो दैन्यं वा यस्य तम्। निरहङ्कारम्। अदीनम्। **सप्तवध्रिम्**। बध संयमने—क्रिन्, पूर्ववत्। पञ्चज्ञानेन्द्रियाणि मनो बुद्धिश्च सप्त बध्रौ संयमने यस्य तम्। अतिजितेन्द्रियम्। अन्यत् पूर्ववत् ॥

५—**यौ**। मित्रावरुणौ युवाम्। **भरद्वाजम्**[१]। अ० २। १२। २। अन्नस्य बलस्य विज्ञानस्य वा भर्तारं धारकं पुरुषम्। **अवथः**। रक्षथः। **गविष्ठिरम्**। **तत्पुरुषे कृति बहुलम्** (पा० ६। ३। १४) इत्यलुक्। **गवियुधिभ्यां स्थिरः** (पा० ८। ३। ९५) इति षत्वम्। गवि वाचि वेदात्मिकायां स्थिरं दृढम्। **विश्वामि-**

---

१. मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्त्ति सोऽन्नं वाजं भरति, तस्मात् मनो भरद्वाज ऋषिः (श० ब्रा० ८। १। १। ९) ॥ सम्पा० ॥

(भरद्वाजम्) अन्न वा बल, वा ज्ञान के धारण करने वाले को, (यौ) जो तुम (गविष्ठिरम्) वेद वाणी में स्थिर को, (विश्वामित्रम्) सबके मित्र को, वा सब हैं मित्र जिसके उसको, और (कुत्सम्) संगतिशील वा दोषों के कतरने वाले को (अवथः) बचाते हो, (यौ) जो तुम दोनों (कक्षीवन्तम्) उद्योगी वा शासन शील (उत) और (कण्वम्) स्तुति करने वाले मेधावी पुरुष को (प्र) अच्छे प्रकार (अवथः) बचाते हो। (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ५ ॥

भावार्थः—पुरुषार्थी, वेदों की आज्ञा पालन करने वाले सर्वहितकारक आदि पुरुषों के लिये समय और आत्मबल सदा अनुकूल रहते हैं ॥ ५ ॥

त्रम् । **मित्रे चर्षौ** (पा० ६ । ३ । १३०) इति दीर्घः । विश्वामित्रः सर्वमित्रः, सर्वं संसृतम्–निरु० २ । २४ । सर्वस्यैव मित्रं सर्वमेव वा तस्य मित्रम् । तं सर्वहितम् । **वरुण, मित्र** । हे मित्रावरुणौ । **कुत्सम्** । **स्नुव्रश्चिकृत्यृषिभ्यः कित्** (उ० ३ । ६६) इति-कुस संश्लेषणे–सः । **सः स्यार्धधातुके** (पा० ७ । ४ । ४९) इति सस्य तः । सद्भिः संगतिशीलम् । यद्वा कृती छेदने सप्रत्ययः । ऋकारस्य उत्वम् । दोषाणां कर्त्तकं छेत्तारम् । यद्वा कुत्स अवक्षेपणे चुरा०—घञ् । कुत्सयति दोषान् यः तम् । कुत्सो वज्रः-निघ० २ । २० । कुत्स इत्येतत्कृन्ततेः । ऋषिः कुत्सो भवति कर्ता[1] स्तोमानामित्यौपमन्यवः । अत्राप्यस्य वधकर्मैव भवति तत्सख इन्द्रः शुष्णं जघानेति–निरु० ३ । ११ । **कक्षीवन्तम्** । **अशेर्नित्** (उ० ३ । १५६) इति कश गतिशासनयोः–क्सिः । ततो मतुप् । मस्य वः । **अन्येषामपि दृश्यते** (पा० ६ । ३ । १३७) इति दीर्घः । कक्षिर्गतिः शासनं वा विद्यते यस्मिन् स कक्षिवान् तं गतिशीलं शासनशीलं वा कक्षीवान् । कक्षीवान् कक्ष्यावान्..अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्—निरु० ६ । १० । **प्र** । प्रकर्षेण । **उत** । अपि च । **कण्वम्** । अ० २ । २५ । ३ । **अशूप्रुषिलटिकणि०** (उ० १ । १५१) इति कण शब्दे निमीलने वा—क्वन् । कणति स्तौति यद्वा निमीलयति दोषान् स्वज्ञानेन, तम् मेधाविनम्–निघ० ३ । १५ । अन्यत्पूर्ववत् ॥

---

१. यहाँ कर्त्ता शब्द देखकर कतिपय लोग वेद ऋषिकृत हैं, ऐसा विचार करते हैं जो अनुचित है, क्योंकि धातुओं के अनेक अर्थ होते हैं ऐसा हम लिख चुके हैं तदनुसार यहाँ डुकृञ् धातु दर्शनार्थक है। तद्यथा तै० आ० में भट्टभास्कर लिखते हैं—'अथ नम ऋषिभ्यो द्रष्टृभ्यः, मन्त्रकृद्भ्यो मन्त्राणां द्रष्टृभ्यः, दर्शनमेव कर्त्तृत्वम्' (तै० आ० / भट्ट० भा० ४ । १ । १) किञ्च सायणाचार्य ने भी इसी स्थल पर लिखा है–'ऋषिरतीन्द्रियार्थद्रष्टा मन्त्रकृत्, करोतिधातुस्तत्र दर्शनार्थः' (तै० आ० / सा० भा० ४ । १ । १) ॥ सम्पा० ॥

यौ मेधातिथिमवथो यौ त्रिशोकं मित्रावरुणावुशनां काव्यं यौ ।
यौ गोतममवथः प्रोत मुद्गलं तौ नो मुञ्चतमंहसः ॥ ६ ॥

यौ । मेधऽअतिथिम् । अवथः । यौ । त्रिऽशोकम् । मित्रावरुणौ । उशनाम् । काव्यम् । यौ । यौ । गोतमम् । अवथः । प्र । उत । मुद्गलम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ६ ॥

भाषार्थः—(यौ) जो (मित्रावरुणौ) दिन रात वा प्राण और अपान तुम दोनों ! (मेधातिथिम्) धारणावती बुद्धि के नित्य प्राप्त करने वाले को और (यौ) जो तुम दोनों (त्रिशोकम्) कायिक, वाचिक, और मानसिक तीन दोषों पर शोक करने वाले को, और (यौ) जो तुम दोनों (उशनाम्) कामना योग्य नीति को और (काव्यम्) बुद्धिमानों के कर्म को (अवथः) बचाते हो। (यौ) जो तुम दोनों (गोतमम्) अतिशय स्तुति करने वाले वा विद्या की कामना करने वाले को (उत) और (मुद्गलम्) मोद अर्थात् हर्ष देने वाले को (प्र) अच्छे प्रकार (अवथः) बचाते हो, (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ६ ॥

६—**यौ** । युवाम् । **मेधातिथिम्** । **षिद्भिदादिभ्योऽङ्** (पा० ३ । ३ । १०४) इति मेधृ मेधाहिंसासङ्गमेषु—अङ् । टाप् । धीर्धारणावती मेधा—इत्यमरः । १।५।२ । **ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गि०** (उ०४।२) इति अत सातत्यगमने–इथिन् । अततीति अतिथिः । मेधां धारणावतीं बुद्धिम् अतति निरन्तरं प्राप्नोति यः, तम् । **अवथः** । **त्रिशोकम्** । त्रिषु कायिकवाचिकमानसिकदोषेषु शोकः खेदो यस्य तम् । **मित्रावरुणौ** । अहोरात्रौ प्राणापानौ वा । **उशनाम्** । **रञ्जेः क्युन्** (उ० २ । ७९) इति वश कान्तौ–क्युन् टाप् । सम्प्रसारणं च । कमनीयां नीतिम् । **काव्यम्** । **गुणवचनब्राह्मणादिभ्यः कर्मणि च** (पा० ५।१।१२४) इति कवि–ष्यञ् । कवीनां मेधाविनां कर्म । **गोतमम्** । गो-तमप् । गौः स्तोता–निघ०३। १६ । अतिशयेन स्तोतारम् । यद्वा, गौः, वाङ्नाम निघ० १ । ११ । तमु काङ्क्षायाम्, पचाद्यच् । गां वाचं विद्यां ताम्यति काङ्क्षति यस्तं विद्याकामम् । **प्र उत** । **मुद्गलम्** । **मुदिग्रोर्गग्घौ** (उ० १ । १२८) इति मुद हर्षे–गक् । ला दानादनयोः कः । मुद्गलो मुद्गवान् मुद्गिलो वा मदनङ्गिलतीति वा मदङ्गिलो वा मुदङ्गिलो वा । निरु० ९ । २४ । मोदस्य हर्षस्य दातारम् । अन्यत् पूर्ववत् ॥

भावार्थः—जो मनुष्य तपश्चर्या करके अपने समय और शारीरिक मानसिक शक्तियों का यथावत् उपयोग करते हैं वे उत्तम नीति और कर्म प्राप्त करके आनन्दित होते हैं ॥ ६ ॥

ययो रथः सत्यवर्त्मर्जुरश्मिर्मिथुया चरन्तमभियाति दूषयन् । स्तौमि मित्रावरुणौ नाथितो जोहवीमि तौ नो मुञ्चतमंहसः ॥ ७ ॥

ययोः । रथः । सत्यऽवर्त्मा । ऋजुऽरश्मिः । मिथुया । चरन्तम् । अभिऽयाति । दूषयन् । स्तौमि । मित्रावरुणौ । नाथितः । जोहवीमि । तौ । नः । मुञ्चतम् । अंहसः ॥ ७ ॥

भाषार्थः—(ययोः) जिन दोनों का (सत्यवर्त्मा) सत्यमार्ग वाला, (ऋजुरश्मिः) सरल व्याप्ति वा डोरी वाला (रथः) रथ (मिथुया) हिंसा के साथ (चरन्तम्) चलते हुये पुरुष को (दूषयन्) सताता हुआ (अभियाति) चढ़ाई करता है। (नाथितः) मैं अधीन होकर (मित्रावरुणौ) दिन रात वा प्राण अपान को (स्तौमि) सराहता हूं। और (जोहवीमि) बारंबार पुकारता हूं, (तौ) वे तुम दोनों (नः) हमें (अंहसः) कष्ट से (मुञ्चतम्) छुड़ावो ॥ ७ ॥

भावार्थः—जो मनुष्य समय और आत्मिक शक्तियों का कुप्रयोग करते हैं, वे ही कर्म उन दुराचारियों का नाश कर देते हैं, इसलिये मनुष्य अपने काल और सामर्थ्य को उत्तम कामों में लगाकर प्रसन्न रहें ॥ ७ ॥

७—**ययोः** । मित्रावरुणयोः । **रथः** । अ० ४।१२।६ । वेगवान् । स्यन्दनः । **सत्यवर्त्मा** । अवितथमार्गयुक्तः । **ऋजुरश्मिः** । **अर्जिदृशिकम्यमि०** । (उ० १।२७) इति अर्ज अर्जने—कुः, ऋजि आदेशश्च इति ऋजुः । **अश्नोतेरशच्** (उ० ४।४६) इति अशूङ् व्याप्तौ-मिः । धातोः रश् इत्यादेशः । ऋजवः सरला अनुकूला रश्मयो व्याप्तयः प्रग्रहा वा यस्य सः । **मिथुया** । मिथ मेधाहिंसनयोः—कुः । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति विभक्तेर्याच् । मिथुना हिंसनेन । **चरन्तम्** । गच्छन्तम् । **अभियाति** । अभिमुखं गच्छति । **दूषयन्** । दुष वैकृत्ये ण्यन्तात्—शतृः । **दोषो णौ** (पा० ६ । ४ । ९०) इति ऊत्वम् । **स्तौमि** । प्रशंसामि । **मित्रावरुणौ** । अहोरात्रौ प्राणापानौ वा । **नाथितः** । नाथवान् । अधीनः । **जोहवीमि** । पुनः पुनराह्वयामि । अन्यत् पूर्ववत् ॥

सूक्तम् ३० ॥

१-८ ॥ राष्ट्री देवता । १-५, ७, ८ त्रिष्टुप्, ६ जगती ॥

परमेश्वरगुणोपदेशः—परमेश्वर के गुणों का उपदेश ॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १ ॥

अहम् । रुद्रेभिः । वसुऽभिः । चरामि । अहम् । आदित्यैः । उत । विश्वऽदेवैः । अहम् । मित्रावरुणा । उभा । बिभर्मि । अहम् । इन्द्राग्नी इति । अहम् । अश्विना । उभा ॥ १ ॥

भाषार्थः—(अहम्) मैं [परमेश्वर] (रुद्रेभिः) ज्ञान दाताओं वा दुःख नाशकों (वसुभिः) निवास कराने वाले पुरुषों के साथ (उत) और (अहम्) मैं ही (विश्वदेवैः) सब दिव्य गुण वाले (आदित्यैः) प्रकाशमान, अथवा अदीन प्रकृति से उत्पन्न हुये सूर्य आदि लोकों के साथ (चरामि) चलता हूँ । (अहम्) मैं (उभा) दोनों (मित्रावरुणा) दिन और रात को, (अहम्) मैं (इन्द्राग्नी) पवन और अग्नि को, (अहम्) मैं ही (उभा) दोनों (अश्विना) सूर्य और पृथिवी को (बिभर्मि) धारण करता हूँ ॥ १ ॥

भावार्थः—परमेश्वर सर्वशक्तिमान् सर्वोत्पादक और सर्वपोषक है, उसकी उपासना से सब मनुष्य नित्य उन्नति करें ॥ १ ॥

१—**अहम्** । परमेश्वरः । **रुद्रेभिः** । अ० २ । २७ । ६ । रुद्+र । रुद्रैः । ज्ञानदातृभिः । दुःखनाशकैः । **वसुभिः** । अ० २ । १२ । ४ । वासयितृभिः । धनैः । **चरामि** । गच्छामि । **आदित्यैः** । अ० १ । ९ । १ । प्रकाशमानैः । अदितेरदीनायाः, देवमातुः प्रकृतेः सकाशादुत्पन्नैः सूर्यादिलोकैः । **उत** । अपि च । **विश्वदेवैः** । सर्वदिव्यगुणयुक्तैः । **मित्रावरुणा** । अहोरात्रौ । **उभा** । उभौ । **बिभर्मि** । धारयामि । **इन्द्राग्नी** । अ० १ । ३५ । ४ । वाय्वग्नी । **अश्विना** । अ० २ । २९ । ६ । द्यावापृथिव्यौ ॥

यह सूक्त कुछ भेद से ऋग्वेद मण्डल १० सूक्त १२५ में है। वहाँ सूक्त की वागाम्भृणी ऋषि और वागाम्भृणी ही देवता है ॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तः ॥२॥

अहम् । राष्ट्री । सम्ऽगमनी । वसूनाम् । चिकितुषी । प्रथमा । यज्ञियानाम् । ताम् । मा । देवाः । वि । अदधुः । पुरुऽत्रा । भूरिऽस्थात्राम् । भूरि । आऽवेशयन्तः ॥ २ ॥

भाषार्थः—(अहम्) मैं (वसूनाम्) धनों की (संगमनी) पहुँचाने वाली और (यज्ञियानाम्) संगति योग्य पूजनीय विषयों की (चिकितुषी) जानने वाली (प्रथमा) पहिली (राष्ट्री) नियम करने वाली शक्ति हूँ। (देवाः) विद्वानों ने (पुरुत्रा) वहुत प्रकारों से (भूरिस्थात्राम्) अनेक पदार्थों में ठहरी हुई (ताम् मा) उस मुझको (भूरि) अनेक विध से (आवेशयन्तः) [अपने आत्मा में] प्रवेश कराके (व्यदधुः) विविध प्रकार धारण किया है ॥ २ ॥

भावार्थः—अनादि, अनन्त, सर्वज्ञ, सर्वपोषक, सर्वनियन्ता परमेश्वर सब स्थूल और सूक्ष्म पदार्थों में विद्यमान है। विद्वान् लोग ही उसकी अपार महिमा का अनुभव करते हैं ॥ २ ॥

२—**अहम्** । परमेश्वरः । **राष्ट्री** । अ० ४ । १ । २ । राज्ञी । नियन्त्री शक्तिः । **संगमनी** । सम्+गम्लृ-ल्युट् । ङीप् । संगमयित्री प्रापयित्री । **चिकितुषी** । कित ज्ञाने-क्वसुः । **उगितश्च** (पा० ४ । १ । ६) इति ङीप् । ज्ञातवती । प्राप्तज्ञाना । **प्रथमा** । प्रख्याता मुख्या । **यज्ञियानाम्** । अ० २ । १२ । २ । यज्ञार्हाणां संगमनीयानां देवानाम् । **ताम्** । तथाविधाम् । **मा** । माम् । परमेश्वरम् । **देवाः** । विद्वांसः । **व्यदधुः** । धात्रो लङि रूपम् । विविधं स्थापितवन्तः । **पुरुत्रा** । **देवमनुष्यपुरुषपुरुमर्त्येभ्यो०** (पा० ५ । ४ । ५६) इति सप्तम्यर्थे-त्रा । बहुषु प्रकारेषु । **भूरिस्थात्राम्** । **अदिशदिभू०** (उ० ४ । ६५) इति भू-क्रिन् । भूरि बहुनाम-निघ० ३।१ । **दादिभ्यश्छन्दसि** (उ० ४ । १७०) इति ष्ठा-त्रन् । बहुपदार्थेषु कृतावस्थानाम् । **भूरि** । अनेकधा । **आवेशयन्तः** । विश, णिच्-शतृः । प्रवेशयन्तः स्वात्मानं प्रति ॥

अ॒हमे॒व स्व॒यमि॒दं व॑दामि॒ जुष्टं॑ दे॒वाना॑मु॒त मानु॑षाणाम्। यं का॒मये॒ तंत॑मु॒ग्रं कृ॑णोमि॒ तं ब्र॒ह्माणं॒ तमृषिं॒ तं सु॑मे॒धाम्॥३॥

अ॒हम्। ए॒व। स्व॒यम्। इ॒दम्। व॒दा॒मि॒। जुष्ट॑म्। दे॒वाना॑म्। उ॒त। मानु॑षाणाम्। यम्। का॒मये॑। तम्ऽत॑म्। उ॒ग्रम्। कृ॒णो॒मि॒। तम्। ब्र॒ह्माण॑म्। तम्। ऋषि॑म्। तम्। सु॒ऽमे॒धाम्॥ ३॥

भाषार्थः—(अहम्) मैं (एव) ही (स्वयम्) आप (देवानाम्) सूर्य आदि लोकों (उत) और (मानुषाणाम्) मननशील मनुष्यों का (जुष्टम्) प्रिय (इदम्) यह वचन (वदामि) कहता हूं। [अर्थात्] (यम्) जिस जिस-को (कामये) मैं चाहता हूं (तम्-तम्) उस उसको ही [कर्मानुसार] (उग्रम्) तेजस्वी, (तम्) उसको ही (ब्रह्माणम्) वृद्धिशील ब्रह्मा, (तम्) उसी को (ऋषिम्) सन्मार्गदर्शक ऋषि, (तम्) उसी को (सुमेधाम् = ०-धम्) उत्तम बुद्धि वाला (कृणोमि) बनाता हूं ॥ ३ ॥

भावार्थः—परमात्मा सब लोकों और प्राणियों को शरण में रखकर उपदेश करता है कि मैं अपने आज्ञाकारियों को प्रीति पूर्वक उत्तम गति देता हूं ॥ ३ ॥

३—अहम्। परमेश्वरः। **एव**। अवधारणे। नान्योऽस्ति ममोपदेष्टेति यावत्। **स्वयम्**। आत्मना। **इदम्**। अनुभूयमानं ब्रह्मात्मकं वाक्यम्। **वदामि**। उपदिशामि। प्रकटयामि। **जुष्टम्**। प्रियं हितम्। सेवितम्। **देवानाम्**। सूर्यादिलोकानाम्। **उत**। अपि च। **मानुषाणाम्**। मननशीलानां मनुष्याणाम्। **यम्**। उपासकम्। **कामये**। वाञ्छामि। **तम्-तम्**। प्रत्येकं वीप्सितं पुरुषम्। **उग्रम्**। दुष्प्रधर्षं तेजस्विनम्। **कृणोमि**। करोमि। **ब्रह्माणम्**। **बृंहेर्नोच्च** (उ० ४। १४६.) इति बृहि वृद्धौ—मनिन्। नस्य अकारः। वृंहति वर्धते वृंहयति वर्धयति। वेदज्ञानेन स ब्रह्मा। विधातारं ब्रह्माणम्। **ऋषिम्**। अ० २। ६। १। ऋषिर्दर्शनात्—निरु० २। ११। आप्तं सन्मार्गदर्शकम्। **सुमेधाम्**। दीर्घश्छान्दसः। सुमेधम्। सुमेधसम्। शोभनप्रज्ञम्॥

मया॒ सोऽन्न॑मत्ति॒ यो वि॒पश्य॑ति॒ यः प्रा॒णति॒ य ई॑ शृ॒णोत्यु॒क्तम् ।
अ॒म॒न्त॒वो मां त उप॑ क्षियन्ति श्रु॒धि श्रु॑त श्र॒द्धेयं॑ ते वदामि ॥४॥

मया॑ । सः । अन्न॑म् । अ॒त्ति॒ । यः । वि॒ऽपश्य॑ति । यः । प्रा॒णति॑ । यः । ई॒म् । शृ॒णोति॑ । उ॒क्तम् । अ॒म॒न्तव॑ः । माम् । ते । उप॑ । क्षि॒य॒न्ति॒ । श्रु॒धि । श्रु॒त॒ । श्र॒त्ऽधेय॑म् । ते॒ । व॒दा॒मि॒ ॥ ४ ॥

भाषार्थः—(मया) मेरे द्वारा ही (सः) वह (अन्नम्) अन्न (अत्ति) खाता है (यः) जो कोई (विपश्यति) विशेष करके देखता है, (यः) जो (प्राणति) श्वास लेता है और (यः) जो (ईम्) यह (उक्तम्) वचन (शृणोति) सुनता है। (माम्) मुझे (अमन्तवः) न जानने वाले (ते) वे पुरुष (उप) हीन होकर (क्षियन्ति) नष्ट हो जाते हैं। (श्रुत) हे सुनने में समर्थ जीव ! (श्रुधि) तू सुन, (ते) तुझसे (श्रद्धेयम्) आदर योग्य सत्य (वदामि) बताता हूँ ॥ ४ ॥

भावार्थः—विवेकी पुरुष परमात्मा को जानकर आनन्द, और अज्ञानी नास्तिक उससे विमुख होकर दुःख भोगते हैं, यह परमेश्वर का उपदेश है ॥ ४ ॥

अ॒हं रु॒द्राय॒ धनु॒रात॑नोमि ब्रह्म॒द्विषे॒ शर॑वे॒ हन्त॒वा उ॑ ।
अ॒हं जना॑य स॒मदं॑ कृणोम्य॒हं द्यावा॑पृथि॒वी आवि॑वेश ॥ ५ ॥

४—**मया** । मम द्वारा । **सः** । पुरुषार्थी । **अन्नम्** । अदनीयम् । जीवनसाधनं वा । **अत्ति** । भक्षयति । **यः** । **वि पश्यति** । विशेषेणावलोकयति । **प्राणति** । शपःप्रयोगश्छान्दसः इड भावश्च । प्राणिति प्रश्वसिति । **ईम्** । इदम् । **शृणोति** । श्रोत्रेण गृह्णाति । **उक्तम्** । वचनम् । **अमन्तवः** । **कमिमनिजनि०** (उ० १ । ७३) इति नञ् + मनु अवबोधने–तुः । अजानन्तः । **माम्** । परमेश्वरम् । **ते** । प्रसिद्धाः मूर्खाः । **उप** । हीने । **क्षियन्ति** । क्षि क्षये । नश्यन्ति । **श्रुधि** । शृणु । **श्रुत** । श्रुतं श्रवणं । यस्यास्तीति श्रुतः । श्रुत–अर्शआद्यच् । हे श्रवणसमर्थ ! **श्रद्धेयम्** । श्रत्, सत्यम्–निघ० ३ । १० । **अचो यत्** (पा० ३ । १ । ९७) इति श्रत् + धात्रो यत् । **ईद्यति** (पा० ६।४।६५) इति ईकारः । श्रद्धातव्यम् । आदरणीयं सत्यम् । **ते** । तुभ्यम् । **वदामि** । उपदिशामि ॥

अहम् । रुद्राय । धनुः । आ । तनोमि । ब्रह्मऽद्विषे । शरवे । हन्तवै । ऊँ इति । अहम् । जनाय । सऽमदम् । कृणोमि । अहम् । द्यावापृथिवी इति । आ । विवेश ॥ ५ ॥

भाषार्थः—(अहम्) मैं (रुद्राय) दुःखनाशक शूर के लिये (ब्रह्मद्विषे) ब्राह्मणों के द्वेषी (शरवे) हिंसक के (हन्तवै) मारने को (उ) ही (धनुः) धनुष (आ तनोमि) सब ओर से तानता हूँ। (अहम्) मैं (जनाय) भक्त जन के लिये (समदम्) आनन्दयुक्त [जगत्] (कृणोमि) करता हूँ। (अहम्) मैंने (द्यावापृथिवी) सूर्य और पृथिवी लोक में (आ) सब ओर से (विवेश) प्रवेश किया है ॥ ५ ॥

भावार्थः—सर्वव्यापक परमेश्वर शिष्टों की रक्षा के लिये दुष्टों का नाश करता है और अपने भक्तों को सब स्थानों में आनन्द देता है ॥ ५ ॥

अहं सोमंमाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणा हविष्मते सुप्राव्या ३ यजमानाय सुन्वते ॥ ६ ॥

अहम् । सोमम् । आहनसम् । बिभर्मि । अहम् । त्वष्टारम् । उत । पूषणम् । भगम् । अहम् । दधामि । द्रविणा । हविष्मते । सुप्रऽअव्या । यजमानाय । सुन्वते ॥ ६ ॥

५—**अहम्** । परमेश्वरः । **रुद्राय** । म० १ । ज्ञानदात्रे । दुःखनाशकाय । तस्य हितायेत्यर्थः । **धनुः** । अ० ४ । ६ । ६ । चापम् । **आ तनोमि** । विस्तारयामि । आततज्यं करोमि । **ब्रह्मद्विषे** । द्विष अप्रीतौ-क्विप् । ब्राह्मणानां द्वेष्ट्रे । **शरवे** । **शृस्वृस्निहि०** (उ० १ । १०) इति शृ हिंसायाम्—उः । कर्मणि चतुर्थी । हिंसकम् । दुष्टम् । **हन्तवै** । **तुमर्थे सेसेनसे०** (पा० ३।४।९) इति हन हिंसागत्योः—तवै । हन्तुं हिंसितुम् । **उ** । अवधारणे । **जनाय** । भक्तजनार्थम् । **समदम्** । **मदोऽनुपसर्गे** (पा० ३ । ३ । ६७) इति मदी हर्षे—अप् । मदेन हर्षेण सहितम् । **कृणोमि** । करोमि । **द्यावापृथिवी** । सूर्यभूलोकौ । **आविवेश** । प्रविष्टवान् ॥

भाषार्थः—(अहम्) मैं (आहनसम्) प्राप्तयोग्य (सोमम्) ऐश्वर्य को (अहम्) मैं (त्वष्टारम्) रसों के छिन्न भिन्न करने हारे सूर्य को (उत) और (पूषणम्) पोषण करने हारी पृथिवी को और (भगम्) सेवनीय चन्द्रमा को (बिभर्मि) धारण करता हूँ। (अहम्) मैं (हविष्मते) भक्ति रखने वाले, (सुन्वते) विद्या रस का निचोड़ करने हारे (यजमानाय) देवताओं की पूजा वा संगति करने हारे पुरुष को (सु प्राव्या=०—णि) सुन्दर सुन्दर रक्षा योग्य (द्रविणा) अनेक धन (दधामि) देता हूँ ॥ ६ ॥

भावार्थः—परमेश्वर ने अनेक प्रकार के ऐश्वर्य और सूर्य आदि बड़े उपकारी पदार्थ रचे हैं। विद्वान् लोग विज्ञान द्वारा उनसे लाभ प्राप्त करके आनन्द भोगते हैं ॥ ६ ॥

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्व१न्तः समुद्रे। ततो वि तिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥ ७ ॥

अहम्। सुवे। पितरम्। अस्य। मूर्धन्। मम। योनिः। अप्ऽसु। अन्तः। समुद्रे। ततः। वि। तिष्ठे। भुवनानि। विश्वा। उत। अमूम्। द्याम्। वर्ष्मणा। उप। स्पृशामि ॥ ७ ॥

६—**अहम्**। परमेश्वरः। **सोमम्**। अ० १। ६। २। ऐश्वर्यम्। **आहनसम्**। आङ्+हन हिंसागत्योः—असुन्। सम्यक् प्रापणीयम्। **बिभर्मि**। धारयामि। **त्वष्टारम्**। अ० २। ५। ६। रसानां तनूकर्तारं सूर्यम्। **उत**। अपि च। **पूषणम्**। अ० १। ९। १। पूषा पृथिवी नाम। निघ० १। १। पोषयित्रीं पृथिवीम्। **भगम्**। अ० १। १४। १। भगो भजतेः—निरु० १। ७। सेवनीयं चन्द्रम्। **दधामि**। ददामि प्रयच्छामि। **द्रविणा**। द्रविणानि। धनानि। **हविष्मते**। हविः—अ० १।४।३। दानयुक्ताय। भक्तिविशिष्टाय। **सुप्राव्या**। **ऋहलोर्ण्यत्**। (पा० ३। १। १२४) इति सु+प्र+अव रक्षणे—ण्यत्। 'संज्ञापूर्वको विधिरनित्यः'—इति वृद्धेरभावः। सुष्ठु प्रकर्षेण अवनीयानि। रक्षणीयानि। **यजमानाय**। देवपूजकाय। **सुन्वते**। षुञ् अभिषवे—शतृः। विद्यारसस्याभिषवं मथनं कुर्वते ॥

भाषार्थः—(अहम्) मैं (अस्य) इस जगत् के (मूर्धन्) नियम के निमित्त (पितरम्) पालन करने वाले गुण को (सुवे) उत्पन्न करता हूं । (मम) मेरा (योनिः) घर (समुद्रे) अन्तरिक्ष में वर्तमान (अप्सु अन्तः) व्यापनशील रचनाओं के भीतर है, (ततः) इसी से (विश्वा) सब (भुवनानि) प्राणियों में (वितिष्ठे) व्यापक होकर वर्तमान हूँ (उत) और (अमूम् द्याम्) उस प्रकाशमान सूर्य को (वर्ष्मणा) अपने ऐश्वर्य से (उप स्पृशामि) छूता रहता हूं ।। ७ ।।

भावार्थः—परमेश्वर सबमें व्यापक रहकर सबका पालन कर्त्ता, और नियन्ता तथा उपास्य है ।। ७ ।।

अहमेव वातं इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिम्ना सं बभूव ॥ ८ ॥

अहम् । एव । वातःऽइव । प्र । वामि । आऽरभमाणा । भुवनानि । विश्वा । परः । दिवा । परः । एना । पृथिव्या । एतावती । महिम्ना । सम् । बभूव ॥ ८ ॥

७—**अहम्** । परमेश्वरः । **सुवे** । षूङ् प्राणिगर्भविमोचने । जनयामि । **पितरम्** । पालकं गुणम् । **अस्य** । दृश्यमानस्य । जगतः । **मूर्धन्** । अ० ३ । ६ । ६ । मुर्वी बन्धने—कनिन् । मूर्धनि । बन्धने । नियमे, निमित्ते । **मम** । **योनिः** । गृहम्—निघ० ३ । ४ । **अप्सु** । व्यापनशीलासु प्रकृतिरचनासु । **अन्तः** । मध्ये । **समुद्रे** । अ० १ । ३ । ८ । समुद्रवन्त्यस्माद् भूतानि । अन्तरिक्षे—निघ० १ । ३ । **ततः** । तस्मात्कारणात् । **वितिष्ठे** । **समवप्रविभ्यः स्थः** (पा० १ । ३ । २२) इति आत्मनेपदम् । विविधं व्याप्य तिष्ठामि । **भुवनानि** । भूतजातानि । **विश्वा** । विश्वानि सर्वाणि । **अमूम्** । विप्रकृष्टाम् । **द्याम्** । प्रकाशमानं सूर्यम् । **वर्ष्मणा** । अ० ३ । ४ । २ । वृषु प्रजननैश्वर्ययोः—मनिन् । ऐश्वर्येण । **उपस्पृशामि** । व्याप्नोमि इत्यर्थः ।।

८—**अहम्** । परमेश्वरः । **एव** । निश्चयेन । **वातः** । पवनः । **इव** । यथा । **प्रवामि** । प्रवर्ते । **आरभमाणा** । आङ् पूर्वको लभ स्पर्शे—शानच् । लस्य रः ।

१. यथा जैमिनि० न्या० में भी यह स्थल द्रष्टव्य है 'वत्सालम्भो यजिः स्पर्शो वा वायव्यादिवद्यजिः । स्पर्शः स्याद्देवराहित्यात्संस्कारः प्रायपाठतः' (जैमिनि० न्या० अ० २ पा० ३ अधि० ६) यहाँ स्पर्श अर्थ दिखाया है । इस प्रकार याज्ञिक प्रसङ्गों में आलम्भन का जो वध अर्थ करते हैं वह न्यायसङ्गत नहीं है । स्पर्श अर्थ करना युक्त है ॥ सम्पा० ॥

भाषार्थः—(अहम् एव) मैं ही (विश्वा) सब (भुवनानि) प्राणियों को (आरभमाणा = आलभमाना) छूती हुई शक्ति (वातः इव) पवन के समान (प्रवामि) चलती रहती हूँ। (दिवा) सूर्य लोक से (परः) परे और (एना पृथिव्या) इस पृथिवी से (परः) परे [वर्तमान होकर] (एतावती) इतनी वड़ी शक्ति (महिम्ना) अपनी महिमा से (संबभूव) हो गई हूँ ॥ ८ ॥

भावार्थः—जैसे वायु सब सांसारिक पदार्थों का अवलम्बन कर्ता है उसी प्रकार परमात्मा वायु का भी आश्रय दाता है और वह इन्द्रियों के विषय, सूर्य पृथिवी आदि पदार्थों से अलग है। उसकी महिमा को जान कर सब मनुष्य पुरुषार्थी होकर आनन्दित रहें ॥ ८ ॥

॥ इति षष्ठोऽनुवाकः ॥

अथ सप्तमोऽनुवाकः ॥

सूक्तम् ३१ ॥

१-७ ॥ मन्युर्देवता ॥ १-३ त्रिष्टुप्, ४-७ जगती ॥

संग्रामे जयप्राप्त्युपदेशः—संग्राम में जय पाने का उपदेश ॥

त्वया मन्यो सरथमारुजन्तो हर्षमाणा हृषितासो मरुत्वन् ।
तिग्मेषव आयुधा संशिशाना उप प्र यन्तु नरो अग्निरूपाः ॥१॥

त्वया । मन्यो इति । सऽरथम् । आऽरुजन्तः । हर्षमाणाः । हृषितासः । मरुत्वन् । तिग्मऽइषवः । आयुधा । सम्ऽशिशानाः । उप । प्र । यन्तु । नरः । अग्निऽरूपाः ॥१॥

आलभमाना । स्पृशन्ती । आलम्बमाना शक्तिः । **भुवनानि** । भूतजातानि लोकान् वा । **विश्वा** । सर्वाणि । **परः** । परस्तात् । दूरे । **दिवा** । सूर्येण । **एना** । सुपां सुलुक्० (पा० ७ । १ । ३९) इति आच् । एनया । अनया । **पृथिव्या** । भूम्या । **एतावती** । यत्तदेतेभ्यः परिमाणे० (पा० ५ । २ । ३९) इति एतद्-वतुप् । आ सर्वनाम्नः (पा० ६ । ३ । ९१) इति आत्वम् । एतत्परिमाणा महती । **महिम्ना** । माहात्म्येन । **सं बभूव** । समर्थो बभूव ॥

भाषार्थः—(मरुत्वन्) हे शूरवीरता वाले (मन्यो) क्रोध ! (त्वया) तेरे साथ (सरथम्) एक रथ पर चढ़ कर [शत्रुओं को] (आरुजन्तः) तोड़ते फोड़ते हुये, (हर्षमाणाः) हर्ष मानते हुये, (हृषितासः) संतुष्ट मन, (तिग्मेषवः) तीक्ष्ण बाणों वाले, (आयुधा) शस्त्रों को (संशिशानाः) तीक्ष्ण करते हुये, (अग्निरूपाः) अग्निरूप [अग्नि तुल्य प्रचण्ड कर्मों वाले, अथवा सन्नद्ध कवच पहिने हुये] (नरः) हमारे नर [मुखिया लोग] (उप प्र यन्तु) व्यापकर चढ़ाई करें ॥ १ ॥

भावार्थः—जो शूरवीर दुष्टों पर क्रोध करके चढ़ाई करते हैं, वे विजयी होते हैं ॥ १ ॥ ❀

अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि । हत्वाय शत्रून् वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ २ ॥

अग्निःऽइव । मन्यो इति । त्विषितः । सहस्व । सेनाऽनीः । नः । सहुरे । हूतः । एधि । हत्वाय । शत्रून् । वि । भजस्व । वेदः । ओजः । मिमानः । वि । मृधः । नुदस्व ॥ २ ॥

१—**त्वया** । मन्युना । **मन्यो** । **यजिमनिशुन्धि०** (उ० ३।२०) इति मन ज्ञाने स्तम्भे च—युच्, अनादेशाभावः[१] । मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा मन्यन्त्यस्मादिषवः–निरु० १० । २९ । हे क्रोध—निघ० २ । १३ । **सरथम्** । समानं रथमारुह्य । सरथमारुह्य–निरु० १० । ३० । **आरुजन्तः** । आभञ्जन्तः पीडयन्तः शत्रून् । **हर्षमाणाः** । हृष तुष्टौ–शानच् । हर्षं कुर्वाणाः । **हृषितासः** । संतुष्टाः सन्तः । **मरुत्वन्** । अ० १ । २० । १ । मरुद्भिः शूरैर्युक्त । **तिग्मेषवः** । तीक्ष्णशराः । **आयुधा** । आयुधानि खड्गादीनि शस्त्राणि । **संशिशानाः** । शो तनूकरणे–कानच् । संश्यन्तः । तीक्ष्णीकुर्वन्तः । **उप** । व्याप्तौ । **प्र यन्तु** । प्रकर्षेण गच्छन्तु । **नरः** । **नयतेर्डिच्च** (उ० २ । १००) इति णीञ् प्रापणे–ऋः । नेतारः । **अग्निरूपाः** । अग्निवत्तीक्ष्णदाहादिकर्माणः । यद्वा सन्नद्धाः कवचिनः । अग्निरूपा अग्निकर्माणः सन्नद्धाः कवचिन इति वा–निरु० १० । ३० ॥

---

१. सानुनासिक यु एवं वु को अन अक होता है । यहाँ युच् का 'यु' सानुनासिक नहीं है, अतः 'अन' आदेश नहीं हुआ । द्र० काशि० ७ । १ । १ ॥ सम्पा० ॥

❀ यह सूक्त ऋग्वेद मं० १० । ८४ में कुछ भेद से है । वहाँ पर सूक्त के ऋषि मन्यु तापस और देवता मन्यु हैं ।

भाषार्थः—(मन्यो) हे क्रोध ! (अग्निः इव) अग्नि के समान (त्विषितः) प्रज्वलित होकर (सहस्व) समर्थ हो, (सहुरे) हे प्रबल ! (हूतः) आवाहन किया हुआ तू (नः) हमारा (सेनानीः) सेनापति (एधि) हो। (शत्रून्) शत्रुओं को (हत्वाय) मारकर (वेदः) उनका धन (वि भजस्व) बाँट दे, और (ओजः) बल (मिमानः) दिखाता हुआ तू (मृधः) हिंसक लोगों को (वि नुदस्व) इधर उधर फेंक दे ॥ २ ॥

भावार्थः—सेनानी लोग क्रोध के साथ शत्रुओं को मारकर उनका धन बाँट लें और उन्हें इतर बितर कर दें ॥ २ ॥

सहस्व मन्यो अभिमातिमस्मै रुजन् मृणन् प्रमृणन् प्रेहि शत्रून्। उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयासा एकज त्वम् ॥ ३ ॥

सहस्व । मन्यो इति । अभिऽमातिम् । अस्मै । रुजन् । मृणन् । प्रऽमृणन् । प्र । इहि । शत्रून् । उग्रम् । ते । पाजः । ननु । आ । रुरुध्रे । वशी । वशम् । नयासै । एकऽज । त्वम् ॥ ३ ॥

भाषार्थः—(मन्यो) हे क्रोध ! (अस्मै) इस पुरुष के लिये (अभिमातिम्) अभिमानी शत्रु को (सहस्व) दबा दे, और (शत्रून्) बैरियों को (रुजन्)

२—अग्निरिव । मन्यो । हे क्रोध ! **त्विषितः** । प्रदीप्तः सन् । **सहस्व** । षह मर्षणे शक्तौ च । शक्तो भव । **सेनानीः** । सेनायाः नेता सेनाधिपतिः । **नः** । अस्माकम् । **सहुरे** । जसिसहोरुरिन् (उ० २ । ७३) इति षह—उरिन् । हे शक्तिमन् । **हूतः** । आहूतः । **एधि** । अस भुवि—लोट् । भव । **हत्वाय** । छान्दसः क्त्वाल्यपोः प्रयोगः । हत्वा । **शत्रून्** । वैरिणः । **विभजस्व** । विभज्य देहि । **वेदः** । विद्लृ लाभे—असुन् । धनम्—निघ० २ । १० । **ओजः** । बलम् । **मिमानः** । माङ् माने—कानच् । आविष्कुर्वन् । **मृधः** । अ० १ । २१ । २ । हिंसकान् शत्रून् । **विनुदस्व** । विविधं प्रेरय ॥

३—**सहस्व** । अभिभव । **मन्यो** । म० १ । हे क्रोध ! **अभिमातिम्** । अ० २ । ६ । ३ । अभिमन्तारं शत्रुम् । **अस्मै** । अस्य जनस्य हितार्थम् । **रुजन्** । भञ्जन् । **मृणन्** । हिंसन् । **प्रमृणन्** । प्रकर्षेण नाशयन् । **प्रेहि** । प्रगच्छ । **शत्रून्** ।

तोड़ता हुआ, (मृणन्) मारता हुआ, (प्रमृणन्) कुचलता हुआ (प्रेहि) चढ़ाई कर। (ते) तेरे (उग्रम्) उग्र (पाजः) बल को (ननु) कभी नहीं (आ रुरुध्रे) वे रोक सकें। (एकज) हे एक [परमात्मा] से उत्पन्न हुये (वशी) बलवान् (त्वम्) तू [उनको] (वशम्) वश में (नयासै) ले आ ॥३॥

भावार्थः—मनुष्य क्रोध करके अभिमान आदि शत्रुओं को जीतकर अपनी इन्द्रियों को वश में रखे ॥ ३ ॥

एको बहूनामसि मन्य ईडिता विशंविशं युद्धाय संशिशाधि ।
अकृत्तरुक् त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्मसि ॥४॥

एकः । बहूनाम् । असि । मन्यो इति । ईडिता । विशम्ऽविशम् । युद्धाय । सम् । शिशाधि । अकृत्तऽरुक् । त्वया । युजा । वयम् । द्युऽमन्तम् । घोषम् । विऽजयाय । कृण्मसि ॥ ४ ॥

भाषार्थः—(मन्यो) हे क्रोध ! (एकः) अकेला ही तू (बहूनाम्) बहुत से शूरों का (ईडिता) सत्कार करने वाला (असि) है। (विशंविशम्) प्रत्येक प्रजा वा मनुष्य को (युद्धाय) युद्ध के लिये (सम्) यथावत् (शिशाधि) शिक्षा दे वा तीक्ष्ण कर। (अकृत्तरुक्) हे पूर्ण कान्ति वाले ! (त्वया युजा)

शातयितॄन् वैरिणः। **उग्रम्** । प्रचण्डम्। **ते** । त्वदीयम्। **पाजः** । **पातेर्बले जुट् च** (उ० ४ । २०३) इति पा रक्षणे—असुन्, जुट् च। बलम्—निघ० २ । ९ । **ननु** । न नुदति, प्रेरयतीति। **हरिमितयोर्द्रुवः** (उ० १ । ३४) इति न+णुद प्रेरणे—कुः, स च डित्। प्रश्नेनैव। **आ** । समन्तात्। **रुरुध्रे** । रुधिर् आवरणे लिटि छन्दसि इरेच् इत्येतस्य स्थाने **इरयो रे** (पा० ६ । ४ । ७६) इत्यनेन 'रे' इत्यादेशः। रुरुधिरे। रुद्धवन्तः। आवृतवन्तः केचित् शत्रवः। **वशी** । वशयिता स्वतन्त्रः। **वशम्** । अधीनत्वम्। **नयासै** । लेटि रूपम्। नय। प्रापय शत्रून्। **एकज** । एकस्मात्परमेश्वराज्जात ! त्वम् ॥

४—एकः । एक एव। **बहूनाम्** । अनेकानां शूराणाम्। **असि** । भवसि। **मन्यो** । हे क्रोध। **ईडिता** । ईड—तृच्। ईडिरध्येषणाकर्मा पूजाकर्मा वा—निरु० ७।१।१५। याचकः। पूजकः सत्कारकः। **विशंविशम्** । प्रत्येकं प्रजाम्। मनुष्यः—निघ०२।३। **युद्धाय** । संग्रामाय। **सम्** । सम्यक्। **शिशाधि** । शासु अनुशिष्टौ।

तुझ मित्र के साथ (वयम्) हम लोग (द्युमन्तम्) हर्षयुक्त (घोषम्) ध्वनि [सिंहनाद वा मारू गीत] (विजयाय) विजय के लिये (कृण्मसि) करते हैं ॥ ४ ॥

भावार्थः—मनुष्य क्रोध पूर्वक शत्रुओं पर धावा करके स्तुति, विजय और कीर्ति पाते हैं ॥ ४ ॥

विजेषकृदिन्द्र इवानवब्रवो३ऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥५॥

विजेषऽकृत् । इन्द्रःऽइव । अनवऽब्रवः । अस्माकम् । मन्यो इति । अधिऽपाः । भव । इह । प्रियम् । ते । नाम । सहुरे । गृणीमसि । विद्म । तम् । उत्सम् । यतः । आऽबभूथ ॥ ५ ॥

भाषार्थः—(मन्यो) हे क्रोध ! (अनवब्रवः) नीच वचन न बोलने वाला, (विजेषकृत्) विजय करने वाला तू (इन्द्रः इव) बड़े प्रतापी पुरुष के समान (इह) यहां पर (अस्माकम्) हमारा (अधिपाः) बड़ा स्वामी (भव) हो। (सहुरे) हे शक्तिमान् (ते) तेरा (प्रियम्) प्रिय (नाम) नाम (गृणी-

---

यद्वा शो तनूकरणे । लोटि छान्दसो विकरणस्य श्लुः, ततो श्लौ इत्यनेन द्वित्वमभ्यासस्येत्वम् । हेर्धित्वम् । शाधि शिक्षय । श्य तीक्ष्णीकुरु । **अकृत्तरुक्** । हे अच्छिन्नदीप्ते । संपूर्णप्रकाश ! । **त्वया** । **युजा** । मित्रेण । **वयम्** । **द्युमन्तम्** । दिवु मोदे—क्विप् । हर्षवन्तम् । **घोषम्** । सिंहनादात्मकं ध्वनिम् । **विजयाय** । विजयार्थम् । **कृण्मसि** । कृण्मः, कुर्मः ॥

५—**विजेषकृत्** । वृतॄवदि० (उ० ३ । ६२) इति जि जये—सः । विजेषस्य विजयस्य कर्ता । **इन्द्रः इव** । प्रतापी पुरुषो यथा । **अनवब्रवः** । अन्+अव+ब्रूञ् व्यक्तायां वाचि—पचाद्यच् । निपातनात्साधुः । अनवनतवचनः । उन्नतवचनः । **अस्माकम्** । **मन्यो** । हे क्रोध । **अधिपाः** । पा रक्षणे—विच् । अधिकं पालकः । **भव** । **इह** । अत्र संग्रामे । **प्रियम्** । प्रीतिकरम् । **ते** । तव । **नाम** । **सहुरे** । म० २ । हे शक्तिमन् । **गृणीमसि** । गॄ शब्दे । गृणीमः स्तुमः । **विद्म** । जानीमः ।

---

१. मस के स्थान में इदन्तो मसि (पा० ७।१।४६) से मसि आदेश हुआ है ॥ सम्पा० ॥

मसि) हम सराहते हैं। (तम्) उस (उत्सम्) स्रोता [परमेश्वर को] (विद्म) हम जानते हैं (यतः) जिससे (आबभूथ) तू आकर प्रकट हुआ है ॥ ५ ॥

भावार्थः—जो मनुष्य अदीन वचन बोलते हैं वे ही विजयी होकर कीर्त्ति पाते हैं ॥ ५ ॥

आभूत्या सहजा वज्र सायक सहो बिभर्षि सहभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥६॥

आऽभूत्या । सहऽजाः । वज्र । सायक । सहः । बिभर्षि । सहऽभूते । उत्ऽतरम् । क्रत्वा । नः । मन्यो इति । सह । मेदी । एधि । महाऽधनस्य । पुरुऽहूत । सम्ऽसृजि ॥ ६ ॥

भाषार्थः—(वज्र) वज्र रूप ! (सायक) हे शत्रुओं के अन्त करने वाले ! (सहभूते) हे सम्पत्ति के साथ वर्तमान ! (आभूत्या सहजाः) विभूति के साथ साथ उत्पन्न होने वाला तू (उत्तरम्) अधिक उत्तम (सहः) बल (बिभर्षि) धारण करता है, (पुरुहूत) बहुतों से आवाहन किये हुए (मन्यो) क्रोध ! (महाधनस्य) बड़े धन प्राप्त कराने हारे संग्राम के (संसृजि) भिड़-

---

तम् । **उत्सम्** । अ० ३ । २४ । ४ । निर्झरम् । कूपम् । परमेश्वरमित्यर्थः । **यतः** । यस्मात्स्थानात् । **आ बभूथ** । आगत्य प्रादुर्बभूविथ ॥

६—**आभूत्या** । विभूत्या । **सहजाः** । **जनसनखनक्रमगमो विट्** (पा० ३ । २ । ६७) इति जनी-विट् । **विड्वनोरनुनासिकस्यात्** (पा० ६ । ४ । ४१) सह जायते प्रादुर्भवतीति सहजाः । **वज्र** । अ० १ । ७ । ७ । **सायक** । षो अन्त-कर्मणि-ण्वुल् युक् च । हे अन्तकर । **सहः** । बलम् । **बिभर्षि** । धारयसि । **सह-भूते** । आत्मना सह भूतिः सम्पत्तिर्यस्य तत्संबुद्धौ । **उत्तरम्** । उत्कृष्टतरम् । **क्रत्वा** । **कृञः कतुः** (उ० १ । ७६) क्रतुना कर्मणा-निघ० २ । १ । प्रज्ञया-निघ० ३ । ९ । **नः** । अस्माकम् । **मन्यो** । **सह** । सार्धम् । **मेदी** । मेद-इनिः । स्नेही । **एधि** । भव । **महा धनस्य** । महान्ति धनानि प्राप्यन्ते यस्मिन् तस्य महाधनस्य ।

जाने पर (क्रत्वा सह) बुद्धि के साथ (नः) हमारा (मेदी) स्नेही (एधि) हो ॥६॥

भावार्थः—मनुष्य संग्राम में बुद्धि पूर्वक क्रोध करके विजयी होते हैं ॥ ६ ॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं धत्तां वरुणश्च मन्युः।
भियो दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम्॥७॥

सम्ऽसृष्टम्। धनम्। उभयम्। सम्ऽआकृतम्। अस्मभ्यम्। धत्ताम्। वरुणः। च। मन्युः। भियः। दधानाः। हृदयेषु। शत्रवः। पराऽजितासः। अप। नि। लयन्ताम्॥ ७॥

भाषार्थः—(वरुणः) श्रेष्ठ शूर (च) और (मन्युः) क्रोध (संसृष्टम्) संग्रह किया हुआ और (समाकृतम्) उगाही किया हुआ (उभयम्) दो प्रकार का [आत्मिक और सामाजिक] (धनम्) धन (अस्मभ्यम्) हमें (धत्ताम्) देवें। (पराजितासः) हारे हुए, और (हृदयेषु) हृदयों में (भियः) अनेक भय (दधानाः) रखते हुए (शत्रवः) शत्रु लोग (अप = अपक्रम्य) भागकर (नि लयन्ताम्) खिसक जावें ॥ ७ ॥

भावार्थः—शूर पुरुष यथानीति क्रोध धारण करके शत्रुओं को हराते और बहुत धन प्राप्त करके अपनी और समाज की उन्नति करते हैं ॥ ७ ॥

संग्रामस्य—निघ० २। १७। **पुरुहूत**। हे बहुभिराहूत !। **संसृजि**। सृज—क्विप्। संसर्गे संयोजने सति॥

७—**संसृष्टम्**। सृज विसर्गे—क्तः। संगृहीतम्। **धनम्**। वित्तम्। **उभयम्**। **संख्याया अवयवे तयप्** (पा० ५।२।४२) इति उभ—तयप्। **उभादुदात्तो नित्यम्** (पा० ५। २। ४४) इति तयपोऽयजादेशः। उभयविधम्। आत्मिकं समाजिकं चेत्यर्थः। **समाकृतम्**। समानीतम्। **अस्मभ्यम्**। **धत्ताम्**। प्रयच्छताम्। दत्ताम्। **वरुणः**। वरणीयः स्वीकरणीयः शूरः। **च**। समुच्चये। **मन्युः**। म० १। क्रोधः। **भियः**। ञिभी भये—संपदादित्वात् क्विप्। भयानि। **दधानाः**। धारयन्तः। **हृदयेषु**। मनःसु। **शत्रवः**। अरयः। **पराजितासः**। पराजिताः। अभिभूताः। **अप**। अपक्रम्य। **नि**। नितराम्। नीचैः। **लयन्ताम्**। लीङ् श्लेषणे—लोट्। लयं प्रलयं विनाशं प्राप्नुवन्तु। प्रच्छन्नं वर्तन्ताम्॥

सूक्तम् ३२ ॥

१-७ ॥ मन्युर्देवता ॥ १ जगती, २-७ त्रिष्टुप् ॥

संग्रामे जयप्राप्त्युपदेशः—संग्राम में जय पाने का उपदेश ॥

यस्ते॑ म॒न्यो॒ऽवि॑धद्व॒ज्र॒ साय॑क॒ सह॒ ओजः॒ पुष्य॑ति॒ विश्व॑मानु॒षक्। सा॒ह्याम॒ दा॒स॒मार्यं॒ त्वया॑ यु॒जा व॒यं सह॑स्कृतेन॒ सह॑सा॒ सह॑स्वता ॥ १ ॥

यः। ते॒। म॒न्यो॒ इति॑। अवि॑धत्। वज्र॒। साय॑क॒। सहः॑। ओजः॑। पु॒ष्य॒ति॒। विश्व॑म्। आ॒नु॒षक्। स॒ह्याम॑। दास॑म्। आर्य॑म्। त्वया॑। यु॒जा। व॒यम्। सहः॑ऽकृतेन। सह॑सा। सह॑स्वता ॥ १ ॥

भाषार्थः—(वज्र) हे वज्र रूप ! (सायक) हे शत्रुनाशक ! (मन्यो) दीप्तिमान् क्रोध ! (यः) जिस पुरुष ने (ते) तेरी (अविधत्) सेवा की है, वह (विश्वम्) सब (सहः) शरीर बल और (ओजः) समाज बल से (आनुषक्) लगातार (पुष्यति) पुष्ट करता है। (सहस्कृतेन) बल से उत्पन्न हुए, (सहस्वता) बलवान्, (त्वया युजा) तुझ सहायक के साथ (सहसा) बल से (वयम्) हम लोग (दासम्) दास, काम बिगाड़ देने वाले मूर्ख और (आर्यम्) आर्य अर्थात् विद्वान् का (सह्याम) निर्णय करें[1] ॥ १ ॥

१—**यः** । पुरुषः । **ते** । तव । **मन्यो** । अ० ४ । ३१ । १ । हे दीप्तिमन् क्रोध ! **अविधत्** । विध विधाने—लङ् । विधेम परिचरणकर्मा—निघ० ३ । ५ । परिचरणं शुश्रूषणं कृतवान् । **वज्र** । हे व्यापनशील वज्र रूप । **सायक** । हे शत्रुनाशक । **सहः** । शारीरिकं बलम् । **ओजः** । सामाजिकं बलम् । **पुष्यति** । वर्धयति । **विश्वम्** । सर्वम् । **आनुषक्** । अनुपूर्वात् षञ्ज सङ्गे—क्विप् । **अनिदिताम्०** (पा० ६ । ४ । २४) इति नलोपः । अनोरकारस्य दीर्घश्छान्दसः । आनुषगिति नामानुपूर्वभ्यानुषक्तं भवति । निरु० ६ । १४ । अनुषक्तमुपर्युपरिलग्नम् । निरन्तरम् । **साह्याम** । वेर्लोपः । वि+षह मर्षणे । विषह्याम अभिभवेम । **दासम्** । उत् असु

१. अर्थात् निर्णय करके उन्हें अपने वश में हर प्रकार से रखें ॥ सम्पा० ॥

भावार्थः—जो मनुष्य बुद्धि पूर्वक क्रोध का आराधन करते हैं वे भीतरी और बाहिरी बल बढ़ाकर मूर्खों का निरादर और विद्वानों का आदर करके कीर्त्ति पाते हैं ॥ १ ॥

यह सूक्त कुछ भेद से ऋग्वेद म० १० । सू० ८३ में है । वहाँ सूक्त के ऋषि मन्यु तापस और देवता मन्यु हैं ॥

मन्युरिन्द्रो॑ मन्युरे॒वास॑ दे॒वो मन्युर्होता॒ वरु॑णो जा॒तवे॑दाः । मन्युर्विश॑ ईडते॒ मानु॑षी॒र्याः पा॒हि नो॑ मन्यो तप॑सा स॒जोषाः॑ ॥२॥

म॒न्युः । इन्द्रः॑ । म॒न्युः । ए॒व । आ॒स॒ । दे॒वः । म॒न्युः । होता॑ । वरु॑णः । जा॒तऽवे॑दाः । म॒न्युः । विशः॑ । ई॒ड॒ते॒ । मानु॑षीः । याः । पा॒हि । नः॒ । म॒न्यो॒ इति॑ । तप॑सा । स॒ऽजोषाः॑ ॥ २ ॥

भाषार्थः—(मन्युः) प्रकाशमान क्रोध (इन्द्रः) ऐश्वर्यवान्, (मन्युः) क्रोध (एव) ही (देवः) दिव्यगुण वाला, (मन्युः) क्रोध (होता) दाता वा ग्रहीता, (वरुणः) वरणीय अङ्गीकारयोग्य, और (जातवेदाः) धन प्राप्त कराने वाला (आस) हुआ है। (मन्युः = मन्युम्) क्रोध को (याः) उद्योग करने वाली (मानुषीः = ०–ष्यः) मनुष्य जातीय (विशः) प्रजायें (ईडते) सराहती हैं। (मन्यो) हे क्रोध (तपसा) ऐश्वर्य से (सजोषाः) प्रीति करता हुआ तू (नः) हमें (पाहि) बचा ॥ २ ॥

उत्क्षेपे–घञ् । दासो दस्यतेः, उपदासयति कर्माणि–निरु० २ । १७ । उत्क्षपयितारम् । दस्युं चोरम् । **आर्यम्** । अ० ४ । २० । ४ । श्रेष्ठं । विद्वांसम् । **त्वया** । मन्युना । **युजा** । सहायेन । **वयम्** । पुरुषार्थिनः पुरुषाः । **सहस्कृतेन** । सहसा बलेनोत्पादितेन । **सहसा** । बलेन । **सहस्वता** । बलवता ॥

२—**मन्युः** । दीप्यमानः क्रोधः । **इन्द्रः** । ऐश्वर्यवान् । **एव** । निश्चयेन । **आस** । अस्तेर्लिटि छान्दसो भूभावाभावः । बभूव । **देवः** । दिव्यगुणयुक्तः । प्रकाशमानः । **होता** । दाता ग्रहीता वा । **वरुणः** । श्रेष्ठः । **जातवेदाः** । अ० १ । ७ । २ । जातधनः । **मन्युः** । **सुपां सुपो भवन्ति** (वा० पा० ७ । १ । ३९) इति

भावार्थः—यथावत् प्रयुक्त क्रोध के गुण पहिले से विदित हैं नीतिज्ञ पुरुष विधिपूर्वक क्रोध से ऐश्वर्य बढ़ाकर रक्षा करते हैं ॥ २ ॥

'मन्युर्विशः' के स्थान में सायण भाष्य और ऋग्वेद में 'मन्युं विशः' पद हैं ॥

अभीहि मन्यो तवसस्तवीयान् तपसा युजा वि जहि शत्रून् । अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥३॥

अभि । इहि । मन्यो इति । तवसः । तवीयान् । तपसा । युजा । वि । जहि । शत्रून् । अमित्रऽहा । वृत्रऽहा । दस्युऽहा । च । विश्वा । वसूनि । आ । भर । त्वम् । नः ॥ ३ ॥

भाषार्थः—(मन्यो) हे प्रकाशमान क्रोध (तवसः) महान् से भी (तवीयान्) अति महान् तू (अभीहि) इधर आ, (तपसा युजा) अपने ऐश्वर्य, मित्र के साथ (शत्रून्) शत्रुओं को (विजहि) मिटा दे । (च) और (अमित्रहा) पीड़ा देने वालों का मारने वाला, (वृत्रहा) अन्धकार नाश करने वाला, (दस्युहा) डाकुओं का मारने वाला (त्वम्) तू (विश्वा) सब (वसूनि) धन को (नः) हमारे लिये (आ) सब ओर से (भर) भर दे ॥ ३ ॥

द्वितीयार्थे प्रथमा । मन्युं क्रोधम् । **विशः** । प्रजाः । **ईडते** । स्तुवन्ति । **मानुषीः** । **मनोर्जातावञ्यतौ षुक् च** (पा०४।१।१६१) इति मनु-अञ् षुक् चागमः । **टिड्ढाण०** (पा० ४ । १ । १५) इति-ङीप् । यद्वा, **जनेरुसिः** (उ० २ । ११५) इति मनु अवबोधने-उसिः । मनुष्-अण, ङीप् । मानुष्यः । मनुष्यजातीयाः । **याः** । या प्रापणे-डः, टाप् । उद्योगशीलाः । **पाहि** । रक्ष । **नः** । अस्मान् । **मन्यो** । हे क्रोध । **तपसा** । तप संतापैश्वर्ययोः-असुन् । प्रतापेन । ऐश्वर्येण । **सजोषाः** । जुषी-असुन् । समानप्रीतिः ॥

३—**अभीहि** । अभिमुखं गच्छ । **मन्यो** । हे क्रोध । **तवसः** । तु सौत्रो धातुर्गतिवृद्धिहिंसासु—असुन् । तवस इति महतो नामधेयम्—निरु० ५ । ९ । तवः, बलनाम—निघ० २ । ९ । महतः प्रवृद्धादपि । **तवीयान्** । तोतृ—ईयसुन् तृलोपः । प्रवृद्धतरः । **तपसा** । सामर्थ्येन । **युजा** । सहायेन । **वि जहि** । विनाशय ।

भावार्थः—पुरुषार्थी मनुष्य नीति पूर्वक क्रोध से धन प्राप्त करके आनन्द भोगते हैं ॥ ३ ॥

त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः। विश्वचर्षणिः सहुरिः सहीयानस्मास्वोजः पृतनासु धेहि ॥ ४ ॥

त्वम्। हि। मन्यो इति। अभिभूतिऽओजाः। स्वयम्ऽभूः। भामः। अभिमातिऽसहः। विश्वऽचर्षणिः। सहुरिः। सहीयान्। अस्मासु। ओजः। पृतनासु। धेहि ॥ ४ ॥

भाषार्थः—(मन्यो) हे क्रोध (त्वम् हि) तू ही (अभि भूत्योजाः) शत्रु पराजय का सामर्थ्यवाला, (स्वयंभूः) अपने आप उत्पन्न होनेवाला, (भामः) प्रकाशमान और (अभिमातिषाहः) अभिमानियों को हराने वाला है। (विश्वचर्षणिः) सब देखने वाला, (सहुरिः) शक्तिमान्, (सहीयान्) अधिक बलवान् तू (पृतनासु) संग्रामों के बीच (अस्मासु) हममें (ओजः) पराक्रम (धेहि) धारण कर ॥ ४ ॥

भावार्थः—जो मनुष्य नीति कुशल और कर्म कुशल होकर दुष्टों पर क्रोध करते हैं; वे ही संग्रामों में विजयी होते हैं ॥ ४ ॥

शत्रून्। अरीन्। **अमित्रहा**। अ० १। १९। २। पीडकनाशकः। **वृत्रहा**। शत्रुहन्ता। **दस्युहा**। चोरादीनां घातकः। **च**। **विश्वा**। सर्वाणि। **वसूनि**। धनानि। **आ**। समन्तात्। **भर**। धारय। **त्वम्**। **नः**। अस्मभ्यम् ॥

४—**त्वम्**। **हि**। **मन्यो**। हे दीप्यमान क्रोध। **अभिभूत्योजाः**। अभिभूतये शत्रुपराजयाय ओजो बलं यस्य स तथाभूतः। **स्वयंभूः**। स्वयमेव आत्मन्युत्पद्यमानः। **भामः**। **अर्त्तिस्तुसुहु०** (उ० १। १४०) इति भा दीप्तौ—मन्। प्रदीप्यमानः। **अभिमातिषाहः**। षह मर्षणे—पचाद्यच्। छान्दसो दीर्घः। अभिमातीनामभिमानिनां पराजेता। **विश्वचर्षणिः**। विश्वचर्षणिः पश्यतिकर्मा—निघ० ३। ११। विश्वस्य सर्वस्य द्रष्टा। **सहुरिः**। अ० ४।३१।२। शक्तिमान्। **सहीयान्**। सोढृतरः। बलवत्तरः। **अस्मासु**। **ओजः**। पराक्रमम्। **पृतनासु**। संग्रामेषु। **धेहि**। धारय ॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीडाहं स्वा तनूर्बलदावा न एहि ॥५॥

अभागः । सन् । अप । पराऽइतः । अस्मि । तव । क्रत्वा । तविषस्य । प्रऽचेतः । तम् । त्वा । मन्यो इति । अक्रतुः । जिहीड । अहम् । स्वा । तनूः । बलऽदावा । नः । आ । इहि ॥ ५ ॥

भाषार्थः—(प्रचेतः) हे उत्तम ज्ञान वाले ! मैं (अभागः सन्) अभागा होकर (तव तविषस्य) तुझ बलवान् के (क्रत्वा) कर्म वा बुद्धि से (अप = अपेत्य) हटकर (परेतः) दूर पड़ा हुआ (अस्मि) हूँ । (मन्यो) हे क्रोध (अक्रतुः) बुद्धि हीन वा कर्म हीन (अहम्) मैंने (तम् त्वा) उस तुझको (जिहीड) क्रुद्ध कर दिया है, (बलदावा) तू (स्वा तनूः) अपने स्वरूप से (नः) हमको (आ इहि) प्राप्त हो ।। ५ ।।

भावार्थः—अनीतिज्ञ पुरुष यथावत् क्रोध न करके दरिद्र और बुद्धिहीन हो जाते हैं, इससे मनुष्यों को यथावत् वर्त्तना चाहिये ।। ५ ।।

५—**अभागः** । भगानामैश्वर्याणां समूहः—इति भग—अण् । ऐश्वर्यसमूहरहितः । सर्वथा निर्धनः । **सन्** । वर्तमानः सन् । **अप** । अपेत्य । **परेतः** । परागतः । **अस्मि** । वर्ते । **तव** । **क्रत्वा** । अ० ४ । ३१ । ६ । कर्मणा प्रज्ञया वा । **तविषस्य** । अ० ४ । १५ । २ । महतः पूजनीयस्य । **प्रचेतः** । हे प्रकृष्टज्ञान । **तम्** । **त्वा** । त्वाम् । **अक्रतुः** । अप्रज्ञः, बुद्धिहीनः कर्महीनो वा । **जिहीड** । हेडृ अनादरे क्रोधे च । लिटि छान्दसं रूपम् । हेडते क्रुध्यतिकर्मा—निघ० २ । १२ । जिहीडे, क्रुद्धं कृतवानस्मि । **स्वा** । **सुपां सुलुक्०** (पा० ७।१।३९) विभक्तेः सुः । स्वया आत्मीयया । **तनूः** । उक्तसूत्रेण विभक्तेः सुः । तन्वा । स्वरूपेण । **बलदावा** । **आतो मनिन्क्वनि०** (पा० ३ । २ । ७४) इति बल+डुदाञ् दाने—वनिप् । बलस्य दाता । **नः** । अस्मान् । **आ इहि** । आगच्छ ॥

अयं ते अस्म्युप न एह्यर्वाङ् प्रतीचीनः सहुरे विश्वदावन् ।
मन्यो वज्रिन्नभि न आ ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥६॥

अयम् । ते । अस्मि । उप । नः । आ । इहि । अर्वाङ् । प्रतीचीनः । सहुरे । विश्वऽदावन् । मन्यो इति । वज्रिन् । अभि । नः । आ । ववृत्स्व । हनाव । दस्यून् । उत । बोधि । आपेः ॥ ६ ॥

भाषार्थः—(अयम्) यह मैं (ते) तेरा (अस्मि) हूँ । (सहुरे) हे समर्थ ! (विश्वदावन्) हे सर्वदाता ! (प्रतीचीनः) प्रत्यक्ष चलता हुआ तू (नः) हमारे (अर्वाङ्) सन्मुख होकर (उप एहि) समीप आ (वज्रिन्) हे वज्रधारी (मन्यो) क्रोध ! (नः अभि) हमारी ओर (आ ववृत्स्व) वर्तमान हो जा, (उत) और (आपेः) अपने बन्धु का (बोधि) बोधकर, [जिससे हम दोनों] (दस्यून्) दुष्टों को (हनाव) मारें ॥ ६ ॥

भावार्थः—जो मनुष्य सब प्रकार विचार करके दुष्टों पर क्रोध करते हैं, वे विजयी होते हैं ॥ ६ ॥

अभि प्रेहि दक्षिणतो भवा नोऽधा वृत्राणि जङ्घनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभावुपांशु प्रथमा पिबाव ॥७॥

६—**अयम्** । पुरुषार्थी । **ते** । तव । **अस्मि** । **उप** । समीपे । **नः** । अस्माकम् । **आ इहि** । आगच्छ । **अर्वाङ्** । अभिमुखः । **प्रतीचीनः** । **विभाषाञ्चेरदिक्स्त्रियाम्** (पा० ५ । ४ । ८) इति प्रत्यच्—स्वार्थे खः । अल्लोपो दीर्घश्च । प्रत्यञ्चन् । प्रत्यक्षं गच्छन् । **सहुरे** । हे शक्तिमन् । **विश्वदावन्** । विश्व+डुदाञ्—वनिप् । हे सर्वस्य दातः । **मन्यो** । हे क्रोध । **वज्रिन्** । हे वज्रोपेत । **अभि** । अभिलक्ष्य । **नः** । अस्मान् । **आ** । समन्तात् । **ववृत्स्व** । छान्दसः शपः श्लुः । वर्तस्व । **हनाव** । आवां हिनसाव । **दस्यून्** । उपक्षपयितान् दुष्टान् । **उत** । अपि च । **बोधि** । बुध अवगमने लोटि छान्दसं रूपम् । बुध्यस्व । बोधं कुरु । **आपेः** । **इणजादिभ्यः** (वा० पा० ३ । ३ । १०८) इति आप्लृ व्याप्तौ—इण् । बन्धोः ॥

अभि । प्र । इहि । दुक्षिणतः । भव । नः । अधं । वृत्राणि । जङ्घनाव । भूरि । जुहोमि । ते । धरुणम् । मध्वः । अग्रम् । उभौ । उपऽअंशु । प्रथमा । पिबाव ॥ ७ ॥

भाषार्थः—(अभि प्र इहि) आगे आ, और (नः) हमारी (दक्षिणतः) दाहिनी ओर (भव) वर्त्तमान हो, (अध) तब (भूरि) बहुत से (वृत्राणि) अन्धकारों को (जङ्घनाव) हम दोनों मिटा देवें। (मध्वः) मधुर रस का (अग्रम्) श्रेष्ठ (धरुणम्) धारण करने योग्य [स्तुतिरूप] रस (ते) तुझे (जुहोमि) भेंट करता हूँ। (प्रथमा = ०–मौ) पहिले वर्तमान (उभौ) हम दोनों (उपांशु) एकान्त में (पिबाव) [रसपान] करें ॥ ७ ॥

भावार्थः—महात्मा पुरुष आत्मदोषों पर क्रोध करके अनेक अन्धकारों को मिटाते हैं और वे ही इस मन्युस्तुति को एकान्त में सूक्ष्म रूप से विचारकर अधिक आनन्द भोगते हैं ॥ ७ ॥

सूक्तम् ३३ ॥

१–८ ॥ अग्निर्देवता । गायत्री छन्दः ॥

सर्वरक्षणोपदेशः—सब प्रकार की रक्षा का उपदेश ॥

अप नः शोशुचदुघमग्ने शुशुग्ध्या रयिम् ।
अप नः शोशुचदुघम् ॥ १ ॥

७—**अभि** । **प्र** । **इहि** । गच्छ । **दक्षिणतः** । दक्षिणोत्तराभ्यामतसुच् (पा० ५ । ३ । २८) इति अतसुच् । दक्षिणभागे परमसहायकत्वेन । **भव** । **नः** । अस्माकम् । **अध** । अथ । अनन्तरम् । **वृत्राणि** । तमांसि । **जङ्घनाव** । हन्तेर्यङ्लुगन्ताल्लोटि । **आडुत्तमस्य पिच्च** (पा० ३ । ४ । ९२) इति आडागमः । आवामतिशयेन हनाव । **भूरि** । भूरीणि बहूनि । **जुहोमि** । ददामि । **ते** । तुभ्यम् । **धरुणम्** । अ० ३ । १२ । ३ । धर्तव्यम् । स्तुतिरूपं रसम् । **मध्वः** । मधोः । मधुररसस्य । **अग्रम्** । श्रेष्ठं सारभूतम् । **उभौ** । अहं च मन्युश्च । **उपांशु** । निर्जने देशे । **प्रथमा** । प्रथमौ । शत्रुभ्यः पूर्वभाविनौ सन्तौ । **पिबाव** । आवां पानं करवाव ॥

अप॑ । नः॒ । शोशु॑चत् । अ॒घम् । अग्ने॑ । शु॒शु॒ग्धि । आ । र॒यिम् । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ १ ॥

भाषार्थः—(नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे। (अग्ने) हे ज्ञानस्वरूप परमेश्वर ! (रयिम्) धन को (आ) अच्छे प्रकार (शुशुग्धि) पवित्र करो। (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ १ ॥

भावार्थः—मनुष्य परमेश्वर की महिमा विचारते हुए दुष्कर्म के त्याग और और सुकर्म के ग्रहण से विद्या रूप और सुवर्ण आदि रूप धन प्राप्त करें ॥ १ ॥

यह सूक्त कुछ भेद से ऋग्वेद म० १ सू० ९७ में है ॥

सु॒क्षे॒त्रि॒या सु॑गातु॒या व॑सू॒या च॑ यजामहे ।
अप॑ नः॒ शोशु॑चद॒घम् ॥ २ ॥

सु॒ऽक्षे॒त्रि॒या । सु॒ऽगा॒तु॒या । व॒सु॒ऽया । च॒ । य॒जा॒म॒हे॒ ।
अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ २ ॥

भाषार्थः—(सुक्षेत्रिया) उत्तम खेत के लिये, (सुगातुया) उत्तम भूमि के लिये (च) और (वसुया) धन के लिये (यजामहे) हम [परमेश्वर को] पूजते हैं। (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ २ ॥

१—**अप** । दूरीभूय । **नः** । अस्माकम् । **शोशुचत्** । ईशुचिर् पूतिभावे यङ्लुगन्तात् लेटि अडागमः । अत्यन्तं शुच्यात् विनश्येदित्यर्थः । **अघम्** । पापम् । **अग्ने** । हे ज्ञानस्वरूप परमात्मन् । **शुशुग्धि** । शुचिर्ज्वलतिकर्मणः निरु० ६ । १ । लोट् । अन्तर्गतण्यर्थः । शपः[१] श्लुः । **हुझल्भ्यो हेर्धिः** (पा० ६ । ४ । १०१) इति धिः । **चोः कुः** (पा० ८ । २ । ३०) इति कुत्वम् । क्लेदय । सिञ्च । **आ** । समन्तात् । **रयिम्** । धनम् । अन्यद् गतम् । आदरार्थं पुनः प्रयोगः ॥

२—**सुक्षेत्रिया** । **इयाडियाजीकाराणामुपसंख्यानम्** (वा० पा० ७।१।३९) इति ङेर्डियाजादेशः । चित्त्वादन्तोदात्तः शोभनाय क्षेत्राय । **सुगातुया** । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति ङेर्याच् । गातुः—पृथिवीनाम—निघ० १ । १ ।

---

१. बहुलं छन्दसि (२ । ४ । ७६) से छान्दस शप् के स्थान में श्लु हुआ है ॥ सम्पा० ॥

भावार्थः—मनुष्य परमेश्वर की महिमा जानकर अनिष्टों को मिटाकर पुरुषार्थ से अपनी प्रभुता बढ़ावें ॥ २ ॥

प्र यद् भन्दिष्ठ एषां प्रास्माकासश्च सूरयः ।

अप नः शोशुचदघम् ॥ ३ ॥

प्र । यत् । भन्दिष्ठः । एषाम् । प्र । अस्माकासः । च ।
सूरयः । अप । नः । शोशुचत् । अघम् ॥ ३ ॥

भाषार्थः—(यत्) जिस प्रकार से (एषाम्) इन प्राणियों के मध्य (भन्दिष्ठः) अत्यन्त सुखी होकर (प्र) प्रकृष्ट [होजाऊं] (च) और (अस्माकासः) हमारे (सूरयः) विद्वान् लोग (प्र) प्रकृष्ट [होवें] [उसी प्रकार से] (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥३॥

भावार्थः—मनुष्य शुभ कर्मों में प्रवृत्त होकर दरिद्रता आदि दुःखों को मिटावें ॥ ३ ॥

प्र यत् ते अग्ने सूरयो जायेमहि प्र ते वयम् ।

अप नः शोशुचदघम् ॥ ४ ॥

प्र । यत् । ते । अग्ने । सूरयः । जायेमहि । प्र । ते । वयम् ।
अप । नः । शोशुचत् । अघम् ॥ ४ ॥

शोभनभूमिप्राप्तये । **वसुया** । पूर्वसूत्रेण ङ्यर्याच् । वसुने धनाय । **च** । समुच्चये । **यजामहे** । परमेश्वरं पूजयामः । अन्यत्पूर्ववत् ॥

३—**प्र** । प्रकर्षेण भवानि । **यत्** । यथा । **भन्दिष्ठः** । भदि कल्याणे सुखे च—तृच्, इष्ठन् । **तुरिष्ठेमेयःसु** (पा० ६ । ४ । १५४) इति तृलोपः । भन्दना भन्दतेः स्तुतिकर्मणः—निरु० ५ । २ । स्तोतृतमः सुखितमः । **एषाम्** । मनुष्यादिप्राणिनां मध्ये । **प्र** । प्रकर्षेण भवन्तु । **अस्माकासः** । **तस्येदम्** (पा० ४ । ३ । १२०) इति अस्मद्—अण् । **तस्मिन्नणि च युष्माकास्माकौ** (पा० ४।३। २) इति अस्माकादेशः अणि वृद्ध्यभावश्छान्दसः । असुगागमश्च । आस्माकः । अस्मदीयाः । **च** । **सूरयः** । अ० २ । ११ । ४ । विद्वांसः । अन्यत् पूर्ववत् ॥

भाषार्थः—(अग्ने) हे परमात्मन् (सूरयः) विद्वान् लोग (यत् ते) जिस तेरे (प्र=प्रजायन्ते) प्रजा हैं, (ते) उस तेरे ही (वयम्) हम लोग (प्र जायेमहि) प्रजा होवें। (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ ४ ॥

भावार्थः—सब मनुष्य विद्वानों के समान परमेश्वर के गुण कर्म स्वभाव जानकर सदा सुखी रहें ॥ ४ ॥

प्र यदुग्नेः सहस्वतो विश्वतो यन्ति भानवः ।

अप नः शोशुचदुघम् ॥ ५ ॥

प्र । यत् । अग्नेः । सहस्वतः । विश्वतः । यन्ति । भानवः ।
अप । नः । शोशुचत् । अघम् ॥ ५ ॥

भाषार्थः—(यत्) जिस कारण से (सहस्वतः) बलवान् (अग्नेः) परमात्मा के (भानवः) अनेक प्रकाश (विश्वतः) सब ओर (प्र) भली प्रकार (यन्ति) चलते रहते हैं। (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ ५ ॥

भावार्थः—मनुष्य परमेश्वर की अनेक सूक्ष्म और स्थूल रचनाओं को देखकर अपने विघ्नों को मिटावें ॥ ५ ॥

त्वं हि विश्वतोमुख विश्वतः परिभूरसि ।

अप नः शोशुचदुघम् ॥ ६ ॥

४—**प्र** । इत्यस्य, जायेमहि, इति क्रियया सह सम्बन्धः । प्रजायन्ते प्रजाः सन्ति । **यत्** । यस्य । **ते** । तव । **अग्ने** । परमात्मन् । **सूरयः** । विद्वांसः । **प्र जायेमहि** । प्रजा भवेम । **ते** । तस्य तव । **वयम्** । उपासकाः । अन्यद्गतम् ॥

५—**प्र** । प्रकर्षेण । **यत्** । यस्मात् । **अग्नेः** । परमात्मनः । **सहस्वतः** । बलवतः । **विश्वतः** । सर्वतः । **यन्ति** । गच्छन्ति । **भानवः** । प्रकाशाः । अन्यत् पूर्ववत् ॥

त्वम् । हि । विश्वतःऽमुख । विश्वतः । परिऽभूः । असि ।
अप । नः । शोशुचत् । अघम् ॥ ६ ॥

भाषार्थः—(हि) जिस कारण से (विश्वतोमुख) हे सब ओर मुख वाले [मुख के समान सर्वोपदेशक, सर्वोत्तम] परमेश्वर ! (त्वम्) तू (विश्वतः) सब ओर से (परिभूः) व्यापक (असि) है । (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ ६ ॥

भावार्थः—मनुष्य परमेश्वर के समान 'विश्वतोमुख' होकर सदा चैतन्य रहें और अनिष्टों को मिटाकर अपनी वृद्धि करें ॥ ६ ॥

द्विषो नो विश्वतोमुखाति नावेव पारय ।
अप नः शोशुचदघम् ॥ ७ ॥

द्विषः । नः । विश्वतःऽमुख । अति । नावाऽइव । पारय ।
अप । नः । शोशुचत् । अघम् ॥ ७ ॥

भाषार्थः—(विश्वतोमुख) हे सब ओर मुख वाले [मुख के समान, सर्वोपदेशक सर्वोत्तम] परमेश्वर ! (द्विषः) द्वेषियों को (अति=अतीत्य) लांघ कर (नः) हमें (पारय) पार लगा, (नावा इव) जैसे नाव से [समुद्र को पार करते हैं], (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ ७ ॥

भावार्थः—जैसे पोत द्वारा समुद्र पार करते हैं, वैसे ही मनुष्य परमेश्वर के आश्रय से सब दोषों को हटाकर सुखी रहें ॥ ७ ॥

६—**त्वम्** । **हि** । **विश्वतोमुख** । हे मुखवत् सर्वोपदेशक, सर्वोत्तम परमात्मन् । **विश्वतः** । सर्वतः । **परिभूः** । अ० ३ । २१ । ४ । ग्रहीता व्यापकः । **असि** । अन्यत् पूर्ववत् ॥

७—**द्विषः** । द्वेष्टॄन् शत्रून् । **नः** । अस्मान् । **विश्वतोमुख** । म० ६ । **अति** । अतीत्य । उल्लङ्घ्य । **नावा इव** । यथा नौकया । **पारय** । पारं गमय । अन्यत् पूर्ववत् ॥

स नः सिन्धुमिव नावाति पर्षा स्वस्तये ।
अप नः शोशुचदघम् ॥ ८ ॥

सः । नः । सिन्धुम्ऽइव । नावा । अति । पर्ष । स्वस्तये । अप । नः । शोशुचत् । अघम् ॥ ८ ॥

भाषार्थः—(सः) सो तू (नः) हमें (स्वस्तये) आनन्द के लिये (पर्ष) पार लगा, (इव) जैसे (नावा) नाव से (सिन्धुम्) समुद्र को (अति = अतीत्य) लांघ कर [पार करते] हैं। (नः) हमारा (अघम्) पाप (अप शोशुचत्) दूर धुल जावे ॥ ८ ॥

भावार्थः—मनुष्य परमेश्वर में निष्ठा करके पुरुषार्थ पूर्वक दुःख सागर से पार होकर सुखी होवें जैसे नाव के आश्रय से जलयात्री समुद्र पार करके प्रसन्न होते हैं ॥ ८ ॥

सूक्तम् ३४ ॥

१-८ ॥ ओदनो देवता । १-४ त्रिष्टुप्, ५ एष यज्ञानामिति त्रिष्टुप्, एतात्स्त्वेति द्विपदा जगती, ६, ७ पञ्चपदा जगती, ८ जगती ॥

ब्रह्मविद्योपदेशः—ब्रह्मविद्या का उपदेश ॥

ब्रह्मास्य शीर्षं बृहदस्य पृष्ठं वामदेव्यमुदरमोदनस्य । छन्दांसि पक्षौ मुखमस्य सत्यं विष्टारी जातस्तपसोऽधि यज्ञः ॥ १ ॥

८—सः । स त्वम् । नः । अस्मान् । सिन्धुम् इव । यथा समुद्रं तथा । नावा । नौकया । अति । अतीत्य । पर्ष । पॄ पालनपूरणयोः, लेटि अडागमः । सिब् बहुलं लेटि (पा० ३ । १ । ३४) इति-सिप् । पारं प्रापय । स्वस्तये । आनन्दाय । अन्यत् पूर्ववत् ॥

ब्रह्म । अस्य । शीर्षम् । बृहत् । अस्य । पृष्ठम् । वामऽदेव्यम् । उदरम् । ओदनस्य । छन्दांसि । पक्षौ । मुखम् । अस्य । सत्यम् । विष्टारी । जातः । तपसः । अधि । यज्ञः ॥ १ ॥

भाषार्थः—(अस्य) इस (ओदनस्य) सेचनसमर्थ वा अन्नरूप परमेश्वर का (शीर्षम्) शिर (ब्रह्म) वेद है, (अस्य) इसकी (पृष्ठम्) पीठ (बृहत्) प्रवृद्ध जगत् और (उदरम्) उदर (वामदेव्यम्) मनोहर परमात्मा से जताया गया [भूतपञ्चक] है। (अस्य) इसके (पक्षौ) दोनों पार्श्व (छन्दांसि) आनन्दप्रद वा पूजनीय कर्म और (मुखम्) मुख (सत्यम्) सत्य है। (विष्टारी) वह विस्तार वाला (यज्ञः) पूजनीय परमात्मा (तपसः) अपने ऐश्वर्य से (अधि) सबसे ऊपर (जातः) प्रकट हुआ है ॥ १ ॥

भावार्थः—परमेश्वर सर्वशक्तिमान् सर्वव्यापक और सर्वान्तर्यामी है, उसकी उपासना सब मनुष्य नित्य करें ॥ १ ॥

अनस्थाः पूताः पवनेन शुद्धाः शुचयः शुचिमपि यन्ति लोकम् ।
नैषां शिश्नं प्र दहति जातवेदाः स्वर्गे लोके बहु स्त्रैणमेषाम् ॥ २ ॥

१—**ब्रह्म** । वेदः । **अस्य** । प्रत्यक्षस्य । **शीर्षम्** । शिरः । **बृहत्** । प्रवृद्धं जगत् । **पृष्ठम्** । पृष्ठभागः । **वामदेव्यम्** । **वामदेवाड् ड्यड्ड्यौ** (पा० ४ । २ । ९) इति वामदेव—ड्यः । वामदेवेन दृष्टं विज्ञातं विज्ञापितं वा—इति दयानन्दभाष्ये यजु० १२ । ४ । वामो वल्गुरेव देवः, वामदेवः परमेश्वरः, तेन विज्ञापितं भूतपञ्चकम् । **उदरम्** । उदरस्थानीयम् । **ओदनस्य** । अ० ४ । १४ । ७ । सेचनशीलस्य प्रवर्धकस्य अन्नरूपस्य वा परमात्मनः । **छन्दांसि** । **चन्देरादेश्च छः** (उ० ४ । २१९) इति चदि आह्लादने—असुन्, चस्य छः । छन्दति, अर्चतिकर्मा—निघ० ३ । १४ । छन्दांसि छादनात्—निरु० ७ । १२ । आह्लादकर्माणि । अर्चनीयकर्माणि । **पक्षौ** । पक्ष परिग्रहे—अच् । पार्श्वौ । **मुखम्** । **सत्यम्** । याथार्थ्यम् । **विष्टारी** । **अत इनिठनौ** (पा० ५ । २ । ११५) इति विस्तार—इनिः । विस्तारवान् । **जातः** । प्रादुर्भूतः । **तपसः** । स्वैश्वर्यात् । **अधि** । उपरि । **यज्ञः** । यजनीयः । ओदनः । परमेश्वरः ॥

अनस्थाः । पूताः । पवनेन । शुद्धाः । शुचयः । शुचिम् । अपि । यन्ति । लोकम् । न । एषाम् । शिश्नम् । प्र । दहति । जातऽवेदाः । स्वःऽगे । लोके । बहु । स्त्रैणम् । एषाम् ॥ २ ॥

भाषार्थः—(अनस्थाः) न गिराने योग्य (पवनेन) शुद्ध आचरण से (पूताः) शुद्ध किये गये, (शुद्धाः) शुद्ध स्वभाव, (शुचयः) प्रकाशमान महात्मा लोग (अपि) ही (शुचिम्) ज्योतिः स्वरूप (लोकम्) लोक [परमात्मा) को (यन्ति) पाते हैं । (जातवेदाः) प्राणियों का जानने वाला परमेश्वर (एषाम्) इनकी (शिश्नम्) गति वा सामर्थ्य को (न) नहीं (प्रदहति) जलाता है । [इसलिये कि] (एषाम्) इन [महात्माओं] का (स्त्रैणम्) सृष्टि का हितकर्म (स्वर्गे) अच्छे प्रकार पाने योग्य सुखदायक (लोके) लोक [परमात्मा] में (बहु) बहुत है ॥ २ ॥

भावार्थः—जितेन्द्रिय शुद्ध स्वभाव योगी जन ही परमात्मा को पाते हैं, और उस जगदीश्वर के सहारे में रह कर संसार का हित करते हुये सर्वत्र गतिमान् होते हैं ॥ २ ॥

२—**अनस्थाः** । **असिसंञ्जिभ्यां क्थिन्** (उ० ३ । १५४) इति असु क्षेपणे—क्थिन् इति अस्थि = क्षेपणम् । **छन्दस्यपि दृश्यते** (पा० ७।१।७६) इति अस्थिशब्दस्य अनङ् आदेशः । अनसनीयाः । अक्षेपणीयाः । अनिवारणीयाः, इत्यर्थः । **पूताः** । पवित्रीकृताः । **पवनेन** । शोधनकर्मणा । **शुद्धाः** । निर्मला । **शुचयः** । दीप्यमानाः परमयोगिनः । **शुचिम्** । दीप्यमानं ज्योतिर्मयम् । **अपि** । अवधारणे । **यन्ति** । प्राप्नुवन्ति । **लोकम्** । परब्रह्मधाम । **न** । निषेधे । **एषाम्** । योगिनाम् । **शिश्नम्** । **इणसिञ्जि०** (उ० ३ । २) इति शश प्लुतगतौ-नक्[१] । शिश्नं श्नथतेः—निरु० ४ । १९ । गतिम् । बलम् । **प्र** । **दहति** । भस्मीकरोति । **जातवेदाः** । अ० १ । ७ । २ । जातानां वेदिता परमेश्वरः । **स्वर्गे** । सु+अर्ज—घञ् । सुष्ठु अर्जनीये । सुखप्रदे । **लोके** । स्थाने । **बहु** । विपुलम् । **स्त्रैणम्** । **स्त्यायतेर्ड्रट्** (उ० ४ । १६६) इति स्त्यै शब्दसंघातयोः—ड्रट् । **लोपो व्योर्वलि** (पा० ६ । १ । ६६) इति यलोपः । टित्वात् ङीप् इति स्त्री = संहतिः । **स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्** (पा० ४ । १ । ८७) **तस्मै हितम्** (पा० ५ । १ । ५) इति हितार्थे नञ् । स्त्रीभ्यः संहतिभ्यः सृष्टिभ्यो हितम् । **एषाम्** ॥

---

१. पृषोदरादीनि० (६ । ३ । १०९) से यहाँ इत्व जानें ॥ सम्पा० ॥

विष्टारिणमोदुनं ये पचन्ति नैनानवर्तिः सचते कदा चन ।
आस्ते युम उप याति देवान्त्सं गन्धर्वैर्मदते सोम्येभिः ॥ ३ ॥

विष्टारिणम् । ओदनम् । ये । पचन्ति । न । एनान् । अवर्तिः । सचते । कदा । चन । आस्ते । यमे । उप । याति । देवान् । सम् । गन्धर्वैः । मदते । सोम्येभिः ॥ ३ ॥

भाषार्थः—(ये) जो महात्मा लोग (विष्टारिणम्) विस्तारवान् (ओदनम्) सेचन समर्थ वा अन्नरूप परमात्मा को [हृदय में] (पचन्ति) परिपक्व करते हैं, (एनान्) इन लोगों को (अवर्त्तिः) दरिद्रता (कदा चन) कभी भी (न) नहीं (सचते) मिलती है। [जो पुरुष] (यमे) नियम वा न्यायकारी परमात्मा में (आस्ते) रहता है, [वह] (देवान्) उत्तम गुणों को (उप) अधिक अधिक (याति) पाता है, और (गन्धर्वैः) पृथिवी आदि लोकों वा वेद-वाणियों को धारण करने वाले (सोम्येभिः) सोम अर्थात् ऐश्वर्य योग्य महात्माओं से (सम्) मिल कर (मदते) आनन्द भोगता है ॥ ३ ॥

भावार्थः—योगी जन परमात्मा में श्रद्धा रखकर सदा उदारचित्त रहते हैं, क्योंकि जितेन्द्रिय पुरुष ही विद्वानों के सत्सङ्ग मे उत्तम उत्तम गुण पाकर आनन्द भोगते हैं ॥ ३॥

३—**विष्टारिणम्** । म० १ । विस्तारवन्तम् । **ओदनम्** । म० १ । सेचनशीलम् अन्नरूपं वा परमात्मानम् । **ये** । महात्मानो योगिनः । **पचन्ति** । पक्वं श्रद्धया दृढं कुर्वन्ति । **न** । निषेधे । **एनान्** । एतान् । योगिनः । **अवर्तिः** । हृपिषिरुहिवृति० (उ० ४ । ११९) इति वृतु वर्तने—इन् । वर्तिर्वृत्तिः जीविका । तदभावः अवर्तिः । दारिद्र्यम् । **सचते** । समवैति यः । **कदाचन** । कदाचिदपि । **आस्ते** । तिष्ठति । **यमे** । नियमे न्यायकारिणि परमात्मनि वा । **उप** । अधिकम् । **याति** । प्राप्नोति सः । **देवान्** । दिव्यगुणान् । **सम्** । सह भूत्वा । **गन्धर्वैः** । अ० २ । १ । २ । गवां पृथिव्यादिलोकानां वेदवाणीनां वा धारकैः । **मदते** । हृष्यति । **सोम्यैः** । सोमार्हैः ऐश्वर्ययोग्यैः ॥

वि॒ष्टा॒रिण॑मोद॒नं ये पच॑न्ति॒ नैना॑न् य॒मः परि॑ मुष्णाति॒ रेतः॑ ।
र॒थी ह॑ भू॒त्वा र॑थ॒यान॑ ईयते प॒क्षी ह॑ भू॒त्वाति॒ दि॒वः समे॑ति ॥४॥

वि॒ष्टा॒रिण॑म् । ओ॒द॒नम् । ये । पच॑न्ति । न । ए॒नान् । य॒मः । परि॑ । मु॒ष्णा॒ति॒ । रेतः॑ । र॒थी । ह॒ । भू॒त्वा । र॒थ॒ऽयाने॑ । ई॒य॒ते॒ । प॒क्षी । ह॒ । भू॒त्वा । अति॑ । दि॒वः॑ । सम् । ए॒ति॒ ॥ ४ ॥

भाषार्थः—(ये) जो महात्मा (विष्टारिणम्) विस्तारवान् (ओदनम्) सेचनशील वा अन्नरूप परमात्मा को [हृदय में] (पचन्ति) पक्का करते हैं, (एनान्) इनसे (यमः) नियम (रेतः) सामर्थ्य को (न) नहीं (परि मुष्णाति) मूस लेता है। वह पुरुष (रथयाने) शरीर से चलने योग्य संसार में (ह) निश्चय करके (रथी) क्रीडाशील (भूत्वा) होकर (ईयते) विचरता है और (ह) अवश्य (पक्षी) सबका पक्ष करने वाला (भूत्वा) होकर (अति) अत्यन्त (दिवः) प्रकाशमान लोकों को (सम्) यथावत् (एति) पाता है ॥ ४ ॥

भावार्थः—परमात्मा में पूर्ण श्रद्धालु शूरवीर महात्मा सदा बलवान् होकर संसार को सहारा देते हुये सूर्य समान प्रकाशित रहते और आनन्द भोगते हैं ॥ ४ ॥

ए॒ष य॒ज्ञानां॒ वित॑तो॒ वहि॑ष्ठो विष्टा॒रिणं॑ प॒क्त्वा दि॒वमा-विवेश । आ॒ण्डीकं॑ कुमु॑दं॒ सं त॑नोति॒ बिसं॑ शा॒लूकं॒ शफ॑को मु॒ला॒ली । ए॒तास्त्वा॒ धारा॒ उप॑ यन्तु॒ सर्वाः॑ स्व॒र्गे

४—पचन्तीति व्याख्यातम् म० ३। **न**। निषेधे। **एनान्**। एतान्। अपादाने द्वितीया। **यमः**। नियमः। **परि**। वर्जने। **मुष्णाति**। द्विकर्मकः। अपहरति। **रेतः**। बलं सामर्थ्यम्। **रथी**। रथ—इनिः। रथवान्। **ह**। अवधारणे। **भूत्वा**। **रथयाने**। रथेन शरीरेण यातव्ये लोके। **ईयते**। ईङ् गतौ। संचरति। **पक्षी**। पक्ष परिग्रहे—अच्, ततः—इनिः। पक्षवान् परिग्रही। **अति**। अत्यन्तम्। **दिवः**। प्रकाशमानान् लोकान्। **समेति**। सम्यक् प्राप्नोति।

लोके मधुमत् पिन्वमाना उप त्वा तिष्ठन्तु पुष्करिणीः समन्ताः ॥ ५ ॥

एषः । यज्ञानाम् । विऽततः । बहिष्ठः । विष्टारिणम् । पक्त्वा । दिवम् । आ । विवेश । आण्डीकम् । कुमुदम् । सम् । तनोति । बिसम् । शालूकम् । शफकः । मुलाली । एताः । त्वा । धाराः । उप । यन्तु । सर्वाः । स्वःऽगे । लोके । मधुऽमत् । पिन्वमानाः । उप । त्वा । तिष्ठन्तु । पुष्करिणीः । सम्ऽअन्ताः ॥५॥

भाषार्थः—(एषः) यह (यज्ञानाम्) उत्तम कर्मों के बीच (विततः) फैला हुआ (बहिष्ठः) अत्यन्त बहुत शुभ गुणों वाला पुरुष (विष्टारिणम्) बड़े विस्तार वाले परमात्मा को [हृदय में] (पक्त्वा) पक्का, दृढ़, करके (दिवम्) प्रकाशस्वरूप परमात्मा में (आ विवेश) प्रविष्ट हुआ है ।

५—**एषः** । दृश्यमानः पुरुषः । **यज्ञानाम्** । यजनीयानां कर्मणां मध्ये । **विततः** । विस्तृतः । **बहिष्ठः** । **अतिशायने तमबिष्ठनौ** (पा० ५ । ३ । ५५) इति बहु—इष्ठन् । **टेः** (पा० ६ । ४ । १५५) इति टिलोपः । अतिशयेन बहुशुभगुणोपेतः । **विष्टारिणम्** । म० १ । विस्तारवन्तम् । **पक्त्वा** । परिपक्वं हृदये दृढं कृत्वा । **दिवम्** । प्रकाशमानं परमात्मानम् । **आ विवेश** । प्रविष्टवान् । **आण्डीकम्** । **अमन्ताड् डः** (उ० १ । ११४) इति अम गतौ—डः । **ईकञ् छन्दसि** (वा० पा० ४ । १ । ८५) इति अण्ड—ईकञ् बाहुलकात् । प्राप्तियोग्यम् । **कुमुदम्** । **इगुपध०** (पा० ३ । १ । १३५) इति कु+मुद हर्षे—कः । कौ भूमौ मोदते । पृथिव्यां मोदकरं वस्तु । **सम्** । सम्यक् । **तनोति** । विस्तारयति । **बिसम्** । बिस प्रेरणे, दिवा०-कः । प्रेरकम् । बलकरं वस्तु । **शालूकम्** । **शलिमण्डिभ्यामूकण्** (उ० ४ । ४२) इति शल गतौ—ऊकण् । वेगकरं वस्तु । **शफकः** । शमु उपशमे—अच्, मस्य फः । इति शब्दस्तोममहानिधिः । कमु कान्तौ—डः । शफं शान्तिं निवृत्तिं कामयते स शफकः । शान्तिकामः । **मुलाली** । मुल रोपणे—कः । **सुप्यजातौ णिनिस्ताच्छील्ये** (पा० ३ । २ । ७८) इति मुल+अल भूषणपर्याप्ति-

(शफकः) शान्ति की कामना करने वाला, (मुलाली) कर्म फल के रोपण, उत्पत्ति को सुधारने वाला पुरुष (आण्डीकम्) प्राप्तियोग्य (कुमुदम्) पृथिवी में आनन्द करने वाली वस्तु को, (बिसम्) बलदायक गुण को (शालूकम्) वेगशील कर्म को (सम्) यथावत् (तनोति) फैलाता है।

(एताः) ये (सर्वाः) सब (धाराः) धारण शक्तियां (स्वर्गे लोके) स्वर्ग लोक में (मधुमत्) मधु नाम ज्ञान की पूर्णता से (त्वा) तुझको (पिन्वमानाः) सींचती हुई (उप) आदर से (यन्तु) मिलें और (समन्ताः) सम्पूर्ण (पुष्करिणीः = ०-ण्यः) पोषणवती शक्तियां (त्वा) तुझमें (उप तिष्ठन्तु) उपस्थित होवें ॥ ५ ॥

भावार्थः— पुरुषार्थी योगी जन परमात्मा की महिमा में लवलीन होकर मधुमती नाम प्रजा की प्राप्ति से संसार का पूरा उपकार करता है ॥ ५ ॥

घृतह्र॑दा मधु॑कूलाः सुरो॑दकाः क्षीरेण॑ पूर्णा उ॑दकेन॑ द॒ध्ना ।
ए॒तास्त्वा॒ धारा॒ उप॑यन्तु सर्वाः॑ स्व॒र्गे लो॒के मधु॑म॒त् पिन्व॑माना॒
उप॑ त्वा तिष्ठन्तु पुष्क॑रिणीः॒ सम॑न्ताः ॥ ६ ॥

घृ॒तऽह्र॑दाः । मधु॑ऽकूलाः । सुरा॑ऽउदकाः । क्षीरेण॑ । पूर्णाः॑ । उ॒द॒केन॑ । द॒ध्ना । ए॒ताः । त्वा॒ । धाराः॑ । उप॑ । य॒न्तु॒ । सर्वाः॑ । स्व॒ःऽगे । लो॒के । मधु॑ऽमत् । पिन्व॑मानाः । उप॑ । त्वा॒ । ति॒ष्ठ॒न्तु॒ । पु॒ष्क॒रिणीः॑ । सम्ऽअ॑न्ताः ॥ ६ ॥

वारणेषु-णिनिः । मुलं रोपणं कर्मफलजननम् अलति भूषयतीति मुलाली । सत्पुरुषः । **एताः** । **त्वा** । त्वां पुरुषम् । **धाराः** । धारणशक्तयः । **उप** । समीपे । **यन्तु** । गच्छन्तु । **सर्वाः** । सकलाः । **स्वर्गे** । म० २ । सुष्ठु अर्जनीये पुण्ये । **लोके** । दर्शनीये स्थाने । **मधुमत्** । **फलिपाटिनमिमनि०** (उ० १ । १८) इति मनु अवबोधने-उः, नस्य धः । यथा तथा मधुमत्तया ज्ञानवत्तया । **पिन्वमानाः** । पिवि-सेचने-शानच् । सिञ्चन्त्यः । **उप तिष्ठन्तु** । उपस्थिताः संगता भवन्तु । **पुष्करिणीः** । **पुषः कित्** (उ० ४ । ४) इति पुष पुष्टौ-करन् । **अत इनिठनौ** (पा० ५ । २ । ११५) । इति पुष्कर-इनिः । पुष्कराणि पोषणानि सन्ति यत्र पुष्करिण्यः पोषणवत्यः शक्तयः । **समन्ताः** । सम्पूर्णाः ॥

भाषार्थः—(घृतह्रदाः) प्रकाश की ध्वनि वाली, (मधुकूलाः) मधु अर्थात् ज्ञान के रक्षा साधन वाली, (सुरोदकाः) सुरा अर्थात् ऐश्वर्य वा तत्त्व मथन का सेवन करने वाली, (क्षीरेण) भोजन साधन से, (उदकेन) सेचन वा वृद्धि साधन से और (दध्ना) धारण पोषण सामर्थ्य से (पूर्णाः) परिपूर्ण,

(एताः) वे (सर्वाः) सब (धाराः) धारण शक्तियां (स्वर्गे लोके) स्वर्ग लोक में (मधुमत्) मधु नाम ज्ञान की पूर्णता से (त्वा) तुझको (पिन्वमानाः) सींचती हुई, (उप) आदर से (यन्तु) मिलें, और (समन्ताः) सम्पूर्ण (पुष्करिणी-०-ण्यः) पोषणवती शक्तियां (त्वा) तुझमें (उप तिष्ठन्तु) उपस्थित होवें ॥ ६ ॥

भावार्थः—मनुष्य योग साधन से अपनी अनेक शक्तियां बढ़ाकर संसार का उपकार करके आनन्द भोगता है ॥ ६ ॥

चतुरः कुम्भांश्चतुर्धा ददामि क्षीरेण पूर्णां उदकेन दध्ना ।
एतास्त्वा धारा उप यन्तु सर्वाः स्वर्गे लोके मधुमत्
पिन्वमाना उप त्वा तिष्ठन्तु पुष्करिणीः समन्ताः ॥ ७ ॥

६—**घृतह्रदाः** । अभ्विघृसिभ्यः क्तः (उ० ३ । ८९) इति घृ क्षरणदीप्त्योः-क्तः । घृतम् । प्रकाशः । ह्राद अव्यक्ते शब्दे-अच्, निपातः । प्रकाशयुक्तध्वनयः । **मधुकूलाः** । कूल आवरणे-अच् । मधु ज्ञानं कूलम् आवरणं रक्षासाधनं यासां ताः । **सुरोदकाः** । सुसूधाञ्गृधिभ्यः क्रन् (उ० २ । २४) षु प्रसवैश्वर्ययोः, यद्वा षुञ् अभिषवे-क्रन् । यद्वा, षुर ऐश्वर्यदीप्त्योः-कः, टाप् । सुरा = उदकम्-निघ० १ । १२ । सुरा सुनोतेः-निरु० १ । ११ । सुराणां पत्नी शक्तिः सुरा । उदकश्च (उ० २ । ३९) इति उन्दी क्लेदने-क्वुन् । सुरा, ऐश्वर्यं तत्त्वमथनं वा, उदकं सेचनं यासां ताः । **क्षीरेण** । घसेः किच्च[1] (उ० ४ । ३४) इति घस्लृ अदने-ईरन् । वा क्षर संचलने-डीरन् । क्षीरम् उदकम्-निघ० १ । १२ । क्षीरं क्षरतेर्घसेर्वेरो नामकरण उशीरमिति यथा—निरु० २ । ५ । भोजनसाधनेन । **पूर्णाः** । पूरिताः । **उदकेन** । सेचनसाधनेन । **दध्ना** । अ० ३ । १२ । ७ । दधि धारणं पोषणं तेन । अन्यत् पूर्ववत् म० ५ ॥

१. क्षीर शब्द वेद में अन्तोदात्त मिलता है, अतएव इस सूत्र का नारायणउणादिवृत्ति के अनुसार 'घसेः चिच्च' पाठ मानना चाहिये, जिससे चित् मानकर अन्तोदात्त हो जाये। इस विषय में दश० पा० उ० की सम्पादकीय टिप्पणी द्रष्टव्य है ॥ सम्पा० ॥

चतुरः । कुम्भान् । चतुःऽधा । ददामि । क्षीरेण । पूर्णान् । उदकेन । दध्ना ।
एताः । त्वा । धाराः । उप । यन्तु । सर्वाः । स्वःऽगे । लोके । मधुऽमत् ।
पिन्वमानाः । उप । त्वा । तिष्ठन्तु । पुष्करिणीः । समऽअन्ताः ॥ ७ ॥

भाषार्थः—(क्षीरेण) भोजन साधन से, (उदकेन) सेचन वा वृद्धि साधन से और (दध्ना) धारण पोषण सामर्थ्य से (पूर्णान्) परिपूर्ण (कुम्भान्) भूमि को पूर्ण करने वाले (चतुरः) चार अर्थात् धर्म, अर्थ, काम, मोक्ष को (चतुर्धा) चार प्रकार से अर्थात् ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, सन्यास आश्रम वा चारों वेद द्वारा (ददामि) दान करता हूं ।

(एताः) ये (सर्वाः) सब (धाराः) धारण शक्तियां (स्वर्गे लोके) स्वर्ग लोक में (मधुमत्) मधु नाम ज्ञान की पूर्णता से (त्वा) तुझको (पिन्वमानाः) सींचती हुई (उप) आदर से (यन्तु) मिलें, और (समन्ताः) सम्पूर्ण (पुष्करिणीः = ०—ण्यः) पोषणवती शक्तियां (त्वा) तुझमें (उप तिष्ठन्तु) उपस्थित होवें ॥ ७ ॥

भावार्थः—परमेश्वर ब्रह्मचर्य आदि चारों आश्रम द्वारा और चारों वेद द्वारा धर्म अर्थ आदि चार पदार्थ देता है । इसलिये मनुष्य चारों आश्रम और चारों वेदों के यथावत् सेवन से चारों पदार्थ प्राप्त करके सदा आनन्दित रहें ॥७॥

इममोदनं नि दधे ब्राह्मणेषु विष्टारिणं लोकजितं स्वर्गम् । स मे मा क्षेष्ट स्वधया पिन्वमानो विश्वरूपा धेनुः कामदुघा मे अस्तु ॥ ८ ॥

७—**चतुरः** । चतुः संख्याकान् धर्मार्थकाममोक्षान् । **कुम्भान्** । अ० ३ । १२ । ७ । कुं भूमिम् उम्भति पूरयतीति कुम्भः । भूमिपूरकान् । **चतुर्धा** । चतुष्प्रकारेण ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्रमरूपेण यद्वा वेदचतुष्टयेन । **ददामि** । प्रयच्छामि । **क्षीरेण** । म० ६ भोजनसाधनेन । **पूर्णान्** । पूरितान् । **उदकेन** । सेचनसाधनेन । **दध्ना** । म० ६ । धारणेन पोषणेन वा । अन्यत् पूर्ववत् म० ५ ॥

इमम् । ओदनम् । नि । दधे । ब्राह्मणेषु । विष्टारिणम् । लोकऽजितम् । स्वःऽगम् । सः । मे । मा । क्षेष्ट । स्वधया । पिन्वमानः । विश्वऽरूपा । धेनुः । कामऽदुघा । मे । अस्तु ॥ ८ ॥

भाषार्थः—(ब्राह्मणेषु) ब्रह्मज्ञानियों के बीच (विष्टारिणम्) विस्तार वाले (लोकजितम्) सब लोक के जीतनेवाले (स्वर्गम्) सुख स्वरूप (इमम्) इस (ओदनम्) सींचने वा बढ़ाने वाले वा अन्नरूप परमात्मा को (नि) निरन्तर (दधे) धरता हूं । (स्वधया) अपनी धारण शक्ति से (पिन्वमानः) बढ़ता हुआ (सः) वह ईश्वर (मे) मेरे लिये (मा क्षेष्ट) कभी न घटे । (विश्वरूपा) सब अङ्गों से सिद्ध (धेनुः) यह तृप्त करने वाली वेदवाणी (मे) मेरे लिये (कामदुघा) उत्तम कामनाओं को पूर्ण करनेवाली (अस्तु) होवे ॥ ८ ॥

भावार्थः—ब्रह्मज्ञानी महात्मा लोग परमात्मा की महिमा को साक्षात् करके सुखी होते हैं, सब मनुष्य परमकल्याणी वेदवाणी को प्राप्त कर उस जगदीश्वर के ज्ञान से सदा आनन्द भोगें ॥ ८ ॥

सूक्तम् ३५ ॥

१-७ ॥ ओदनो देवता । १, २, ५-७ त्रिष्टुप् ३, ४ जगती ॥

ब्रह्मविद्योपदेशः—ब्रह्म विद्या का उपदेश ॥

यमोदनं प्रथमजा ऋतस्य प्रजापतिस्तपसा ब्रह्मणेऽपचत् । यो लोकानां विधृतिर्नाभिरेषात् तेनौदनेनाति तराणि मृत्युम् ॥ १ ॥

८—**इमम्** । निर्दिष्टम् । **ओदनम्** । सेचनशीलं प्रवर्धकम् अन्नरूपं वा परमात्मानम् । **नि** । नितराम् । **दधे** । धरामि । **ब्राह्मणेषु** । अ० ४ । ६ । १ । वेदवेत्तृषु पण्डितेषु । **विष्टारिणम्** । म० १ विस्तारवन्तम् । **लोकजितम्** । सर्वलोकजेतारम् । **स्वर्गम्** । सुष्ठु अर्जनीयं सुखस्वरूपम् । **सः** । ओदनः । **मे** । मह्यम् । **मा क्षेष्ट** । क्षि क्षये,माङि लुङ् । क्षयं मा प्राप्नोतु । **स्वधया** । स्वधारणशक्त्या । **पिन्वमानः** । वर्धमानः । **विश्वरूपा** । सर्वाङ्गसिद्धा । **धेनुः** । अ० ३ । १० । १ । वाङ्नाम—निघ० १।११ । तर्पयित्री वेदवाणी । **कामदुघा** । **दुहः कब्घश्च** (पा० ३ । २ । ७०) इति काम+दुह प्रपूरणे—कप् हस्य घः । उत्तमकामानां दोग्ध्री प्रपूरयित्री । अभीष्टसम्पादयित्री । **मे** । मह्यम् । **अस्तु** ॥

यम् । ओदनम् । प्रथमऽजाः । ऋतस्य । प्रजाऽपतिः । तपसा । ब्रह्मणे । अपचत् । यः । लोकानाम् । विऽधृतिः । न । अभिऽरेषात् । तेन । ओदनेन । अति । तराणि । मृत्युम् ॥ १ ॥

भाषार्थः—(ऋतस्य) सत्य के (यम्) जिस (ओदनम्) वृद्धि करने वाले परमात्मा को (प्रथमजाः) प्रख्यात पुरुषों में उत्पन्न हुए, (प्रजापतिः) प्रजापालक योगी जन ने (तपसा) अपने तप, सामर्थ्य से (ब्रह्मणे) ब्रह्म की प्राप्ति के लिये (अपचत्) परिपक्व अर्थात् हृदय में दृढ़ किया है। (यः) जो परमात्मा (लोकानाम्) सब लोकों का (विधृतिः) विधाता (न) कभी नहीं (अभिरेषात्) घटता है, (तेन) उस (ओदनेन) बढ़ाने वाले वा अन्न रूप परमात्मा के साथ (मृत्युम्) मृत्यु के कारण [निरुत्साह आदि दोष] को (अति = अतीत्य) लांघकर (तराणि) मैं तर जाऊँ ॥ १ ॥

भावार्थः—जिस परमात्मा को ऋषि मुनि महात्मा लोग साक्षात् करते चले आये हैं, उसी के गुणों को हम जानकर पुरुषार्थ के साथ अपने जीवन को सुधारें ॥ १ ॥

येनातरन् भूतकृतोऽति मृत्युं यमन्वविन्दन् तपसा श्रमेण ।
यं पपाच ब्रह्मणे ब्रह्म पूर्वं तेनौदनेनाति तराणि मृत्युम् ॥२॥

१—यम् । ओदनम् । सू० ३४ । म० १ । सेचकं प्रवर्धकं वा परमात्मानम् । **प्रथमजाः** । प्रथमेषु श्रेष्ठपुरुषेषु जातः । **ऋतस्य** । सत्यस्य परब्रह्मरूपस्य । **प्रजापतिः** । प्रजानां पालको योगिजनः । **तपसा** । स्वसामर्थ्येन । **ब्रह्मणे** । ब्रह्मप्राप्तये । **अपचत्** । पक्वं हृदये दृढं कृतवान् । **यः** । ओदनः । **लोकानाम्** । ब्रह्माण्डानाम् । **विधृतिः** । विधारयिता । **न** । निषेधे । **अभिरेषात्** । रिष हिंसायाम्—लडर्थे लेट् कर्मण्यर्थे । रेष्यते । नश्यति । **तेन** । **ओदनेन** । सेचकेन प्रवर्धकेन अन्नरूपेण वा परमात्मना । **अति** । अतीत्य । **तराणि** । पारं गच्छानि प्राप्नवानि । **मृत्युम्** । मरणकारणं निरुत्साहम् ॥

येन । अतरन् । भूतऽकृतः । अति । मृत्युम् । यम् । अनुऽअविन्दन् । तपसा । श्रमेण । यम् । पपाच । ब्रह्मणे । ब्रह्म । पूर्वम् । तेन । ओदनेन । अति । तराणि । मृत्युम् ॥ २ ॥

भाषार्थः—(येन) जिस परमात्मा के साथ (भूतकृतः) प्राणियों को [उत्तम] बनाने वाले पुरुष (मृत्युम्) मृत्यु के कारण निरुत्साह आदि को (अति = अतीत्य) लांघकर (अतरन्) तर गये हैं, और (यम्) जिसको (तपसा) ब्रह्मचर्य आदि तप और (श्रमेण) परिश्रम से (अन्वविन्दन्) उन्होंने अनुक्रम से पाया है। और (यम्) जिसको (ब्रह्मणे) ब्रह्मा, [वेदज्ञानी] के लिये (ब्रह्म) वेद में (पूर्वम्) पहिले ही (पपाच) परिपक्व वा दृढ किया था। (तेन) उस (ओदनेन) बढ़ाने वाले वा अन्नरूप परमात्मा के साथ......म० १ ॥ २ ॥

भावार्थः—जिस परमात्मा को पाकर महा उपकारी जनों ने तप और परिश्रम से अनेक विघ्नों को हटाकर सुख प्राप्त किया है और जिसका प्रतिपादन वेदों ने किया है, उसी के ज्ञान से सब मनुष्य अपने क्लेश टालकर आनन्द पावें ॥ २ ॥

यो दाधार पृथिवीं विश्वभोजसं यो अन्तरिक्षमापृणाद् रसेन। यो अस्तभ्नाद् दिवमूर्ध्वो महिम्ना तेनौदनेनाति तराणि मृत्युम् ॥ ३ ॥

यः । दाधार । पृथिवीम् । विश्वऽभोजसम् । यः । अन्तरिक्षम् । आऽअपृणात् । रसेन । यः । अस्तभ्नात् । दिवम् । ऊर्ध्वः । महिम्ना । तेन । ओदनेन । अति । तराणि । मृत्युम् ॥ ३ ॥

२—**येन** । ओदनेन । **अतरन्** । पारं प्राप्नुवन् । **भूतकृतः** । भूतानां प्राणिनां कर्तार उपकर्तारः पुरुषाः । **अति** । अतीत्य । **मृत्युम्** । मरणहेतुं निरुत्साहादिकम् । **यम्** । **अन्वविन्दन्** । अनुक्रमेण प्राप्नुवन् । **तपसा** । ब्रह्मचर्येण । **श्रमेण** । श्रमु तपसि खेदे च-घञ् । परिश्रमेण । ब्रह्माभ्यासेन । **यम्** । **पपाच** । पक्वं दृढं चकार । **ब्रह्मणे** । ब्रह्मज्ञानिने । **ब्रह्म** । वेदः । **पूर्वम्** । प्रथमम् । अन्यत् पूर्ववत् म० १ ॥

भाषार्थः—(यः) जिस परमेश्वर ने (विश्वभोजसम्) सबका पालन करने वाली (पृथिवीम्) पृथिवी को (दाधार) धारण किया था, (यः) जिसने (अन्तरिक्षम्) अन्तरिक्ष को (रसेन) रस अर्थात् अन्न वा जल से (आ अपृणात्) भर दिया है । (यः) जिसने (महिम्ना) अपनी महिमा से (ऊर्ध्वः) ऊंचा होकर (दिवम्) प्रकाशमान सूर्य को (अस्तभ्नात्) ठहराया है । (तेन) उस (ओदनेन) बढ़ाने वाले वा अन्नरूप परमात्मा के साथ ..म० १ ॥ ३ ॥

भावार्थः—परमात्मा ने पृथिवी आदि लोकों और सब चराचर जगत् को रचकर धारण किया है और जो सबसे ऊपर विराजमान है, उसकी महिमा को विचार कर हम अपनी उन्नति करें ॥ ३ ॥

यस्मान्मासा निर्मितास्त्रिंशदराः संवत्सरो यस्मान्निर्मितो द्वादशारः । अहोरात्रा यं परियन्तो नापुस्तेनौदनेनाति तराणि मृत्युम् ॥ ४ ॥

यस्मात् । मासाः । निःऽमिताः । त्रिंशत्ऽअराः । सम्ऽवत्सरः । यस्मात् । निःऽमितः । द्वादशऽअरः । अहोरात्राः । यम् । परिऽयन्तः । न । आपुः । तेन । ओदनेन । अति । तराणि । मृत्युम् ॥ ४ ॥

भाषार्थः—(यस्मात्) जिस [परमात्मा] से (त्रिंशदराः) तीस अरों

३—**यः** । ओदनः । **दाधार** । धृतवान् । **पृथिवीम्** । भूमिम् । **विश्वभोजसम्** भुज पालनाभ्यवहारयोः—असुन् । सर्वस्य पालयित्रीम् । **अन्तरिक्षम्** । मध्यलोकम् । **आ—अपृणात्** । पॄ पालनपूरणयोः—लङ् । सम्यक् पूरितवान् । **रसेन** । अन्नम्–निघ० २ । ७ । उदकम्—निघ० १ । १२ । **अस्तभ्नात्** । स्तन्भु[1] रोधने—लङ् । अवरुद्धवान् । दृढीकृतवान् । **दिवम्** । प्रकाशमानं सूर्यम् । **ऊर्ध्वः** । उपरि वर्तमानः सन् । **महिम्ना** । महत्त्वेन । प्रभावेण । अन्यत् पूर्ववत् म० १ ॥

४—**यस्मात्** । ओदनात्परमेश्वरात् । **मासाः** । मसी परिमाणे—घञ् ।

१. यह सौत्र धातु है । द्र० काशि० ३ । १ । ८२ ॥ सम्पा० ॥

वाले (मासाः) महीने (निर्मिताः) बने हैं, (यस्मात्) जिससे (द्वादशारः) बारह अरों [के समान महीनों] वाला (संवत्सरः) संवत्सर (निर्मितः) बना है। (यम्) जिसको (परियन्तः) घूमते हुए (अहोरात्राः) दिन रात (न) नहीं (आपुः) पकड़ सके हैं। (तेन) उस (ओदनेन) बढ़ाने वाले वा अन्नरूप परमात्मा के साथ...म० १ ॥ ४ ॥

भावार्थः—परमात्मा ने दिन रात आदि काल चक्र बनाया है परन्तु वह अनादि अनन्त होने से काल के अधिकार से बाहिर है। उसी की उपासना सब मनुष्य करें ॥ ४ ॥

यः प्राणदः प्राणदवान् बभूव यस्मैं लोका घृतवन्तः क्षरन्ति । ज्योतिष्मतीः प्रदिशो यस्य सर्वास्तेनौदनेनाति तराणि मृत्युम् ॥ ५ ॥

यः । प्राणदः । प्राणदऽवान् । बभूव । यस्मैं । लोकाः । घृतऽवन्तः । क्षरन्ति । ज्योतिष्मतीः । प्रऽदिशः । यस्य । सर्वाः । तेन । ओदनेन । अति । तराणि । मृत्युम् ॥ ५ ॥

भाषार्थः—(यः) जो परमेश्वर (प्राणदः) प्राण देने वाला और (प्राणदवान्) प्राणदाताओं [सूर्य पृथिवी वायु आदि] का रखने वाला (बभूव)

मस्यते परिमीयते कालोऽनेन स मासः। शुक्लकृष्णपक्षद्वयात्मकाः कालाः। **निर्मिताः** । रचिताः । **त्रिंशदराः** । रथचक्रावयवाः कीलका अराः चक्रवदावर्तमानत्वान्मासास्तथा रूप्यन्ते। त्रिंशत्संख्याकानि दिनानि अरा इव येषां ते तथोक्ताः। **संवत्सरः** । अ० १ । ३५ । ४ । द्वादशमासात्मकः कालः। **यस्मात्** । **निर्मितः** । **द्वादशारः** । द्वादशमासा अरा इव चक्रे स्थिता यस्मिन् स तथाभूतः। **अहोरात्राः** । अहानि च रात्रयश्च। **यम्** । परमात्मानम्। **परियन्तः** । परिगच्छन्तः। परिवर्त्तमानाः । **न** । निषेधे । **आपुः** । प्राप्तवन्तः । अन्यत् पूर्ववत् । म० १ ॥

५— **यः** । ओदनः । परमात्मा । **प्राणदः** । प्राणदाता । **प्राणदवान्** । प्राणदैः प्राणप्रदैः सूर्यपृथिवीव्याप्यादिभिर्युक्तः । **बभूव** । **यस्मै** । परमेश्वराय ।

हुआ, और (यस्मै) जिसके लिये (घृतवन्तः) प्रकाशमान् वा सारवान् (लोकाः) सब लोक (क्षरन्ति) बहते हैं। और (यस्य) जिसकी ही (सर्वाः) सब (ज्योतिष्मतीः=०-त्यः) तेजोमय (प्रदिशः) बड़ी दिशायें हैं। (तेन) उस (ओदनेन) बढ़ाने वाले वा अन्नरूप परमात्मा के साथ......म० १ ॥ ५ ॥

भावार्थः—सब लोक लोकान्तर और सब पदार्थ परमेश्वर के वशवर्ती हैं। उसकी आज्ञा पालन से हम सदा सुखी रहें ॥ ५ ॥

यस्मा॑त् प॒क्वाद॒मृतं॑ संब॒भूव॒ यो गा॑य॒त्र्या अधि॑पतिर्ब॒भूव॑। यस्मि॑न् वेदा॒ निहि॑ता वि॒श्वरू॑पा॒स्तेनौ॑द॒नेनाति॑ तराणि मृ॒त्युम् ॥ ६ ॥

यस्मा॑त्। प॒क्वात्। अ॒मृत॑म्। स॒म्ऽब॒भूव॑। यः। गा॒य॒त्र्याः। अधि॑ऽपतिः। ब॒भूव॑। यस्मि॑न्। वेदाः॑। निऽहि॑ताः। वि॒श्वऽरू॑पाः। तेन॑। ओ॒द॒नेन॑। अति॑। त॒रा॒णि॒। मृ॒त्युम् ॥ ६ ॥

भाषार्थः—(यस्मात् पक्वात्) जिस परिपक्व परमात्मा से (अमृतम्) मोक्ष (संबभूव) उत्पन्न हुआ, (यः) जो (गायत्र्याः) गायत्री [स्तुति वा वेदवाणी] का (अधिपतिः) अधिपति (बभूव) हुआ, (यस्मिन्) जिसमें (विश्वरूपाः) सबसे कीर्तन योग्य अथवा सब का निरूपण करने वाले (वेदाः)

लोकाः। दृश्यमानानि भुवनानि। **घृतवन्तः**। दीप्तिमन्तः। सारवन्तः। **क्षरन्ति**। स्रवन्ति। **ज्योतिष्मतीः**। प्रशस्ततेजस्काः। प्रकाशवत्यः। **प्रदिशः**। प्रकृष्टा दिशाः। **यस्य**। ओदनस्य सम्बन्धिन्यः सन्ति। **सर्वाः**। समस्ताः। अन्यत् पूर्ववत्। म० १ ॥

६—**यस्मात्**। परमात्मनः। **पक्वात्**। दृढस्वभावात्। **अमृतम्**। अमरणहेतुः। मोक्षः। **संबभूव**। उत्पन्नं बभूव। **यः**। **गायत्र्याः**[1]। अ०३।३।१२। गायत्री गायतेः स्तुतिकर्मणः—निरु० ७। १२। गायनीयायाः स्तुतेः। वेदवाण्याः। **अधिपतिः**। स्वामी। **बभूव**। **यस्मिन्**। **वेदाः**। विद ज्ञाने, विद सत्तायाम्,

---

१. 'यया गायन्तं त्रायते' इति गायत्री (य० / द०भा० ६। १३)। गयान् प्राणान् त्रायते सा गायत्री (ऋग्० भा० भू० ग्रन्थप्रामाण्याप्रामाण्यविषय, पृ० ३२१)। प्राणा वै गयास्तत्प्राणांस्तत्रे, तद्यद्गयांस्तत्रे, तस्माद् गायत्री नाम (श० ब्रा० १४। ८। १५। ७) गायतो मुखादुदपतत् (निरु० ७। १२) ॥ सम्पा० ॥

वेद (निहिताः) निधिरूप से स्थित हैं। (तेन) उस (ओदनेन) बढ़ाने वाले वा अन्नरूप परमात्मा के साथ (मृत्युम्) मरण के कारण [निरुत्साह आदि दोष] को (अति = अतीत्य) लांघ कर (तराणि) मैं तर जाऊं॥ ६॥

भावार्थः—जिस परमात्मा ने कल्याणमयी वेदवाणी देकर मनुष्यों को मोक्ष का अधिकारी किया है। उसके गुण कर्म स्वभाव को पहिचान कर हम सदा पुरुषार्थ करते रहें॥ ६॥

अव॑ बाधे द्वि॒षन्तं॑ देवपी॒युं स॒पत्ना॒ ये मेऽप॒ ते भ॑वन्तु। ब्र॒ह्मौद॒नं वि॒श्वजि॑तं पचामि शृ॒ण्वन्तु॑ मे श्र॒द्द- धा॑नस्य दे॒वाः॥७॥

अव॑। बा॒धे॒। द्वि॒षन्त॑म्। दे॒व॒ऽपी॒युम्। स॒ऽपत्नाः॑। ये। मे॒। अप॑। ते। भ॒व॒न्तु। ब्र॒ह्म॒ऽओ॒द॒नम्। वि॒श्व॒ऽजि॑तम्। प॒चा॒मि॒। शृ॒ण्वन्तु॑। मे॒। श्र॒त्ऽदधा॑नस्य। दे॒वाः॥ ७॥

भाषार्थः—(द्विषन्तम्) द्वेष करने वाले (देवपीयुम्) देवताओं के हिंसक को (अव बाधे) मैं हटाता हूं। (ये) जो (मे) मेरे (सपत्नाः) प्रतियोगी हैं, (ते) वे (अप भवन्तु) हट जावें। (विश्वजितम्) संसार के जीतने वाले (ब्रह्मौदनम्) सबसे बड़े सींचने वाले वा अन्नरूप परमात्मा को

विद्लृ लाभे विद विचारणे-घञ्। धर्मब्रह्मप्रतिपादकानि ऋग्यजुः सामाथर्वात्मकानि अपौरुषेयाणि शास्त्राणि। **निहिताः**। निधिरूपेण स्थापिताः। **विश्वरूपाः**। **खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः** (उ० ३। २८) इति रु शब्दे-पः, दीर्घश्च। यद्वा रूप रूपक्रियायाम्। अच्, रूयते रूप्यते वा रूपम्। सर्वैः रूयमाणाः कीर्त्यमानाः। सर्वेषां पदार्थानां रूपकाः। अन्यत् पूर्ववत्॥

७—**अव बाधे**। अपवारयामि। **द्विषन्तम्**। हिंसन्तम्। **देवपीयुम्**। पीयति हिंसाकर्मा—निरु० ४। २५। **खरुशङ्कुपीयु०** (उ० १। ३६) इति पीयतेः—कुः। देवानां हिंसकम्। **सपत्नाः**। अ० १। ९। २। शत्रवः। **ये**। **मे**। मम। **अपभवन्तु**। दूरे गच्छन्तु। **ते**। शत्रवः। **ब्रह्मौदनम्**। ओदन इति व्याख्यातम्—सू० ३४ म० १। प्रवृद्धं सेचकं प्रवर्धकम् अन्नरूपं वा

(पचामि) पक्का [हृदय में दृढ़] करता हूं। (देवाः) व्यवहार कुशल विद्वान् लोग (श्रद्दधानस्य) श्रद्धा रखने वाले (मे) मेरी [वार्ता] (शृण्वन्तु) सुनें ॥ ७ ॥

भावार्थः—मनुष्य जगदीश्वर में पूरी भक्ति करके पुरुषार्थ पूर्वक अपने सब विघ्नों को हटा कर आनन्द भोगें ॥ ७ ॥

इति सप्तमोऽनुवाकः ॥

अथ अष्टमोऽनुवाकः

सूक्तम् ३६ ॥

१-१० । अग्निर्देवता । अनुष्टुप्छन्दः ।

राजधर्मोपदेशः—राजा के धर्म का उपदेश ॥

तान्त्स॒त्यौजा॒ः प्र द॑ह॒त्व॒ग्निर्वै॑श्वान॒रो वृषा॑ ।

यो नो॑ दु॒रस्या॒द् दिप्सा॒च्चाथो॒ यो नो॑ अराति॒यात् ॥ १ ॥

तान् । स॒त्यऽओ॑जाः । प्र । द॒ह॒तु॒ । अ॒ग्निः । वै॒श्वा॒न॒रः । वृषा॑ । यः । न॒ः । दु॒र॒स्यात् । दिप्सा॑त् । च॒ । अथो॒ इति॑ । यः । न॒ः । अ॒रा॒ति॒ऽयात् ॥ १ ॥

भाषार्थः—(सत्यौजाः) सत्य बल वाला, (वैश्वानरः) सब नरों का हित करने वाला, (वृषा) सुख वर्षाने वाला वा ऐश्वर्यवान् (अग्निः) सर्वव्यापक परमेश्वर (तान्) उन सबको (प्रदहतु) भस्म कर डाले। (यः)

परमात्मानम् । **विश्वजितम्** । सर्वस्य जेतारम् । **पचामि** । परिपक्वं दृढं करोमि । **शृण्वन्तु** । आकर्णयन्तु । **मे** । मम वाक्यम् । **श्रद्दधानस्य** । श्रद्धाधारकस्य । **देवाः** । व्यवहारिणो विद्वांसः ॥

१—**तान्** । निर्दिष्टान् । **सत्यौजाः** । अवितथबलः । **प्र** । प्रकर्षेण । **दहतु** । भस्मीकरोतु । **अग्निः** । सर्वव्यापकः परमेश्वरः । **वैश्वानरः** । अ० १ । १० । ४ । सर्वनरहितः । **वृषा** । अ० १ । १२ । १ । सुखवर्षकः । ऐश्वर्यवान् । **यः** । शत्रुः ।

जो (नः) हमें (दुरस्यात्) दुष्ट माने, (च) और जो (दिप्सात्) मारना चाहे, (अथो) और भी (यः) जो (नः) हमसे (अरातियात्) बैरी सा वर्ताव करे ॥ १ ॥

भावार्थः—पुरुषार्थी मनुष्य परमेश्वर पर विश्वास करके धर्म के विघ्नकारियों को नष्ट करें ॥ १ ॥

यो नो दिप्सददिप्सतो दिप्सतो यश्च दिप्सति ।
वैश्वानरस्य दंष्ट्रयोरग्नेरपि दधामि तम् ॥ २ ॥

यः । नः । दिप्सत् । अदिप्सतः । दिप्सतः । यः । च । दिप्सति ।
वैश्वानरस्य । दंष्ट्रयोः । अग्नेः । अपि । दधामि । तम् ॥ २ ॥

भाषार्थः—(यः) जो पुरुष (अदिप्सतः) न सताने वाले (नः) हमको (दिप्सत्) सताना चाहे, (च) और (यः) जो (दिप्सतः) सताने वाले [हम] को (दिप्सति) सताना चाहता है, (तम्) उसको (वैश्वानरस्य) सब नरों के हितकारक (अग्नेः) ज्ञानी पुरुष के (दंष्ट्रयोः) दोनों डाढ़ों के बीच जैसे (अपि) अवश्य (दधामि) धरता हूँ ॥ २ ॥

भावार्थः—जो मनुष्य धर्मात्माओं को बिना कारण सतावे, और जो दुष्ट धर्मात्माओं को उनके दण्ड देने पर भी दुष्ट आचरण करे, उन शत्रुओं को

नः । अस्मान् । **दुरस्यात्** । **उपमानादाचारे** (पा० ३।१।१०) इति दुष्ट—क्यच् । **दुरस्युर्द्रविणस्युर्०** (पा० ७।४।३६) इति क्यचि दुष्टस्य दुरस्भावः । तदन्ताल्लेटि आडागमः । दुष्टानिवाचरेत् । **दिप्सात्** । दन्भु दम्भे—सन् । **दम्भ इच्च** (पा० ७।४।५६) इति इत्वम् । **अत्र लोपोऽभ्यासस्य** (पा० ७।४।५८) इति अभ्यासलोपः । भष्भावाभावश्छान्दसः । धिप्सेत् । दम्भितुं हिंसितुमिच्छेत् । **च** । **अथो** । अपि च । **अरातियात्** । पूर्ववत् क्यचि लेट् । अरातिवदाचरेत् । शत्रुवदनुतिष्ठेत् ॥

२—**यः** । शत्रुः । **नः** । अस्मान् । **दिप्सत्** । लेटि अडागमः । दम्भितुं हिंसितुमिच्छेत् । **अदिप्सतः** । दम्भितुं हिंसितुमनिच्छतः । **दिप्सतः** । हिंसितुमिच्छतः । **यः** । **च** । **दिप्सति** । दम्भितुमिच्छति । जिहिंसिषति । **वैश्वानरस्य** । सर्वनरहितस्य । **दंष्ट्रयोः** । **दाम्नीशसयुयुज०** (पा० ३।२।१८२) इति दंश दशने—ष्ट्रन्, अजा-

राजा परमेश्वर के दिये सामर्थ्य से ऐसे कुचल डाले जैसे डाढ़ों के बीच अन्न को ॥ २ ॥

य आगरे मृगयन्ते प्रतिक्रोशेऽमावास्ये ।
क्रव्यादो अन्यान् दिप्सतः सर्वांस्तान्त्सहसा सहे ॥ ३ ॥

ये । आऽगरे । मृगयन्ते । प्रतिऽक्रोशे । अमाऽवास्ये । क्रव्यऽअदः । अन्यान् । दिप्सतः । सर्वान् । तान् । सहसा । सहे ॥ ३ ॥

भाषार्थः—(ये) जो दुष्ट (आगरे) घर में (प्रतिक्रोशे) गूंजते हुए (अमावास्ये) अमावस के अन्धकार में (मृगयन्ते) खोजते फिरते हैं । (अन्यान्) दूसरों को (दिप्सतः) सताने वाले (तान् सर्वान्) उन सब (क्रव्यादः) मांसभक्षी सिंह आदिकों को (सहसा) बल सें (सहे) मैं जीतता हूं ॥ ३ ॥

भावार्थः—रात्रि के अन्धकार में जो सिंह आदि हिंसक पशु वा मनुष्य सतावें, राजा उनका यथावत् प्रवन्ध करे ॥ ३ ॥

सहे पिशाचान्त्सहसैषां द्रविणं ददे ।
सर्वान् दुरस्यतो हन्मि सं म आकूतिर्ऋध्यताम् ॥ ४ ॥

सहे । पिशाचान् । सहसा । एषाम् । द्रविणम् । ददे । सर्वान् । दुरस्यतः । हन्मि । सम् । मे । आऽकूतिः । ऋध्यताम् ॥ ४ ॥

दित्वात्—टाप् । खादनसाधनयोर्दन्तविशेषयोर्मध्ये । अग्नेः । ज्ञानिनः पुरुषस्य । अपि । अवधारणे । दधामि । धरामि । तम् । शत्रुम् ॥

३—ये । शत्रवः । आगरे । ऋदोरप् (पा०३ । ३ । ५७) इति गॄ निगरणे—अप् । आगारे । गृहे । मृगयन्ते । मृग अन्वेषणे । अन्विच्छन्ति । प्रतिक्रोशे । प्रतिध्वनियुक्ते । अमावास्ये । अमा=सह वसतश्चन्द्रार्कौ यस्याम्, अमा+वस निवासे—ण्यत्,[१] टाप् । अमावास्या कृष्णपक्षान्ततिथिः । अ च (पा० ४ । ३ । ३१) इति अमावास्या—अप्रत्ययः, जात इत्यर्थे । अमावास्यायां जाते कृष्णकाले । क्रव्यादः । अ० २ । २५ । ५ । मांसभक्षकान् सिंहादीन् । अन्यान् । इतरान् पुरुषान् । दिप्सतः । हिंसितुमिच्छून् । सर्वान् । तान् । सहसा । वलेन । सहे । अभिभवामि ॥

---

१. अमावस्यदन्य० (३ । १ । १२२) इत्यनेन ॥ सम्पा० ॥

भाषार्थः—(पिशाचान्) मांसभक्षकों को (सहसा) बल से (सहे) मैं जीतता हूं, और (एषाम्) इनका (द्रविणम्) धन [सुपात्रों को] (ददे) मैं देता हूं, (दुरस्यतः) सताने वाले (सर्वान्) सबों को (हन्मि) मैं मारता हूं। (मे) मेरा (आकूतिः) शुभ संकल्प (सम् ऋध्यताम्) यथावत् सिद्ध होवे ॥ ४ ॥

भावार्थः—राजा दुष्टों का हनन करके उनका धन सेनापति आदि योग्य पुरुषों को पारितोषिक में देवे और प्रयत्न पूर्वक अपना शुभ संकल्प सिद्ध करे ॥४॥

ये दे॒वास्तेन॒ हास॑न्ते॒ सूर्ये॑ण मिमते ज॒वम् ।
न॒दीषु॒ पर्व॑तेषु॒ ये सं तैः प॒शुभि॑र्वि॑दे ॥ ५ ॥

ये । दे॒वाः । तेन॑ । हास॑न्ते । सूर्ये॑ण । मि॒मते॒ । ज॒वम् । न॒दीषु॑ । पर्व॑तेषु । ये । सम् । तैः । प॒शुऽभिः॑ । वि॒दे॒ ॥ ५ ॥

भाषार्थः—(ये) जो (देवाः) विजयी शूर (तेन) पुण्य के साथ (हासन्ते) चलना चाहते हैं, और (ये) जो (नदीषु पर्वतेषु) नदियों और पर्वतों पर (सूर्येण) सूर्य के साथ (जवम्) अपना वेग (मिमते) करते हैं (तैः) उन (पशुभिः) दृष्टि वाले देवताओं से (सम् विदे) मैं मिलता हूं ॥५॥

भावार्थः—जो महात्मा लोग सूर्य के समान शीघ्रगामी होकर बड़े बड़े कठिन कामों को सिद्ध करते हैं, उनसे मिलकर सब मनुष्य उत्तम गुण प्राप्त करें ॥ ५ ॥

४—**सहे** । अभिभवामि । **पिशाचान्** । अ० १ । १६ । ३ । पिशिताशिनो राक्षसान् । **सहसा** । बलेन । **एषाम्** । **द्रविणम्** । अ० २ । २९ । ३ । धनम् । **ददे** । ददामि पात्रेभ्यः । **सर्वान्** । **दुरस्यतः** । हन्तुमिच्छून् । **हन्मि** । नाशयामि । **मे** । मम । **आकूतिः** । अ० ३ । २ । ३ । शुभसंकल्पः । **सम् ऋध्यताम्** । सम्यक् सिध्यतु ॥

५—**ये** । **देवाः** । विजिगीषवः शूराः । **तेन** । तॄ प्लवनसंतरणयोः—डः । पुण्येन—इति शब्दकल्पद्रुमः । **हासन्ते** । ओहाङ् गतौ—सनि छान्दसं रूपम् । जिहासन्ते । गन्तुमिच्छन्ति । **सूर्येण** । आदित्येन । **मिमते** । माङ् माने—लट् । उपमया सादृश्येन कुर्वन्ति । **जवम्** । स्ववेगम् । **नदीषु** । **पर्वतेषु** । गिरिषु । **ये** । **तैः** । **पशुभिः** । अ० २ । २६ । १ । द्रष्टृभिर्देवैः । **सम् विदे** । संजाने । संगच्छे ॥

तप॑नो अस्मि पिशा॒चानां॑ व्या॒घ्रो गोम॑तामिव ।

श्वानः॑ सिं॒हमि॑व दृ॒ष्ट्वा ते न वि॑न्दन्ते॒ न्य॒ञ्च॑नम् ॥६॥

तप॑नः । अ॒स्मि॒ । पि॒शा॒चाना॑म् । व्या॒घ्रः । गोम॑ताम्ऽइव । श्वानः॑ । सिं॒हम्ऽइ॑व । दृ॒ष्ट्वा । ते । न । वि॒न्द॒न्ते॒ । नि॒ऽअ॒ञ्च॑नम् ॥ ६ ॥

भाषार्थः—मैं (पिशाचानाम्) मांसाहारियों का (तपनः) संताप देने वाला (अस्मि) हूँ, (इव) जैसे (व्याघ्रः) बाघ (गोमताम्) गौ वालों का होता है। (ते) वे लोग (न्यञ्चनम्) छिपने का स्थान (न) नहीं (विन्दन्ते) पाते हैं, (इव) जैसे (श्वानः) कुत्ते (सिंहम्) सिंह को (दृष्ट्वा) देखकर [घबड़ा जाते हैं] ॥ ६ ॥

भावार्थः—दण्डवान् प्रतापी पुरुष के सन्मुख हिंसक जीव नहीं ठहरते हैं ॥ ६ ॥

न पि॑शा॒चैः सं श॑क्नोमि॒ न स्ते॒नैर्न व॑न॒र्गुभिः॑ । पि॒शा॒चास्तस्मा॑न्नश्यन्ति॒ यम॒हं ग्राम॑मावि॒शे ॥ ७ ॥

न । पि॒शा॒चैः । सम् । श॒क्नो॒मि॒ । न । स्ते॒नैः । न । व॒न॒र्गुऽभिः॑ । पि॒शा॒चाः । तस्मा॑त् । न॒श्य॒न्ति॒ । यम् । अ॒हम् । ग्राम॑म् । आ॒ऽवि॒शे ॥ ७ ॥

भाषार्थः—(न) न तो (पिशाचैः) पिशाचों के साथ, (न) न

६—**तपनः** । तप—ल्युट् । संतापकः । **अस्मि** । **पिशाचानाम्** । मांसभक्षकाणाम् । **व्याघ्रः** । हिंसकजन्तुविशेषः । **गोमताम्** । गोस्वामिनाम् । **इव** । यथा । **श्वानः** । अ० ४ । ५ । २ । श्वाऽशुयायी शवतेर्वा स्याद् गतिकर्मणः श्वसितेर्वा—निरु० । ३ । १८ । कुक्कुराः । **सिंहम्** । अ० । ४ । ८ । ७ । **इव** । **दृष्ट्वा** । अवलोक्य । **ते** । पिशाचाः । **न** । निषेधे । **विन्दन्ते** । लभन्ते । **न्यञ्चनम्** । निम्नगमनं रक्षास्थानम् ॥

७—**न** । निषेधे । **पिशाचैः** । पिशिताशिभिः । **सम्** । सम् वस्तुम् । **शक्नोमि** ।

(स्तेनैः) चोरों के साथ, और (न) न (वनर्गुभिः) वनचर डाकुओं के साथ (सम् शक्नोमि) रह सकता हूं। (यम्) जिस (ग्रामम्) ग्राम में (अहम्) मैं (आविशे) घुसता हूं, (पिशाचाः) पिशाच लोग (तस्मात्) उस स्थान से (नश्यन्ति) भाग जाते हैं ॥ ७ ॥

भावार्थः—राजा प्रबन्ध करे कि बस्तियों में हिंसक चोर आदि लूट खसोट न करें ॥ ७ ॥

यं ग्राममाविशत इदमुग्रं सहो मम ।
पिशाचास्तस्मान्नश्यन्ति न पापमुप जानते ॥ ८ ॥

यम् । ग्रामम् । आऽविशते । इदम् । उग्रम् । सहः । मम ।
पिशाचाः । तस्मात् । नश्यन्ति । न । पापम् । उप । जानते ॥ ८ ॥

भाषार्थः—(यम् ग्रामम्) जिस ग्राम में (इदम्) यह (उग्रम्) उग्र (मम) मेरा (सहः) बल (आ विशते) प्रवेश करता है। (पिशाचाः) पिशाच लोग (तस्मात्) उस स्थान से (नश्यन्ति) भाग जाते हैं और (पापम्) पाप को (न) नहीं (उप जानते) जानते हैं ॥ ८ ॥

भावार्थः—प्रतापी नीति निपुण राजा के शासन में दुष्ट लोग उपद्रव नहीं मचाते हैं ॥ ८ ॥

शक्तो भवामि । **स्तेनैः** । चौरैः । **वनर्गुभिः** । **मृगय्वादयश्च** (उ० १ । ३७) इति वन+गम्लृ गतौ–डुः, रुडागमः । स्तेननाम–निघ० ३।२४ । वनर्गू वनगामिनौ–निरु० ३ । १४ । वनचरैः । दस्युभिः । **पिशाचाः** । पिशिताशनाः । **तस्मात्** । ग्रामात् । **नश्यन्ति** । अदृष्टा भवन्ति, पलायन्ते । **यम्** । **अहम्** । **ग्रामम्** । अ० ४ । ७ । ५ । वसतिम् । **आविशे** । प्रविशामि ॥

८—**यम्** । **ग्रामम्** । वसतिम् । **आविशते** । प्रविशति । **इदम्** । **उग्रम्** । तीक्ष्णम् । **सहः** । बलम् । **मम** । मदीयम् । **पिशाचाः, तस्मात्, नश्यन्ति** । म० ७ । **न** । निषेधे । **पापम्** । पाति यस्मात् तत् । अनिष्टम् । **उप जानते** । अवबुध्यन्ते ॥

ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव।

तानहं मन्ये दुर्हितान् जने अल्पशयूनिव ॥ ९ ॥

ये। मा। क्रोधयन्ति। लपिताः। हस्तिनम्। मशकाःऽइव। तान्। अहम्। मन्ये। दुःऽहितान्। जने। अल्पशयून्ऽइव ॥ ९ ॥

भाषार्थः—(ये) जो (लपिताः) बकवादी लोग (मा) मुझे (क्रोधयन्ति) क्रोध करते हैं, (मशकाः इव) जैसे मच्छड़ (हस्तिनम्) हाथी को। (तान्) उन (दुर्हितान्) दुष्कर्मियों को (जने) मनुष्यों के बीच (अल्पशयून् इव) थोड़े सोने वाले कीट पतंगों के समान (अहम्) मैं (मन्ये) मानता हूँ ॥९॥

भावार्थः—बतबने दुराचारियों को दण्ड देकर राजा सदा दुर्बल रक्खे ॥ ९ ॥

अभि तं निर्ऋतिर्धत्तामश्वमिवाश्वाभिधान्या।

मल्वो यो मह्यं क्रुध्यति स उ पाशान्न मुच्यते ॥ १० ॥

अभि। तम्। निःऽऋतिः। धत्ताम्। अश्वम्ऽइव। अश्वऽअभिधान्या। मल्वः। यः। मह्यम्। क्रुध्यति। सः। ऊँ इति। पाशात्। न। मुच्यते ॥ १० ॥

भाषार्थः—(तम्) उसको (निर्ऋतिः) अलक्ष्मी (अभिधत्ताम्) बांध लेवे (अश्वम् इव) जैसे घोड़े को (अश्वाभिधान्या) घोड़ा बांधने की

९—**ये**। दुष्टाः। **मा**। माम्। **क्रोधयन्ति**। कोपयन्ति। **लपिताः**। लप व्यक्तायां वाचि—क्तः। लपितं कथनमस्यास्तीति, अर्श आद्यच्। वाचालाः। **हस्तिनम्**। गजम्। **मशकाः**। कृञादिभ्यः संज्ञायां वुन् (उ० ५। ३५) इति मश शब्दे—वुन्। दंशकाः। **इव**। यथा। **तान्**। **अहम्**। **मन्ये**। जानामि। **दुर्हितान्**। दुष्कर्मिणः। **जने**। जनसमूहे। **अल्पशयून्**। भृमृशीङ्० (उ० १। ७) इति अल्प+शीङ् स्वप्ने—उः। अल्पशयनस्वभावान् क्षुद्रजन्तून् ॥

१०—**अभि धत्ताम्**। बध्नातु। **तम्**। दुष्टम्। **निर्ऋतिः**। । अ० ३। ११। २। कृच्छ्रापत्तिः—निरु० २। ७। अलक्ष्मीः। **अश्वम् इव**। यथा तुरङ्गम्।

रसरी से । (यः मल्वः) जो मलिन पुरुष (मह्यम्) मुझ पर (क्रुध्यति) क्रोध करता है, (सः) वह (पाशात्) फांसी से (उ न) कभी नहीं (मुच्यते) छुटता है ॥ १० ॥

भावार्थः—राजा कुकर्मी दुष्टों को यथावत् दण्ड देकर सत्पुरुषों की रक्षा करे ॥ १० ॥

सूक्तम् ३७ ॥

१-१२ ॥ १, २, ६, १० ओषधिः, ३, ४, ५ अप्सरसः, ८, ९, इन्द्रः, ११ गन्धर्वः, ७, १२ गन्धर्वाप्सरसो देवताः ॥ १-४, ६, ८-१५ अनुष्टुप्, ५ पथ्या पङ्क्तिः, ७ उष्णिक् ॥

गन्धर्वाप्सरसां गुणोपदेशः-गन्धर्व और अप्सराओं के गुणों का उपदेश ॥

त्वया पूर्वमथर्वाणो जघ्नू रक्षांस्योषधे ।

त्वया जघान कश्यपस्त्वया कण्वो अगस्त्यः ॥ १ ॥

त्वया । पूर्वम् । अथर्वाणः । जघ्नुः । रक्षांसि । ओषधे ।

त्वया । जघान । कश्यपः । त्वया । कण्वः । अगस्त्यः ॥ १ ॥

भाषार्थः—(ओषधे) हे तापनाशक परमेश्वर ! (त्वया) तेरे सहारे से (पूर्वम्) पहिले (अथर्वाणः) निश्चल स्वभाव वाले अथवा मंगल के लिये व्यापक महात्माओं ने (रक्षांसि) राक्षसों को (जघ्नुः) मारा था । (त्वया)

अश्वाभिधान्या । अश्वमभिदधाति बध्नात्यनया सा अश्वाभिधानी । करणे-ल्युट् टित्त्वाद् ङीप् । अश्वबन्धनरज्ज्वा । **मल्वः** । कॄगॄशॄदृभ्यो वः (उ० १ । १५५) इति मल धारणे—वः । मलिनः । क्रूरः । **यः** । **मह्यम्** । **क्रुधद्रुहेर्ष्या०** (पा०१। ४ । ३७) इति चतुर्थी । **क्रुध्यति** । कुप्यति । **सः** । **उ** । एव । **पाशात्** । बन्धनात् । **न** । **मुच्यते** । वियुज्यते ॥

१—**त्वया** । **पूर्वम्** । अग्रे । **अथर्वाणः** । अ० ४ । १ । ७ । निश्चलस्वभावाः । मङ्गलाय व्यापकाः महात्मानः । **जघ्नुः** । हतवन्तः । **रक्षांसि** । राक्षसान् । **ओषधे** । अ० १ । २३ । १ । हे तापनाशक परमेश्वर ! **जघान** । हतवान् ।

तेरे साथ ही (कश्यपः) तत्वदर्शी पुरुष ने, और (त्वया) तेरे साथ ही (कण्वः) मेधावी, तथा (अगस्त्यः) कुटिलगति, पाप के फेंकने में समर्थ जीव ने (जघान) मारा था ॥ १ ॥

भावार्थः—जैसे पूर्वज ऐतिहासिक जितेन्द्रिय पुरुषों ने जगत् का उपकार किया है, वैसे ही सब मनुष्य ज्ञान पूर्वक दोषों का नाश करके परस्पर उपकार करें ॥ १ ॥

त्वया॑ व॒यम॑प्स॒रसो॒ ग॑न्ध॒र्वांश्चा॑तयामहे ।

अज॑शृङ्ग्यज॒ रक्षः॒ सर्वा॑न् ग॒न्धेन॑ नाशय ॥ २ ॥

त्वया॑ । व॒यम् । अ॒प्स॒रसः॑ । ग॒न्ध॒र्वान् । चा॒त॒या॒म॒हे॒ । अज॑ऽशृङ्गि । अज॑ । रक्षः॑ । सर्वा॑न् । ग॒न्धेन॑ । ना॒श॒य ॥ २ ॥

भाषार्थः—(अजशृङ्गि) हे जीवात्मा के दुःखनाशक शक्ति परमेश्वर ! (त्वया) तेरे साथ (वयम्) हम लोग (अप्सरसः) आकाश, जल, प्राण और प्रजाओं में व्यापक शक्तियों को और (गन्धर्वान्) विद्या वा पृथिवी धारण करने वाले गुणों को (चातयामहे) मांगते हैं। (गन्धेन) अपनी व्याप्ति से (सर्वान्) सब (रक्षः) राक्षसों को (अज) हटा दे और (नाशय) नाश कर दे ॥ २ ॥

भावार्थः—जो मनुष्य परमेश्वर पर विश्वास करके पुरुषार्थ करते हैं, वे ही संसार को सुख देते हैं। [अजशृङ्गी एक औषध भी है] ॥ २ ॥

इन मन्त्रों के साथ अ० २ सू० २ का मिलान करो ॥

कश्यपः । अ० २ । ३३ । ७ । पश्यकः, तत्त्वदर्शकः पुरुषः । **कण्वः** । अ० २।३२। ३ । मेधावी निघ० ३ । १५ । **अगस्त्यः** । अ० २ । ३२ । ३ । अगस्य कुटिलगतेः पापस्य असने उत्पाटने समर्थः पुरुषः ॥

२—**त्वया** । **वयम्** । **अप्सरसः** । अ० २ । २ । ३ । **सर्त्तेरप्पूर्वादसिः** (उ० ४ । २३७) इति अप् + सृ गतौ—असिः । अप्सु आकाशे जले प्राणेषु प्रजासु च सरणशीलाः शक्तीः । **गन्धर्वान्** । अ० २ । १ । २ । विद्याधारकान् पृथिवीधारकान् वा गुणान् । **चातयामहे** । चते याचने भ्वा० । व्यत्ययेन णिच्—याचामहे । **अजशृङ्गि** । अजो जीवात्मा-अ० ४ । १४ । १ शृङ्गम्-अ० २।३२।६ । शॄ हिंसायाम्—गन्, स च कित् नुट् च, ङीप् । अजस्य जीवात्मनः शृङ्गं दुःखनाशनं यस्याः सा शक्तिः परमेश्वरः, तत्सम्बुद्धौ । अजशृङ्गीति ओषधिविशेषोऽप्यस्ति । **अज** । प्रक्षिप । **रक्षः** । रक्ष पालने—अपादाने क्विप् । राक्षसान् । **सर्वान्** । **गन्धेन** । गन्ध गतिहिंसायाचनेषु[1]—अच् । स्वव्याप्त्या । **नाशय** ॥

---

१. देखें पृ० ६६० की टिप्पणी ॥ सम्पा० ॥

नदीं यन्त्वप्सरसोऽपां तारमवश्वसम् । गुल्गुलूः पीला नलद्यौ३ऽक्षगन्धिः प्रमन्दनी । तत्परेताप्सरसः प्रतिबुद्धा अभूतन ॥३॥

नदीम् । यन्तु । अप्सरसः । अपाम् । तारम् । अवऽश्वसम् । गुल्गुलूः । पीला । नलदी । औक्षऽगन्धिः । प्रऽमन्दनी । तत् । परा । इत । अप्सरसः । प्रतिऽबुद्धाः । अभूतन ॥ ३ ॥

भाषार्थः—(अप्सरसः) आकाश, जल, प्राण, और प्रजाओं में व्यापक शक्तियां (अपाम्) जल के (तारम्) तट को (अवश्वसम्) भरती हुई (नदीम्) नदी [नदी के समान पूर्णता] को (यन्तु) प्राप्त हों ॥

[जो प्रत्येक] (गुल्गुलूः) रक्षा साधन से रक्षित, (पीला) सबको घेरने वाली, (नलदी) बन्धन काटने वाली, (औक्षगन्धिः) बड़ों के योग्य गतिवाली, और (प्रमन्दनी) आनन्द देने वाली शक्ति है ।

(तत्) इसलिये (अप्सरसः) हे आकाश, जल, प्राण और प्रजाओं में व्यापक शक्तियो ! (परा) पराक्रम से (इत) प्राप्त हो, तुम (प्रतिबुद्धाः) प्रत्यक्ष जानी हुयी (अभूतन) हो चुकी हो ॥ ३ ॥

३—**नदीम्** । अ० १ । ८ । १ नदीत्वम् । नदीवत्पूर्णताम् । **यन्तु** । प्राप्नुवन्तु । **अप्सरसः** । म० २ । अप्सु आकाशजलप्राणप्रजासु व्यापनशीलाः शक्तयः । **अपाम्** । व्याप्तिमतां जलानाम् । **तारम्** । तॄ प्लवनसंतरणयोः—घञ् । तरणस्थानम्, तीर्थम्, नदीकूलम् । **अवश्वसम्** । श्वस प्राणने—क्विप्, अन्तर्भावितण्यर्थः । अवश्वासयन्तीम् । सर्वतः पूरयन्तीम् । **गुल्गुलूः** । अ० २ । ३६ । ७ । गुड रक्षायाम्—क्विप् + गुड—कुः, स्त्रियाम् ऊङ् । डलयोरैक्यम् । गुडा रक्षासाधनेन गुडिता । रक्षिता शक्तिः । **पीला** । पील प्रतिष्टम्भे—अच्, टाप् । रोधनशीला नियामिका । **नलदी** । णल बन्धने—अच् + दो अवखण्डने—कः, ङीष् । बन्धनच्छेदिका । **औक्षगन्धिः** । औक्षः, अ० २ । ३६ । ७ । उक्षा, महन्नाम—निघ० ३ । ३ । ततः, अण् । सर्वधातुभ्य इन् (उ० ४ । ११८) इति गन्ध गतिहिंसायाचनेषु—इन् । महतां योग्या गतिर्यस्याः सा । **प्रमन्दनी** । मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु—ल्युट्,

भावार्थः—परमेश्वर की अनन्त गुणवाली शक्तियां संसार में व्याप्त हैं। मनुष्य विज्ञान पूर्वक उनसे उपकार लेकर आनन्द पावें ॥ ३ ॥

यत्राश्वत्था न्यग्रोधा महावृक्षाः शिखण्डिनः ।

तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥ ४ ॥

यत्रं । अश्वत्थाः । न्यग्रोधाः । महाऽवृक्षाः । शिखण्डिनः ।
तत् । परा । इत । अप्सरसः । प्रतिऽबुद्धाः । अभूतन ॥ ४ ॥

भाषार्थः—(यत्र) जहां पर (अश्वत्थाः) वीरों में खड़े होने वाले, (न्यग्रोधाः) शत्रुओं को रोक देने वाले, (महावृक्षाः) अत्यन्त स्वीकार करने योग्य, और (शिखण्डिनः) अत्यन्त उद्यमी पुरुष हों।

(तत्) वहां (अप्सरसः) हे आकाश आदि में व्यापक शक्तियो ! (परा) पराक्रम से (इत) प्राप्त हो, तुम (प्रतिबुद्धाः) प्रत्यक्ष जानी हुई (अभूतन) हो चुकी हो ॥ ४ ॥

भावार्थः—मनुष्य परमेश्वर के गुण कर्म स्वभाव जानकर महापुरुषार्थी होवें ॥ ४ ॥

यत्रं वः प्रेङ्खा हरिता अर्जुना उत यत्राघाटाः कर्कर्यः संवदन्ति । तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥ ५ ॥

ङीप् । प्रमोदयित्री, हर्षयित्री । **तत्** । तस्मात् । **परा** । पराक्रमेण । **इत** । गच्छत प्राप्नुत । **अप्सरसः** । हे अप्सरसः । आकाशजलप्राणप्रजासु व्यापनशीलाः शक्तयः । **प्रतिबुद्धाः** । प्रत्यक्षज्ञाताः । **अभूतन** । भू सत्तायाम् लुङ् । **तप्तनप्तनथनाश्च** (पा० ७ । १ । ४५) इति तकारस्य तन । अभूत । अवर्तिढ्वम् ।

४—यत्र । यस्मिन् स्थाने । **अश्वत्थाः** । अ० ३ । ६ । १ । अश्वेषु बलवत्सु स्थितिशीलाः । अश्वत्थामानः । अतिवीरपुरुषाः । **न्यग्रोधाः** । न्यक् + रुधिर् आवरणे—अच् । शत्रूणां रोधकाः । **महावृक्षाः** । वृक्ष वरणे-कः । महावरणीयाः । अतिश्रेष्ठाः । **शिखण्डिनः** । **अण्डन् कृसृभृवृञः** (उ० १ । १२९) इति शिखि गतौ—अण्डन्, स च कित् तत इनिः । गतिवन्तः । उद्योगिनः । अन्यत् पूर्ववत् म० ३ ॥

यत्र । वः । प्रऽइंङ्खाः । हरिताः । अर्जुनाः । उत । यत्र । आघाटाः । कर्कर्यः । सम्ऽवदन्ति । तत् । परा । इत । अप्सरसः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥

भाषार्थः—(यत्र) जहां (प्रेङ्खाः) उत्तम गतिवाली, (हरिताः) स्वीकार करने योग्य, (अर्जुनाः) उपार्जन करने वाली, (उत) और (यत्र) जहां (आघाटाः) चेष्टा करती हुई (कर्कर्यः) उत्तम कर्म ग्रहण करने वाली प्रजायें (वः) तुम्हारा (संवदन्ति) सम्वाद करती हैं।

(तत्) वहाँ (अप्सरसः) हे आकाशादि में व्यापक शक्तियो ! (परा) पराक्रम से (इत) प्राप्त हो, तुम (प्रतिबुद्धाः) प्रत्यक्ष जानी हुई (अभूतन) हो चुकी हो ॥ ५ ॥

भावार्थः—उद्योगी पुरुषार्थी पुरुष परमेश्वर की महिमा साक्षात् करके आनन्दित होते हैं ॥ ५ ॥

एयमंगुन्नोषंधीनां वीरुधां वीर्यावती ।
अजशृङ्ग्यराटकी तीक्ष्णशृङ्गी व्यृषतु ॥ ६ ॥

आ । इयम् । अगन् । ओषधीनाम् । वीरुधाम् । वीर्यऽवती । अजऽशृङ्गी । अराटकी । तीक्ष्णऽशृङ्गी । वि । ऋषतु ॥ ६ ॥

भाषार्थः—(ओषधीनाम्) ताप नाशक (वीरुधाम्) विविध प्रकार से उगने वाली प्रजाओं के बीच (वीर्यवती) बड़ी सामर्थ्य वाली (इयम्) यह

५—**यत्र** । **वः** । युष्माकम् । **प्रेङ्खाः** । प्र+ईखि गतौ-घञ्, टाप् । प्रकृष्टगतयः । **हरिताः** । हृश्याभ्यामितन् (उ० ३ । ९३) इति हृञ् हरणे=स्वीकारे-इतन्, टाप् । हरणीयाः स्वीकरणीयाः । **अर्जुनाः** । अर्ज अर्जने-उनन् टाप् । अर्जनशीलाः । प्रयत्नस्वभावाः । **उत** । अपि च । **आघाटाः** । आङ्+घट चेष्टायाम्-घञ् । चेष्टायमानाः । **कर्कर्यः** । कृदाधा० (उ० ३।४०) इति डुकृञ् करणे-कः, रा दाने ङीप् । कर्कं रातीति कर्करी । कर्मग्रहीत्र्यः प्रजाः । **सम्वदन्ति** । सम्वादं कुर्वन्ति । अन्यत् पूर्ववत् म० ३ ॥

६—**इयम्** । समीपे वर्तमाना । **आ अगन्** । गमेर्लुङि छान्दसं रूपम् ।

शक्ति (आ अगन्) प्राप्त हुई है। वही (अजशृङ्गी) जीवात्मा का दुःख काटने वाली, (अराटकी) शीघ्र प्राप्त होने वाली, (तीक्ष्णशृङ्गी) बड़े तेज वाली शक्ति परमेश्वर (वि ऋषतु) व्याप्त होवे ॥ ६ ॥

भावार्थः—परम पिता परमेश्वर की शक्ति सब पदार्थों में व्यापक है, उसके ज्ञान से हम लोग अपनी उन्नति करें ॥ ६ ॥

आ नृत्यंतः शिखण्डिनो गन्धर्वस्याप्सरापतेः ।
भिनद्मि मुष्कावपि यामि शेपः ॥ ७ ॥

आऽनृत्यतः । शिखण्डिनः । गन्धर्वस्य । अप्सराऽपतेः ।
भिनद्मि । मुष्कौ । अपि । यामि । शेपः ॥ ७ ॥

भाषार्थः—(आनृत्यतः) सब ओर चेष्टा करने वाले (शिखण्डिनः) महा उद्योगी (गन्धर्वस्य) वेदवाणी और पृथिवी आदि को धारण करने वाले (अप्सरापतेः) आकाश, जल प्राण और प्रजाओं में व्यापक शक्तियों के रक्षक परमेश्वर का (शेपः) सामर्थ्य (यामि) मैं मांगता हूं, [जिस से] (मुष्कौ) [काम क्रोध रूप] दो चोरों को (अपि) अवश्य (भिनद्मि) छिन्न भिन्न करूं ॥ ७ ॥

आगमत् । आगता । **ओषधीनाम्** । तापनाशयित्रीणां मध्ये । **वीरुधाम्** । विरोहणशीलानां प्रजानां मध्ये । **वीर्यवती** । छान्दसो दीर्घः । अतिशयेन सामर्थ्ययुक्ता । **अजशृङ्गी** । म० २ । अजस्य जीवात्मनो दुःखनाशनी शक्तिः । **अराटकी** । **कृञादिभ्यः संज्ञायां वुन्** (उ० ५ । ३५) इति अर+अट गतौ-वुन् ङीष् । अरं शीघ्रम् अटति सा । शीघ्रगामिनी । **तीक्ष्णशृङ्गी** । म० २ । शृङ्गाणि ज्वलतो नाम-निघ० १ । १७ । तीव्रतेजाः । **वि ऋषतु** । ऋषी गतौ । व्याप्नोतु ॥

७- **आनृत्यतः** । नृती-गात्रविक्षेपे—शतृः । सम्यक् चेष्टायमानस्य । **शिखण्डिनः** । म० ४ । उद्योगिनः । **गन्धर्वस्य** । म० २ । पृथिव्यादिधारकस्य । **अप्सरापतेः** । अ० २ । २ । ३ । अप्सराणाम् आकाशजलप्राणप्रजासु सरणशीलानां शक्तीनां पालकस्य परमेश्वरस्य । **भिनद्मि** । विदारयामि । **मुष्कौ** । **सृवृभूशुषिमुषिभ्यः कक्** (उ० ३ । ४१) इति मुष स्तेये-कक् । कामक्रोधरूपौ तस्करौ । **अपि** । एव । **यामि** । याञ्चाकर्मा-निघ० ३।१९ । अहं याचे । **शेपः** । **पानीविषिभ्यः पः**

भावार्थः—सर्वव्यापक सर्वनियामक परमेश्वर के विचार से मनुष्य जितेन्द्रिय होकर काम क्रोध आदि दोषों को मिटावें ॥ ७ ॥

भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मयीः ।
ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ॥ ८ ॥

भीमाः । इन्द्रस्य । हेतयः । शतम् । ऋष्टीः । अयस्मयीः । ताभिः । हविःऽअदान् । गन्धर्वान् । अवकाऽअदान् । वि । ऋषतु ॥ ८ ॥

भाषार्थः—(इन्द्रस्य) परमेश्वर की (शतम्) सौ (हेतयः) हनन शक्तियां (अयस्मयीः) लोह की बनी हुई (ऋष्टीः) खड्गों के समान (भीमाः) भयानक हैं । (ताभिः) उनके साथ [दुष्ट दमन के लिये] (हविरदान्) ग्राह्य अन्न के भोजन करने वाले (अवकादान्) हिंसाओं के नाश करने वाले, (गन्धर्वान्) वेदवाणी और पृथिवी के धारण करने वाले पुरुषों को [वह परमेश्वर] (वि ऋषतु) व्याप्त होवे ॥ ८ ॥

भावार्थः—परमेश्वर दुराचारियों को अनेक प्रकार से दण्ड देकर सत्पुरुषों की रक्षा करता है ॥ ८ ॥

(उ० ३ । २३) इति शीङ् स्वप्ने—पः । शेपो वैतस इति पुंस्प्रजननस्य । शेपः शपतेः स्पृशतिकर्मणः—निरु० ३ । २१ । सामर्थ्यम् ॥

८—**भीमाः** । अ० ३ । २५ । १ । भयंकराः । **इन्द्रस्य** । परमेश्वरस्य । **हेतयः** । अ० १ । १३ । ३ । हननशक्तयः । **शतम्** । बहु—निघ० ३ । १ । **ऋष्टीः** । ऋषी गतौ—क्तिच्, क्तिन् वा । ऋष्टयः । खड्गाः यथा । **अयस्मयीः** । सर्वधातुभ्योऽसुन् (उ० ४ । १८९) इति इण् गतौ—असुन् । अयस्मय्यः लौहे निर्मिताः । **ताभिः** । **हविरदान्** । हविः+अद भक्षणे पचाद्यच् । ग्राह्यान्नभोक्तॄन् । **गन्धर्वान्** । म० २ । वेदवाण्यादिधारकान् । **अवकादान्** । कृञादिभ्यः० (उ० ५ । ३५) इति अव रक्षणगतिहिंसादिषु—वुन् । टाप् + अद—अच् । हिंसानां भक्षकान् नाशकान् । **वि ऋषतु** । व्याप्नोतु ॥

भीमा इन्द्र॑स्य हे॒तयः॑ श॒तमृ॒ष्टीर्हि॑र॒ण्ययीः॑ ।
ताभि॑र्हविर॒दान् ग॑न्ध॒र्वान॑वका॒दान् व्यृ॑षतु ॥ ९ ॥

भी॒माः । इन्द्र॑स्य । हे॒तयः॑ । श॒तम् । ऋ॒ष्टीः । हि॒र॒ण्ययीः॑ । ताभिः॑ । ह॒विः॒ऽअ॒दान् । ग॒न्ध॒र्वान् । अ॒व॒का॒ऽअ॒दान् । वि । ऋ॒ष॒तु ॥ ९ ॥

भाषार्थः—(इन्द्रस्य) परमेश्वर की (शतम्) सौ (हेतयः) हनन शक्तियां (हिरण्ययीः) तेजोमयी (ऋष्टीः) तलवारों के समान (भीमाः) भयानक हैं। (ताभिः) उनके साथ [दुष्ट दमन के लिये] (हविरदान्) ग्राह्य अन्न के भोजन करने वाले (अवकादान्) हिंसाओं को नाश करने वाले (गन्धर्वान्) वेदवाणी और पृथिवी के धारण करने वाले पुरुषों को [वह परमेश्वर] (वि ऋषतु) व्याप्त होवे ॥ ९ ॥

भावार्थः—म० ८ के समान ॥ ९ ॥

अ॒व॒का॒दान॑भिशो॒चान॒प्सु ज्यो॑तय माम॒कान् ।
पि॒शा॒चान् सर्वा॑नोषधे॒ प्र मृ॑णीहि॒ सह॑स्व च ॥ १० ॥

अ॒व॒का॒ऽअ॒दान् । अ॒भि॒ऽशो॒चान् । अ॒प्ऽसु । ज्यो॒त॒य । मा॒म॒कान् । पि॒शा॒चान् । सर्वा॑न् । ओ॒ष॒धे॒ । प्र । मृ॒णी॒हि॒ । सह॑स्व । च॒ ॥ १० ॥

भाषार्थः—(अवकादान्) हिंसाओं के नाश करने वाले, (अभिशोचान्) सब ओर प्रकाशमान (मामकान्) मेरे पुरुषों को (अप्सु) व्याप्यमान प्रजाओं

९—**हिरण्ययीः** । हिरण्यः=हिरण्यमयः=निरु० १० । २३ । हिरण्यमय्यः । तेजोमय्यः । अन्यत् पूर्ववत्—म० ८ ॥

१०—**अवकादान्** । म० ८ । हिंसानां भक्षकान् नाशकान् । **अभिशोचान्** । अभितः शोचमानान् दीप्यमानान् । **अप्सु** । व्याप्यमानासु प्रजासु । **ज्योतय** । ज्योततेर्ज्वलतिकर्मा—निघ० १ । १६ । णिचि रूपम् । द्योतय प्रकाशय । **मामकान्** । मत्सम्बन्धिनः पुरुषान् । **पिशाचान्** । मांसभक्षकान् रोगादीन् ।

के बीच (ज्योतय) ज्योति वाला कर। (ओषधे) हे औषध समान ताप नाशक परमेश्वर (सर्वान् सब (पिशाचान्) मांस भक्षक रोग वा जीवों को (प्रमृणीहि) मार डाल (च) और (सहस्व) हरा दे ॥ १० ॥

भावार्थ:—परमेश्वर की प्रार्थना पूर्वक धर्मात्मा पुरुष दुष्ट स्वभावों रोग और दुष्ट जीवों का नाश करें ॥ १० ॥

श्वेवैकः कपिरिवैकः कुमारः सर्वकेशकः ।
प्रियो दृश इव भूत्वा गन्धर्वः सचते स्त्रियस्तमितो नाशयामसि ब्रह्मणा वीर्यावता ॥ ११ ॥

श्वाऽइव । एकः । कपिःऽइव । एकः । कुमारः । सर्वऽकेशकः । प्रियः । दृशेऽइव । भूत्वा । गन्धर्वः । सचते । स्त्रियः । तम् । इतः । नाशयामसि । ब्रह्मणा । वीर्यऽवता ॥ ११ ॥

भाषार्थ:—(एकः इव) एक ही परमेश्वर (श्वा) गतिशील वा वृद्धिशील है, (एकः इव) एक ही (कपिः) कंपाने वाला वा क्रोध शील, (कुमारः) कामना योग्य, (सर्वकेशकः) सर्व प्रकाशक है। (प्रियः इव) प्रिय ही परमेश्वर (गन्धर्वः) वेदवाणी वा पृथिवी का धारण करने वाला (भूत्वा) होकर (दृशे) सबके देखने के लिये (स्त्रियः) आपस में संगति रखने वाले समूहों में (सचते) मिला रहता है। (वीर्यावता) उस सामर्थ्य वाले (ब्रह्मणा) परब्रह्म के साथ (तम्) चोट करने वाले चोर को (इतः) यहां से (नाशयामसि) हम नाश करते हैं ॥ ११ ॥

सर्वान् । **ओषधे** । हे ओषधिवत् तापनाशक परमेश्वर । **प्र** । **मृणीहि** । मृण । नाशय । **सहस्व** । अभिभव । **च** । समुच्चये ॥

११—श्वा । श्वनुक्षन्० (उ० १ । १५९) टुओश्वि गतिवृद्ध्योः कनिन् । श्वाऽशुयायी शवतेर्वा स्याद् गतिकर्मणः श्वसितेर्वा—निरु० ३ । १८ । गतिशीलः वृद्धिशीलः । **इव** । अवधारणे । **एकः** । अद्वितीयः । **कपिः** । **कुण्ठिकम्प्योर्नलोपश्च** (उ०४।१४४) इति कपि चलने-इः । कम्पते क्रुध्यतिकर्मा—निघ० २ । १२ । कम्पयिता । क्रोधशीलः । **कुमारः** । **कमेः क्रिदुच्चोपधायाः** (उ० ३ ।

भावार्थः—परमात्मा को सर्वद्रष्टा आदि गुण विशिष्ट जानकर मनुष्य ज्ञान पूर्वक अपने दुष्कर्मों का नाश करें ॥ ११ ॥

जाया इद् वो अप्सरसो गन्धर्वाः पतयो यूयम् ।

अप धावतामर्त्या मर्त्यान् मा सचध्वम् ॥ १२ ॥

जायाः । इत् । वः । अप्सरसः । गन्धर्वाः । पतयः । यूयम् । अप । धावत । अमर्त्याः । मर्त्यान् । मा । सचध्वम् ॥ १२ ॥

भाषार्थः—(गन्धर्वाः) हे वेदवाणी वा पृथिवी लोक को धारण करने वाले पुरुषो ! (अप्सरसः) आकाश आदि में व्यापक शक्तियां (वः) तुम्हारे लिये (इत्) ही (जायाः) सुख उत्पन्न करने वाली हैं (यूयम्) तुम [उनके] (पतयः) रक्षक [बनो]। (अप) आनन्द से (धावत) धावो और (अमर्त्याः) हे अमर [नित्य उत्साही] पुरुषो ! (मर्त्यान्) मरते हुये [निरुत्साही] मनुष्यों के हित करने वाले पुरुषों को (मा=मया) लक्ष्मी के साथ (सचध्वम्) सदा मिलो ॥ १२ ॥

१३८) इति कमु कान्तौ—आरन् । कमनीयः । **सर्वकेशकः** । काशृ दीप्तौ—वुन् । अकारस्य एकारः । केशी केशा रश्मयस्तैस्तद्वान् भवति काशनाद् वा प्रकाशनाद्वा, निरु० १२ । २५ । सर्वप्रकाशकः । **प्रियः** । प्रीतिकरः । **दृशे** । अ० १ । ६ । ३ । द्रष्टुम् । सर्वदर्शनाय । **भूत्वा** । गन्धर्वः । पृथिव्यादिधारकः परमेश्वरः । **स्त्रियः** । अ० १ । ८ । १ । स्त्यै संघाते ड्रट्, ङीप् । सर्वाः संहतीः । समूहान् । **तम्** । तन आघाते[1]—डः । तानयतीति तः । आहन्तारं चोरम् । **इतः** । अस्मात् स्थानात् । **नाशयामसि** । नाशयामः । **ब्रह्मणा** । परमेश्वरेण सह । **वीर्यावता** । अतिशयसामर्थ्ययुक्तेन ॥

१२—जायाः । **जनेर्यक्** (उ० ४ । १११) इति जन जनने—यक्, टाप् । **ये विभाषा** (पा० ६ । ४ । ४३) इति आत्वम् । सुखस्य जनयित्र्यः । **इत्** । एव । **वः** । युष्मभ्यम् । **अप्सरसः** । म० २ । आकाशादिषु सरणशीलाः शक्तयः । **गन्धर्वाः** । म० २ । हे विद्यायाः पृथिव्याः वा धारकाः पुरुषा । **पतयः** । रक्षकाः । **यूयम्** । **अप** । आनन्देन । यथा—अपचितिः पूजा । **धावत** । शीघ्रं गच्छत । **अमर्त्याः** । **अघ्न्यादयश्च** (उ० ४ । ११२) इति मृङ् प्राणत्यागे—यक् तुक् च,

[1]. धातुओं के अनेक अर्थ होने से तन का आघात अर्थ दिखाया है ॥ सम्पा० ॥

भावार्थः—परमेश्वर की अनन्त अद्भुत शक्तियां संसार में उपस्थित हैं, उत्साही पुरुष उनसे उपकार लेकर सदा परस्पर उन्नति करें ॥ १२ ॥

सूक्तम् ३८ ॥

१-७ ॥ अप्सरा देवता ॥ १-४ अनुष्टुप्, ५, ७ जगती, ६ त्रिष्टुप्-छन्दः ॥

परमेश्वरगुणोपदेशः—परमेश्वर के गुणों का उपदेश ॥

उद्भिन्दतीं संजयन्तीमप्सरां साधुदेविनीम् ।
ग्लहे कृतानि कृण्वानामप्सरां तामिह हुवे ॥ १ ॥

उत्ऽभिन्दतीम् । सम्ऽजयन्तीम् । अप्सराम् । साधुऽदेविनीम् ।
ग्लहे । कृतानि । कृण्वानाम् । अप्सराम् । ताम् । इह । हुवे ॥ १ ॥

भाषार्थः—(उद्भिन्दतीम्) [शत्रुओं को] उखाड़ने वाली, (सञ्जयन्तीम्) यथावत् जीतने वाली, (अप्सराम्) अद्भुत रूप वाली, (साधुदेविनीम्) उचित व्यवहार वाली, (ग्लहे = ग्रहे) [अपने] अनुग्रह में (कृतानि) कर्मों को (कृण्वानाम्) करती हुई (ताम्) उस (अप्सराम्) आकाश, जल, प्राण और प्रजाओं में व्यापक [परमेश्वर] शक्ति को (इह) यहाँ पर (हुवे) मैं बुलाता हूं ॥ १ ॥

निपातनात्साधुः । अमराः । नित्योत्साहिनः । **मर्त्यान्** । **हसिमृग्रिण्०** (उ० ३ । ८६) इति मृङ् प्राणत्यागे—तन् । **तस्मै हितम्** (पा० ५ । १ । ५) इति मर्त-यत् । मर्तेभ्यो मनुष्येभ्यो हितान् पुरुषान् । **मा** । माङ् माने—क्विप् । **सुपां सुलुक्०** (पा० ७ । १ । ३९) इति विभक्तेर्लुक् । मया लक्ष्म्या । इन्दिरा लोकमाता मा—इत्यमरः १ । १ । २७ । **सचध्वम्** । समवेत ॥

१—उद्भिन्दतीम् । भिदिर् विदारणे—शतृः, ङीप् । उत्कर्षेण शत्रून् विदारयन्तीम् । **संजयन्तीम्** । सम्यग् जयं कुर्वतीम् । **अप्सराम्** । अ० २ । २ । ३ । अद्भुतरूपवतीम् । **साधुदेविनीम्** । **सुप्यजातौ णिनिस्ताच्छील्ये** (पा०३।२।७८) इति साधु+दिवु क्रीडाविजिगीषाव्यवहारस्तुत्यादिषु-णिनिः । उचितव्यवहार-

भावार्थः—परमेश्वर की अद्भुत शक्तियां सब व्यवहारों में व्याप्त हैं मनुष्य उनकी खोज लगा कर सदा सुखी रहें ॥ १ ॥

इस सूक्त का मिलान अ० २ सू० २ और पिछले सूक्त से करो ॥

विचिन्वतीमाकिरन्तीमप्सरां साधुदेविनीम् ।
ग्लहे कृतानि गृह्णानामप्सरां तामिह हुवे ॥ २ ॥

विऽचिन्वतीम् । आऽकिरन्तीम् । अप्सराम् । साधुऽदेविनीम् । ग्लहे । कृतानि । गृह्णानाम् । अप्सराम् । ताम् । इह । हुवे ॥ २ ॥

भाषार्थः—(विचिन्वतीम्) [पदार्थों को] समेटने वाली, (आकिरन्तीम्) फैलाने वाली, (अप्सराम्) अद्भुत रूप वाली, (साधुदेविनीम्) उचित व्यवहार वाली, (ग्लहे) [अपने] अनुग्रह में (कृतानि) कर्मों को (गृह्णानाम्) ग्रहण करती हुई (ताम्) उस (अप्सराम्) आकाश आदि में व्यापक शक्ति को (इह) यहां पर (हुवे) मैं बुलाता हूं ॥ २ ॥

भावार्थः—सब मनुष्य परमेश्वर की अनन्त शक्तियों से अपने कार्य सिद्ध करके आनन्द प्राप्त करें ॥ २ ॥

यायैः परिनृत्यत्याददाना कृतं ग्लहात् ।
सा नः कृतानि सीषती प्रहामाप्नोतु मायया ।
सा नः पयस्वत्यैतु मा नो जैषुरिदं धनम् ॥ ३ ॥

शीलाम् । **ग्लहे** । अक्षेषु ग्लहः[1] (पा० ३।३।७०) इति ग्लहू ग्रहणे—अप् । अनुग्रहे । **कृतानि** । कर्माणि । **कृण्वानाम्** । कुर्वाणाम् । **अप्सराम्** । अ० २ । २ । ३ । अप्सु आकाशजलप्राणप्रजासु सरणशीलां परमेश्वरशक्तिम् । **ताम्** । प्रसिद्धाम् । **इह** । अस्मिन् वर्त्तमानकर्मणि । **हुवे** । आह्वयामि ॥

२—**विचिन्वतीम्** । चिञ् चयने—शतृ । संचीकुर्वतीम् । **आकिरन्तीम्** । कॄ विक्षेपे—शतृ । विक्षिपन्तीम् । **गृह्णानाम्** । ग्रह उपादाने—शानच् । आददानाम् । अन्यत् पूर्ववत् म० १ ॥

---

१. इस सूत्र से अप् प्रत्यय करने पर अर्थविषयक यह आपत्ति आती है कि अक्षदेवन विषय में 'ग्लहः' बनेगा, अतः यहाँ ३ । ३ । ११८ से घ प्रत्यय एवं व्यत्यय से स्वर मानना ठीक होगा । वस्तुतः ग्लह शब्द स्पर्धा-वाचक मानने पर प्रकृत सूत्र से अप् करने में भी हानि नहीं, पर उस पक्ष में सम्पूर्ण सूक्त का देवता 'सुगृहिणी स्त्री' मानना होगा ॥ सम्पा० ॥

या । अयैः । परिऽनृत्यति । आऽददाना । कृतम् । ग्लहात् । सा । नः । कृतानि । सीषती । प्रऽहाम् । आप्नोतु । मायया । सा । नः । पयस्वती । आ । एतु । मा । नः । जैषुः । इदम् । धनम् ॥ ३ ॥

भाषार्थः—(या) जो शक्ति (अयैः) मङ्गल अनुष्ठानों के साथ (ग्लहात्) [अपने] अनुग्रह से (कृतम्) कर्म (आददाना) स्वीकार करती हुई (परिनृत्यति) सब ओर चेष्टा करती है । (सा) वही (नः) हमारे (कृतानि) कर्मों को (मायया) बुद्धि के साथ (सीषती) नियमबद्ध चाहती हुई (प्रहाम्) उत्तम गति (आप्नोतु) प्राप्त करे [अर्थात् प्रसन्न हो] (सा) वही (नः) हमारे लिये (पयस्वती) अन्न वाली होकर (ऐतु) आवे । (नः) हमारे (इदम्) इस (धनम्) धन को [शत्रु लोग] (मा जैषुः) न जीतें ॥ ३ ॥

भावार्थः—मनुष्य परमेश्वर की शक्तियों को जानकर पुष्कल अन्न आदि पदार्थ प्राप्त करके बलवान् हों ॥ ३ ॥

या अक्षेषु प्रमोदन्ते शुचं क्रोधं च बिभ्रती ।
आनन्दिनीं प्रमोदिनीमप्सरां तामिह हुवे ॥ ४ ॥

३—**या । अयैः** । एति सुखमनेन, इण् गतौ—अच् । अयः शुभावहो विधिः—इत्यमरः १ । ४ । २७ । शुभावहैर्विधिभिः । मङ्गलानुष्ठानैः । **परिनृत्यति** । सर्वत्र चेष्टते । **आददाना** । स्वीकुर्वाणा । **कृतम्** । कर्म । **ग्लहात्** । स्वानुग्रहात् । **सा । नः** । अस्माकम् । **कृतानि** । कर्माणि । **सीषती** । षिञ् बन्धने—सनि, शतरि छान्दसं रूपम् । सिषीषन्ती । बन्धुं नियन्तुम् इच्छन्ती । **प्रहाम्** । प्र+ ओहाङ् गतौ—कः, टाप् । प्रकृष्टां गतिम् । **आप्नोतु** । प्राप्नोतु । **मायया** । प्रज्ञया निघ० ३ । ९ । **नः** । अस्मभ्यम् । **पयस्वती** । पयः=अन्नम्—निघ० २ । ७ । अन्नवती । **ऐतु** । आगच्छतु । **नः** । अस्माकम् । **मा जैषुः** । जि जये माङि लुङि रूपम् । न जयन्तु । मापहार्षुः शत्रवः । **इदम्** । **धनम्** । वित्तम् ॥

याः । अक्षेषु । प्रऽमोदन्ते । शुचम् । क्रोधम् । च । बिभ्रती । आऽनन्दिनीम् । प्रऽमोदिनीम् । अप्सराम् । ताम् । इह । हुवे ॥ ४ ॥

भाषार्थः—(याः = या) जो शक्ति (शुचम्) शुद्धि (च) और (क्रोधम्) क्रोध (बिभ्रती) धारण करती हुई 'अक्षेषु' सब व्यवहारों में (प्रमोदन्ते = ०-दते) हर्ष पाती है। (आनन्दिनीम्) आनन्द दायिनी, (प्रमोदिनीम्) हर्ष कारिणी (ताम्) उस (अप्सराम्) आकाश आदि में व्यापक शक्ति को (इह) यहां पर (हुवे) मैं बुलाता हूं ॥ ४ ॥

भावार्थः—न्यायस्वरूप परमात्मा की महिमा जानकर मनुष्य सब व्यवहारों में आनन्द प्राप्त करें ॥ ४ ॥

पण्डित सेवकलाल कृष्णदास की संहिता में (बिभ्रती) के स्थान पर 'बिभ्रति' पद है ॥

सूर्यस्य रश्मीनन्‍ु याः संचरन्ति मरीचीर्वा या अनु-संचरन्ति । यासामृषभो दूरतो वाजिनीवान्त्सद्यः सर्वान् लोकान् पर्यैति रक्षन् । स न ऐतु होममिमं जुषाणो-३ऽन्तरिक्षेण सह वाजिनीवान् ॥ ५ ॥

सूर्यस्य । रश्मीन् । अनु । याः । सम्ऽचरन्ति । मरीचीः । वा । याः । अनुऽसंचरन्ति । यासाम् । ऋषभः । दूरतः । वाजिनीऽवान् । सद्यः । सर्वान् । लोकान् । परिऽएति । रक्षन् । सः । नः । आ । एतु । होमम् । इमम् । जुषाणः । अन्तरिक्षेण । सह । वाजिनीऽवान् ॥ ५ ॥

४—याः । एकवचने बहुवचनम् । या । अप्सरा । **अक्षेषु** । अक्षू व्याप्तौ अच्, घञ् वा । यद्वा । **अशेर्देवने** (उ० ३ । ६५) इति अशूङ् व्याप्तौ सङ्घाते च —सः । **प्रमोदन्ते** । प्रमोदते, प्रहृष्यति । **शुचम्** । ईशुचिर्—पूतीभावे—क्विप् । शुद्धिम् । **क्रोधम्** । कोपम् । **च** । **बिभ्रती** । धारयन्ती । **आनन्दिनीम्** । सुखवतीम् । **प्रमोदिनीम्** । प्रहर्षयित्रीम् । अन्यद् यथा म० १ ॥

भाषार्थः—(याः) जो [शक्तियां] (सूर्यस्य) सूर्य की (रश्मीन् अनु) व्यापक किरणों के साथ साथ (संचरन्ति) चलती रहती हैं, (वा) और (याः) जो (मरीचीः) सब प्रकाशों के (अनुसंचरन्ति) साथ साथ फिरती हैं।

(यासाम् = तासाम्) उनका (ऋषभः) दर्शक परमेश्वर (वाजिनीवान्) अन्नवती क्रिया धारण करता हुआ (दूरतः) दूर से (सद्यः) तुरन्त ही (सर्वान् लोकान्) सब लोकों को (रक्षन्) पालता हुआ (पर्यैति) घेरकर आता है।

(अन्तरिक्षेण सह) सबमें दृश्यमान सामर्थ्य के साथ (वाजिनीवान्) बलवती क्रिया वाला (सः) वह परमेश्वर (नः) हमारे (इयम्) इस (होमम्) आत्मदान को (जुषाणः) स्वीकार करता हुआ (ऐतु) आवे ॥५॥

भावार्थः—परमेश्वर अपनी शक्ति से सब दूर और निकट के पदार्थों में व्यापक होकर रक्षा करता है। मनुष्य उसमें पूर्ण श्रद्धा करके पुरुषार्थ पूर्वक अपनी उन्नति करें॥ ५॥

पं० सेवकलाल कृष्णदास की संहिता में 'पर्यैति' के स्थान पर 'पर्येति' और पद पाठ में 'परि-एति' पद है॥

अ॒न्तरि॑क्षेण स॒ह वा॑जिनीवन् क॒र्कीं व॒त्साम्इ॒ह र॑क्ष वाजिन्।
इ॒मे ते॑ स्तो॒का ब॑हु॒ला एह्य॒र्वाङि॒यं ते॑ क॒र्कीह ते॒ मनो॑ऽस्तु ॥६॥

५—**सूर्यस्य**। आदित्यस्य। **रश्मीन्**। अ० २। ३२। १। व्यापकान् किरणान्। **अनु**। अनुसृत्य। **याः**। अप्सराः। ईश्वरशक्तयः। **संचरन्ति**। सम्यग् गच्छन्ति। **मरीचीः**। म्रियन्ते तमांसि यया। **मृकणिभ्यामीचिः** (उ० ४। ७०) इति मृङ् —ईचिः। दीप्तीः। प्रकाशान्। **वा**। वेति विचारणार्थे ..अथापि समुच्चयार्थे भवति निरु० १। ४। **अनुसंचरन्ति**। अनुलक्ष्य व्याप्नुवन्ति। **यासाम्**।=तासाम् अप्सराणाम्। **ऋषभः**। अ० ३। ६। ४। द्रष्टा सर्वश्रेष्ठः परमेश्वरः। **दूरतः**। दूरदेशात्। अगम्यस्थानात्। **वाजिनीवान्**। अन्नवती क्रियावान्। **सद्यः**। अ० २। १। ४। तत्क्षणम्। **सर्वान्**। **लोकान्**। दृश्यमानानि भुवनानि। **पर्यैति**। परित आगच्छति। **रक्षन्**। पालयन्। **सः**। **नः**। अस्माकम्। **ऐतु**। आगच्छतु। **होमम्**। **अर्तिस्तुसुहु०** (उ० १।१४०) इति हु दानादानयोः—मन्। आत्मदानम्। **इमम्**। **जुषाणः**। सेवमानः। **अन्तरिक्षेण**। सर्वमध्यदृश्यमानेन सामर्थ्येन। **सह**। **वाजिनीवान्**। बलवती क्रियायुक्तः॥

अन्तरिक्षेण । सह । वाजिनीऽवन् । कर्कीम् । वत्साम् । इह । रक्ष । वाजिन् । इमे । ते । स्तोकाः । बहुलाः । आ । इहि । अर्वाङ् । इयम् । ते । कर्की । इह । ते । मनः । अस्तु ॥ ६ ॥

भाषार्थः—(अन्तरिक्षेण सह) सब में दृश्यमान सामर्थ्य के साथ (वाजिनीवन्) हे अन्नवती वा बलवती क्रिया वाले, (वाजिन्) हे बलवान् परमेश्वर ! (इह) यहां पर (कर्कीम्) अपनी बनाने वाली और (वत्साम्) निवास देने वाली शक्ति की (रक्ष) रक्षा कर। (इमे) यह सब (ते) तेरे (स्तोकाः) अनुग्रह (बहुलाः) बहुत पदार्थ देने वाले हैं। (अर्वाङ्) सन्मुख (एहि) तू आ। (इयम्) यह (ते) तेरी (कर्की) रचना शक्ति है। (इहि) इसमें (ते) तेरा (मनः) मनन (अस्तु) होवे ॥ ६ ॥

भावार्थः—परमेश्वर ने अपनी व्यापकता और कृपा से सब संसार हमारे लिये रचा है। हम उसका मनन करके सदा सुखी रहें ॥ ६ ॥

अन्तरिक्षेण सह वाजिनीवन् कर्कीं वत्सामिह रक्ष वाजिन्। अयं घासो अयं व्रज इह वत्सां नि बध्नीमः। यथानाम वं ईश्महे स्वाहा ॥ ७ ॥

६—**अन्तरिक्षेण**। सर्वमध्यदृश्यमानेन सामर्थ्येन। **सह** । **वाजिनीवन्**। वाजिनी अन्नवती बलवती वा क्रिया तया तद्वन्। **कर्कीम्**। **कृदाधा०** (उ० ३। ४०) इति डुकृञ्-कः, ङीष्। कर्त्रीं शक्तिम्। **वत्साम्**। **वृतॄवदिवचिवसि०** (उ० ३। ६२) इति वस निवासे-सः। निवासयित्रीम्। **इह**। अस्मिन् शरीरे। **रक्ष**। पालय। **वाजिन्**। हे बलवन्। **इमे**। दृश्यमानाः। **ते**। तव। **स्तोकाः**। ष्टुच प्रसादे-घञ्। प्रसादाः। अनुग्रहाः। यद्वा श्च्युतिर् क्षरणे इत्यनेन आद्यन्तविपर्ययो भवति, स्तोकाः—निरु० २। १। बिन्दवः। **बहुलाः**। अ० ३।१४।६। वृद्धिशीलाः। बहुदातारः। **एहि**। आगच्छ। **अर्वाङ्**। अभिमुखः। **इयम्**। **ते**। **कर्की**। कर्त्रीशक्तिः। **इह**। **ते**। **मनः**। मननम्। विज्ञानम्। **अस्तु**। भवतु॥

अन्तरिक्षेण । सह । वाजिनीऽवन् । कर्कीम् । वत्साम् । इह । रक्ष । वाजिन् । अयम् । घासः । अयम् । व्रजः । इह । वत्साम् । नि । बध्नीमः । यथाऽनाम । वः । ईश्महे । स्वाहा ॥ ७ ॥

भाषार्थः—(अन्तरिक्षेण सह) सबमें दृश्यमान सामर्थ्य के साथ (वाजिनीवन्) हे अन्नवती वा बलवती क्रिया वाले, (वाजिन्) हे बलवान् परमेश्वर (इह) यहाँ पर (कर्कीम्) अपनी बनाने वाली और (वत्साम्) निवास देने वाली शक्ति की (रक्ष) रक्षा कर। (अयम्) यह (घासः) भोजन है, (अयम्) यह (व्रजः) आने जाने का स्थान है, (इह) यहाँ पर [हृदय में] (वत्साम्) तेरी निवास देने वाली शक्ति को (नि) निरन्तर (बध्नीमः) हम बांधते हैं।

(वः) तुम्हारा (यथानाम) जैसा नाम है, [वैसे ही] (ईश्महे) हम ऐश्वर्यवान् होवें। (स्वाहा) यह आशीर्वाद हो ॥ ७ ॥

भावार्थः—परमेश्वर ने अपने अनन्त सामर्थ्य से अन्न, शरीर, घर आदि पदार्थ हमें दिये हैं, हम उनका यथावत् उपयोग करके सदा ऐश्वर्यवान् होवें ॥ ७ ॥

सूक्तम् ३९ ॥

१-१० ॥ १, २, ९, १० अग्निः, ३, ४ वायुः; ५, ६ आदित्यः; ७, ८ चन्द्रो देवता ॥ १, ३, ५, ७ त्रिपदजगती; २, ४, ६, ८ संस्तारपङ्क्तिः, ९, १० त्रिष्टुप्छन्दः ॥

परमेश्वरगुणोपदेशः—परमेश्वर के गुणों का उपदेश।

७—**अन्तरिक्षेणेत्यादिः** । पूर्वोऽर्धर्चःपूर्ववद् योज्यः । **अयम्** । उपस्थितः । **घासः** । **घलपोश्च** (पा० २ । ४ । ३८) इति अदो घस्लृ आदेशो घञि । अदनीयः पदार्थः । **अयम्** । **व्रजः** । **गोचरसंचरवहव्रज०** (पा० ३ । ३ । ११९) इति व्रज गतौ–घः । गमनप्रदेशः । **इह** । अस्मिन् विषये । **वत्साम्** । म० ६ । निवासयित्रीं शक्तिम् । **नि** । नितराम् । **बध्नीमः** । हृदये धारयामः । **यथानाम** । यादृशगुणविशिष्टं नामास्ति तथैव । **वः** । आदरे बहुवचनम् । तव । **ईश्महे** । ऐश्वर्यवन्तो भवामः । **स्वाहा** । अ० २ । १६ । १ । सुवाणी । आशीर्वादः । सुदानम् ॥

पृथिव्यामग्नये समनमन्त्स आर्ध्नोत् । यथा पृथिव्यामग्नये समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ १ ॥

पृथिव्याम् । अग्नये । सम् । अनमन् । सः । आर्ध्नोत् । यथा । पृथिव्याम् । अग्नये । सम्ऽअनमन् । एव । मह्यम् । सम्ऽनमः । सम् । नमन्तु ॥ १ ॥

भाषार्थः--(पृथिव्याम्) पृथिवी पर (अग्नये) भौतिक अग्नि के लिये वे [ऋषि लोग] (सम्) यथाविधि (अनमन्) नमे हैं, (सः) उसने [उन्हें] आर्ध्नोत्) बढ़ाया है। (यथा) जैसे (पृथिव्याम्) पृथिवी पर (अग्नये) अग्नि के लिये वे (सम् अनमन्) यथावत् नमे हैं, (एव) वैसे ही (मह्यम्) मेरे लिये (संनमः) सब सम्पत्तियां (सम्) यथावत् (नमन्तु) नमें ॥ १ ॥

भावार्थः—जैसे पूर्व ऋषियों ने शिल्प आदि में भौतिक अग्नि के प्रयोग से यज्ञ सिद्ध करके अनेक सम्पत्तियां प्राप्त की हैं, वैसे ही हम भी प्राप्त करें ॥ १ ॥

पृथिवी धेनुस्तस्या अग्निर्वत्सः ।
सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ २ ॥

पृथिवी । धेनुः । तस्याः । अग्निः । वत्सः । सा । मे । अग्निना । वत्सेन । इषम् । ऊर्जम् । कामम् । दुहाम् । आयुः । प्रथमम् । प्रऽजाम् । पोषम् । रयिम् । स्वाहा ॥ २ ॥

१--पृथिव्याम् । भूलोके । अग्नये । भौतिकाग्नये । सम् । सम्यक् । यथाविधि । अनमन् । णम प्रह्वत्वे शब्दे च-लङ् । नता अभवन् ते ऋषयः । सः । अग्निः । आर्ध्नोत् । ऋधु वृद्धौ-लङ्, अन्तर्गतण्यर्थः । अवर्धयत् । यथा । येन प्रकारेण । एव । एवम् । मह्यम् । पुरुषार्थिने पुरुषाय । संनमः । अन्येभ्योऽपि दृश्यन्ते (पा० ३ । २ । ७५) इति सम्+णम-विच् । सर्वाःसन्नतयः सम्पत्तयः । नमन्तु । प्रह्वीभवन्तु । अन्यद् गतम् ॥

भाषार्थः—(पृथिवी) पृथिवी (धेनुः) दुधैल गौ के समान है, (तस्याः) उस [धेनु] के (वत्सः) बच्चा सदृश (अग्निः) है। (सा) वह [धेनु] (मे) मुझे (वत्सेन) बच्चे रूप (अग्निना) अग्नि के साथ (इषम्) अन्न, (ऊर्जम्) पराक्रम, (कामम्) उत्तम मनोरथ, (प्रथमम् आयुः) प्रधान जीवन, (प्रजाम्) प्रजा (पोषम्) पोषण और (रयिम्) धन (दुहाम्) परिपूर्ण करे। (स्वाहा) यह आशीर्वाद हो ॥ २ ॥

भावार्थः—जिस प्रकार बछड़े द्वारा गौ से दूध लेते हैं, इसी प्रकार अग्नि विद्या द्वारा पृथिवी के पदार्थों से अनेक कला कौशल सिद्ध करके मनुष्य समृद्ध होवें ॥ २ ॥

अन्तरिक्षे वायवे समनमन्त्स आर्ध्नोत्। यथान्तरिक्षे वायवे समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ ३ ॥

अन्तरिक्षे । वायवे । सम् । अनमन् । सः । आर्ध्नोत् । यथा । अन्तरिक्षे । वायवे । सम्ऽअनमन् । एव । मह्यम् । सम्ऽनमः । सम् । नमन्तु ॥ ३ ॥

भाषार्थः—(अन्तरिक्षे) मध्यलोक में (वायवे) वायु को वे [ऋषि लोग] (सम्) यथाविधि (अनमन्) नमे हैं, (सः) उसने [उन्हें] (आर्ध्नोत्) बढ़ाया है। (यथा) जैसे (अन्तरिक्षे) मध्यलोक में (वायवे) वायु को (सम्

२—**पृथिवी** । भूमिः । **धेनुः** । अ०३ । १० । १ । दोग्ध्री गौर्यथा । **तस्याः** । धेन्वाः । **अग्निः** । भौतिकाग्निः । **वत्सः** । अ०३ । १२ । ३ । गोशिशुर्यथा । **सा** । धेनुः । **मे** । मह्यम् । **अग्निना** । **वत्सेन** । शिशुना च । **इषम्** । अ० ३ । १० । ७ । अन्नम् । **ऊर्जम्** । अ० ३ । १० । ७ । पराक्रमम् । **कामम्** । सुमनोरथम् । **दुहाम्** । तलोपः । दुग्धाम् । प्रपूरयतु । **आयुः** । जीवनम् । **प्रथमम्** । प्रख्यातं प्रधानम् । **प्रजाम्** । पुत्रपौत्रभृत्यादिरूपां संततिम् । **पोषम्** । पोषणम् । **रयिम्** । धनम् । **स्वाहा** । आशीर्वादोऽस्तु ॥

३—**अन्तरिक्षे** । मध्यलोके । **वायवे** । पवनाय । अन्यत् पूर्ववत् । म ० १ ॥

अनमन्) वे यथावत् नमे हैं, (एव) वैसे ही (मह्यम्) मुझको (सन्नमः) सब सम्पत्तियां (सम्) यथावत् (नमन्तु) नमें ॥ ३ ॥

भावार्थः—मनुष्य पूर्वज ऋषियों के समान सबमें वर्तमान वायु से उपकार लेकर आनन्द भोगें ॥ ३ ॥

अन्तरिक्षं धेनुस्तस्या वायुर्वत्सः ।
सा मे वायुना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ ४ ॥

अन्तरिक्षम् । धेनुः । तस्याः । वायुः । वत्सः । सा । मे । वायुना । वत्सेन । इषम् । ऊर्जम् । कामम् । दुहाम् । आयुः । प्रथमम् । प्रऽजाम् । पोषम् । रयिम् । स्वाहा ॥ ४ ॥

भाषार्थः—(अन्तरिक्षम्) मध्यलोक (धेनुः) दुधैल गौ के समान है। (तस्याः) उस [धेनु] का (वत्सः) बच्चा रूप (वायुः) वायु है। (सा) वह [धेनु] (मे) मुझे (वत्सेन) बच्चा रूप (वायुना) वायु के साथ (इषम्) अन्न, (ऊर्जम्) पराक्रम, (कामम्) उत्तम मनोरथ, (प्रथमम् आयुः) प्रधान जीवन, (प्रजाम्) प्रजा, (पोषम्) पोषण और (रयिम्) धन (दुहाम्) परिपूर्ण करे। (स्वाहा) यह आशीर्वाद हो ॥ ४ ॥

भावार्थः—वायु से अनेक प्रकार उपकार लेकर मनुष्य सुखी हों ॥ ४ ॥

दिव्यादित्याय समनमन्त्स आर्ध्नोत् । यथा दिव्यादित्याय समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ ५ ॥

दिवि । आदित्याय । सम् । अनमन् । सः । आर्ध्नोत् । यथा । दिवि । आदित्याय । सम्ऽअनमन् । एव । मह्यम् । सम्ऽनमः । सम् । नमन्तु ॥५॥

४—सर्वं पूर्ववत् म० २, ३ ॥

भाषार्थः—(दिवि) आकाश में वर्तमान (आदित्याय) सूर्य को वे [ऋषि लोग] (सम्) यथाविधि (अनमन्) नमे हैं, (सः) उसने [उन्हें] (आर्ध्नोत्) बढ़ाया है। (यथा) जैसे (दिवि) आकाश में वर्तमान (आदित्याय) सूर्य को (सम्–अनमन्) वे यथावत् नमे हैं, (एव) वैसे ही (मह्यम्) मुझको (सन्नमः) सब सम्पत्तियाँ (सम्) यथावत् (नमन्तु) नमें ॥ ५ ॥

भावार्थः—पहिले ऋषि महात्माओं के समान सूर्य के प्रकाश आदि से उपकार लेकर आनन्द प्राप्त करें ॥ ५ ॥

द्यौर्धेनुस्तस्या आदित्यो वत्सः ।
सा म आदित्येन वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ ६ ॥

द्यौः । धेनुः । तस्याः । आदित्यः । वत्सः । सा । मे । आदित्येन । वत्सेन । इषम् । ऊर्जम् । कामम् । दुहाम् । आयुः । प्रथमम् । प्रऽजाम् । पोषम् । रयिम् । स्वाहा ॥ ६ ॥

भाषार्थः—(द्यौः) सूर्यलोक (धेनुः) दुधैल गौ के समान है, (तस्याः) उस [धेनु] का (वत्सः) बच्चा रूप (आदित्यः) सूर्य है। (सा) वह [धेनु] (मे) मुझे (वत्सेन) बच्चा रूप (आदित्येन) सूर्य के साथ (इषम्) अन्न (ऊर्जम्) पराक्रम, (कामम्) उत्तम मनोरथ, (प्रथमम् आयुः) प्रधान जीवन, (प्रजाम्) प्रजा, (पोषम्) पोषण, और (रयिम्) धन (दुहाम्) परिपूर्ण करे, (स्वाहा) यह आशीर्वाद हो ॥ ६ ॥

भावार्थः—मनुष्य सूर्यलोक और सूर्य का पृथिवी से संबन्ध जानकर अनेक लाभ उठाकर सुखी होवें ॥ ६ ॥

दिक्षु चन्द्राय समनमन्त्स आर्ध्नोत् । यथा दिक्षु चन्द्राय समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ ७ ॥

५—दिवि । आकाशे वर्तमानाय । आदित्याय । अ० १।९।१। प्रकाशमानाय सूर्याय । अन्यत् पूर्ववत्–म० १ ॥

६—सर्वं पूर्ववत्–म० २, ५ ॥

दिक्षु । चन्द्राय । सम् । अनमन् । सः । आर्ध्नोत् । यथा । दिक्षु । चन्द्राय । सम्ऽअनमन् । एव । मह्यम् । सम्ऽनमः । सम् । नमन्तु ॥ ७ ॥

भाषार्थः—(दिक्षु) सब दिशाओं में (चन्द्राय) चन्द्रमा को वे [ऋषि लोग] (सम्) यथाविधि (अनमन्) नमे हैं। (सः) उसने [उन्हें] (आर्ध्नोत्) बढ़ाया है। (यथा) जैसे (दिक्षु) सब दिशाओं में (चन्द्राय) चन्द्रमा को (सम्-अनमन्) वे यथावत् नमे हैं, (एव) वैसे ही (मह्यम्) मुझको (सन्नमः) सब सम्पत्तियां (सम्) यथावत् (नमन्तु) नमें ॥ ७ ॥

भावार्थः—मनुष्य चन्द्रमा के पुष्टिकारक गुणों से उपकार लेकर आनन्दित हों ॥ ७ ॥

दिशो धेनवस्तासां चन्द्रो वत्सः ।
ता मे चन्द्रेण वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ ८ ॥

दिशः । धेनवः । तासाम् । चन्द्रः । वत्सः । ताः । मे । चन्द्रेण । वत्सेन । इषम् । ऊर्जम् । कामम् । दुहाम् । आयुः । प्रथमम् । प्रऽजाम् । पोषम् । रयिम् । स्वाहा ॥ ८ ॥

भाषार्थः—(दिशः) सब दिशायें (धेनवः) दुधैल गौओं के समान हैं। (तासाम्) उन [गौ रूपों] का (वत्सः) बच्चा रूप (चन्द्रः) चन्द्रमा है। (ताः) वे [गौ रूप] (मे) मुझे (वत्सेन) बच्चा रूप (चन्द्रेण) चन्द्रमा के साथ (इषम्) अन्न, (ऊर्जम्) पराक्रम, (कामम्) उत्तम मनोरथ (प्रथमम् आयुः) प्रधान जीवन, (प्रजाम्) प्रजा, (पोषम्) पोषण और (रयिम्) धन (दुहाम् = दुहताम्) परिपूर्ण करें। (स्वाहा) यह आशीर्वाद हो ॥ ८ ॥

७—दिक्षु । प्राच्यादिषु । चन्द्राय । आह्लादकाय चन्द्रमसे । अन्यत् पूर्ववत् । म० १ ॥

८—दुहाम् । दुहताम् प्रपूरयन्तु । अन्यत् पूर्ववत् । म० २, ७ ॥

भावार्थः—मनुष्य चन्द्रमा के गुणों का पृथिवी के साथ सम्बन्ध जान कर अन्न आदि पदार्थों को पुष्ट करके आनन्द भोगें ॥ ८ ॥

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उं। नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् ॥ ९ ॥

अग्नौ । अग्निः । चरति । प्रऽविष्टः । ऋषीणाम् । पुत्रः । अभिशस्तिऽपाः । ऊँ इति । नमःऽकारेण । नमसा । ते । जुहोमि । मा । देवानाम् । मिथुया । कर्म । भागम् ॥ ९ ॥

भाषार्थः—(ऋषीणाम्) धर्म के साक्षात् करने वाले मुनियों वा विषय देखने वाली इन्द्रियों का (पुत्रः) शुद्ध करने वाला, (अभिशस्तिपाः) हिंसा के भय से बचाने वाला (अग्निः) सर्वव्यापक परमेश्वर (उ) निश्चय करके (अग्नौ) सूर्य, अग्नि आदि तेज में (प्रविष्टः) प्रवेश किये हुये (चरति) चलता है। (ते)] उस] तुझको (नमस्कारेण) नमस्कार और (नमसा) आदर के साथ (जुहोमि) मैं आत्मदान करता हूँ। (देवानाम्) महात्माओं के (भागम्) ऐश्वर्य वा सेवनीय कर्म को (मिथुया = मिथुना) दुष्टता से (मा कर्म) हम नष्ट न करें ॥ ९ ॥

भावार्थः—सब मनुष्य परब्रह्म जगदीश्वर को पूर्ण भक्ति से सर्वत्र व्यापक जानकर महात्माओं के समान शुभ कर्म करके सदा ऐश्वर्यवान् होवें ॥ ९ ॥

९—**अग्नौ** । सूर्यादितेजसि । **अग्निः** । सर्वव्यापकः परमेश्वरः । **चरति** । व्याप्नोति । **प्रविष्टः** । अन्तर्गतः । **ऋषीणाम्** । अ० २ । ६ । १ । साक्षात्कृत-धर्माणां मुनीनाम्, विषयद्रष्टॄणामिन्द्रियाणां वा । **पुत्रः** । अ० १ । ११ । ५ । पुनातीति पुत्रः । पविता शोधकः । **अभिशस्तिपाः** । अ० २ । १३ । ३ । हिंसा-भयाद्ररक्षकः । **उ** । निश्चयेन । **नमस्कारेण** । सत्कारेण । **नमसा** । नमनेन, आदरेण । **ते** । तथाविधाय तुभ्यम् । **जुहोमि** । आत्मदानं करोमि । **देवानाम्** । महात्मनाम् । **मिथुया** । अ० ४ । २९ । ७ । मिथुना हिंसनेन दुष्कर्मणा । **मा कर्म** । कृञ् हिंसायाम्–माङि लुङि । **मन्त्रे घसह्वर०** (पा० २ । ४ । ८०) इति च्लेर्लुक् । मा कार्ष्म मा हिंसिष्म । **भागम्** । भग–अण् । ऐश्वर्याणां समूहम् । यद्वा, भज–घञ् । भजनीयं कर्म ॥

हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् । सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् ॥ १० ॥

हृदा । पूतम् । मनसा । जातऽवेदः । विश्वानि । देव । वयुनानि । विद्वान् । सप्त । आस्यानि । तव । जातऽवेदः । तेभ्यः । जुहोमि । सः । जुषस्व । हव्यम् ॥ १० ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् ! (देव) हे प्रकाशवान् परमेश्वर ! तू (विश्वानि) सब (वयुनानि) ज्ञानों को (विद्वान्) जानने वाला है। (जातवेदः) हे बड़े धन वाले ! [मेरी] (सप्त) सात (आस्यानि) [मस्तक की] गोलकें (तव) तेरी [तेरे तत्पर हों] । (तेभ्यः) उनके हित के लिये (हृदा) हृदय और (मनसा) मन से (पूतम्) शोधे हुये कर्म को (जुहोमि) समर्पण करता हूं। (सः) सो तू [मेरे] (हव्यम्) आवाहन को (जुषस्व) स्वीकार कर ॥ १० ॥

भावार्थः—मनुष्य अपनी सब इन्द्रियों को उस सर्वशक्तिमान् की आज्ञा में लगा कर सदा आनन्द भोगें। मस्तक की सात इन्द्रियों के जीतने में ही सब प्राणी आनन्द पाते हैं जैसा "**कः सप्तखानि वि ततर्द शीर्षणि**........" अ० १० । २ । ६ में वर्णन है। "सप्त आस्यानि" पद की व्याख्या में "सप्त ऋषयः" पद अ० ४ । ११ । ९ देखो ॥ १० ॥

इस मन्त्र का दूसरा पाद 'विश्वानि देव... विद्वान्' य० ४० । १६ में है ॥

१०—**हृदा** । हृदयेन । **पूतम्** । शोधितं कर्म । **मनसा** । अन्तःकरणेन । **जातवेदः** । अ० १ । ७ । २ । हे जातप्रज्ञान परमेश्वर ! । **विश्वानि** । सर्वाणि । **देव** । हे प्रकाशमान । **वयुनानि** । अ० २ । २८ । २ । ज्ञानानि । **विद्वान्** । जानन् सन् वर्त्तसे । **सप्त** । सप्तसंख्याकानि । **आस्यानि** । **ऋहलोर्ण्यत्** (पा० ३ । १ । १२४) इति असु क्षेपणे, यद्वा आस उपवेशने—ण्यत् । अस्यन्ते क्षिप्यन्ते । यद्वा, आसते तिष्ठन्ति विषया यत्र तानि । शीर्षण्यानि खानि इन्द्रियाणि मम प्राणिनः । **तव** । तव परमेश्वरस्य, तत्पराणि भवन्तु—इत्यर्थः । **जातवेदः** । हे जातधन । **तेभ्यः** । तादर्थ्ये चतुर्थी । तेषामास्यानां हिताय । **जुहोमि** । समर्पयामि । **सः** । स त्वम् । **जुषस्व** । सेवस्व । स्वीकुरु । **हव्यम्** । ह्वेञ्—यत् । आह्वानम् ॥

सूक्तम् ४० ॥

१-८ ॥ जातवेदा देवता ॥ १-७ त्रिष्टुप्, ८ । ये दिशामित्यस्य जगती छन्दः । ब्रह्मेत्यस्य त्रिष्टुप् छन्दः ।

शत्रुनाशनायोपदेशः—शत्रु के नाश करने का उपदेश ॥

**ये पुरस्ता॒ज्जुह्व॑ति जातवेदः॒ प्राच्या॑ दि॒शो॑ऽभि॒दास॑न्त्य॒स्मान् ।
अ॒ग्निमृ॒त्वा ते परा॑ञ्चो व्यथन्तां प्र॒त्यगे॑नान् प्रतिस॒रेण॑ हन्मि ॥१॥**

ये । पु॒रस्ता॑त् । जुह्व॑ति । जा॒त॒ऽवे॒दः॒ । प्राच्या॑ः । दि॒शः । अ॒भि॒ऽदास॑न्ति । अ॒स्मान् । अ॒ग्निम् । ऋ॒त्वा । ते । परा॑ञ्चः । व्य॒थ॒न्ता॒म् । प्र॒त्यक् । ए॒ना॒न् । प्र॒ति॒ऽस॒रेण॑ । ह॒न्मि॒ ॥ १ ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (पुरस्तात्) सन्मुख होकर (प्राच्याः) पूर्व वा सन्मुख (दिशः) दिशा से (अस्मान्) हमको (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं । (ते) वे (अग्निम्) [तुझ] सर्वव्यापक को (ऋत्वा) पाकर (पराञ्चः) पीठ देते हुए (व्यथन्ताम्) व्यथा में पड़ें । (एनान्) इनको (प्रतिसरेण) [तुझ] अग्रगामी के साथ (प्रत्यक्) उलटा (हन्मि) मैं मारता हूं ॥ १ ॥

भावार्थः—मनुष्य परमेश्वर में भक्ति करके पुरुषार्थ पूर्वक अपने आत्मिक और शारीरिक शत्रुओं का नाश करें । ऐसा ही भाव अन्य मन्त्रों का समझें ॥१॥

इस सूक्त का मिलान अथर्व ३ । २६ तथा २७ से करो ॥

१—**ये** । शत्रवः । **पुरस्तात्** । अग्रतः । **जुह्वति** । हु दानादनयोः । अदन्ति । नाशयन्ति । **जातवेदः** । नाशयन्ति । **जातवेदः** । अ० १ । ७ । २ । हे जातप्रज्ञान परमेश्वर । **प्राच्याः** । अ० ३।२६।१ । स्वस्थानात् पूर्वायाः स्वाभिमुखीभूतायाः । **दिशः** । दिशायाः सकाशात् । **अभिदासन्ति** । अभितो घ्नन्ति । **अस्मान्** । धार्मिकान् । **अग्निम्** । सर्वव्यापिनं त्वां जातवेदसम् । **ऋत्वा** । गत्वा, प्राप्य । **ते** । शत्रवः । **पराञ्चः** । पराङ्मुखाः । कुण्ठितशक्तयः सन्तः । **व्यथन्ताम्** । व्यथ भयसंचलनयोः । व्यथिताः संतप्ता भवन्तु । **प्रत्यक्** । प्रतिमुखम् । **एनान्** । दुष्टान् शत्रून् । **प्रतिसरेण** । अ० २ । ११ । २ । अग्रगामिना त्वया सह । **हन्मि** । नाशयामि ॥

ये दक्षिणतो जुह्वति जातवेदो दक्षिणाया दिशोऽभिदासन्त्यस्मान्। यममृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ २ ॥

ये। दक्षिणतः। जुह्वति। जातऽवेदः। दक्षिणायाः। दिशः। अभिऽदासन्ति। अस्मान्। यमम्। ऋत्वा। ते। पराञ्चः। व्यथन्ताम्। प्रत्यक्। एनान्। प्रतिऽसरेण। हन्मि ॥ २ ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (दक्षिणतः) दाहिनी ओर में (दक्षिणायाः) दक्षिण वा दाहिनी (दिशः) दिशा से (अस्मान्) हमको (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं। (ते) वे (यमम्) [तुझ] धर्मराज न्यायकारी को (ऋत्वा) पाकर .... म० १ ॥ २ ॥

ये पश्चाज्जुह्वति जातवेदः प्रतीच्या दिशोऽभिदासन्त्यस्मान्। वरुणमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ३ ॥

ये। पश्चात्। जुह्वति। जातऽवेदः। प्रतीच्याः। दिशः। अभिऽदासन्ति। अस्मान्। वरुणम्। ऋत्वा। ते। पराञ्चः। व्यथन्ताम्। प्रत्यक्। एनान्। प्रतिऽसरेण। हन्मि ॥ ३ ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (पश्चात्) पीछे की ओर में (प्रतीच्याः) पश्चिम वा पीछे वाली (दिशः)

२—**दक्षिणतः**। अ० ४। ३२। ७। दक्षिणहस्तदिशि। **दक्षिणायाः**। अ० ३। २६। २। दक्षिणस्याः। दक्षिणहस्तवर्त्तमानायाः। **यमम्**। यमयति नियमयति जीवान् स यमः, यम—अच्। धर्मराजं न्यायिनं जातवेदसम्। अन्यद् यथा म० १ ॥

३—**पश्चात्**। पश्चात् (पा० ५। ३। ३२) इति अपर-आतिः, पश्चभावः।

दिशा से (अस्मान्) हमको (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं। (ते) वे वरुणम् [तुझ] सर्वश्रेष्ठ को (ऋत्वा) पाकर म०...१ ॥३॥

य उत्तरतो जुह्वति जातवेद उदीच्या दिशोऽभिदासन्त्यस्मान्। सोममृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥४॥

ये। उत्तरतः। जुह्वति। जातऽवेदः। उदीच्याः। दिशः। अभिऽदासन्ति। अस्मान्। सोमम्। ऋत्वा। ते। पराञ्चः। व्यथन्ताम्। प्रत्यक्। एनान्। प्रतिऽसरेण। हन्मि ॥ ४ ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (उत्तरतः) बायीं ओर में (उदीच्याः) उत्तर वा बायीं (दिशः) दिशा से (अस्मान्) हमको (जुह्वति खाते और (अभिदासन्ति) चढ़ाई करते हैं। (ते) वे (सोमम्) [तुझ] ऐश्वर्य वाले को (ऋत्वा) पाकर...म० १ ॥ ४ ॥

ये३ धस्ताज्जुह्वति जातवेदो ध्रुवाया दिशोऽभिदासन्त्यस्मान्। भूमिमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ५ ॥

ये। अधस्तात्। जुह्वति। जातऽवेदः। ध्रुवायाः। दिशः। अभिऽदासन्ति। अस्मान्। भूमिम्। ऋत्वा। ते। पराञ्चः। व्यथन्ताम्। प्रत्यक्। एनान्। प्रतिऽसरेण। हन्मि ॥ ५ ॥

पश्चाद् देशे। **प्रतीच्याः**। अ०३। २६। ३। पश्चिमायाः। पश्चाद्भागे स्थितायाः। **वरुणम्**। वरणीयं श्रेष्ठं त्वाम् ॥

४—**उत्तरतः**। उत्तर-अतसुच्। वामहस्तदिशि। **उदीच्याः**। अ० ३। २६। ४। उत्तरस्याः। वामभागवर्त्तमानायाः। **सोमम्**। ऐश्वर्यवन्तं त्वाम् ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (अधस्तात्) नीचे की ओर में (ध्रुवायाः) स्थिर (दिशः) दिशा से (अस्मान्) हम को (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं । (ते) वे (भूमिम्) [तुझ] सर्वाधार को (ऋत्वा) पाकर ......म० १ ॥ ५ ॥

येऽ३न्तरिक्षाज्जुह्वति जातवेदो व्यध्वाया दिशोऽभिदासन्त्यस्मान् । वायुमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ६ ॥

ये । अन्तरिक्षात् । जुह्वति । जातऽवेदः । विऽअध्वायाः । दिशः । अभिऽदासन्ति । अस्मान् । वायुम् । ऋत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ ६ ॥

भाषार्थः—(जातवेदः) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (अन्तरिक्षात्) अन्तरिक्ष वा आकाश से (व्यध्वायाः) विविध मार्ग वाली (दिशः) दिशा से (अस्मान्) हमको (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं। (ते) वे (वायुम्) [तुझ] बलवानों में महाबलवान् को (ऋत्वा) पाकर............म० १ ॥ ६ ॥

य उपरिष्टाज्जुह्वति जातवेद ऊर्ध्वाया दिशोऽभिदासन्त्यस्मान् । सूर्यमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ७ ॥

५—अधस्तात् । दिक्शब्देभ्यः० (पा०५।३।२७) इति अधर–अस्तातिः । अस्ताति च (पा० ५ । ३ । ४०) इति अध् इत्यादेशः । अधोभागे । ध्रुवायाः । अ० ३ । २६ । ५ । स्थिरायाः । भूमिम् । अ० १।११।२ । भवन्ति भूतानि यस्यां सा भूमिः, ईश्वरनाम—सत्यार्थप्रकाशे, समुल्लास १ । सर्वाधारं, त्वाम् ॥

६—अन्तरिक्षात् । अ० १।३०।३१ । आकाशात् । व्यध्वायाः । उपसर्गादध्वनः (पा० ५ । ४ । ८५) इति वि+अध्वन्—अच् समासान्तः । विविधमार्गायाः । वायुम् । अ० २ । २० । १ । बलीनां बलिष्ठं त्वामीश्वरम् ॥

ये । उपरिष्टात् । जुह्वति । जातऽवेदः । ऊर्ध्वायाः । दिशः । अभिऽदासन्ति । अस्मान् । सूर्यम् । ऋत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ ७ ॥

भाषार्थः—(जातवेद:) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (उपरिष्टात्) ऊँचे स्थान में (ऊर्ध्वाया:) ऊपर वाली (दिश:) दिशा से (अस्मान्) हमको (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं। (ते) वे (सूर्यम्) [तुझ] सर्वव्यापक वा सर्वप्रेरक को (ऋत्वा) पाकर···म० १ ॥ ७ ॥

ये दिशामन्तर्देशेभ्यो जुह्वति जातवेदः सर्वाभ्यो दिग्भ्यो-ऽभिदासन्त्यस्मान् । ब्रह्मर्त्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ८ ॥

ये । दिशाम् । अन्तःऽदेशेभ्यः । जुह्वति । जातऽवेदः । सर्वाभ्यः । दिक्ऽभ्यः । अभिऽदासन्ति । अस्मान् । ब्रह्म । ऋत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ ८ ॥

भाषार्थः—(जातवेद:) हे ज्ञानवान् परमेश्वर ! (ये) जो लोग (दिशाम्) दिशाओं के (अन्तर्देशेभ्य:) मध्य देशों से (सर्वाभ्य:) सब (दिग्भ्य:) दिशाओं से (अस्मान्) हमको (जुह्वति) खाते और (अभिदासन्ति) चढ़ाई करते हैं। (ते) वे (ब्रह्म) [तुझ] ब्रह्म को (ऋत्वा) पाकर (पराञ्च:) पीठ देते हुये (व्यथन्ताम्) व्यथा में पड़ें। (एनान्) इनको (प्रतिसरेण) [तुझ] अग्रगामी के साथ (प्रत्यक्) उलटा (हन्मि) मैं मारता हूँ ॥ ७ ॥

७—उपरिष्टात् । उपर्युपरिष्टात् (पा० ५ । ३ । ३१) इति ऊर्ध्व—रिष्टातिल्, ऊर्ध्वस्य उपभाव: । ऊर्ध्वभागे । ऊर्ध्वायाः । अ० ३।२६।६ । उपरि वर्तमानाया: । सूर्यम् । अ० १ । ३ । ५ । सर्वव्यापकं सर्वप्रेरकं वा त्वां परमात्मानम् । अन्यत् पूर्ववत् ॥

भावार्थः—मनुष्य उस सर्वनियन्ता परब्रह्म का आश्रय लेकर विचार पूर्वक अपने सब विघ्नों का नाश करके आनन्द भोगें ॥ ८ ॥

इति अष्टमो ऽनुवाकः ॥

इति चतुर्थं काण्डम् ॥

इति श्रीमद्राजाधिराजप्रथितमहागुणमहिम श्री **सयाजीरावगायकवाडा-**
धिष्ठितबड़ोदेपुरीगतश्रावणमासपरीक्षायाम् ऋक्सामाथर्ववेदभाष्येषु
लब्धदक्षिणेन श्री पण्डित **क्षेमकरणत्रिवेदिना**
कृते अथर्ववेदभाष्ये चतुर्थंकाण्डं समाप्तम् ॥

इदं काण्डं प्रयागनगरे फाल्गुनमासे शिवचतुर्दश्याम् [कृष्णचतुर्दश्याम्]
१९७१ तमे विक्रमीये संवत्सरे सुसमाप्तिमगात् ॥

मुद्रितम्—आषाढकृष्णैकादश्यां संवत् १९७२ ता० ७ जुलाई १९१५ ॥

८—**दिशाम्** । दिशानाम् । **अन्तर्देशेभ्यः** । अन्तरालेभ्यः । **सर्वाभ्यः** । सकलाभ्यः । **दिग्भ्यः** । दिशाभ्यः । **ब्रह्म** । अ० १ । ८ । ४ । सर्वेभ्यो बृहत्त्वाद् ब्रह्म । तं त्वां परमेश्वरम् । अन्यत् पूर्ववत् ॥